भारतीय ज्ञानपीठ काशी

ज्ञानपीठ ग्रन्थागार

"ज्ञानं परमबलम्"

कृपया—

(१) मेरे द्वारा लिये गये ग्रन्थों को [illegible] निश्चित समय पर लौटा दीजिये।

(२) पत्रों को [illegible] न कीजिये। मुखपृष्ठ पर [illegible] न कीजिये।

(३) पेन्सिल से [illegible] न कीजिये, न कोई गंदा चित्र बनाइये। ग्रन्थालय [illegible] करती है।

(४) [illegible] न [illegible], न मुड़ा [illegible]।

(५) [illegible] न [illegible], न [illegible] दीजिये।

(६) [illegible]

आर्हतमतप्रभाकरस्य
चतुर्थो मयूखः

श्रीमद्वादिदेवसूरिविरचितः

प्रमाणनयतत्त्वालोकालङ्कारः

तद्व्याख्या च

स्याद्वादरत्नाकरः

यह ग्रंथ श्री. चुनीलालजी कस्तुरचन्दजी पोरवाल कालंदरी (मारवाड) वाले तरफ से भेट.

पुण्यपत्तनस्थ
ओसवालवंशजश्रेष्ठिलाघाजीतनूजमोतीलाल इत्येतैः टिप्पणी-
भिरुपोद्घातेन च परिष्कृत्य संशोधितः ।

वीरसंवत् २४५३.


प्रथमेयमङ्कनावृत्तिः ।

मूल्यं सार्धरुप्यकद्वयम् ।

इदं पुस्तकं ' मोतीलाल लाघाजी ' इत्येतैः पुण्यपत्तने (१९६ भवानी पेठ) प्रकाशितम् । (अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः)

तच्च,

पुण्यपत्तने सदाशिवश्रेण्यां ' लक्ष्मण माऊराव कोकाटे ' इत्यनेन स्वकीये ' हनुमान प्रिंटिंग प्रेस ' मुद्रणालये मुद्रितम् ।



वागड (कच्छ) देशोद्धारक दादा श्री जीतविजयजी महाराजना प्रशिष्य
प्रातःस्मरणीय शान्तमूर्ति परमपूज्य आचार्यदेव
श्री विजयकनकसूरीश्वरजी महाराज

श्रीः

प्रास्ताविकं किंचित्।

वीरः सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिताः।
वीरेणाभिहतः स्वकर्मनिचयो वीराय नित्यं नमः॥
वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो।
वीरे श्रीधृतिकीर्तिकान्तिनिचयः श्रीवीर! भद्रं दिश॥ १॥

आर्हतमतप्रभाकरसंस्थायाश्चतुर्थो मयूखः स्याद्वादरत्नाकराभिधशासनदेवकृपया प्रकाश्यते। सोऽयं ग्रन्थः (८४०००) चतुरशीतिसहस्रग्रन्थसंख्यात्मको निरमायि श्रीवादिदेवसूरिभिरिति कर्णपरम्परातः समागता प्रथितिः। बहुशः प्रयतमानैरस्माभिस्तत्तज्जैनाचार्याणां सूरीणां च कृपयालाभि सप्तपरिच्छेदात्मको भागो ग्रन्थराजस्यास्य। अस्मन्मुद्रापितग्रन्थान्तरक्रमेण संमुद्यते चेदयं तर्हि व्याप्नुयाद् द्वादशशतीं पृष्ठानामिति संभावयामः। संपूर्णो ग्रन्थ एकस्मिन् विभागे संग्रथ्यते चेद्भवेद् वैरस्याय पिपठिषूणामतो विभागशः संमुद्य प्रकाशयितुमारब्ध एषः। तत्र प्रथमो भागः प्रथमपरिच्छेदात्मको मुद्रितः। प्राय इयतैव प्रमाणेन भागान्तराणां प्रत्येकं प्रतिमासं मुद्रणं स्यादिति समीहामहे। ग्रन्थराजोऽयं बौद्धयौगादिमतानां परामर्शकोऽतोऽवश्यमध्ययनार्हो न केवलं स्याद्वादमतानुयायिनां किंतु भिन्नमतस्थानामपि स्याद्वादमतजिज्ञासूनाम्। अतः पूर्वमयूखवदस्यापि मूल्याल्पत्वपरिशिष्टविस्तारग्रन्थान्तर्बहिःपरिचयादिकं सविस्तरमाहृतम्। सन्ति चास्य ग्रन्थस्य द्वादशपरिशिष्टानि। किंतु परिशिष्टादिकमन्तिमे विभाग एव मुद्रयितुमर्हम्। अग्रेतनपत्राणां मुद्रयिष्यमाणां निर्देशस्य पूर्वं कर्तुमशक्यत्वात्। केवलं टिप्पन्यादिकमर्थावसायोपयोगि तत्तत्स्थलेऽधोभागे निरदेशि। प्रतिपत्रं पङ्क्त्यङ्का निर्दिष्टा येषामुपयोगः परिशिष्टदर्शनसौकर्याय। अन्यच्च पुस्तकानां वस्त्रात्मकं बन्धनमस्तु न पत्रात्मकमिति सूचयन्ति केचिन्महाभागाः परं तद्यक्तिशो ग्राहकैः स्वयमनुष्ठेयम्। अस्माभिस्तथा संपादने यैर्नाभिमतस्तदर्थं द्रव्याधिक्यव्ययस्ते मुधैव पीडितचेतसो भवेयुरिति यथापूर्वं सरणिराहृता। इतिविनिवेदकः।

आर्हतमतप्रभाकरकार्यालयः पुण्यपत्तनम्।
वी. सं. २४५३ संवत्सरीपर्व।

विद्वद्वशंवदः—
मोतीलाल लाधाजी

ॐ नमः सर्वज्ञाय ।

श्रीवादिदेवसूरिविरचितः प्रमाणनयतत्त्वालोकालङ्कारः

तद्व्याख्या च

॥ स्याद्वादरत्नाकरः ॥

नमः परमविज्ञानदर्शनानन्दशक्तये ॥
श्रीयुगादिजिनेन्द्राय स्वायत्तीकृतमुक्तये ॥ १ ॥

एकस्यापि तुरङ्गमस्य कमपि ज्ञात्वोपकारं सुर-
श्रेणीभिः सह षष्टियोजनमितामाक्रम्य यः काश्यपीम् ॥
आरामे समवासरद् भृगुपुरस्यैशानदिग्मण्डने । ५
स श्रीमान् मयि सुव्रतः प्रकुरुतां कारुण्यसान्द्रे दृशौ ॥ २ ॥

---

१ अनुष्टुप् । २ शार्दूलविक्रीडितम् । ३ गूर्जरप्रदेशेऽधुना ' भडोच ' इति ख्यातस्य । ४ विंशस्तीर्थंकरः । ५ श्रीमुनिसुव्रतस्वामितीर्थे लाटदेशमंडनभृगुकच्छपुराधिपो जितशत्रुनामा राजा आसीत् । एकदा तेन राज्ञा यज्ञे स्वतुरंग आलम्भव्य इति निश्चयः कृतः । एतदभिज्ञानपूर्णा सम्प्राप्तकेवलज्ञानदर्शनाः ससुरनराः श्रीमन्तो भगवन्तो मुनिसुव्रतस्वामिनः एकस्यां रात्रौ योजनानां षष्टिमुल्लंघ्य भृगुकच्छे कोरण्टवनं सम्प्राप्ता देशनान्ते तत्र अश्वेन सह राजाजितशत्रुः समागतः भगवन्तं वन्दित्वा सम्मुखमुपविष्टः । भगवद्भिरपि तत्प्रबोधाय तस्य अश्वस्य आत्मनश्च पूर्वभवः कथितः । तत्समाकर्ण्य जातजातिस्मृतिस्तुरंगमः सम्यक्त्वमूलं देशविरतिधर्मं सचित्ताहारवर्जनं स्वीकृतवान् । अयमश्वः षण्मासान्ते मृत्वा सौधर्मावतंसके महर्द्धिको देवः संजातः । ततस्तेनावधिज्ञानद्वारा स्वपूर्वभवो ज्ञातः । अथ च तेन स्वामिसमवसरणस्थाने रत्नमयश्चैत्यः प्रभुप्रतिमाश्चमूर्तिश्च कारिता प्रतिष्ठापिता च । तत्कालात्तत्स्थानं ' अश्वावबोधतीर्थ ' इति ख्यातिमदभूत् ।

प्रांशुप्राकारकान्तां त्रिदशपरिवृढव्यूहरुद्धावकाशां
वाचालां केतुकोटिक्वणदनणुमणीघोरणीभिः समन्तात् ॥
यस्य व्याख्यानभूमीमहह किमिदमित्याकुलाः कौतुकेन ।
प्रेक्षन्ते प्राणभाजः स भुवि विजयतां तीर्थकृत् पार्श्वनाथः ॥३॥

दत्त्वा कर्णं सुरेशे स्थितवति भवति स्मेरवक्त्रारविन्दे ।
वृन्दे वृन्दारकाणामनुसरति मुदं मन्त्रिणि स्वर्गिणां च ॥
आयातान् वादबुद्ध्या झटिति गणभृतः प्रौढयुक्तिप्रपञ्चै-
र्निःशङ्कानादधानो जयति जिनपतिर्वर्द्धमानः सभायाम् ॥ ४ ॥

प्रत्यक्षद्वयदीप्तनेत्रयुगलस्तर्कस्फुरत्केसरः ।
शाब्दव्यात्तकरालवक्त्रकुहरः सद्धेतुगुञ्जारवः ॥
प्रक्रीडन्नयकानने स्मृतिनखश्रेणीशिखाभीषणः ।
संज्ञावालधिबन्धुरो विजयते स्याद्वादपञ्चाननः ॥ ५ ॥

यन्नामस्मृतिमात्रतोऽपि कृतिनां वाचां विलासाः क्षणात् ।
जायन्ते प्रतिवादिकोविदमदध्वंसक्षमाः सर्वतः ॥
तां त्रैलोक्यगृहप्ररूढकुमतध्वान्तप्रदीपप्रभां ।
वन्दे शारदचन्द्रसुन्दरमुखीं श्रीशारदां देवताम् ॥ ६ ॥

येषां हन्त पिबन्ति कर्णपुटकैरद्यापि रोमाञ्चिताः ।
किञ्चित्कूणितलोचनाश्च सुधियः सुस्वादुशास्त्रामृतम् ॥
निःसाधारणभक्तिभाजनजने विघ्वस्य विघ्नावलीं ।
सन्तु श्रीमुनिचन्द्रसूरिगुरवस्तेऽमीप्सितप्राप्तये ॥ ७ ॥

श्रीसिद्धसेनहरिभद्रमुखाः प्रसिद्धा-
स्ते सूरयो मयि भवन्तु कृतप्रसादाः ॥

---

१ स्रग्धरा २ 'किंकिणी' इति प. पुस्तके पाठः । ३ त्रयोविंशतितमस्तीर्थकरः। ४ श्रीवर्धमानेन एकादशानां गणधराणां संशया निराकृताः । तद्विषयक सविस्तरं वर्णनमस्मन्मुद्रापितस्याद्वादमञ्जर्यां १७८ पृष्ठे २।४ टिप्पन्योर्द्रष्टव्यम् ५ सांव्यवहारिकं पारमार्थिकं चेति द्विभेदं प्रत्यक्षम् । ६ वसन्ततिलका ।

येषां विमृश्य सततं विविधान् निबन्धान्
शास्त्रं चिकीर्षति तनुप्रतिभोऽपि मादृक् ॥ ८ ॥
अधिकतरमनीषोल्लासिनस्तुल्यबुद्धे-
र्मदविषधरदष्टस्वान्तदेहस्य चास्ति ॥
उपकृतिरिह शास्त्रेणामुना नैव किन्तु ५
प्रकृतिसरलचित्तस्याल्पबोधस्य मत्तः ॥ ९ ॥

इह कृतज्ञतामवलम्बमानः शास्त्रकारस्तत्सिद्धिनिबन्धनं परापरगुरुप्रवाहं स्मृत्यादर्शे सङ्क्रमयन्निमं प्रथमतः श्लोकमाह—

रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥ १ ॥ १०

श्लोकस्य वाच्योऽर्थः ।

तत्र तीर्यते भवाम्भोधिर्भव्यैरनेनेति तीर्थं चतुर्वर्णः श्रमणमसङ्घः तस्य ईशः स्वामी तीर्थेशः प्रत्यासन्नोपकारित्वादिह श्रीवर्द्धमानस्तम् । स्मृतिं स्मरणमानये प्रापयामि । अपश्चिमतीर्थाधिनाथं श्रीमहावीरमहमिह ग्रन्थारम्भे स्मरामीत्यर्थः । कथंभूतम् । रागोऽभिष्वङ्गात्मा । द्वेषः परसम्पत्त्यसहन- १५
स्वभावस्तौ विशेषेणापुनर्जेयतया जेतुं विक्षेप्तुं शीलं यस्यासौ रागद्वेषविजेता तम् । पुनः कीदृशम् । ज्ञातारमवबोद्धारम् । कस्य । विश्ववस्तुनः कालत्रयवर्त्तिसामान्यविशेषात्मकपदार्थस्य भूयः किं विशिष्टम् । शक्रैः शतमन्युभिः पूज्यः कमनीयाशोकाद्यष्टमहाप्रातिहार्य-

---

१ श्रीसिद्धसेनस्य संमतितर्कादयो ग्रन्थाः । हरिभद्रस्य अनेकान्तजयपताकादयो ग्रन्थाः । २ मालिनी । ३ ' स्मृत्यात्मदर्शे ' इति प. म. पुस्तकयोः पाठः । ४ ' चउव्विहे संघे पं. तं.—१ समणा २ समणीओ ३ सावगा ४ साविआओ (१ श्रमणः २ श्रमणी ३ श्रावकः ४ श्राविका)' इति स्था. सू. ३६३. ५ पूर्वदिक्स्थम् । अविद्यमानः पश्चिमः पश्चाद्भावी तीर्थकरो यस्येत्यपश्चिमः तमन्तिमं तीर्थकराभिति वा । ६ 'अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनं च । भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम् ।' इति ।

विरचनेनार्चनीयः शक्रपूज्यस्तम् । पुनरपि कीदृक्षम्, गिरां वाचामीशं यथावस्थितवस्तुगोचरत्वेन तासां प्रयोक्तृत्वान्नायकम् । अनेन च विशेषणचतुष्टयेनामी यथाक्रमं भगवतो मूलातिशयाश्चत्वारः स्मृतिमुकुरभूमिकामानीयन्ते । तद्यथा अपायापगमातिशयो ज्ञानातिशयः पूजातिशयो वागतिशयश्चेति । एतेषां चातिशयानामित्थमुपन्यासे तथोत्पत्तिरेव निमित्तम् । तथा हि नाविजितरागद्वेषो विश्ववस्तुज्ञाता भवति । न चाविश्ववस्तुज्ञः शक्रपूज्यः सम्पद्यते । न च शक्रपूजाविरहे भगवांस्तथागिरः प्रयुङ्क्त इति श्लोकस्य वाच्योऽर्थः ॥

श्लोकस्य प्रतीयमानोऽर्थः।

प्रतीयमानस्त्वयम् । इह ये किलाविदलितदृढतररागद्वेषद्विषद्दत्ताशेषदुःखविशेषाः अविदितहेयोपादेयोपेक्षणीयतात्त्व्यापितजीवन्मृततुल्यभावाः सकललोकस्यापि अनवलोकनीयाः विषयाविसंवादसमुदितपरमानन्दप्रसादितहृदयसहृदयस्पृहणीयशब्दप्रयोगाशक्ताः अथ च परमसुखविज्ञानपूज्यत्वसम्यक्शब्दप्रयोक्तृत्वाभिलाषिणस्तान् प्रति तत्समीहितगुणाधीशस्य भगवतः समाश्रयणीयत्वं वस्त्वमुना श्लोकेन व्यञ्जनव्यापारगोचरतामावेदयतो ग्रन्थकृतोऽस्माभिरेतत्स्मरणशरणप्रपन्नैरिदं शास्त्रमुपदिश्यते । तदहो जना यूयमप्यमुमेवासाधारणगुणाधिकरणं स्मरणकरणेन शरणं प्रपद्यध्वमिति परहितप्रपन्नत्वमुपदेशदानदक्षत्वं च वस्तु भगवत्समाश्रयणार्थं परप्रोत्साहनायामुत्साहप्रतीतेर्दयावीररसो भगवद्विषयो रत्याख्यो भावश्च ध्वन्यते । यो हि दुर्जयमप्यान्तरमरातिनिकरं परितः पराकर्तुं प्रवीणस्तस्य बहिरहितसम्भावनैव नाविर्भवतीत्यतिशयोक्तिरलङ्कारः । अत एव चान्येभ्यो विजयिभ्यो व्यतिरेकावगमाद् व्यतिरेकालङ्कारश्च ।

१ 'दन्ताशेष' इति भ. म. पुस्तकयोः पाठः । २ परस्परास्थाबन्धात्मिका रतिः स्थायिभावेष्वयं प्रथमो भावः । ३ शत्रुसमुदायम् । ४ विशेषविवक्षया भेदाभेदयोगायोगव्यत्ययोऽतिशयोक्तिः । काव्यानुशासने अ. ६ । ५ उत्कर्षापकर्षहेतोः साम्यस्य चोक्तावनुक्तौ चोपमेयस्याधिक्यं व्यतिरेकः । का. अ. ६ ।

नित्योद्युक्तत्वेन प्रतिपक्षक्षेपकत्वेनासम्मोहाध्यवसायित्वेन चोत्साहप्रतीतेर्वीरैरसश्च भगवतोऽरागवतो रागद्वेषेति विशेषणेन व्यज्यते । विशेषणचतुष्टयेन चान्यतीर्थिकतीर्थेशेभ्यो भगवतः समधिकत्वावगतेर्व्यतिरेकालङ्कारो ध्वन्यते । एवं चासाधारणगुणाधिकरणतया भगवतः परमगुरुत्वं ख्यापितं भवति । तथाहि परमो गुरुर्भगवान् वर्द्धमानो रागद्वेषविजेतृत्वात् विश्ववस्तुज्ञातृत्वात् शक्रपूज्यत्वात् वागीशत्वाच्च यः पुनर्नाभिहितसाध्यसम्पन्नः स न यथोक्तसाधनाधारो यथा सम्प्रतिपन्नः । एतेनापरगुरुरपि गणधरादिरस्मद्गुरुपर्यन्तो व्याख्यातः । तस्यैकदेशेन निगदितसाधनाधिकरणत्वादपरगुरुत्वोपपत्तेः ।

परापरगुरुप्रवाहस्मरणं शास्त्रसिद्धिनिबन्धनमस्ति न वेति विचारः ।

अत्राह कश्चिद्, भवतु नामैवं परापरगुरुप्रवाहस्य प्रसिद्धिः । तथापि कथमसौ प्रकृतशास्त्रस्य सिद्धिनिबन्धनं येन तदारम्भे तस्य स्मृतिः श्रेयसीति तत्रैके समादधते परापरगुरुप्रवाहस्य स्मरणाद् धर्म्मविशेषोत्पत्तेरधर्मध्वंसात् तद्धेतुकविघ्नोपशान्तेरभीप्सितशास्त्रपरिसमाप्तिः स तत्सिद्धिनिबन्धनमिति तन्न तर्कानुकूलम् । एवं हि तेषां प्रस्तुतशास्त्रारम्भे पात्रदानादिकमपि कर्तव्यकक्षामास्कन्देत् । परापरगुरुप्रवाहस्मरणवत् तस्यापि धर्मविशेषोत्पत्तिहेतुत्वाविशेषादभिहितशास्त्रसिद्धिनिबन्धनत्वोपपत्तेः । मङ्गलत्वात् आप्तस्मरणं शास्त्रसिद्धिनिबन्धनमित्यपरे । तदपि त्रपापात्रम् । स्वाध्यायादेरपि मङ्गलत्वाविरोधात् न खलु परापरगुरुपरम्परास्मरणमेव मङ्गलमिति क्षितिपतिशासनं समस्ति । परापरगुरुप्रबन्धानुध्यानाद् ग्रन्थकारस्य नास्तिकतापरिहारसिद्धितस्तद्वचनस्यास्तिकैरादरणीयत्वेन सर्वत्र ख्यात्युपपत्तेस्तदनुध्यानं तत्सिद्धिनिबन्धनमिति कतिपये । तदपि न चतुरचेतोहरम् । आत्मादिपदार्थ-

---

१ नयादिविभावः स्थैर्याद्यनुभावो धृत्यादिव्यभिचार्युत्साहो धर्मदानयुद्धभेदो वीरः । धर्मवीरो नागानन्दे जीमूतवाहनस्य । दानवीरः परशुरामवलिप्रभृतीनाम् । युद्धवीरो वीरचरिते रामस्य । का. अ. २ । २ गणधरात् श्रीमुनिचन्द्रसूरिः ४१तमः ।

समर्थनादेव शास्त्रकर्तुर्नास्तिकतापरिहारघटनात् । तदन्तरेण शास्त्रादौ परापरगुरुप्रबन्धानुध्यानवचने सत्यपि नास्तिकतापरिहारानुपपत्तेः । शिष्टाचारपरिपालनसाधनत्वात् तत्स्मरणं तत्सिद्धिनिबन्धनमित्यन्ये । नैतदपि साधीयः । स्वाध्यायादेरपि सकलशिष्टाचारपरिपालनसाधनत्वे-
५ नावधारणात् । ततः प्रस्तुतशास्त्रोत्पादनिमित्तचिरन्तनशास्त्रस्योत्पत्ति-कारणत्वात् तदर्थनिर्णयसाधनत्वाच्च परापरगुरुप्रवाहस्तत्सिद्धिनिबन्ध-नमित्येतदेव सहृदयसंवेद्यमिति ।

ननु यथावद्विज्ञानमेव कर्तुस्तत्सिद्धिनिबन्धनमिति चेत् । मैवम् ।

परापरात्तनिर्मितशास्त्रं प्रकृतशास्त्रे हेतुभूतमिति शङ्कासमाधानाभ्यां व्यवस्थापनम् ।

१० तस्य गुरूपदेशपरतन्त्रत्वात् । श्रुतज्ञानावरण-क्षयोपशमात् गुरूपदेशविरहेऽपि श्रुतज्ञानस्योत्पादान्न तत्परतन्त्रमिति चेत् । तदप्यवद्यम् । द्रव्यभावश्रुतस्यात्तोपदेशापाये कस्याप्यभावात् । तथाहि द्रव्यश्रुतं द्वादशाङ्गवचनात्मकम् । तदर्थज्ञानं तु भावश्रुतम् । तद्द्वितयमपि गण-धराणां भगवदर्हद्वचनातिशयप्रसादात् स्वमतिश्रुतज्ञानावरणवीर्यान्त-
१५ रायक्षयोपशमातिशयाच्चोपजायमानं कथमाप्तायत्तं न भवेत् । तथा च परापरात्तप्रवाहनिबन्धन एव परापरशास्त्रप्रवाहस्तन्निबन्धनं च यथाव-द्विज्ञानं शास्त्रकर्तुरभिमतशास्त्रकरणलक्षणफलसिद्धेरप्युपाय इति तत्का-मेनाप्तः समस्तोऽपि तदारम्भे स्मरणीय एव । यथोक्तम् ।

" अभिमतफलसिद्धेरभ्युपायः सुबोधः ।
२० प्रभवति स च शास्त्रात् तस्य चोत्पत्तिराप्तात् ॥
इति भवति स पूज्यस्तत्प्रसादप्रबुद्धै-
र्न हि कृतमुपकारं साधवो विस्मरन्ति ॥ १ ॥ "

अथ यथा गुरूपदेशः शास्त्रसिद्धेर्निबन्धनं तथाप्तस्मरणनिर्मित-धर्मविशेषमङ्गलनास्तिकतापरिहारशिष्टाचारपरिपालनान्यपि तत्सिद्धौ

---

१ अस्मन्मुद्रापितस्याद्वादमञ्जर्यां पृ. १७६ टि. ३.

२ अस्मन्मुद्रापिततत्त्वार्थाधिगमसूत्रेषु अ. ८ सू. ७, १४. अ. १ सू. ५.

तेषां सहकारित्वाविशेषात् । अवितथमेतत् केवलमात्तस्मरणानिर्मिता-
न्येव तानि शास्त्रसिद्धौ सहकारीणीत्यवधारणं प्रतिषिध्यते । सत्पात्र-
दानादिना निमित्तान्तरेणापि निर्मितानां तेषां तस्यां सहकारित्वसम्भ-
वात् । कदाचित्तदभावेऽपि पूर्वोपार्जितधर्मविशेषेभ्य एव शास्त्रनिष्पत्तेश्च ।
परापरगुरूपदेशस्तु न तद्वदनियतः शास्त्रकरणे तस्यावश्यमपेक्षणीय- ५
त्वादितरथा तदनुपपत्तेः । ततः परापरगुरुप्रवाहस्य शास्त्रसिद्धिनिबन्ध-
नत्वात् तदारम्भसमये तत्स्मृतिरुपपन्नैवेति ॥

कथं पुनः **प्रमाणनयतत्त्वालोकः** शास्त्रं येन तदारम्भे परापरगुरु-
प्रवाहः स्मर्यत इति चेत् । उच्यते । तल्लक्षणयो-

प्रमाणनयतत्त्वालोकस्य शास्त्रत्वासिद्धिः[1]।

गात् । तथाहि वर्णात्मकं पदम् । पदात्मकं सूत्रम् । १०
सूत्रसमूहः प्रकरणम् । प्रकरणसमूहो यथासमयं
परिच्छेदो वा पादो वा आह्निकं वा अध्यायो वा तत्समूहश्च शास्त्रमिति
शास्त्रलक्षणम् । तच्चाष्टपरिच्छेदीरूपस्य प्रमाणनयतत्त्वालोकस्यास्तीति
सोऽपि शास्त्रम् । यद्वा विश्वव्यापकाप्रमाणनयतत्त्वशासनाच्छास्त्रत्वमस्य
मनीषिभिर्मन्तव्यम् । प्रसिद्धे चास्य शास्त्रत्वे तद्विवरणस्यापि शास्त्रत्वं १५
सिद्धमवबोद्धव्यम् । तदर्थत्वात् । एवं च सिद्धमिदम्

यः सूत्रार्थपविलशास्त्रपटली निर्वर्तनप्रौढता-
हेतुत्वात् परमोपकारकतया विश्वत्रये विश्रुतः ।
प्रारम्भेऽत्र कृतज्ञतां प्रकटयन्नात्मन्यसौ सूत्रकृत्-
तामेतामकरोत् परापरगुरुस्तोमस्य तस्य स्मृतिम् ॥ १० ॥ २०

ननु शक्यानुष्ठानाभिधेयेनाभिमतप्रयोजनेन सम्बन्धेन च सहिता-
न्येव शास्त्राणि प्रेक्षावद्भिरादृियन्ते नान्यथा ।

प्रमाणनयतत्त्वेति सूत्रमवतारयितुं शास्त्रेऽनुबन्धचतुष्टयस्यावश्यकत्वप्रदर्शनम् ।

प्रेक्षावत्त्वक्षतेः । तत्किमिदं प्रस्तूयमानं शास्त्र-
मभिधेयप्रयोजनसंबन्धैः सहितं रहितं वा
स्यात् । रहितं चेत् तर्हि तदारम्भार्थमभियोगो २५
निरुपयोगः स्यात् । अहिलपलापवायसंदशनस्वरूपोपवर्णनदर्शदाडिमा-

---

१ विषयः, संबन्धः, प्रयोजनं, अधिकारीत्यनुबन्धचतुष्टयम् । २ अहिलस्य पिशाचाविष्टस्य प्रलापाः । ३ 'काकस्य कति वा दन्ता मेषस्याण्डं कियत्पलम् । गर्दभे कति रोमाणीत्येषा मूर्खविचारणा' इति वचनानुसारं वायसदन्तस्वरूपोपवर्णनं निरर्थकम् । ४ 'दशदाडिमानि षडपूपाः' इत्यादिकं निरर्थकवाक्योदाहरणं पातञ्जलभाष्ये ।

दिवाक्यवत् प्रज्ञाभिमानिनामवज्ञास्पदत्वात् । अथ तैः सहितम् । तथापि यत्तत्राभिधेयं तद्यद्यशक्यानुष्ठानम् । तदा सर्वव्याधिहरविषधराधीशशिरोरत्नादानोपदेशवत्कथमिव कस्यचिदपि तत्रोपादेयबुद्धिः प्रादुःष्यात् । प्रयोजनमप्यनभिमतं चेत् जननीपाणिग्रहणोपदेशवत् तत्रातितरामनादरश्चतुराणां स्यादित्यनेकशङ्काशङ्कुसमुद्धरणार्थमिदमादिवाक्यमाह—

प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यत इति।१।

प्रकर्षेण सन्देहाद्यपनयनस्वरूपेण मीयते परिच्छिद्यते वस्तु येन तत्प्रमाणम् । नीयते गम्यते श्रुतप्रमाणपरिच्छिन्नार्थैकदेशोऽनेनेति नयः प्रमाणं च नयश्चेति प्रमाणनयौ तयोस्तत्त्वमसाधारणं स्वरूपम् । तस्य विशेषेणावस्थापनं व्यवस्थापनम् । तदेवार्थः प्रयोजनं यत्र तदर्थम् । ननु द्वयमिह प्रकृतम् । इदमर्थः शास्त्रम् । उपक्रम्यत इति च क्रिया । तत्र किं प्रमाणनयतत्त्वव्यवस्थापनार्थमित्यत्र शास्त्रं संबध्यते यदुत प्रमाणनयतत्त्वव्यवस्थापनार्थमिदं शास्त्रमुपक्रम्यते । अथ क्रियाविशेषणमेतत् प्रमाणनयतत्त्वव्यवस्थापनार्थमित्यत्र उपक्रम्यते योऽस्योपक्रमः स प्रमाणनयतत्त्वव्यवस्थापनार्थ इति । भवति चामूदृशि प्रोक्ते संदेहः । यथा शोभनं पचतीत्युक्ते किं पाक्यं तण्डुलादि शोभनमथ पाक इति । उच्यते । क्रियाविशेषणमेवैतत् । व्यावस्थापनं हि शास्त्रकारव्यापारो न तु शास्त्रव्यापारः । आचार्यो हि मुख्यतया व्यवस्थापयति न शास्त्रम् । तत्तूपचारात्[1] मिक्षा वासयतीति यथा । तस्माच्छास्त्रस्य यो व्यापारः स्वाभिधेयप्रतिपादनं नाम तत् सूचितमेव प्रमाणनयतत्त्वेत्यवयवेन । व्यवस्थापनार्थमित्यनेन तु प्रयोजनमुक्तम् । अतो यस्य तत्प्रयोजनमाचार्यस्य तदीय एव व्यापारस्तेन विशिष्यते । व्यवस्थापनार्थ

प्रमाणनयतत्त्वेति सूत्रस्य विवरणम् ।

---

१ उपचारो लक्षणा । यथा यतेर्नगरनिवासे भिक्षालाभो हेतुः ।

आचार्यस्योपक्रमः शिष्यनिष्ठ इति। यथा घटशब्दः पृथुबुध्नोदराकारार्थः। तदर्थस्तु घट उदकाहरणार्थः। तदुच्चारयिता तु तेन शब्देन तदर्थव्यवस्थापनार्थ इति। स इहापि न्यायः। शास्त्रं प्रमाणनयतत्त्वार्थम्। प्रमाणनयतत्त्वं हेयोपादेयोपेक्षणीयेष्वर्थेषु हानोपादानोपेक्षार्थम्। आचार्यस्तु तत्कर्ता तेन शास्त्रेण तदर्थव्यवस्थापनार्थ इति। एवं व्यवस्थापनार्थत्वमुपक्रमस्याचार्यव्यापारस्य यथोचितं न तथा शास्त्रस्य। तस्य करणभावेन तथोपयोगादिति। एवं प्रमाणनयतत्त्वव्यवस्थापनायेदं प्रमाणनयतत्त्वव्यवस्थापनार्थमित्येवं तत्पुरुषोऽपि यदि क्रियते। तत्रापि क्रियाविशेषणतैव व्याख्येया। इदं स्वसंवेदनप्रत्यक्षेणान्तस्तत्त्वरूपतया प्रतिभासमानं प्रमाणनयतत्त्वालोकाख्यं शास्त्रम्। उपक्रम्यते बहिः शब्दरूपतया प्रारभ्यते प्रणीयत इति यावत्।

ननु प्रमाणं च नयश्चेति द्वन्द्वे नयनशब्दस्य पूर्वं निपातः प्राप्नोत्यल्पोच्चतरत्वान्न पुनःप्रमाणशब्दस्य बह्वचत्वादिति चेत्। तन्न। अभ्यर्हितत्वेन बह्वचोऽपि प्रमाणशब्दस्यात्पाच्चतरात् नयशब्दात् पूर्वं निपातने कृते दोषाभावात्। नह्यल्पाच्चतरादभ्यर्हितं पूर्वं निपतीति कस्यचिदप्रसिद्धम्। लक्षणेहेत्वोरित्यत्र हेतुशब्दादल्पाच्चतरादपि लक्षणपदस्य बह्वचोऽभ्यर्हितस्य पूर्वं प्रयोगदर्शनात्। कथं पुनः प्रमाणशब्दो नयशब्दादभ्यर्हित इति चेत्। उच्यते। प्रमाणस्य सकलादेशित्वेन विकलादेशिनो नयादभ्यर्हितत्वात्। तद्वाचकः प्रमाणशब्दोऽपि नयशब्दा-

प्रमाणनयेतिद्वन्द्वगत-प्रमाणशब्दस्य पूर्वनिपात-विचारः।

---

१ 'स्थापनार्थम्' इति म. म. पुस्तकयोः पाठः। २ 'व्यापारात्' इति म. म. पुस्तकयोः पाठः। ३ 'तत्रोपयोगात्' इति प. पुस्तके पाठः। ४ 'अल्पाच्तरं' इति पा. सू. २-२-३४। ५ 'अभ्यर्हितं च' इति का. वार्तिकम् २-२-३४. ६ 'लक्षणहेत्वोः क्रियायाः' इति पा. सू. ३-२-१२६। ७ सकलादेशः प्रमाणवाक्यं, तल्लक्षणं चैदम्-प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः तद्विपरीतस्तु विकलादेशो नयवाक्यमित्यर्थः।

दभ्यर्हित एव । ननु कथमभ्यर्हितत्वानभ्यर्हितत्वाभ्यां सकलादेशित्व-विकलादेशित्वे व्याप्ते सिद्धे यतः प्रमाणनययोस्ते सिद्धयेते इति चेत् । प्रकृष्टापकृष्टविशुद्धिलक्षणत्वादभ्यर्हितत्वानभ्यर्हितत्वयोस्तद्-व्यापकत्वमिति ब्रूमः । नहि प्रकृष्टां विशुद्धिमन्तरेण प्रमाणमनेकधर्म्म-
५ धर्म्मिस्वभावं सकलमर्थमादिशति । नयस्यापि सकलादेशित्वप्रसंगात् । नापि विशुद्धयपकर्षमन्तरेण नयो धर्म्ममात्रं धर्म्मिमात्रं वा। विकलमा-दिशति । प्रमाणस्यापि विकलादेशित्वप्रसङ्गात् । ननु नयोऽभ्यर्हितः प्रमाणात् तद्विषयांशे विप्रतिपत्तौ सम्प्रत्ययहेतुत्वादिति चेत् । न । कस्यचित् प्रमातुः प्रमाणादेवाशेषवस्तुनिर्णयात् तद्विषयांशे विप्रति-
१० पत्तेरसम्भवात् नयात् सम्प्रत्ययासिद्धेः कस्यचित् प्रतिपत्तुस्तत्सम्भवे नयात् सम्प्रत्ययसिद्धिरिति चेत् । सकलवस्तुनि विप्रतिपत्तौ प्रमाणात् किन्न सम्प्रत्ययसिद्धिः । सोऽयं सकलवस्तुविप्रतिपत्तिनिराकरणसम-र्थात् प्रमाणाद्वस्त्वेकदेशे विप्रतिपत्तिनिरसनसमर्थं सन्नयमभ्यर्हितं ब्रुवाणो न न्यायवादी ।

१५ इदं च वाक्यं मुख्यवृत्त्या[1] प्रयोजनमेव प्रतिपादयितुमुपन्यस्तम् । तस्यैव प्राधान्येन प्रवृत्त्यङ्गत्वात् । अभिधेय-सम्बन्धौ तु सामर्थ्याद् गमयति । तथा हि

प्रयोजननिरूपणम् ।

प्रमाणनयतत्त्वमभिधेयं प्रमाणनयतत्त्वेत्यवयवेन लक्षितम् इत्यभिधेय-विधुरत्वावारेका[2] निराकृता । अमुष्य चाभिधेयस्य सुखानुष्ठेयत्वादशक्यानु-
२० ष्ठानत्वशङ्का दूरत एव निरस्ता । प्रयोजनं द्वेधा कर्त्तुः श्रोतुश्च । पुनर्द्विविधम् अनन्तरं सान्तरञ्च । तत्र कर्त्तुरनन्तरं प्रयोजनं प्रमाण-नयतत्त्वव्यवस्थापनं प्रमाणेत्याद्यवयवेन ण्यन्तेन[3] साक्षान्निर्दिष्टम्। श्रोतुस्तु व्यवस्थेत्युपसर्गधातुसमुदायेनैव तदन्तर्गतं प्रत्याय्यते । सान्तरप्रयोज-नं तु द्वेधा प्रधानमप्रधानञ्च तत्र अप्रधानं कर्त्तुस्सत्त्वानुग्रहस्त्यात्यादि-

---

१ अभिधावृत्त्या न तु लक्षणया । २ आरेका-शङ्का । ३ णिचूप्रत्ययान्तेन ।

स्वभावम्। श्रोतुस्तु हेयोपादेयोपेक्षणीयेष्वर्थेषु हानोपादानोपेक्षालक्षणम्। प्रधानं त्वभ्युदयनिःश्रेयसावाप्तिस्वरूपमुभयोरपि। एतच्चानन्तरप्रयोजनफलत्वात् तेनैवाक्षिप्तमवसेयम्। अतो निष्प्रयोजनत्वानभिमतत्वशङ्के सुतरामेव व्युदस्ते। सम्बन्धस्त्वभिधेयेन सह वाच्यवाचकभावलक्षणः शास्त्रस्यावश्यंभावीत्यनुक्तोऽप्यर्थाद् गम्यत इति सम्बन्धरहितत्वाशङ्कानुत्थानोपहतैवेति।

पूर्वशास्त्रेणास्यागतार्थत्वप्रतिपादनम्।

ननु प्रमाणनयतत्त्वस्यावस्थापनार्थमिदमायुष्मद्भिः शास्त्रमुपक्रम्यते। तदवस्थापनं च "**प्रमाणनयैरधिगम**" इत्यादिना प्रबन्धेन पूर्वाचार्यैरुमास्वातिवाचकमुख्यैः कृतमेव। अवस्थापितस्य चावस्थापनं पिष्टपेषणवन्निरुपयोगम्। अत्रोच्यते। चिरन्तनाचार्यैरवस्थापितमपि प्रमाणनयतत्त्वमतिगम्भीरत्वान्न दुर्विदग्धाकुलितचेतोवृत्तिरयं लोकः प्रतिपद्यते। तत्प्रतिपादनाय चायमुपक्रमः। अत एव व्यवस्थापनेत्यत्र विशेषद्योतको विशब्दः प्रयुक्तः। धात्वर्थमात्रवृत्तेरवशब्दस्य योगेऽपि हि ण्यन्तस्य तिष्ठतेः स्थापनमात्रमेवार्थः। न च सुश्लिष्टलक्ष्यलक्षणादिविभागप्रकल्पनलक्षणाविशेषं विना विनेयानां तावन्मात्रेण प्रमाणनयतत्त्वव्यवस्थापनहेतुरनाकुलता कल्पत इति॥

प्रमाणनयेत्यादिवाक्यस्य प्रामाण्यस्थापनम्।

अत्राह कश्चित्। इदमादिवाक्यं प्रमाणमप्रमाणं वा। प्रमाणमित्याचक्ष्महे। कतमत्प्रमाणमिति चेत्। परार्थागमः परार्थानुमानं चेति ब्रूमः। मा भूदनादेयवचनतास्माकमित्यागमानुकूलं हि शास्त्रकारास्तत्परिकीर्त्तयन्ति। तत्राप्तपरम्पराधिगतार्थप्रतिपादनपरत्वादिदमादिवाक्यमागममूलः परार्थागमः प्रतिपाद्यते। प्रामाण्यं पुनरस्याभ्यस्त-

---

१ तत्त्वा. सू. १-६. २ पिष्टस्य पेषणं नास्ति मृतस्य मरणं नहि। कृतस्य करणं नास्ति नास्ति दीर्घस्य दीर्घता॥ इत्युक्तेः। ३ पूर्वाचार्यैः। सिद्धसेनदिवाकरप्रभृतिभिः। ४ विनेयाः-शिष्याः। ५ 'अनाकुलताम्' इति म.म.पुस्तकयोः पाठः।

प्रवक्तृगुणान् प्रतिपाद्यान् प्रति स्वत एवाभ्यस्तकारणगुणान् प्रति प्रत्यक्षादिवत् । अनभ्यस्ततद्गुणांस्तु कांश्चित्तान् प्रति सुनिश्चितासम्भवद्बाधकत्वरूपादनुमानात् । अपरांस्तु प्रतिपन्नाप्तान्तरोपदेशादपि तथा स्वयं स्वार्थानुमानेन निश्चितमर्थं प्रकृत्य शास्त्रार्थिनां प्रतिपादयितुं शास्त्रकृतां युक्तमेतदिति स्वार्थानुमानमूलं परार्थानुमानमिदमामनन्ति । तात्पर्यं खल्वस्य प्रवर्तितव्यमत्र शास्त्रे प्रमाणनयतत्त्वप्रतिपित्सुभिस्तद्व्यवस्थापनार्थत्वादिति प्रतीयते । न चास्य हेतोरसिद्धिः । उत्तरग्रन्थेन प्रसाधयिष्यमाणत्वात् । अथ यथा ग्रन्थकर्तुः प्रवर्त्ततेऽनुमानं तथा तदर्थिनः श्रोतुरपि तत्प्रवर्त्तिष्यत इत्यलमेतदुपन्यासेनेति चेत् । अस्थाने स्पर्द्धाबन्धः । शास्त्रकर्त्ता ह्यन्तःकरणेन सकलमपि निर्वर्त्तयिष्यमाणशास्त्रार्थं यथाकथञ्चित्समधिगतं सम्यक्परामृशन् प्रेक्षावतः प्रवर्त्तयितुमादिवाक्यं प्रयुङ्क्त इति न किञ्चिदचतुरस्रम् । तदितरस्तु कथमिव प्रस्तुतशास्त्रार्थमवगच्छेदिति चिन्त्यम् । प्रवर्त्तनेन चेत् कथं न तर्हि परस्पराश्रयः । नहि प्रयोजनमजानानः प्रवर्त्तते । न चाप्रवृत्तः प्रयोजनं जानातीति । समस्तपरार्थानुमानमुद्रोपद्रवकारिणी चेयमाशङ्का । शक्यत एव हि वक्तुमेवं धूमानुमानेऽपि । यत्प्रतिपादकवत् प्रतिपाद्यस्यापि स्वत एवोत्पत्स्यते प्रकृतमनुमानमिति किमेतदुपन्यासेनेति । अथ भवेत् कश्चिद्विपर्ययसंशयानध्यवसायवशीकृतात्मा तं प्रति तत्प्रतीकारायोपयुज्यत एवैतत्प्रयोग इति चेत् । इतरत्रापि किं न तथा समर्थयसे ।

आदिकरणवाक्येऽनेकान्तवादस्य स्थापनम् ।

अथादिवाक्यकृतावेकान्तोऽनेकान्तो वेति अनेकान्त इत्याचक्ष्महे । तथाहि ये प्रेक्षापूर्वकारिणः सर्वथैवाप्रतिपन्नाप्ताः प्रतिपन्नप्रकृतमात्राप्ता वा भवेयुर्नामी प्रमाणप्रदर्शनमन्तरेण प्रवर्त्तयितुं शक्या इत्यमून् प्रति प्रयोक्तव्यमेव यथासम्भवमागमानुमानोभयस्वभावमादिवाक्यम् । तथा हि यः प्रेक्षापूर्वकारी कुतश्चिद्भ्रमोहात् कञ्चनाप्तं प्रतिपेदे तं प्रत्यनु-

मानमिति । यश्च तं प्रकृतमेव प्रत्यपद्यत तं प्रति प्रवचनमनुमानं चेति नियमाद्विरचनीयमादिवाक्यम् । यस्तु प्रेक्षापूर्वकारी प्रतिपन्नाऽप्रतिनियतास्तं प्रत्येतत्करणाकरणयोर्यदृच्छैव विराजते । शास्त्रकृतैवोपन्यस्ते हि तस्मिन्नमूदृशमयोजनपात्रं शास्त्रमेतदित्येवं रूपमास्तान्तरोपदेशं प्रेक्षावान् नापेक्षतेऽपेक्षते चानुपन्यस्ते तम् इत्युभयथापि प्रेक्षावतः प्रवृत्तिरनिवृत्तैव । अथेतरथाऽप्यत्र पक्षे प्रेक्षावतः प्रवृत्तिसिद्धेरकरणैकान्त एव रमणीय इति चेत् । कः खलु विशेषोऽशेषशेमुषीशालिना सम्भावितः शास्त्रकृदास्तोपज्ञादुपदेशात् तदितरास्तप्रणीतोपदेशे ग्रन्थलाघवमिति चेत् किमर्थमेतद्विशिष्यत इति प्रकाश्यम् । शिष्यस्य प्रवर्तमानस्य स्वल्पप्रयासार्थमिति चेत् । तर्हीतरास्तप्रणीतमुपदेशमनुसरतः किं न तावान् प्रयासः स्यात् । तदुभयव्यापिशिष्यप्रयाससाम्ये निर्निबन्धनः शास्त्रकृदादिवाक्योपदेशप्राप्तिबन्धः निर्बंधः किञ्च शास्त्रकृतैव कृतमेतत् सर्वथैवाप्रतिपन्नास्तान् प्रतिपन्नप्रकृतमात्रास्तांश्चापि प्रेक्षावतः प्रवर्त्तयति । येऽपि चाप्रेक्षापूर्वकारिणोऽर्थसंशयात्कूप्यादौ प्रवर्त्तन्ते तेषामपीह शास्त्रे तस्मादेव प्रवर्त्तमानानामपास्य हठाद्प्रेक्षाराक्षसीं घटयन्ति प्रेक्षाप्रणयिनीमिति किं न पश्यसि विशेषलाभम् । तस्माद् अवस्थितमिदं यदत्र पक्षे यदृच्छैवेति । ये च प्रत्यक्षमेव प्रमाणमाचक्षते तान्प्रति न प्रयोक्तव्यमेवेति । तदयं संक्षेपः । यद्यादिवाक्यमुपकल्प्यते तदा कस्यचित्तस्मादेव प्रमाणादितरस्य पुनरर्थसंशयात् प्रवृत्तिः । यदा तु नोपकल्प्यते तदाऽन्तरोपदेशरूपात् प्रमाणादर्थसंशयाद्वेति सर्वत्र सर्वस्यापि प्रवृत्तिसिद्धेरादिवाक्योपकल्पनेऽनेकान्तो व्यवतिष्ठते । सविस्तरशास्त्रेष्वादिवाक्यस्याभिधानमनभिधानमन्यत्रेत्येवमादिवाक्यानेकान्तं ये केचिदास्थिषत न तेऽनवद्यया विद्ययानन्दयन्ति सहृदयान् । आदिवाक्यमात्रोपन्यासे हि न समासस्य व्युदासं विस्तरस्य वाऽवतरणं गण-

१ ' प्रतिपन्नो ' इति प. पुस्तके पाठः । २ ' उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ' इति पा. सू. २-४-२१ । ३ ' प्रत्यक्षमेवं ' इति म. पुस्तके पाठः । ४ समासः संक्षेपः । व्युदासो निराकरणम् । आसमूलकादित्यर्थः ।

यन्ति मनीषिणः । संक्षिप्तेष्वपि केषुचिच्छास्त्रेषु तदुपन्यासस्य तदितरेष्वपि तदनुपन्यासस्य दर्शनात् ।

आदिवाक्ये कृते तस्मादर्थसंशयतोऽपि वा ॥
अकृते वृत्तिरन्यात्तादर्थसंशयतोऽपि वा ॥ ११ ॥
व्यासात् समासतो वापि शास्त्रे कर्तुः समीहिते ॥
तदेवमादिवाक्यस्यानेकान्तोऽसौ व्यवस्थितः ॥ १२ ॥

ये त्वेकान्तवादिनः सौगतादयस्तेषां न कथञ्चिदप्यादिवाक्यं प्रकाशयितुमवकल्पते । तस्य प्रामाण्यमस्वीकुर्वतां समर्थयितुमसमर्थानां वा वैयर्थ्यात् ।

सौगतादीनामादिकरणवाक्यस्यासामञ्जस्यम् ।

अत्राहुरेकान्तकृताभिमानाः परे प्रयोक्तव्यमवश्यमादौ ॥
शास्त्रस्य वाक्यं न विना ह्यनेन प्रेक्षावतां सिध्यति वृत्तिरत्र॥१३॥

तथाहि प्रयोजनप्रतिपत्तिनान्तरीयकत्वात् प्रेक्षावतां प्रवृत्तेरनभिहितप्रयोजनशास्त्रस्य तैः काकदन्तपरीक्षादिवदनादरणीयत्वमेव भवेदतः प्रयोजनप्रदर्शनेन तेषां प्रवर्त्तनाय शास्त्रस्यादौ वाक्यं प्रयोजनप्रकाशनपरमुपन्यसनीयमेव । अभ्यधायि च ।

" अनिर्दिष्टफलं सर्वं न प्रेक्षापूर्वकारिभिः ।
शास्त्रमाद्रियते तेन वाच्यमग्रे प्रयोजनम् ॥ १ ॥
शास्त्रस्य हि फले ज्ञाते तत्प्राप्त्याशावशीकृताः ।
प्रेक्षावन्त प्रवर्त्तन्ते तेन वाच्यं प्रयोजनम् ॥ २ ॥

इति अत्रोच्यते ।

तावदेव लभते प्रतिष्ठितं प्रोक्तमेतदखिलं कुतीर्थिकैः ॥
यावदेव न जिनेन्द्रसूनवो व्यञ्जयन्ति दृढयुक्तिडम्बरम् ॥ १४ ॥

तथाहि प्रेक्षापूर्वकारिणां प्रवर्त्तनाय किल शास्त्रादौ प्रयोजनप्रतिपादकं वाक्यमुपादीयते । ते च प्रमाणप्रदीपप्रद्योतितन्यायमार्गप्रसर्पणप्रवृत्तान्वर्थप्रेक्षापूर्वकारिव्यपदेशाः प्रमाणत एव प्रवर्त्तन्ते । न चादिवाक्यप्रभवं ज्ञानमध्यक्षं बौद्धैस्तावदभिधानीयम् अस्पष्टत्वात् । नापि

१ उपेन्द्रवज्रा । २ रथोद्धता ३ प्रत्यक्षम् ।

यरार्थानुमानम् । साध्यसाधनयोर्व्याप्तिप्रतिपत्तौ तर्कप्रमाणस्य तैरनङ्गीकारात् । प्रत्यक्षस्यानुमानस्य वा तत्रासमर्थत्वेन साधयिष्यमाणत्वात् । अप्रमाणादेव विकल्पज्ञानात् तयोर्व्याप्तिप्रतिपत्तिरिति त्वसमीचीनम् । प्रत्यक्षानुमानप्रमाणत्वसमर्थनस्य वैयर्थ्यापत्तेरप्रमाणादेव प्रत्यक्षानुमेयार्थ प्रतिपत्तिप्रसङ्गात् । स्यान्मतम् । उपलब्धप्रयोजनवाक्यानां प्रयोजनार्थिनां वाक्योपदर्शितप्रयोजनविषयभावाभावपरामर्शपरः संशयः समाविर्भवति । आविर्भूतप्रयोजनविषयसंशयानां च कदाचित्तत्प्राप्त्या वशीकृतान्तरात्मनामर्थसंशयस्य प्रवर्त्तकत्वात् । संशयितसस्यसम्पत्त्यादिफलान ॰ ॰ बलादीनां कृष्यादाविव प्रवर्तमानानां श्रोतृणां विस्मृश्यकारिणां विस्मृश्यकारित्वाविरोध इति तेषां संशयोत्पादनार्थः प्रयोजनवाक्योपन्यास इति । अत्रोच्यते । वाक्योपन्यासः शास्त्रप्रयोजनविषयसंशयोत्पिपादयिषया । संशयोऽपि च निश्चयविरुद्धोऽनुत्पन्ने च निश्चये तत्राप्रतिबद्धवृत्तिकतया वाक्योपन्यासात् प्रागप्यसौ प्रादुर्भवन् केन निवार्यते येन तदर्थं वाक्यमुपन्यस्येत । स्यादेतत् अश्रुतप्रयोजनवाक्यानां प्रयोजनसामान्ये तत्सत्त्वेतराभ्यां संशयो जायते किमिदं चिकित्साशास्त्रवत् सप्रयोजनमुत काकदन्तपरीक्षादिवन्निष्प्रयोजनमिति। तस्माच्च संशयादनुपन्यस्तेऽपि प्रयोजनवाक्ये प्रयोजनसामान्यार्थिनः प्रवर्त्तन्ताम्। प्रयोजनविशेषे तु कथमश्रुतप्रयोजनवाक्यानां संशयोत्पत्तिः प्रायेण च प्रयोजनविशेषविषयस्यैव संशयस्य प्रवृत्तिकारणत्वात् तदुत्पादनाय वाक्यं प्रयोक्तव्यमेवेति । तदसाम्प्रतम् । कुतश्चिच्छास्त्रादनुभूतपूर्वप्रयोजनविशेषं श्रोतारं प्रति तावद्वाक्यस्यानुपयोगात् । स हि किञ्चिच्छास्त्रमुपलभ्य प्रागनुभूतप्रयोजनविशेषेण शास्त्रेणास्य वर्णपदवाक्यकृतं साधर्म्यमवधार्य किमिदमपि सफलं निष्फलं वा । सफलमपि किमनेनैवान्येन वा फलेन फलवदिति संदिहानो विनाऽपि प्रयोजनवाक्येन प्रवर्त्तत एव । अननुभूतपूर्वप्रयोजनविशेषोऽपि श्रोता शास्त्रमिदमनेन प्रयोजनेन तद्वदित्युपन्यस्तेऽपि वाक्ये प्रयोजनविशेषमे-

वाजानानः पृच्छति शास्त्रमिदमनेन प्रयोजनेन तद्वदित्येन किमुक्तं भवतीति न पुनस्तद्वतो भविष्यत्युत नेति संदिग्धे । प्रागनधिगततत्त्वरूपस्य तद्भावेतराभ्यां संशयायोगात् । अप्रतिपत्तिस्तु स्यात् ततो वाक्यात् न जानेऽहं किमनेनोक्तमिति । अनुभूतविस्मृतप्रयोजनविशेषोऽपि च कस्यचिच्छास्त्रस्य परिसमाप्तितः परिज्ञातप्रयोजनविशेषः समुत्पन्नतद्विषयस्मृतिनिबन्धकप्रत्ययः सन् श्रोता तदानेन वाक्येन शास्त्रतः समुपजातप्रयोजनविशेषविषयस्मृतिकः क्रियते यदि तदन्तरेणापि कुतश्चिदसमाहितान्तःकरणादिप्रत्ययकलापात् तदुत्पत्तिर्न स्यात् । तदेव वा शास्त्रं प्रागनुभूतप्रयोजनविशेषशास्त्रसादृश्यादुपलभ्यमानं स्मृतिं नाविर्भावयेदित्यलं वाक्यकल्पनया । नहि वाक्यतोऽपि विस्मृतप्रयोजनविशेषस्य नियमेन स्मृतिर्भवति । ततोऽपि कदाचित् तस्या उत्पत्तिरिति चेत् । तर्हि कदाचिच्छास्त्रमात्रादपि तदुत्पत्तिर्दृश्यत एवेति कः शास्त्राद्वाक्यस्यातिशयः । नियमेन तु नोभाभ्यामप्यनुस्मरणं भवति । अन्येऽपि वा तद्धेतवस्तत्रोपन्यस्येरन्निति त्यज्यतां तदास्थानिर्बन्धः । सामान्यविशेषयोश्च दर्शनादर्शनाभ्यां विशेषस्मरणसहकारिभ्यां संशयः समुपजायते । न च वाक्यं प्रयोजनविशेषस्य भावाभावयोः सामान्यम् । ननु विवक्षापरतन्त्रत्वेन स्वार्थतथाभावातथाभावयोरपि प्रयोगसम्भवात् सामान्यमेव वाक्यमिति चेत् । तर्हि शास्त्रमपि शास्त्रान्तरसादृश्यात् प्रयोजननिर्वृत्त्युपायत्वानुपायत्वयोःसामान्यमन्यतरनिश्चयनिमित्ताभावात् ततः एव संशयतः[1] प्रवर्त्ततामिति शास्त्रेण कृतकृत्यत्वादकिंचित्करं वाक्यम् । नापि संशयात् प्रवर्त्तमानः प्रेक्षापूर्वकारी भवितुमर्हति प्रमाणपुरःसरप्रवृत्तिप्रसादप्राप्यत्वात् तद्व्यपदेशस्येति । स्यान्मतं मामूत् संशयोत्पादनेनादिवाक्यस्य प्रवृत्तौ सामर्थ्यं किन्तु नारब्धव्यमिदं शास्त्रं प्रयोजनरहितत्वात् काकदन्तपरीक्षादिवदिति शास्त्रारम्भप्रतिषेधाय प्रयुज्यमानाया व्यापकानुपलब्धेरसिद्धतोद्भावनार्थं तत्प्रयोगोऽवकल्प्यत

---

१ 'संशयानः' इति प. पुस्तके पाठः ।

एवेति । तदपि व्यामूढभाषितम् । वाक्यस्य प्रमाणत्वेनानवस्थिततया प्रयोजनविशेषसद्भावप्रकाशनसामर्थ्यविरहितस्तदसिद्धिमुद्भावयितुमशक्तत्वात् । नापि सप्रयोजनत्वेतरयोःपरस्परपरिहारस्थितयोः कुतश्चित्प्रमाणादेकभावाप्रतीतावितराभावप्रतिपत्तिः । येन वाक्यमात्रस्योपक्षेपेण परकीयाया व्यापकानुपलब्धेरसिद्धिः स्यात् । नापि कुतश्चित्प्रयोजनविशेषं स्वयं प्रतिपन्नवता परस्य तत्प्रकाशनोपायमनुपदर्शयता शास्त्रारम्भनिषेधकस्य हेतोरसिद्धिरुद्भावयितुं शक्यते । वाक्यस्याप्रमाणस्य हेतुप्रतिपक्षभूतार्थप्रत्युपस्थापनासमर्थस्योपक्षेपमात्रेणासिद्धेरयोगात् । नापि निष्प्रमाणिका तत्प्रतिपक्षप्रतिपत्तिः । अतिप्रसङ्गात् । नाप्यन्तःकरणसमाधानमात्रवशवर्त्तिविकल्पोपरचितस्य प्रयोजनविशेषस्य परमार्थतोऽसतोऽनेन वाक्येनोपदर्शनेऽपि तदसिद्धतोद्भावनं न्याय्यम् । परिकल्पितव्यापकोपलम्भलक्षणसाधनस्य स्वप्रत्यनीकतथाविधव्यापकानुपलम्भव्यापारविमर्दानुपपत्तेः । उपपत्तौ वा कथमर्थादर्थगतिरिति सन्ध्यावन्ध्यास्तनन्धयपराक्रमवर्णनावन्न वन्ध्या भवेत् । कथमेतत् यद्यपीदं वाक्यमप्रमाणत्वाद्विपरीतपदार्थोपस्थापनामुखेनासिद्धतां नोद्भावयति । तथापि शास्त्रस्य निष्प्रयोजनत्वं सन्देहदोलामधिरोहयत्येव । सन्दिग्धनियोजनत्वस्य च शास्त्रस्यैकान्तेन निश्चितं प्रयोजनाभावं प्रेक्षावदारम्भप्रतिषेधहेतुं प्रयुंजानोऽनेन वाक्येन प्रतिचिक्षिप्सितो न पुनः प्रयोजनविशेषविषयनिश्चय एवोत्पिपादयिषितः । नहि प्रतिपक्षाक्षेपेणैव साधनधर्माणामसिद्धिरपि तु स्वग्राहिविज्ञानविकलतया धर्मिणि सन्दिग्धत्वमप्यसिद्धत्वमेव । तस्मात् सन्दिग्धासिद्धतोद्भावनाय वाक्यप्रयोग इति । तदपि न साधिमानमाधत्ते । यथाहि सप्रयोजनत्वे सन्देहोत्पादने वाक्यस्यानुपयोगित्वं शास्त्रमात्रादपि भावात्, तथा निष्प्रयोजनत्वेऽपि । अथायमाशयः । समुपन्यस्ते परेण व्यापकानुपलम्भे प्रयोजनवाक्येनासिद्धतां प्रतिपाद्य कथमसिद्धिः साधनस्येति प्रत्यवतिष्ठमानं परं शास्त्र-

---

१ 'विरहितस्य' इति प. पुस्तके पाठः। २ सन्धा—प्रतिज्ञा । ३ खण्डयितुमिष्टः ।

परिसमाप्तितः प्रयोजनमनुगमयिष्यन् शास्त्रं श्रावयति । ततः समधिगते तेन प्रयोजने तदुपक्षिप्तस्य साधनस्यासिद्धिरिति । नायमप्याशयः साधीयान् । नहि शास्त्रश्रवणतः प्रयोजने समधिगन्तव्ये शास्त्रादौ तद्वाक्यमुपादीयमानं कञ्चनार्थं पुष्णाति । तत्रावगन्तव्यप्रयोजनस्यानुपयोगादिति यत्किञ्चिदेतत् । नन्वसिद्धतोद्भावनप्रकारोऽनेन न्यायेन प्रलयमेव गत इति चेत् । मैवम् । न खलु वयमसिद्धतोद्भावनपरं न्यायमेव प्रतिक्षिपामोऽपि तु प्रमाणशक्तिसम्पत्सम्पर्कविरहात् वाङ्मात्रमेवेदमिति वदामः । नहि न्यायानुसारितामात्मसात् कुर्वन् कश्चिदनुपप्लवमानसो न्यायमेव प्रतिक्षिपति । वाङ्मात्रं तु विवक्षितार्थप्रकाशनानुपयोगितया प्रतिक्षिपेदपि । तन्नेदमसिद्धतोद्भावनार्थमपि प्रयोजनवाक्यं शाक्यैरादावुपन्यसनीयम् ।

आगमप्रामाण्यविचारः ।

आगमप्रमाणरूपं प्रेक्षावतां प्रवृत्तये तदवश्यं विधेयमित्यन्ये । तदपि न्यायशून्यम् । यतोऽयमागमः पौरुषेयो वाऽपौरुषेयो वा । प्रथमकल्पनायां कुतोऽस्य प्रामाण्यनिश्चय इत्यभिधेयम् । स्वत एवेति चेत् । मैवम् । प्रामाण्यनिश्चयैकान्तस्य प्रामाण्यगोचरसंशयानुत्पत्तिप्रसङ्गादिदोषोपहतत्वेन प्रतिक्षेप्स्यमानत्वात् । परत एवेत्यप्यसत्यम् । परतः प्रामाण्यनिश्चयैकान्तस्यानवस्थादिदोषदूषितत्वेन निराकरिष्यमाणत्वात् । अपौरुषेयत्वमप्यस्य पुरस्तात् पराकरिष्यमाणत्वेन भणितुमननुगुणम् । केचिदाहुः 'शास्त्रस्य प्रस्तावकमुपक्रमवाक्यं तदन्तरेण तत्प्रारम्भानुपपत्तेः' इति । तदप्यसुन्दरम् । अनवस्थानुषङ्गात् । यथैव हि प्रस्तावकं वाक्यमन्तरेण न शास्त्रमवतरति तथा तदपि वाक्यान्तराद्विना नेति । प्रस्तावकत्वं चाभिसन्धाय प्रयोजनवाक्येऽवश्योपन्यसितव्ये शास्त्रस्य गुणनिमित्तपरिमाणादयः कथं नोपन्यस्येरन्[1] । ततो व्याख्यातृवशादवतरन् ग्रन्थ

[1] 'नोपन्यसेरन्' इति प. भ. पुस्तकयोः पाठः

एव स्वात्मनः प्रस्तावकोऽस्तु किं प्रयोजनवाक्योपन्यासप्रयासेन । एतेन शास्त्रप्रतिज्ञास्व्यापनफलः संक्षेपतः शास्त्रशरीरख्यापनफलश्च तदादौ वाक्योपन्यास इत्येवमादयोऽसत्कल्पना न्यायोपदर्शनाननुकूलतया निरुपयोगित्वेन निर्वर्णितोत्तराः प्रतिपत्तव्याः । वाङ्मात्रेण प्रकृतार्थनिश्चययायोगात् । नहि तत्र शब्दगडुमात्रव्यतिरेकेण कश्चन न्यायो विपश्चितामविपरीतप्रतिपत्तौ प्रतीयते । तस्मात् प्रेक्षावतां प्रतिपत्तिनिमित्तं वाङ्मात्रव्यतिरेकेण न्याय एव दर्शनीयो येन निर्रारेकं प्रवर्त्तेरन् । एवं च

शास्त्रस्येष्टफलप्रतीतिकृतये कर्त्तव्यमादौ वचो ।
नो वेति स्थितमत्र जैनसमये सन्न्यायसामर्थ्यतः ॥
एकान्तस्तु न सिद्धिपद्धतिमितस्तत्साधनार्थं ततो ।
व्यर्थं दर्शनपक्षपाततरलाः क्लिश्यन्ति तीर्थ्याः परे ॥१५॥१॥

प्रमाणनयतत्त्वव्यवस्थापनार्थमिति प्रत्यपादि । तत्र प्रमाणं तावल्लक्षयितुमाह—

स्वपरव्यवसायिज्ञानं प्रमाणमिति ॥ २ ॥

प्रमाणमिति लक्ष्यम् । स्वपरव्यवसायिज्ञानमिति लक्षणम् । लक्षणं च परस्परं व्यतिरेके सति विजातीयेभ्यो व्यवच्छिन्नं लक्ष्यतेऽवधार्यते येन तदुच्यते असाधारणो धर्म इति यावत् । यथा तपनीयतदाभासयोर्वर्णविशेषः । तत्र प्रतिपाद्यानुसारेण यथायोगं लक्ष्यं वा लक्षणं वा द्वयमपि वा विधीयते ।

परप्रतिपत्तये हि वाक्यं कीर्त्तयन्ति कृतिनः । परे चापरिमितप्रकारा दुर्वारप्रसरो ह्यसौ मोहमहाराजः प्रतिविषयमनेकाभिर्भङ्गीभिरुज्जृम्भते ।

---

१ 'व्याख्यापन' इति प. पुस्तके पाठः । २ नहि प्रतिज्ञामात्रेण कार्यसिद्धिरित्युक्तेः । ३ ' न्यायपथ ' इति भ. पुस्तके पाठः । ४ निःशंकम् । ५ ' लक्ष्यं ' इत्यधिकं प. पुस्तके ।

ततश्च कश्चित् कचित् संशेते नाध्यवस्यति विप्रतिपद्यते चेति । तदनुसारेण लक्षणवाक्ये लक्षणादीनां विधिरविरुद्धोऽभिधीयत इति ।

अत्राह धर्मोत्तरः । ' लक्ष्यलक्षणभावविधानवाक्ये लक्ष्यमनूद्य लक्षणमेव विधीयते । लक्ष्यं हि प्रसिद्धं भवति ततस्तदनुवाद्यम् । लक्षणं पुनरप्रसिद्धमिति तद्विधेयम् । अज्ञातज्ञापनं विधिरित्यभिधानात् । सिद्धे तु लक्ष्यलक्षणभावे लक्षणमनूद्य लक्ष्यमेव विधीयते ' इति । तदेतदवन्धुरम् । लक्ष्यवल्लक्षणस्यापि प्रसिद्धिर्नहि न सिद्धेति कुतस्तस्याप्यज्ञातत्वनिबन्धनो विधिरप्रतिबद्धः सिद्धयेत् । विवक्षितलक्ष्यास्पदत्वेनाज्ञानाल्लक्षणस्य तत्त्वेन विधिरप्रतिबद्धः सिद्ध एवेति चेत् तर्हि लक्ष्यस्यापि विवक्षितलक्षणलक्षितत्वेनाज्ञानात् तत्त्वेन किं न विधिः साधीयान् । अथ सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामत[2] ' इति न्यायात् विवक्षितलक्षणलक्षितत्वेन लक्ष्यस्य विधिरित्यभिधीयमाने लक्षणस्यैवासौ पर्यवस्यति । वह्निमत्त्वेन पर्वतः साध्य इति अभिधीयमाने वह्निवत् । हंत तर्हि विवक्षितलक्ष्यास्पदत्वेन लक्षणस्य विधिरित्यभिधीयमाने लक्ष्यस्यैवासौ पर्यवस्यतीत्यपि किन्न पश्यसि । न चायं सार्वत्रिको न्यायः । रक्तं पटं वयेत्यादौ कदाचिद्विशेषणविशेष्ययोरुभयोरपि विधेयत्वप्रसिद्धेः । अदग्धैदहन[3]न्यायेन यावदप्राप्तं तावद्विधीयत इति हि तद्विदः । अथ यथा कांश्चित्प्रति संशयानध्यवसायनिरासाय तत्परान् तीर्थान्तरीयान् प्रति विप्रतिपत्तिपर्यायविपर्ययप्रतिक्षेपायापि तद्विलक्षणं कक्षीकरणीयम् । न वैतेषां

धर्मोत्तरमतस्य सविस्तरं खण्डनम् ।

१ ' सविशेषणौ ' इति प. पुस्तके पाठः । २ सविशेषणे हि विधिनिषेधौ विशेष्ये बाधे सति विशेषणमुपसङ्कामतः । इति न्यायस्वरूपम् । तदर्थश्च-यत्र सविशेषणे विशेष्ये विशेष्यमात्रे विधेर्निषेधस्य वा बाधस्तत्र तौ विधिनिषेधौ विशेषणमुपसङ्कामतः । ३ अग्निर्यावददग्धं तावद्दहति । ४ ' तथा ' इति प. पुस्तके पाठः ।

स्वपरव्यवसायिज्ञानमद्यापि प्रसिद्धम् । न चाप्रसिद्धस्यानुवादो निरपवादः । तदेवमनुवादः सर्वनाम्ना यच्छब्देन स्वपरव्यवसायिज्ञानस्य विशेषणमेतान् प्रत्यप्रातीतिकमेवेति चेत् । तर्हि समस्तप्रमाणप्रमेयापलापिनः शून्यतावादिनः प्रत्यक्षानुमाने । प्रत्यक्षैकपक्षपातिनो नास्तिकस्य चाऽनुमानं न प्रतीतमेवेत्येतौ प्रति लक्ष्ययोः प्रत्यक्षानुमानयोरपि कुतोऽनुवादसर्वनाम्ना विशेषणं रमणीयमिति तल्लक्षणसूत्रेऽप्यदूषणं स्यात् । अथ विशेषशब्दार्थमात्रतः प्रत्यक्षादेस्तयोरपि प्रतीतिसम्भवादनुवादसर्वनाम्ना तस्य विशेषणं रमणीयमिति चेत् । इतरत्रापि तथाप्रतीतिमास्थाय किं न तत्समर्थयसे । अथ तौ प्रति प्रथमं लक्ष्यं प्रसाध्य तस्य यच्छब्देन विशेषणमिति चेत्—

साधो सौगत भूभर्तुर्द्धर्मकीर्त्तेर्निकेतने ।
व्यवस्थां कुरुषे नूनमस्थापितमहत्तमः ॥ १६ ॥

स हि महात्मा विनिश्चये[1] 'प्रत्यक्षमेकम्' न्यायबिन्दौ[2] तु 'प्रत्यक्षानुमाने द्वे' अप्यप्रसाध्यैव तल्लक्षणानि प्रणयति स्म । किञ्च शब्दानित्यत्वसिद्धये कृतकत्वमसिद्धमपि सर्वमुपन्यस्य पश्चात् तत्सिद्धिमभिदधानोऽपि न लक्षणस्य तामनुमन्यसे इति स्वाभिमानमात्रम् । अपि च प्रत्यक्षलक्षणव्याख्यालक्षणे 'लक्ष्यलक्षणभावविधानवाक्ये' इत्यादिना लक्षणस्यैव विधिमभिधत्से विधेरेवापराधान्न बुद्धेः । यतो न्यायविनिश्चयटीकायां स्वार्थानुमानस्य लक्षणे, 'तत्कथं त्रिरूपलिङ्गग्राहिण एव दर्शनस्य नानुमानत्वप्रसङ्ग' इति पर्यनुयुञ्जान एतदेव सामर्थ्यप्राप्तं दर्शयति यदनुमेयेऽर्थे 'ज्ञानं तत्स्वार्थमिति' इतीत्यनुमन्यमानश्चानुमापयसि स्वयमेव लक्ष्यस्यापि विधिम् । स्पष्टमेवाभिदधासि च न्यायबिन्दुवृत्तौ एतस्यैव लक्षणे 'त्रिरूपाच्च लिङ्गाद्यदनुमेयालम्बनं ज्ञानं तत्स्वार्थमनुमानम्' इति, विनिश्चयटी-

---

१ धर्मकीर्तिकृतः प्रमाणविनिश्चयनामको ग्रन्थोऽयम् । अस्य धर्मोत्तराचार्येण व्याख्या कृता । २ न्या. बिं. परि. १ सू. ३. ३ न्या. बिं. परि. २ सू. ३.

कायामेव च परार्थानुमानलक्षणे ' त्रिरूपस्य लिङ्गस्य यदाख्यानं तत्परार्थमनुमानम्' इति च व्याचक्षाण इत्यक्षुण्णं ते वैचक्षण्यमिति । किञ्च असम्भवाव्याप्त्यतिव्याप्तयस्त्रयो दोषा निषेधनीया लक्षणे विचक्षणैः । न च प्रत्यक्षशब्दावाच्ये सर्वस्मिन्नपि वस्तुनि निर्विकल्पकत्वाभ्रान्तत्वे सम्भवत इत्यसम्भवातिव्याप्त्योरसम्भवेऽप्यव्याप्तिः प्राप्तैव प्रत्यक्षलक्षणस्य । तथागतमेकमन्तरेणापरेषां सविकल्पकज्ञानेऽपि प्रत्यक्षशब्दवाच्यत्वस्य प्रसिद्धेः । न च तत्र सविकल्पकत्वं पराकृत्य निर्विकल्पकत्वकल्पनां भवानप्यातिष्ठते । अथ यत्तद्भवतामस्माकं चेत्यादेस्तत्र तत्राभिधानाद्यत्परेषामस्माकं च प्रत्यक्षशब्दवाच्यत्वेन प्रसिद्धं स्यात् तस्यैव कल्पनापोढत्वादिविधिरभिधीयते । न चास्माकं सविकल्पकज्ञानं तच्छब्दवाच्यत्वेन प्रसिद्धमित्यव्याप्तेरप्राप्तिरेवेति चेत् । तर्हि परेषां शब्दब्रह्माद्वैतवादिनां च न किञ्चिन्निर्विकल्पकं ज्ञानं प्रत्यक्षशब्दवाच्यत्वेन प्रसिद्धमिति तत्राप्युभयप्रसिद्ध्यसिद्धेर्न तद्विधिरविरुद्धः स्यात् । अथ केषांचित् परेषामपि निर्विकल्पकमपि ज्ञानं तच्छब्दवाच्यत्वेन प्रसिद्धमेवेति चेत् तर्हि कस्यचित्परस्यापि स्वपरव्यवसाय्यपि ज्ञानं किं न प्रसिद्धमवबुध्यसे । अपि च भिक्षो विप्रतिपन्नान् प्रति लक्षणं प्रणीयते इत्याचक्षाणोऽप्यविप्रतिपन्नेभ्य एव तदुपदिशसि सिद्धसाध्यतां च नावधारयसीति किमभिदध्महे । ननु सम्यग्ज्ञानस्य ज्ञापयितुमुपक्रान्तत्वात् तद्भेद एवेदं प्रत्यक्षं ततश्च प्रत्यक्षमिति यत्प्रसिद्धं सम्यग्ज्ञानं तस्यैव कल्पनापोढत्वादिविधिः । नच परप्रतीतं सविकल्पकं प्रत्यक्षं सम्यग्ज्ञानं विसंवादकत्वादिति चेत् । तर्हि कुकारुकस्येवैकं सन्धित्सतोऽन्यत्प्रच्यवते । भवति चैवमभ्रान्तपदस्यापार्थकत्वं सम्यग्ज्ञानस्य भ्रान्तत्वायोगात् । अथ समर्थित एवाभ्रान्तपदस्यार्थो विप्रतिपत्तिप्रतिक्षेपो नाम । गच्छद्वृक्षादिदर्शनस्य हि

---

१ ' तक्षा च तन्तुवायश्च नापितो रजकस्तथा । पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः ' ॥ कुत्सिताः कारवः कुकारवः ।

ग्राह्ये विपर्यस्तस्यापि कल्पनापोढत्वं पश्यन्नवश्यमध्यवस्येत् प्रत्यक्षत्वं कश्चिदिति तत्प्रतिक्षेपायाविपर्यस्तार्थप्रतिपादकमभ्रान्तपदमुपादेयमिति चेत् । हन्त बौद्धोऽपि नट इव केवलवाक्प्रपञ्चेन वञ्चयसि । गच्छदृवृक्षादिवेदनं हि तत्र तत्र मिथ्याज्ञानं मिथ्याज्ञानमिति सर्वत्रांशे विसंवादकमिति प्रपञ्चतः प्रतिपाद्येदानीं ग्राह्ये विपर्यस्तमिति पर्यायान्तरं परिकल्प्याभ्रान्तपदेन व्यपोहसि ननु सम्यग्ज्ञानपदेनेति व्यक्तं ते वाग्व्यंसकत्वम् । अपि च भगवद्भुवनसूत्रणासूत्रधारो धर्मकीर्तिरपि न्यायविनिश्चयस्याद्यद्वितीयतृतीयपरिच्छेदेषु यथाक्रमं 'प्रत्यक्षं कल्पनापोढमभ्रान्तम्' इति । 'तत्र स्वार्थं त्रिरूपाल्लिङ्गतोऽर्थदृक्' इति । 'परार्थमनुमानं तु स्वदृष्टार्थप्रकाशनम्' इति त्रीणि लक्षणानि 'तिमिराशुभ्रमणनौयानसङ्क्षोभाद्यनाहितविभ्रममविकल्पकं ज्ञानं प्रत्यक्षम्' इति । 'त्रिलक्षणाल्लिङ्गाद्यदनुमेयेऽर्थे ज्ञानं तत्स्वार्थमनुमानम्' इति । 'यथैव हि स्वयं त्रिरूपाल्लिङ्गतो लिङ्गिनि ज्ञानमुत्पन्नं तथैव परत्र लिङ्गिज्ञानोत्पिपादयिषया त्रिरूपलिङ्गाख्यानं परार्थमनुमानम्' इति च व्याचक्षाणो लक्ष्यस्यैव विधिमन्वकीर्त्तयत् । तथा 'लक्ष्यलक्षणभावविधानवाक्ये' इत्युपक्रम्य 'लक्षणमेव विधीयते' इत्यभिदधानः कथं न स्ववचनविरोधमवबुध्यसे । तथाहि कार्यकारणभाववदुभयाधारः सम्बन्धो लक्ष्यलक्षणभावस्तावत्तस्य च विधानमित्युक्ते लक्ष्यस्य लक्षणस्य च विधिः पर्यवस्यति । तथा च लक्षणमेव विधीयत इति दुर्निरोधो विरोधः । अथ परे परिकीर्त्तयन्ति लक्ष्यलक्षणभावविधानमिति तदनुवादादयमदोष एवेति ब्रूषे साधो 'सिद्धे तु लक्ष्यलक्षणभावे' इत्यत्र कस्ते कुशलोपायः । पूर्ववाक्यव्यवस्था-

---

१ व्यंसकः- धूर्तः । २ अधुना धर्मकीर्तिकृतन्यायबिन्दौ एवमुपलभ्यते सूत्रव्याख्यानम् । तथा च-'तत्र कल्पनापोढमभ्रान्तं प्रत्यक्षम् (न्या. बिं. परि. १ सू. ४), तत्र स्वार्थं त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानम् (न्या. बिं. परि २ सू. ३) त्रिरूपलिङ्गाख्यानं परार्थानुमानम् (न्या. बिं. परि. ३ सू. १) अत्र लिङ्गेपि लिङ्गेषु पाठभेदः ।

पितार्थानुवादप्रतिपादनपरं हीदं वाक्यखण्डलकं न च पूर्ववाक्येन लक्ष्यलक्षणभावो व्यवस्थाप्यते त्वदास्थयेत्यसम्बद्धमिदं स्यात् । सम्बद्धत्वे वा पूर्वत्र तदुभयविधिः सिध्येत् । तथा च न तस्मिन् स्ववाग्विरोधः प्रतिरोधमधिवसति । लक्ष्यस्य लक्षणं तस्य भाव इति तु व्याख्यानम् । प्रसिद्धार्थहान्यप्रसिद्धार्थपरिकल्पनलक्ष्यपदानर्थकत्वदोषकदर्थितमिति सहृदयोद्वेजकम् । अथात्र प्रसिद्धस्यार्थस्यासम्भवात् तद्धानिस्तद्विरुद्धपरिकल्पनं च गङ्गायां घोषः प्रतिवसतीत्यादाविवाविरुद्धमेवेति चेत् । मैवम् । लक्ष्यलक्षणयोरुभयोर्भावस्तदत्र प्रसिद्धोऽर्थस्तस्य च सम्भवः समर्थितः समर्थयिष्यते चेति ।

बलदेवबलं स्वीयं दर्शयन्न निदर्शनम् ।
वृद्धधर्मोत्तरस्यैव भावमत्र न्यरूपयत् ॥ १७ ॥

इहान्यो व्युत्पत्तिकालोऽन्यश्च व्यवहारकालः । तत्र व्यवहारकाले लक्षणस्य लक्ष्यसिद्धये व्यापारणेति भवतु तदा यत्पदपरामर्शनीयता व्युत्पन्नस्य सतः । यदा तु व्युत्पत्तिसमयस्तदा लक्षणमेव ज्ञाप्यमस्येदं लक्षणमिति यदेव च ज्ञाप्यं तदेवानूद्यते इति विरुद्धमेतत् । ज्ञाप्यं विधेयत्वादविज्ञातं सत्कथमनूद्यते[1] । अत एवास्य लक्ष्यवत् भूतविभक्त्या निर्देशस्तदा न युज्यते । यद्यपि हि कदाचित् क्रियेत । यथा शिखया परिव्राजकः कमण्डलुना छात्र इति । तत्रापि फलमुखेनैव लक्षणविधेराक्षेपो न तु लक्षणविधिरेव । तेन वाक्यान्तरार्थ एवोपप्लवते परिव्राजकस्य शिखा लिङ्गं छात्रस्य कमण्डलुरिति । अतस्तेन तस्य प्रतीतिसिद्धिरिति । तस्माल्लक्षणविधानावसरे तत्पदपरामर्श एवास्योचितः । यत्तूच्यते कथमप्रसिद्धस्य लक्षणत्वं भवति प्रसिद्धं वा कथं नानूद्येतेति सेयमन्याऽप्रसिद्धिर्या लक्षणत्वविधानावसर उपयुज्यते । अन्या च प्रसिद्धिर्या लक्ष्यावबोधनाय । शब्दार्थमात्रेण हि ज्ञातं सल्लक्षणत्वेन विधातुं शक्यम् । अत्यन्ताप्रसिद्धस्य धर्मस्यालक्षणत्वात् नतु तया प्रसिद्धया

१ 'मनूद्येत' इति प. पुस्तके पाठः ।

विधेयतासामर्थ्यायातं तत्पदपरामर्शयोग्यत्वमस्य निवर्त्तते । विहितस्य तु या लक्ष्यावबोधनाय व्यापारणा सान्याप्रसिद्धिर्यासौ लक्षणव्युत्पत्ति-वाक्याल्लक्षणत्वेनावगतौ सत्यां तदनुसन्धानरूपा तत्रास्य भवत्वनुद्यमानता । स ह्यस्य व्यवहारकाल इत्युक्तमेवैतत् । यः कुण्डली स देवदत्त इत्येवमादावपि यदा कुण्डलित्वं विधेयतया प्रक्रम्यते तदा यस्तत्र देवदत्तस्तस्य कुण्डलित्वं लक्षणम् । योऽग्निस्तस्य धूमो लक्षणम् । अतो यः कुण्डली यत्र वा धूमो भवता दृश्यते तत्र स देवदत्तस्तत्र वा वह्निरिति भवता प्रतिपत्तव्यमित्ययमेव न्यायः । एवं यः परिव्राजक-स्तस्य शिखा लिङ्गमित्ययं व्युत्पत्तिकालः । अत्र च परिव्राजकस्यैवानुवादः । व्यवहारकाले तु विपर्ययः । यतोऽस्य शिखा लिङ्गमतो यः शिखी स परिव्राजकस्त्वया व्यवहर्त्तव्य इति । ततो यद्यप्येकधैवोच्यते तथाप्यु-क्तिसङ्क्षेपमात्रमेतत् । व्युत्पत्तिव्यवहारकालापेक्षया तु विध्यनुवाद-विभागोऽत्र द्रष्टव्य इति ।

वृद्धसेवाप्रसिद्धोऽपि ब्रुवन्नेवं विशङ्कितः ॥
बालवत्स्यादुपालभ्यस्त्रैविद्यविदुषामयम् ॥ १८ ॥

तथाहि सोयं वृद्धधर्मोत्तरानुसार्य्यप्यलीकवाचालतया तुल्यस्वरूप-योरपि व्युत्पत्तिव्यवहारकालयोरतुल्यतामुपकल्पयन् बाल इवैकामप्य-ङ्गुलिं वेगवत्तया चलयन् द्वयीकृत्य दर्शयतीत्येवमुपालभ्यते त्रैविद्य-कोविदैः । व्युत्पत्तिस्वरूपापरिहारेण हि व्यवहारोऽपि सम्पद्यते । न खलु नालिकेरद्वीपादायातः पुमान् वह्निमानयानय नीरं क्षीरं चेत्या-द्युत्तमवृद्धनियोगात्तत्र तत्र प्रवर्त्तमानं कञ्चनापि मध्यमवृद्धं पुमांसं पश्यंस्तत्तत्पदावापोद्वापं च परिभावयन्नयं वह्निरयमस्य वाचक इत्येवं वह्नेः स्वरूपे प्रतिनियतवाचकवाच्यत्वे च व्युत्पत्तिं प्रतिपद्य तत्स्वरूप-परिहारेण व्यवहारमवतारयत्यपि । तर्हि लक्षणसिद्धये लक्ष्यस्यापि

१ 'तत्र' इति नास्ति प. पुस्तके । २ 'संपश्यं' इति प. पुस्तके पाठः ।

व्यापारणायाः प्रसिद्धेः । यथा हि मोहमहापिशाचपारवश्यात् स्वपरव्यवसायिज्ञानस्य प्रमाणत्वे विपर्ययसंशयानध्यवसायाः कस्यचित् प्रादुःप्यन्तीति तं प्रति तत्प्रतिक्षेपाय विवादास्पदं ज्ञानं मानं स्वपरव्यवसायित्वादित्येवमनुमानमारभ्यते । तथा तत एव प्रमाणस्य स्वपरव्यवसायिज्ञानत्वे कस्यचित्ते समुत्पद्यन्त इति । तदपनोदाय विवादाधिकरणं प्रमाणं स्वपरव्यवसायिज्ञानं प्रमाणत्वादित्येवमपि तदवश्यमुपदेश्यम् । तथा हि **ताथागताः** केचन कलशादिप्रत्यक्षसंवेदनं प्रमाणतया प्रतिपद्यन्ते न च स्वपरव्यवसायितया । तन्मते प्रत्यक्षस्य व्यवसायशून्यत्वात् परस्य चाप्रामाणिकत्वेनापारमार्थिकत्वात् । ततश्चैते तस्मिन् ज्ञाने स्वैकज्ञापकतया निर्व्यवसायतया च प्रत्यवस्थिताः सन्तः प्रतिपादितानुमानेन स्वपररूपोभयार्थज्ञापकत्वं कथञ्चिद्व्यवसायं च प्रतिपादनीयाः येऽपि परैकव्यवसायिज्ञानमानिनो **नैयायिकादयस्तानपि** प्रतिपादितानुमानेनैव स्वपरव्यवसायित्वं सिद्धिपद्धतिमारोपणीयम् । तथा कदाचिल्लक्षणांशसिद्धये लक्षणांशस्यैव व्यापारणा यथा ज्ञानं स्वव्यवसायि परव्यवसायित्वान्यथानुपपत्तेरिति । यच्च यदा तु व्युत्पत्तिसमयस्तदेत्यादि । तदपि नावदातम् । यतो विप्रतिपत्तिप्रतिक्षेपाय लक्षणं प्रणीयत इति व्यक्तं भवतामेव तत्र तत्र जयवैजयन्ती । न च वचनमात्रेण तत्प्रतिक्षेपः सम्पद्यते । नापि वचनं परार्थानुमानादन्यत् प्रमाणं भवितुमर्हति । भवद्भवनेऽवश्यतया[1] लक्षणवाक्यानि परार्थानुमानरूपाण्यभ्युपेयान्यथा तदभिधानानर्थक्यप्रसक्तेः । अत एवोद्योतकरवाचस्पतिप्रभृतयः परेऽपि ' **लक्षणवाक्यं केवलव्यतिरेक्यनुमानम्** ' इत्यामनन्ति । न चैवं व्युत्पत्तिकाल एवायं लक्षणप्रणयनं नामेत्येकान्तः कान्तो भवेत् । विप्रतिपत्तिपराकरणाय प्रयुक्तस्य लक्षणवाक्यस्य परार्थानुमानरूपत्वेन व्यवहारस्वरूपत्वात् । अन्यथा वह्निविप्रतिपत्तिव्युदासाय प्रयुक्तस्य धूमानुमानस्यापि व्युत्पत्तिकाललिङ्गितत्वप्रसङ्गात् । एवं

---

१ ' भवद्भवना ' इति प. म. पुस्तकयोः पाठः ।

चावतीर्णो व्यवहारकालस्य विलयः । विनेयापेक्षया तु लक्षणप्रणयनस्य व्युत्पत्तिकालाभिधाने ध्वस्तो लक्षणस्यैव विधिः । विनेयान् प्रति लक्ष्यस्यापि कदाचिद् विधेयत्वात् । विगलितश्च विप्रतिपन्नानेवाश्रित्य लक्षणं प्रणीयत इति मनोराज्याभिनिवेशः । यदेव च ज्ञाप्यं तदेवेत्यादिना च शब्दमात्रतः प्रतीतत्वाविशेषेऽपि लक्षणस्यानुवाद्यत्वं प्रत्याचक्षाणो लक्ष्यस्य च कक्षीकुर्वाणो न परीक्षकः । यच्चावाचि अत एवेत्यादि तत्रायमाशयः । लक्ष्यं हि प्रसिद्धमनुवाद्यं भवतीत्यस्मात् भूतविभक्तयो द्वितीयाद्याः समुपादीयन्ते । लक्षणं पुनरप्रसिद्धं विधेयमित्यतो भव्यविभक्तिः प्रथमैव प्रयुज्यत इति सोऽयं साहित्यज्ञताभिमानात् तत्र वृद्धधर्मोत्तरमधरयति । स्वयं त्वेवं व्याचष्ट इति किमन्यदस्य देवानांप्रियस्य श्लाघनीयता प्रज्ञायाः । सुप्रसिद्धा हि साहित्ये लोके वेदे च

*' कृतककुपितैर्बाष्पाम्भोभिः सदैत्य विलोकितै-
र्वनमसि गता यस्य प्रीत्या धृतापि तथाम्बया ।
नवजलधरश्यामाः पश्यन् दिशो भवतीं विना ।
कठिनहृदयो जीवत्येव प्रिये स तव प्रियः ' ॥ १ ॥

इति

' आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धुं न सम्भावित एव तावत्करेण रुद्धोऽपि हि[1] केशपाशः ॥२॥'

इति

*' पौलस्त्यः स्वयमेव याचत इति श्रुत्वा मनो मोदते ।
देयो नैष हरप्रसादपरशुर्मानाधिकं ताम्यति ॥
तद्वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही ।
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम् ॥ ३ ॥'

इति

*एतत् श्लोकद्वयं काव्यानुशासने स्वोपज्ञप्राचीनटीकायां शिवदत्तकृतार्वाचीनटीकायां च किञ्चित्पाठभेदेन समुपलभ्यते का. अ. टी. पृ. १७८ पं. १०, पृ. १७८ पं. २२, परन्तु काव्यानुशासनकर्तुर्हेमचन्द्रादस्य प्राचीनत्वम् ।

१ रघुवंशमहाकाव्ये ७ सर्गे ६ श्लो. । २ ' न ' इति प. पुस्तके ' च ' इति र. काव्ये च पाठः ।

*'ताताऽजन्म वपुर्विलङ्घितवियत् क्रौर्यं कृतान्ताधिकम् ।
शक्तिः कृत्स्नसुरासुरोष्मशमनी तातादथोच्चैः पदम् ॥
सर्वं वत्स तवातिशायिनिधनं क्षुद्रात्तु यत्तापसात् ।
तेनाहं त्रपया शुचा च विवशः कष्टां दशामागतः ॥ ४ ॥'

इति

'द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥५॥'

इति

*'तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ॥
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥६॥'

इत्यादौ॥ रक्तं पटं वयेत्यादौ, 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इत्यादौ च, यथाक्रमं वनमिति करेणेति द्विजेभ्य इति क्षुद्रात्तापसादिति कपालिन इति रणाश्वमेधे इत्यादेः रक्तं पटमित्यादेरग्निहोत्रमित्यादेश्चांशाद्विधेयादपि पुरो द्वितीयाद्या विभक्तयः ।

तथा तेष्वेव

'कारणगुणानुवृत्त्या द्वौ ज्ञाने तपसि चातिशयमाप्तौ ॥
व्यासः पाराशर्यः स च रामो जामदग्न्य इह ॥ १ ॥'

इति

'सूर्याचन्द्रमसौ यत्र चित्रं खद्योतपोतकौ ।
नित्योदयजुषे तस्मै परस्मै ज्योतिषे नमः' ॥ २ ॥

इति

*'आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवम् ।
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ॥
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते ।
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥३॥'

---

*एतानि त्रीणि पद्यानि काव्यानुशासने स्वोपज्ञप्राचीनटीकायां शिवदत्तकृतार्वाचीनटीकायां च किञ्चित्पाठभेदेन समुपलभ्यन्ते । पृ. १७९ पं. २, का. प्रा. टी. पृ. १६७ पं. १५, पृ. २० पं. ५१.

१ कुमारसम्भवमहाकाव्ये २ सर्गे श्लो. ७१. २ मैत्र्युपनिषदि ६-३.

इत्यादौ 'खलेवाली भवेन्मेधिः' इत्यादौ लोहितोष्णीषा ऋत्विजः संचरन्तीत्यादौ च व्यास इति, राम इति, सूर्याचन्द्रमसाविति, शाखाणीत्यादेः, ऋत्विज इत्यादेश्चांशादनुवाद्यादपि साध्यविभक्तिः प्रथमा प्रसिद्धैवेति । यथा चात्रामीषामंशानामनुवाद्यत्वं पूर्वत्र च तत्तदंशानां विधेयत्वं तथा श्रीमदम्बाप्रसादसचिवप्रवरेण कल्पलतायां तत्सङ्केते कल्पपल्लवे च प्रपञ्चितमस्तीति तत एवावसेयम् । अपि च भवदभिप्रायेण 'प्रत्यक्षं कल्पनापोढम्' इत्यत्रापि प्रत्यक्षमिति लक्ष्यांशात् सिद्धादपि साध्यविभक्तिर्दृश्यत एव । भवान् पुनस्तस्मात् सिद्धविभक्तिमेवामंस्त तत् 'यस्यामेव शाखायां स्थितस्तामेव छिनत्ति' इति नीतिं नातिवर्त्तते । अथ कथितमपि कथं नानुसंधत्से अभ्यधिष्महि यदा लक्षणमिति अयमाशयो यथा शिखया परिव्राजक इत्युक्तेऽपि परिव्राजकस्य शिखा लिङ्गमिति वाक्यान्तरार्थ एवोपप्लवते तथेहापि प्रत्यक्षं कल्पनापोढमित्युक्तेऽप्यस्य प्रत्यक्षस्य लक्ष्यस्येदं कल्पनापोढत्वादि लक्षणमिति चेत् । अत्र पर्यनुयुङ्ज्महे महोपाध्यायम् । तत्रापि हि वाक्यान्तरे कस्ते समाश्वासः । शक्यमेव ह्येवं वक्तुं यथा परिव्राजकस्य शिखा लिङ्गमित्यत्र शिखया परिव्राजको लक्ष्य इत्यादिर्वाक्यान्तरार्थ एवोपप्लवते तथा प्रत्यक्षस्य कल्पनापोढत्वादि लक्षणमित्यत्रापि कल्पनापोढत्वादिना प्रत्यक्षं लक्ष्यत इति कल्पनापोढत्वादिलक्षणस्य प्रत्यक्षं लक्ष्यमित्यादिः । नहि किमप्यस्ति तद्वाक्यं यस्य वाच्यं न वाक्यान्तरेणावतारयितुं शक्यत इत्यभिमतविपरीतव्यवस्थानवस्था च दुर्निवारा भवेदिति । एवं च तिमिराशुभ्रमणेत्यादिव्याख्यावाक्यानां व्यत्ययेनार्थं समर्थयमानो निवारणीयो विपश्चिदिति । यत्तु यत्तूच्यते कथमप्रसिद्धस्य लक्षणत्वमित्याद्याशङ्क्य सेयमन्याऽप्रसिद्धिर्या लक्षणत्वे-

---

१ 'व्युत्पत्तिसमयस्तदा' इत्यधिकं प. पुस्तके । २ 'परिव्राजको लक्ष्यत इति शिखायाः' इत्यधिकं प. पुस्तके । ' ३ लक्षणश्चे ' इति प. पुस्तके पाठः ।

त्यादिनोक्तमेवैतादित्यन्तेन समाहितम् । तत्सर्वं लक्ष्यविधिसिद्धयेऽपि शक्यानुसन्धानम् । तथाहि सेयमन्याऽप्रसिद्धिर्या लक्ष्यत्वविधानावसरे उपयुज्यतेऽन्या च सा प्रसिद्धिर्या लक्षणावबोधनाय । शब्दार्थमात्रेण हि ज्ञातं सल्लक्ष्यत्वेन विधातुं शक्यम् । अत्यन्ताप्रसिद्धस्य लक्ष्यत्वेन विधातुमशक्यत्वात् । ननु तथा प्रसिद्धथा विधेयतासामर्थ्यायातं तत्पदपरामर्शनीयत्वमस्य निवर्त्तते । तस्य तु या लक्षणावबोधनाय व्यापारणा सा अन्या प्रसिद्धिर्यासौ लक्षणवाक्याल्लक्ष्यत्वेनावगतौ सत्यां प्रमाणं चैतदित्येवं तदनुसन्धानरूपा तत्रास्यानूद्यमानता । स चास्य व्यवहारकाल इति । यदपि प्रत्यपादि यः कुण्डली स देवदत्त इत्यादि । तदपि तत्रापि हि वाक्यान्तर इत्यादिना निवेदितोत्तरप्रायम् ।

लक्षणं द्विविधमात्मभूतमनात्मभूतं चेति व्यवस्थापनम् ।

अथान्यच्चिन्त्यते द्विविधं लक्षणमात्मभूतं अनात्मभूतं च । तत्रात्मभूतं लक्षणमाशुशुक्षणेरौष्ण्यवत् । अनात्मभूतं तु देवदत्तस्य दण्डवत् । तत्रेह प्रमाणस्य स्वपरव्यवसायिज्ञानमात्मभूतं लक्षणं लक्षणीयम् ।

लक्ष्यलक्षणयोस्तादात्म्यमिति मतखण्डनम् ।

अत्राह कश्चित् । नन्वेवं लक्ष्यलक्षणयोस्तादात्म्यादप्रसिद्धे लक्षणे लक्ष्यस्याप्यप्रसिद्धत्वात् कस्य लक्षणं लक्षणीयम् । प्रसिद्धे वा लक्ष्ये लक्षणस्यापि प्रसिद्धत्वान्निष्प्रयोजनं तदभिधानमिति । तदचतुरस्रम्, लक्ष्यलक्षणयोः सर्वथा तादात्म्यस्यासिद्धत्वात् कथंचित्तादात्म्यस्य तु प्रसिद्धयप्रसिद्धी प्रत्यनैकान्तिकत्वात् । क्षयोपशमभावाभावयोरेव तत्र कारणत्वात् । अथाभिदधीथाः सर्वथा भिन्नं लक्ष्याल्लक्षणं दण्डवदिति । नैतदवितथं अनवस्थापत्तिदुःस्थत्वात् । तथा हि सर्वथा पृथग्भूताद्विवक्षितलक्षणाल्लक्ष्यं कथं सिद्धयेत् । लक्षणान्तराच्चेत् तदपि यद्यमुष्मादेकान्तेन पृथग्भूतं तदा लक्षणान्तरादेव लक्ष्यं सिध्येदिति अनवस्था । सुदूरमपि गत्वा यद्यपृथग्भूताल्लक्षणात् कुतश्चिल्लक्ष्यसिद्धिरभिधीयते तर्हि न सर्वं लक्षणं लक्ष्याद्भिन्नमेव । तथैकान्तपृथग्भूतं लक्षणं

प्रसिद्धमप्रसिद्धं वा सल्लक्ष्यस्य प्रज्ञापकं भवेत् । प्रसिद्धं चेत् तदा कुतस्तत्प्रसिद्धिः । स्वकीयलक्षणादिति चेत् तर्हि तस्यापि प्रसिद्धिः स्वकीयलक्षणान्तरादित्यनास्था । अथ गत्वापि सुदूरं स्वरूपत एव कस्यापि लक्षणस्य प्रसिद्धिः स्वीक्रियते तर्हि न सकलं भिन्नमेव लक्षणस्य स्वात्मभूतलक्षणत्वात् । अथाप्रसिद्धं लक्षणमास्थीयते नन्वेकान्तेन कथंचिद्वा । न तावदेकान्तेन अतिप्रसङ्गपराहतत्वात् । अथ कथंचिदप्रसिद्धं लक्षणमुच्यते शब्दार्थमात्रेण हि प्रसिद्धं लक्षणं विवक्षितलक्ष्यास्पदत्वेन त्वप्रसिद्धमिति । सत्यमेवमेतत् । किन्तु लक्ष्यादेकान्तेन लक्षणस्य पार्थक्येऽतिप्रसङ्गो दुष्परिहर एव । विन्ध्यमहीध्रर-न्ध्रवर्त्तिदूर्वापल्लवलतानामपि तथाभूतानां विवक्षितलक्ष्यं प्रति लक्षणत्वप्राप्तेः । अस्तु तर्ह्यभिन्नमेव लक्ष्यालक्षणमाशुशुक्षणेरौष्ण्यवदिति चेत् । अयमपि न प्रमाणपरतन्त्रस्योल्लापः । नियमहेत्वभावेन विपर्ययस्यापि प्रसक्तेः । तादात्म्याविशेषेऽपि पावकोष्णयोरौष्ण्यमेव पावकस्य लक्षणं न पुनरग्नेरौष्ण्यस्येति हि कुतस्त्या नियतिः । अप्रसिद्धत्वादौष्ण्यं कृष्णवर्त्मनो लक्षणमिति चेत् तर्किं कृष्णवर्त्मापि महात्मा नोऽप्रसिद्धः । एवमिति चेत् । अहह महासाहसिकत्वं ते । यच्चाक्षुषप्रत्यक्षोपलक्ष्यमप्याशुशुक्षणिमप्रसिद्धं ब्रवीषि । प्रसिद्ध एवायं धार्म्मिमात्ररूप इति चेत् कथं तर्हि दहनौष्ण्ययोस्तादात्म्यं समर्थयिष्यते । प्रसिद्धाप्रसिद्धयोः सर्वथा तादात्म्यविरोधात् । ततः कथंचिद्भिन्नयोरभिन्नयोश्च लक्ष्यलक्षणभावप्रतीतिसद्भावात् सर्वथा विरोधाभावात् । अन्यथा लक्ष्यलक्षणभावशून्यतापत्तेः ।

संवृत्त्या लक्ष्यलक्षणभाव इति चेत् केयं संवृत्तिर्नाम । उपचार इति चेत् अस्ति तर्हि मुख्यः कचिल्लक्ष्यलक्षणभावः । कचिन्मुख्यस्यासत्तायामुपचारस्याप्रवृत्तेः । विचारतोऽनुपपद्यमाना विकल्पबुद्धिः संवृत्तिरिति चेत् कथं तया लक्ष्यलक्षणभावः । तस्य तत्रावभासनादिति चेत् ।

संवृत्त्या लक्ष्यलक्षणभाव इति मतस्य खण्डनम् । तथा विकल्पस्य सद्विषयकत्वव्यवस्थापनम् ।

सिद्धस्तर्हि बौद्धो लक्ष्यलक्षणभावस्तद्वदबौद्धोऽपि किं न सिध्येत् । विकल्पाद्बहिर्भूतस्य तस्यासम्भवादिति चेत् । न तस्यासम्भवे तादात्म्यविकल्पविषयत्वायोगात् । न च सकलो विकल्पविषयोऽसम्भवन्नेव । सम्भवतोऽपि विकल्पविषयत्वोपपत्तेः प्रत्यक्षविषयवत् । सर्वो विकल्पोऽसम्भवद्विषयो विकल्पत्वात् मनोराज्यादिविकल्पवदिति चेत् । सर्वं प्रत्यक्षमसम्भवद्विषयं प्रत्यक्षत्वात् केशोन्दुकप्रत्यक्षवदिति किं न स्यात् । प्रत्यक्षाभासोऽसम्भवद्विषयो दृष्टो न प्रत्यक्षमिति चेत् । तर्हि विकल्पाभासोऽसम्भवद्विषयो न विकल्प इति समानः परिहारः । कः पुनः सत्यो विकल्पः प्रत्यक्षं किं सत्यमिति समः पर्यनुयोगः । यतः प्रवर्त्तमानोऽर्थक्रियायां न विसंवाद्यते तत्सम्यक्प्रत्यक्षमिति चेत् । यतो विकल्पादर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यते स सत्य इति किं नानुमन्यसे । किं पुनर्विकल्पस्यार्थपरिच्छेदकत्वं प्रत्यक्षस्य किमिति वाच्यम् । अविचलितस्पष्टार्थावभासित्वमिति चेत् । कस्यचिद् विकल्पस्यापि तदेव कस्यचित्तु बाधकविधुरास्पष्टार्थावभासित्वमपीति मन्यामहे । अस्पष्टोऽर्थ एव न भवतीति चेत् कुतस्तस्यानर्थत्वम् । पुनरस्पष्टतयाऽनवभासनादिति चेत् स्पष्टोऽप्येवमनर्थः स्यात् पुनः स्पष्टतयाऽनवभासनात् यथैव हि दूरात्पादपादिसामान्यमस्पष्टतया प्रतिभाति पुनर्निकटदेशवर्त्तितायां तदेवास्पष्टं न प्रतिभाति तद्विशेषस्य तदा प्रतिभासनात् तथैव सन्निहितस्य विशिष्टं पादपादिरूपं स्पष्टतया प्रतिभातं पुनर्दूरतरदेशवर्त्तितायां न तदेव स्पष्टं प्रतिभासते । यदि पुनः सन्निहितज्ञानग्राह्यमेव तद्रूपं विशिष्टमिति मतिस्तदा दविष्ठादिज्ञानग्राह्यमेव तद्रूपं सामान्यमिति किं न मतम् । यथा च विशिष्टं पादपादिरूपं स्वार्थक्रियां निर्वर्तयति तथा पादपादिसामान्यरूपमपि प्रतिपत्तुः परितोषकरणं हि यद्यर्थक्रिया तदा तत्सामान्यस्यापि सा समस्त्येव कस्यचित्तावता परितोषात् । अथ स्वविषयज्ञानजनकत्वमर्थक्रिया तदपि सामान्य-

---

१ केशोन्दुकं केशग्रन्थिः ।

स्यास्त्येव । सजातीयार्थकरणमर्थक्रियेति चेत् सापि सदृशपरिणाम-स्यास्ति विसदृशपरिणामस्येव । सदृशेतरपरिणामात्मकाद्धि बालपादपात् सदृशेतरपरिणामात्मक एव तरुणपादपः प्रादुर्भवन्नुपलभ्यते । तत्र यथा विसदृशपरिणामाद्विशेषाद्विसदृशपरिणामस्तथा सदृशपरिणामात् सामा-न्यात् सदृशपरिणाम इति । सजातीयार्थकरणमर्थक्रिया सिद्धा सामा- ५
न्यस्य विशेषतश्चैतद्विषयपरिच्छेदे निश्चेप्यते । ततो वस्त्वेवं सामान्यं विशेषवत् तत्र च प्रवर्त्तमानो विकल्पो वस्तुनिर्भासः संवादकत्वादनुप-प्लव एव प्रत्यक्षवत् । तादृशाच्च विकल्पाल्लक्ष्यलक्षणभावो व्यवस्था-प्यमानो न बुद्ध्यारूढ एव । यतः सांवृतः स्यादिति सिद्धः पारमा-र्थिको लक्ष्यलक्षणभाव इति । १०

इदानीमक्षरार्थः । तत्र प्रमाणमिति पूर्ववन्निर्वचनीयम् । स्वमात्मा ज्ञानस्यैव स्वरूपमित्यर्थः । परः स्वस्मादन्यः
स्वपरव्यवसायिज्ञानमिति लक्षणे पदकृत्यप्रदर्शनम् ।
अर्थ इति यावत् । तौ व्यवस्यति यथावस्थि-तत्वेन निश्चिनोतीत्येवं शीलं यत्तत्स्वपरव्यवसायि।
ज्ञायते बुद्ध्यते वस्त्वनेनेति ज्ञानं प्राधान्येन विशेषग्राहको बोधः । १५
इह च व्यवच्छेद्यापेक्षया लक्षणविशेषणप्रवृत्तिरिति ज्ञानमिति प्रमाणस्य विशेषणमज्ञानस्वभावस्य व्यवहारानंगस्य सन्मात्रगोचरस्य स्वसमय-प्रसिद्धस्य दर्शनस्य सन्निकर्षकारकसाकल्यादेश्च नैयायिकादिपरिकल्पि-तस्य प्रामाण्यप्रतिषेधार्थमुपन्यस्तम् । ज्ञानस्यापि स्वसंवेदनेन्द्रियजमानस-योगिप्रत्यक्षरूपतया चतुर्विकल्पस्य निर्विकल्पतया प्रामाण्यं यत्तथा- २०
गतैः पर्यकल्पि तन्निरासार्थं सन्देहविपर्ययानध्यवसायानां प्रमाणतापरि-हारार्थं च व्यवसायिपदोपादानम् । पारमार्थिकबाह्यार्थापलापिनां विज्ञानाद्वैतवादिनां मिथ्याभिनिवेशव्युदासार्थं परपदप्रणयनम् । नित्यपरोक्षबुद्धिवादिनां मीमांसकानामेकार्थसमवायिज्ञानान्तरप्रत्यक्ष-

१ 'वस्तुवत् इति प. भ. पुस्तकयोः पाठः।

ज्ञानवादिनां **नैयायिकवैशेषिकाणां** प्रधानविवर्त्तत्वेनाचेतनज्ञानवादिनां **कापिलानां** च मतमपाकर्तुं स्वशब्दसंशब्दनम् ।

संपूर्ण प्रमाणलक्षणवाक्यं पुनः परपरिकल्पितस्यार्थोपलब्धिहेतुत्वस्या-
सम्पूर्णप्रमाणलक्षणे पदकृत्यप्रदर्शनम् । विसंवादकत्वस्यानधिगतार्थाधिगन्तृत्वादेश्च प्रमा-
५ णलक्षणताप्रतिक्षेपार्थम् । तथाहि ।

आचक्षते लक्षणमक्षपादपक्षे सदाऽक्षुण्णनिबद्धकक्षाः ।
सर्वप्रमाणानुगुणं यदत्र क्षणं तदेतर्हि विचारयामः ॥ १९ ॥

'अर्थोपलब्धिहेतुः प्रमाणम्' इति तत्पक्षः । स न परीक्षां क्षमते ।
प्रमातृप्रमेययोरपि द्रोणकुसुमरसनिषेकसौवीराञ्जनशरीराहारादेरपि चार्थोपलब्धिहेतुत्वेन प्रमा-
प्रमाणलक्षणे न्यायमतस्य खण्डनम् । १० णताप्रसंगात् ।

अत्राह **वाचस्पतिः**, सर्वः कर्त्ता करणगोचरव्यापारो न तु साक्षात्फले व्याप्रियते । करणं च द्वेधा सिद्धमसिद्धं च । तत्र सिद्धं परश्वधादि दारुद्वैधी-
वाचस्पतिमतखण्डनम् । १५ भावायोद्यम्योद्यम्य दारुणि निपातयन् दारु च्छिनत्तीत्युच्यते । न तु साक्षात्कर्तृव्यापारगोचरो दारुद्वैधीभावः । किन्तु स्पर्शवद्वेगवतः करणीभूतस्य परशोः संयोगोद्यमननिपातलक्षणस्तु कर्तृव्यापारः परशुगोचर एव । एवं स्वर्गकामोऽपि कर्त्ता न साक्षात् स्वर्गे व्याप्रियते । किन्तु तत्करणं यागमसिद्धं साधयति । स्वर्गस्तु यागव्यापारादेवापूर्वाभिधानाच्चेतनाश्रयोद्देशकालव्यवस्थाभेदासादितपरिणतिविशेषात् साक्षादुत्प- २० द्यते । तद्वदिहापि प्रमाता सिद्धमिन्द्रियाद्यसिद्धं वा तत्सन्निकर्षादि व्यापारयन्नुत्पादयन्वा करण एव चरितार्थः । करणं त्विन्द्रियादि तत्सन्निकर्षादि वा नान्यत्र चरितार्थमिति साक्षादुपलब्धावेव फले

---

१ उपजातिः । २ गौ. सू. पृ. ९४ पं. ४ 'उपलब्धिहेतुश्च प्रमाणम्' इति । ३ अत्र प्रमाणं सुश्रुतादिषु ।

व्याप्रियते । प्रमेयस्य तु प्रत्यक्षादन्यत्रोपलब्धिहेतुभाव एव तावन्नास्ति। केवलं प्रमाणविषयमात्रेणोपयुज्यते । यत्राप्यस्य हेतुभावः प्रत्यक्षेऽभिप्रेयते तत्रापीन्द्रियसंबन्धमात्रे उपयुज्यते प्रमेयम्। इन्द्रियमेव तु तत्सन्निकर्षादि वा साक्षात् प्रमाहेतुः । तत्सिद्धमेवं न प्रमाता साक्षात् प्रमाहेतुः कर्तृत्वाद्यो यः कर्त्ता स सर्वो न साक्षात्फलहेतुर्यथा ब्रश्चनयजमानादिस्तथा चायं तस्मात्तथा । तथा प्रत्यक्षं प्रमेयं न प्रमाहेतुः प्रमेयत्वाद्यत्प्रमेयं न तत्सर्वं प्रमाहेतुरनुमेयादिवत्तथा चैतत्तस्मात् तथेति । तदिदं प्रमातृप्रमेययोः प्रमाणे चरितार्थत्वं फले च प्रमाणस्य । तस्मात्तदेव फलहेतुः । प्रमातृप्रमेये तु फलोद्देशेन प्रवृत्त इति तद्व्यक्तथञ्चिदिति । अत्रोच्यते सकलस्याप्येतत् प्रयासस्येदमेव फलं यदिन्द्रियसन्निकर्षादिकमनन्तरमर्थप्रतिपत्तिनिमित्तं तदेव प्रमाणं न व्यवहिते प्रमातृप्रमेये इति अनुपपन्नं चैतत् । यतो हेतुशब्दमात्रोक्तावपि यः साक्षादुपलब्धौ हेतुरिन्द्रियादि स एव चेत् प्रमाणतयाभिप्रेतः सूक्ष्मदर्शिनोऽस्य तदा स्वपरव्यवसायिज्ञानमेव तथाभ्युपगन्तुमुचितम् । वस्तुपरिच्छित्तिरानन्तर्येण तत एव भावात् । यथा च ज्ञानरूपादपि प्रमाणाद्वस्तुपरिच्छित्तिः फलं कथञ्चिद्भिद्यते तथा फलपरिच्छेदे निश्चेप्यते । भवतश्चात्र श्लोकौ ।

अर्थोपलब्धेर्यदि साधनस्य प्रमाणतां वक्षि विचक्षण त्वम् ।
तदा प्रमात्रादिषु तत्प्रसक्त्या जज्ञे सुभिक्षं भवतः प्रमाणैः ॥ २० ॥

अथापि यत्सन्निहितं तदेव प्रमाणमाख्यासि हृषीकमुख्यम् ।
त्यक्त्वा तदानीं स्वमताभिमानं ज्ञानं प्रमाणं वद निर्विवादम् ॥ २१ ॥

भिक्षोर्यो लक्षणं यत्समाचक्षतेऽध्यक्षमुख्यप्रमाणस्य साधारणम् ।
तद्विसंवादवैकल्यरूपं स्फुटं वर्ण्यमानं सकर्णैः समाकर्ण्यताम् ॥ २२ ॥

---

१ भुजङ्गप्रयातम् ।

प्रमाणमविसंवादिविज्ञान-मिति बौद्धमतस्य प्रस्थाप-नपूर्वकं खण्डनम्।

तथाहि ते प्राहुः—प्रमाणमविसंवादिविज्ञानमिति। अविसंवादकत्वं चार्थप्रापकत्वमुच्यते। तच्च प्रत्यक्षानुमानयोरुभयोरप्यस्तीति सामान्यलक्षणम्। तत्र प्रत्यक्षस्य स्वप्रदर्शितस्वलक्षणक्षणस्य क्षणिकत्वेन प्राप्त्यसम्भवेऽपि तत्सन्तानप्राप्तेः सम्भवात् सन्तानाध्यवसायजननमेव प्रापकत्वम्। द्विविधो हि प्रत्यक्षस्य विषयो ग्राह्योऽध्यवसेयश्च। तत्र ग्राह्यक्षण एकः सकलसजातीयविजातीयव्यावृत्तः। स्वलक्षणाख्यस्य तत्र परिस्फुरणात्। इदमेव ग्राह्यत्वमर्थस्य यत् स्वाकारज्ञानजनकत्वम्। इदमेव च ग्राहकत्वं ज्ञानस्य यदर्थाकारतयात्मलाभः। अध्यवसेयः पुनः सन्तानः। बहवश्च स्वलक्षणलक्षणा उपादानोपादेयभावमापन्नाः संतानः। तस्य चाध्यवसेयत्वमगृहीतस्यापि प्रवृत्तिविषयत्वम्। अध्यवसेयार्थसन्तानापेक्षयैव च प्रत्यक्षस्य प्रामाण्यव्यवस्था स्वलक्षणस्य प्रापयितुमशक्यत्वात्। सन्तानश्चाध्यवसीयतेऽपहर्त्तुमशक्यत्वात्। इति सन्तानाध्यवसायापेक्षं प्रत्यक्षे सर्वत्र प्रामाण्यव्यवस्थापनं न ग्रहणापेक्षम्। तस्मात् सन्तानाध्यवसाये सत्यविसंवादकत्वेन प्रत्यक्षस्य प्रामाण्यम्। ननु निर्विकल्पकत्वात् प्रत्यक्षस्य कथं तेन सन्तानाध्यवसायः सम्भवति। उच्यते। प्रत्यक्षजन्यविकल्पेन सन्तानस्याध्यवसितत्वात् प्रत्यक्षेणाध्यवसितः स इत्यभिधीयते। अनुमानस्य पुनरपारमार्थिकसामान्यविषयतया भ्रान्तत्वेऽपि प्रणालिकया मूलवस्तुलक्षणप्रभवत्वान्मणिप्रभायां मणिबुद्धिरिव वस्तुप्राप्त्या प्रापकत्वम्। यतस्तस्यापि ग्राह्याध्यवसेयतया विषयो द्विविधः। तत्राध्यवसेयं स्वलक्षणम्। समुत्पन्नेऽनुमानेऽध्यवसायादर्थक्रियाकारिणी स्वलक्षण एव प्रमातुः प्रवृत्त्युपलब्धेः। ग्राह्यस्तु विषयोऽस्य सामान्यमेव। तत्पुनर्बहिस्तादात्म्येनाध्यवसीयमानो बुद्ध्याकारो वा। अलीकबाह्यं वाऽन्तर्बहीरूपम्। परमार्थतस्तु न कश्चिदनुमानस्य विषयः। तथाहि न स्वलक्षणं तत्र तस्यापरिस्फुरणात्। न बुद्ध्याकारः बहिस्तादात्म्येन तस्यासम्भवात्। नाप्यलीकबाह्यम्। तस्य सर्वथाप्यसम्भवेनार्थक्रियासामर्थ्यशून्यत्वतः करिकेसरकलापकल्पत्वादिति निर्विषयमनुमानम्।

स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तत्वात् भ्रान्तं च । अनुमानं हि स्वालम्बनि प्रतिभातेऽनर्थे सामान्यस्वरूपेऽर्थत्वं स्वलक्षणरूपतामारोप्य प्रवर्त्तत इति भ्रान्तम् । तथापि स्वभावकार्यलिङ्गदर्शनजन्यतया पारम्पर्येण स्वभाविनि कारणे च प्रतिबद्धत्वात् तत्प्रापकतयार्थाविसंवादकत्वेन प्रमाणम् । तदुक्तम् **'अतस्मिंस्तद्ग्रहो भ्रान्तिरपि सम्बन्धतः प्रमा'** इति । अनुमानविकल्पान्तराणां नियतार्थप्रतिबन्धाभावादप्रापकत्वेनाविसंवादकत्वानुपपत्तेरप्रामाण्यम् । यथाध्यवसितप्रापकं च प्रमाणम् । अतः पीतशङ्खादिग्राहिज्ञानानां शङ्खमात्रादिप्राप्तौ सत्यामपि न प्रामाण्यं यथाध्यवसितस्याप्राप्तेः । अध्यवसितो हि पीतः शङ्खः प्राप्यते । नतु श्वेतः । तस्माद्यथाध्यवसितार्थप्रापकमविसंवादिज्ञानं प्रमाणमिति स्थितम् ।

एतदध्यवसिताखिलवस्तुप्रापकत्वमविसंवदनं यत् ।
व्याहतं सकलमानसमानं लक्ष्म तन्न घटनामुपयाति ॥ २३ ॥

अध्यवसायस्य **सुगतशासने** वस्तुविषयत्वाभावात्। अवस्तुनश्च प्राप्तुमशक्यत्वात् । तदुक्तम् । **' यथाध्यवसायमतत्त्वात् यथा तत्त्वं चानध्यवसायात्'** इति । मूलभूतवस्तुप्राप्तिः **पुनरन्धकंटकीयन्यायमनुसरति** । नहि तदन्यतरेणापि प्रमाणेन दृष्टं यद्भूत्वा प्राप्यते । सन्तानप्राप्त्या तत्प्राप्तिरित्यपि न पेशलम् । क्षणक्षयिक्षणपरम्परातः पृथग्भूतस्य पारमार्थिकस्य सन्तानस्य **तथागतैरस्वीकरणात्** । अथापारमार्थिकेऽपि सन्ताने सति संवृतिमाहात्म्यात् प्रमाणलक्षणमिदं निर्वक्ष्यति । यथोक्तम् । **' सांव्यवहारिकस्य चैतत् प्रमाणस्य लक्षणं । वस्तुतस्त्वनाद्यविद्यावासनारोपितग्राह्यग्राहकादिभेदप्रपञ्चं ज्ञानमात्रमेवेदमिति किं प्राप्यते किं वा प्रापयति'** इति । तदिदं स्वसमयोद्घोषणमात्रं न कञ्चन प्राकरणिकमर्थं समर्थयते । अविचारितरम्या हि प्रतीतिः संवृतिरिति सम्मतं **सौगतानाम्** । या च न विचारगोचरे विचरति ।

---

१ ' न ' इति प. पुस्तके पाठः । २ स्वागता । ३ अन्धस्य यथा कण्टकोपरि पादो यदृच्छया पतति तद्वदित्यर्थः ।

तथापि प्रमाणलक्षणनिर्वहणमिति महत्कैतवम् । अविद्यावासनानिर्मितश्च न ग्राह्यग्राहकादिव्यवहारः । किन्तु तात्त्विक एवेति ज्ञानाद्वैतविघटनप्रघट्टके प्रकटयिष्यते । यदि चापरमुत्तरप्रकारमनवधारयद्भिः सांवृत एव सन्तानः परिकल्प्यते । हन्त तर्हि नैयायिकादिसम्मता जात्यवयविसमवायप्रभृतयोऽपि संवृतिनिर्मितमूर्त्तयः किमिति न परिकल्प्यन्ते । वृत्तिविकल्पादिबाधकविधुरीकृतत्वादिति यदि मतं तर्हि भेदादिविकल्पैः सन्तानस्य प्रतिहन्यमानत्वात् तत्रापि तुल्यः पन्थाः ।

एवं च सति ।

विसंवादापेतं यदिह किमपि ज्ञानमखिलम् ।
प्रमाणं तद्बौद्धैरभिहितमिदं तु प्रतिहतम् ॥
अविज्ञातज्ञानं त्वभिदधति भट्टस्य तनयाः ।
प्रमाणं तत्सम्प्रत्यवतरतु दूष्यत्वपदवीम् ॥ २४ ॥

तथा हि अनधिगतार्थाधिगन्तृत्वं प्रमाणस्य किमभिधीयते ।

अनधिगतार्थाधिगन्तृत्वं प्रमाणस्येति भाट्टमतस्य खण्डनम् ।

प्रमाणान्तरेणानधिगतस्यार्थस्य यदधिगन्तृत्वं तदिति चेत् ननु प्रमाणान्तरं परकीयं स्वकीयं वा । यदि परकीयम् तदा साधयिष्यमाणसर्वज्ञज्ञानस्य समस्तवस्तुविस्तारगोचरतया तदधिगतार्थाधिगन्तृत्वात् निखिललौकिकज्ञानानामप्रामाण्यं प्रसज्येत । देवदत्तज्ञानस्यापि यज्ञदत्तादिप्रमाणप्रतिपन्नार्थग्राहित्वादप्रमाणत्वं स्यात् । अथ स्वकीयं तदपि न साम्प्रतम् । प्रमाणस्य गृहीततदितरगोचरप्रवृत्तस्य प्रामाण्यं प्रति विशेषानुपलक्षणत्वात् । अथ गृहीते गोचरे प्रवर्त्तमानं प्रमाणं किं कुर्वीत । नन्वगृहीतेऽपि किं कुर्वीत । अज्ञाननिवर्त्तनमिति चेत् गृहीतेऽपि तदेव कुरुताम् । कृतस्य करणायोग इति चेत् मैवम् । अज्ञानविनिवर्त्तनान्तरकरणात् । पुनरज्ञाननिवर्त्तनस्य किं फलमिति चेत् । आयुष्मन्नज्ञानविनिवर्त्तनं स्वयमेव फलं न च फलस्यापि फलमन्वेषणीयम् । तदविरामप्रसक्तेः । न च प्रयोजना-

---

१ शिखरिणी ।

नुवर्त्ति प्रमाणं भवति । अविकला चेत् तस्य जनिका सामग्री तदा तदुत्पद्यत एव । कस्य चायं पर्यनुयोगस्त्वया विधीयते यदुत गृहीतेऽपि विषये प्रवर्तमानं प्रमाणं किं कुर्यादिति । न तावत् प्रमाणस्य । तंद्धि दैवोपनतां स्वजनिकां सामग्रीं समासाद्य समुत्पद्यमानं वराकं कथं पर्यनुयोगमुवमवतरेत् । नापि प्रमातुः तस्यापि च सति योग्ये गोचरेऽभिमुखीभूतेषु करणेषु ५
भूयोऽपि प्रादुर्भवन्त्येव संवेदनानीति सोऽपि तपस्वी किमित्थमुपलभ्यताम् ।

किंमिति पश्यसि वस्तु तदेव भो
यदिह पूर्वधिया कलितं किल ।
किमिति वस्तुनि सन्निहितेऽपि च
त्वमसि नैव निमीलितलोचनः ॥ २५ ॥ १०

अपि च

पुनः पुनः प्रमाणानां प्रवृत्तौ विषयेष्विह ।
सर्वथा नास्ति वैयर्थ्यं फलस्याप्युपलम्भनात् ॥ २६ ॥

तथाहि हालाहलजिह्मगादौ हेये मुहुर्वस्तुनि वीक्ष्यमाणे ॥
स कोऽपि तापः स्फुरति प्रकामं न गोचरं यो वचसामुपैति ॥२७॥ १५
निरीक्ष्यमाणे परमार्थतस्तु हेये मुहुर्मोहविकारमुख्ये ॥
विवेकसेकप्लुतमानसानामरोचकस्तीव्रतरोऽभ्युदेति ॥ २८ ॥
प्रेयस्विनीपार्वणशीतरोचिर्मयूरमाणिक्यमुखे त्वजस्रम् ॥
आदेयवस्तुन्यवलोक्यमाने सम्प्राप्यते प्रीतिरसः स कोऽपि ॥२९॥
तत्त्वतस्तु सुधियामभीप्सिते तीर्थनाथपदपङ्कजद्वये ॥ २०
याति दर्शनपथं मुहुर्मुहुः प्रीतिसम्पदमुपैति मानसम् ॥ ३० ॥
ततश्च तस्मिन् हृदयैकशूले कामं तथान्तःकरणानुकूले ॥
हानार्थमादानकृते च सद्यः सज्जायते प्राणभृतां प्रवृत्तिः ॥ ३१ ॥

---

१ ' तद्विदा ' इति प.भ. पुस्तकयोः पाठः । २ द्रुतविलम्बितम् ।

यदप्यदः प्रतिपाद्यते कुमारिलेन ' यत्रापिस्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः । नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥ १ ॥' इति तदपि न मनोरमम् । यतो नोत्तराणि प्रमाणानि जायमानानि सर्वात्मनाप्यपूर्वमेवार्थं परिच्छिन्दन्ति । अथापूर्वस्यापि तस्य तत्र परिच्छेदो विधत एव । तथा ह्यनुमानेन वह्निमात्रमन्वयायि प्रत्यक्षेण तु ज्वालाकलापशालित्वादिविशेषविशिष्टो वह्निर्निश्चीयत इति चेत् । एवं तर्हि यथानधिगतान् विशेषानिदं परिच्छिन्ददप्रमाणमेव तथाधिगतं वह्नित्वमपि परिच्छिन्ददप्रमाणमेव किन्न भवेत् । किंच यदि शतकोटिस्फटिकमालोक्य कतिपयकालकलाविलम्बादूर्ध्वं यथास्थितमेव यदा कलयति तदा तत्प्रत्यक्षस्य कुतः प्रामाण्यं स्यात् । अननुभूयमानस्यापि विशेषाकलनस्य तत्र कल्पने धारावाहिष्वपि तत् कल्पनास्तु । अथ तत्कालावस्थितत्वविशेषप्रतिभासः स्फुट एव तत्रास्ति । नन्वसौ धारावाहिष्वपि तथैवास्ति ततस्तान्यपि प्रमाणानि स्युः । अथ प्रमाणान्येव तान्यनधिगतेंऽशेऽधिगतांश एव प्रामाण्यप्रतिषेधादिति चेत् । तदचारु । गृहीतागृहीतांशयोः प्रवर्त्तमानस्य प्रमाणस्य प्रामाण्यं प्रति विशेषाभावात् । ननु यदि गृहीतेऽपि गोचरे प्रमाणं प्रवर्त्तते तर्हि तत्र तस्य प्रवृत्त्यविरामः प्रसज्येत । नहि तद्विरमणे काञ्चन सीमानं जानीमहे । अज्ञानविनिवर्त्तनाख्यस्वफलोत्पादस्वसीमा त्वतिक्रान्तैवानेन । अत्राभिधीयते । नयनादिकरणानां गोचरान्तरव्यापारतो वा प्रमातुः परिश्रमतो वा स्वसामग्रीपरिभ्रंशतो वा प्रमाणस्य विरतेः सम्भवान्नाविरतिप्रसक्तिः । न चानवस्थाप्येवंविधा मूलबाधाविधायिनी । न ह्युत्तरसमयसम्भविविज्ञानपरम्परासमुत्पादमन्तरेण प्राचीनविज्ञानसमुत्पत्तिर्बाध्यते । तस्मादविराम-

'यत्रापि स्यात्परिच्छेद' इति कुमारिलकारिकाया उद्भावनपूर्वकं निराकरणम्।

१ एकस्मिन्नेव घटे ' घटोऽयं घटोऽयम् । इत्येवमुत्पद्यमानमुत्तरोत्तरज्ञानं धारावाहिकज्ञानम् ।

प्रसङ्गापादनद्वारेणानवस्थाप्येषा परैः प्रकाश्यमाना न नः काञ्चन क्षतिमातनोति । तदाह

' मूलक्षतिकरीमाहुरनवस्थां हि दूषणम् ।
मूलसिद्धात्वरुद्धापि नानवस्था निवार्यते ॥ १ ॥'

किञ्च यद्यनुपलब्धार्थावबोधकमेव प्रमाणमङ्गीक्रियते, कथं तर्हि तपस्विनी प्रत्यभिज्ञा प्रामाण्यं स्वीकरिष्यति । पूर्वोपलब्धार्थपरिच्छेदकत्वस्यापि तस्यां प्रतीयमानत्वात् ।

अथाधिगतगन्तृत्वे प्रामाण्यं स्यात् स्मृतेरपि ।
यदि स्यात् किं तदा जातं क्षुण्णं जैनेन्द्रशासने ॥ ३२ ॥
परोक्षव्यक्तिरेषा हि प्रमाणं स्मृतिरिप्यते ।
स्वपरव्यवसायित्वात् स्याद्वादन्यायवेदिभिः ॥ ३३ ॥
परिच्छेदे तृतीये च सर्वमेतद् भणिष्यते ।
तस्मादबुद्धबोद्धृत्वे मुच्यतामयमाग्रहः ॥ ३४ ॥

न च प्रकृतं प्रमाणलक्षणमव्यापकमिति मन्तव्यम् । सर्वासामपि प्रत्यक्षपरोक्षप्रमाणव्यक्तीनां स्वपरव्यवसायिज्ञानत्वेन व्याप्तानामुपलभ्यमानत्वात् । ननु सर्वज्ञानानां स्वरूपसंवेदनं प्रमाणं प्रति परव्यवसायासम्भवेनैतल्लक्षणावृत्तेरव्यापकतेति चेत् नैवम् । तत्र स्वं चासौ ग्राह्यत्वसाधर्म्येण परश्च स्वपरस्तं व्यवस्यतीत्येवं शीलं यत्तत्तथेत्येवं लक्षणयोजनात्। अतिव्यापकं तद्धविष्यतीत्यपि न परिभावनीयम् । अप्राणभूतेषु सन्देहादिषु सर्वथाप्येतदसम्भवस्य प्रदर्शितत्वात् । नाप्यसम्भवदोषकलुषितमेतल्लक्षणम् । तत्सम्भवसाधकस्य प्रमाणत्वाख्यस्य हेतोः सद्भावात् । तथाहि प्रमाणं स्वपरव्यवसायिज्ञानं प्रमाणत्वात् । यत्पुनः स्वपरव्यवसायिज्ञानं न भवति न तत् प्रमाणं यथा संशयादि घटादि च प्रमाणं च विवादापन्नं ततः स्वपरव्यवसायिज्ञानम् । न च

'स्वपरव्यवसायिज्ञानं प्रमाणमिति सिद्धान्तलक्षणेऽतिव्याप्त्यादिदोषपरिहारः।

प्रमाणत्वमसिद्धम् । प्रमाणसामान्ये सर्वप्रावादुकानां विवादाभावात् । अस्यानभ्युपगमे तु स्वाभिमतानभिमतसाधनदूषणयोरनुपपत्तिः । ननु यदेव प्रमाणं धर्मित्वेनात्र निरदेशि कथं तस्यैव हेतुत्वमुपपन्नमिति चेत् । ननु किमस्य हेतुत्वानुपपत्तौ निमित्तम् । किं धर्मित्वहेतुत्वयोर्विरोधः । किं वा प्रतिज्ञार्थैकदेशत्वम् । यद्वाऽनन्वयत्वम् । तत्राद्यपक्षेऽयमभिप्रायः । धर्माणामधिकरणं धर्म्मी तदधिकरणस्तु धर्म्मः । ततो यद्यत्र प्रमाणं धर्मि कथं हेतुः स चेत् कथं धर्मि हेतोर्धर्मत्वाद्धर्मधर्मिणोश्चैक्यानुपपत्तेः । तदयुक्तम् । विशेषं धर्म्मिणं विधाय सामान्यं हेतुमभिदधतां दोषासम्भवात् । प्रमाणं हि प्रत्यक्षपरोक्षव्यक्तिलक्षणं धर्म्मि । प्रमाणत्वसामान्यं हेतुः । ततो नात्र सर्वथैक्यम् । कथञ्चिदैक्यं तु भवदपि न धर्मधर्मिभावं विरुणद्धि । प्रत्युत तत्प्रयोजकमेव । तदन्तरेण धर्म्मधर्म्मिभावेऽतिप्रसङ्गात् । द्वितीयपक्षेऽपि साध्यधर्मधर्मिसमुदायस्य प्रतिज्ञार्थस्यैकदेशोऽत्र धर्मी हेतुतयोपात्तोऽस्ति । नच तथापि किंचिद् दूषणम् । अन्यथानुपपत्तिश्चेन्निश्चिक्ये तदा प्रतिज्ञार्थैकदेशोऽन्यो वा सर्वो गमक एव । ननु प्रतिज्ञार्थैकदेशोऽपि यदि गमकः स्यात्तदाऽनित्यः शब्दोऽनित्यत्वादिति अयमपि गमकतां कलयेत् । तदप्यत्याकुलम् । न खलु प्रतिज्ञार्थैकदेशत्वं गमकत्वे कारणमभिदध्महे येनानित्यत्वादेरपि तत्प्रसज्येत । किन्त्वगमकत्वं गमकत्वं वा प्रति तदप्रयोजकमिति ब्रूमः । न हि धूमद्रव्यं धूमध्वजं प्रति गमकमिति गगनाङ्गणोत्संगसङ्गिसमुद्धुररजोराजिरपि द्रव्यत्वसद्भावाद्धूमिका भवति । तद्वद्वा धूमद्रव्यमप्यगमकम् । तदिहान्यथानुपपत्तिर्विषेणीया । सा त्वनित्यत्वे नास्ति । तस्य शब्दे प्रतिवादिनः स्वरूपासिद्धत्वादिति तदेवागमकम् । प्रमाणत्वे पुनरसौ विद्यत इति तद्गमकमेव । तृतीयकल्पेऽपि किं बहिर्व्याप्तिरन्तर्व्याप्तिरुभयी वा तत्र नास्तीत्यनन्वयत्वं स्यात् । नाद्यः पक्षः । सर्वं क्षणिकं सत्त्वादित्यादेरप्यनन्वयत्वप्रसक्तेः । अथास्य दृष्टान्तेऽनन्वयस्यापि साध्यधर्मिणि सर्वत्रान्वयसिद्धेर्विपक्षे बाधकप्रमाणसद्भावाच्च निर्दोषतानुमन्यते । न तर्हि

बहिर्व्याप्तेरभावादनन्वयत्वम् । अन्तर्व्याप्तिस्तु सत्त्वादेरिव प्रमाणत्वस्यापि । साध्यधर्मिणि सर्वत्राऽन्वयसिद्धेः विपक्षे बाधकसद्भावाच्च । एतेन तृतीयपक्षोऽपि प्रतिक्षिप्तः । सर्वथा साधर्म्यविप्रयुक्तत्वात् कथमस्य गमकत्वमिति यौगैरपि न तर्कणीयम् । केवलव्यतिरेकिणोऽपि हेतो- रविनाभावनियमनिर्णयेन साध्यसाधनसामर्थ्यसद्भावात् । सात्मकं ५ जीवच्छरीरं प्राणादिमत्त्वात् । यत्तु सात्मकं न भवति तत्प्राणादिमदपि न भवति । यथा कलशः प्राणादिमच्च जीवच्छरीरं तस्मात्सात्मकमित्या- दिवत् । अनेन च विरुद्धत्वमनैकान्तिकत्वं च प्रतिक्षिप्तमवगन्तव्यम् । अन्यथानुपपत्तिस्वीकृते हेतौ तयोः सर्वथावकाशाभावात् । तस्मान्नि- रवद्योऽयं हेतुः प्रमाणस्य स्वपरव्यवसायिज्ञानत्वं साधयत्येव । तथा च १० नासम्भवदोषदुष्टमप्येतत् प्रमाणलक्षणमिति स्थितम् ।

यत्प्रावादुकलक्षणानि नयते सद्यः कथाशेषता-
मव्याप्तिप्रमुखेन न प्रतिहतं दोषत्रयेणापि यत् ॥
स्याद्वादामृतपानपूतवदनैरभ्यस्यमानं बुधैः ।
सिद्धं सम्प्रति मानलक्ष्म तदिदं श्रीमज्जिनैर्जल्पितम् ॥३५॥ २॥ १५

अथ प्रमाणलक्षणे ज्ञानमिति विशेषणस्य समर्थनार्थमुपपत्तिमाह—

अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं हि प्रमाणमतो ज्ञानमेवेदम् ॥ ३ ॥

अभिमतमुपादेयम् । अनभिमतं हेयम् । तत् द्वितयमपि द्विप्रकारं मुख्यं गौणं च । तत्र मुख्यमभिमतं सुखम् । तदपि द्विभेदमशाश्वतिकं २० शाश्वतिकं च । तत्राद्यं बाह्यद्रव्यसम्बन्धापेक्षं सद्वेद्यास्रव्यपुण्यकर्म्मविपाकात् प्रादुर्भूतः संसार्यात्मनः प्रसादपरिणामः । शाश्वतिकं तु समस्तकर्म्मक्षयतः समुद्भूतो मुक्तात्मनः परमानन्दपरिणामः । गौणं पुनरभिमताशाश्वतिक- शाश्वतिकसुखयोः साधनम् । तत्राशाश्वतिकसुखसाधनं गंधसारघन-

१ 'कर्मक्लेशानिश्लेषत' इति प. पुस्तके पाठः ।

सारहारहारिप्रियतमाप्रमुखम् । शाश्वातकसुखसाधनं तु सम्यग्दर्शनज्ञानचारित्रस्वरूपं रत्नत्रयम् । अनभिमतं तु मुख्यं दुःखम् । तत्पुनरसद्वेद्याभिधानपापकर्मविपाके सति विरोधिद्रव्याद्युपनिपातात्मनः पीडालक्षणः परिणामः। गौणं पुनरनभिमतं दुःखसाधनं विषविषधरमकरकान्ताराकूपारप्रभृतिकम् । पुरुषदशादेशकालविशेषाच्च भावानां सुखदुःखसाधनत्वमव्यवस्थितमवधार्यम् । तथाहि यदेव दृढकठिनकलेवरस्य प्रबलजाज्वल्यमानजाठरजातवेदसः कस्यचित्पुंसः सुरभिपरिमलोद्गारसुन्दररसरससहकारफलपटलमुपयुक्तं परमानन्दसम्पदे सम्पद्यते । तदेवानवरतविवर्धमानविविधव्याधिप्रबन्धविधुरस्याधिकतरमंदीभूतौदर्यज्वलनस्य परस्य प्रौढपीडापरम्पराप्रसूतये प्रभवतीति । यदवाचि । **पंचशतीप्रकरणप्रणयनप्रवीणैरत्र भवद्भिरुमास्वातिवाचकमुख्यैः** । ' **तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य । निश्चयतोऽस्यानिष्टं न विद्यते किञ्चिदिष्टं वा**' इति । एवंविधयोरभिमतानभिमतवस्तुनोर्यौ स्वीकारतिरस्कारौ प्राप्तिपरिहारौ तयोः क्षमं समर्थं प्रापकं परिहारकं चेत्यर्थः । अभिमतानभिमतयोरुपलक्षणत्वादभिमतानभिमतोभयाभावस्वभाव उपेक्षणीयोऽप्यत्रार्थो लक्षयितव्यः । रागगोचरः खल्वभिमतो द्वेषविषयोऽनभिमतो रागद्वेषद्वितयानालम्बनं तृणादिरुपेक्षणीयस्तस्य चोपेक्षकं प्रमाणं तदुपेक्षायां समर्थमित्यर्थः । तत्र प्रापकत्वं प्रमाणस्याभिमतार्थप्रदर्शकत्वमेव । यतो नार्थदेशं पुरुषं नयत् पुरुषदेशं वार्थमानयत् प्रापकं प्रमाणमपि त्वर्थं प्रदर्शयदिति । अभिमतवस्तुप्राप्तिर्हि न प्रमाणपरतन्त्रा । तस्याः पुरुषाभिलाषनिमित्तकप्रवृत्तिप्रभवत्वात् । न च प्रवृत्तेरभावे प्रमाणस्य वस्तुप्रदर्शकत्वरूपो व्यापार एव न सम्भवतीति विभावनीयम् । अनुभवविरोधात् । न खलु कुमुदबान्धवादौ प्रत्यक्षेण दृष्टेऽप्यप्रवर्त्तमानो लोकस्तस्याप्रदर्शकत्वमिति प्रतिपद्यते । ततः प्रवृत्त्यभावेऽपि प्रमाणस्य वस्तुप्रदर्शकत्वमुररीकर्त्तव्यम् । परिहारकत्वमपि प्रमाणस्याभिमतार्थ-

---

१ सम्यग्दर्शनज्ञानचारित्राणीति रत्नत्रयम् । २ प्रशमरतिप्रकरणे गाथा ४९ ।

प्रदर्शकत्वमेव । एवमुपेक्षकत्वमपि तस्योपेक्षणीयार्थप्रदर्शकत्वमेव द्रष्टव्यम् । हिशब्दो यस्मादर्थे । यस्मादभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं प्रमाणमत इदं ज्ञानमेव भवितुमर्हति नाज्ञानरूपं सन्निकर्षादि । प्रयोगश्चात्र । प्रमाणं ज्ञानमेव अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमत्वात् । यत्पुनर्न ज्ञानं तन्नाभिमतवस्तुस्वीकारतिरस्कारक्षमं यथा सम्प्रतिपन्नं स्तम्भादि अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं च प्रमाणं तस्माद् ज्ञानमेव । न चात्र साधनमसिद्धम् । अभिमतवस्तुस्वीकारार्थमनभिमतवस्तुतिरस्कारार्थं च प्रार्थयन्ते प्रेक्षापूर्वकारिणः प्रमाणं । नतु व्यसनपारवश्यादिति समस्तैरपि प्रमाणवादिभिरभिमतत्वात् ।

अभीप्सितानीप्सितयोः समर्थं प्रदर्शकत्वेन तु भोः प्रमाणम् ॥
सर्वंरभीष्टं घटते न चेदं ज्ञानात्मकत्वं प्रविहाय तस्य ॥ ३६ ॥३॥

उपपत्त्यन्तरमाह—

नवै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नं तस्यार्थान्तरस्येव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेरिति ॥ ४ ॥

नवै नैव । सन्निकर्ष इन्द्रियार्थसम्बन्धः स एव आदिर्यस्य कारकसाकल्यबुद्धिवृत्त्यादेस्तत्तथा तस्य । कथंभूतस्य । अज्ञानस्याचैतन्यस्वरूपस्य । प्रामाण्यमर्थयाथात्म्यव्यवस्थापित्वम् । उपपन्नं युक्तियुक्तम् । कुतः । तस्य सन्निकर्षादेः । अर्थान्तरस्येवेति अर्थः सन्निकर्षादिस्तस्मादन्यः प्रमेयो घटादिरर्थान्तरं तस्येव । स्वार्थव्यवसितौ स्वार्थयोः स्वपरयोर्व्यवसितिर्निश्चितिस्तस्यां कर्त्तव्यायामित्यर्थः । साधकतमत्वस्य करणत्वस्य । अनुपपत्तेः अघटनात् । अयमत्र समुदायार्थः । यथा सम्प्रतिपन्नस्य घटादेरर्थान्तरस्याज्ञानस्वभावस्य स्वार्थव्यवसितौ साधकतमत्वाभावात् प्रामाण्यं नोपपद्यते । तथा सन्निकर्षादेरपि प्रयोगः

---

१ ' चेह ' इति प. पुस्तकेः पाठः ।

पुनरेवं विरचनीयः । सन्निकर्षादिर्न प्रमाणव्यवहारभाक् स्वार्थव्यवसितावसाधकतमत्वात् । यत् स्वार्थव्यवसितावसाधकतमं न तत् प्रमाणव्यवहारभाग् यथोभयसम्प्रतिपन्नं घटादि । स्वार्थव्यवसितावसाधकतमश्च सन्निकर्षादिस्तस्मान्न प्रमाणव्यवहारभाक् ॥ ४ ॥

साम्प्रतमस्य हेतोरसिद्धतापरिहारार्थं सूत्रद्वयमाह—

न खल्वस्य स्वनिर्णीतौ करणत्वं स्तम्भादेरिवाचेतनत्वादिति ॥ ५ ॥

नाप्यर्थनिश्चितौ स्वनिश्चितावकरणस्य कुम्भादेरिव तत्राप्यकरणत्वादिति ॥ ६ ॥

अस्येति सन्निकर्षादेः । स्वनिर्णीताविति स्वव्यवसितौ । अचेतनत्वादिति अचिद्रूपत्वात् । नाप्यर्थनिश्चिताविति अस्य करणत्वमिति प्राक्तनेन सम्बन्धः । तत्रापीति अर्थनिश्चितावपि । शेषं तु व्यक्तम् । प्रयोगयुगलं पुनरित्थमिहोपन्यसनीयम् । सन्निकर्षादिः स्वनिर्णीतौ करणं न भवति अचेतनत्वात् य इत्थं स इत्थं यथा स्तम्भादिस्तथा चायं तस्मात्तथा । सन्निकर्षादिरर्थनिश्चितौ करणं न भवति स्वनिश्चितावकरणत्वात् य एवं स एवं यथा कुम्भादिः । यथोक्तसाधनसम्पन्नश्चायं तस्माद्यथोक्तसाध्य इति । एवं च ।

न सन्निकर्षप्रमुखं प्रमाणमज्ञानरूपं घटते कथंचित् ॥
न मुख्यतो यत्करणत्वमस्य वस्तुप्रमायां घटते कथंचित् ॥३७॥

अत्राहुर्नैयायिकाः यदभाषि सन्निकर्षादिर्न प्रमाणव्यवहारभागित्यादि तत्रादिशब्दसूचितकारकसाकल्यादीनां प्रमाणव्यवहारपराकरणे वयमपि सहायाः । सन्निकर्षस्य तु तत्पराकरणं न क्षमामहे । स्वव्यवसितावसाधकतमत्वसिद्धावप्यर्थव्यवसितावसाधकतमत्वस्य हेत्वेकदेशस्यासिद्धत्वात् ।

सन्निकर्षादिर्न प्रमाणव्यवहारभागिति नैयायिकमतपरीक्षणम् ।

यत्पुनरनुमानं तत्सिद्धावभ्यधायि । सन्निकर्षादिरर्थानिश्चितौ करणं न भवति स्वनिश्चितावकरणत्वादिति । तत्रार्थनिश्चितेस्तावदावाभ्यामविवादेन फलत्वं प्रतिपन्नम् । तच्च सन्निकर्षस्य करणतां समस्तप्रतिपत्तृसाक्षिकं समर्पयतीति कथमकितवः कश्चित्तस्य तदपलापं विदधीत । तथाहि न फलं किञ्चित्करणमन्तरेणोत्पद्यमानमीक्ष्यते । न चात्र प्रमाता प्रमेयं वा करणतया कल्पनीयम् । कर्तृकर्म्मतया तथोर्व्यवस्थितत्वात् । तस्माद्बुद्धेर्धीभावस्वभावे फले परश्वधादिवदर्थानिश्चितिरूपे फले सन्निकर्ष एव करणम् । तस्यैव तत्र घटमानत्वादित्यनुमानबाधितः पक्षः । हेतोश्चात्र प्रदीपेन व्यभिचारः । तस्य स्वनिश्चितावकरणस्याप्यर्थनिश्चितौ करणत्वात् । तथा चाहुर्लौकिकाः प्रदीपेन पन्थानं पश्याम इति । एवं च सन्निकर्षस्य करणत्वप्रतिषेधानुपपत्त्यार्थव्यवसितावसाधकतमत्वस्यासिद्धेर्लब्धावकाशमिदम् । सन्निकर्षः प्रमाणमर्थप्रमितौ साधकतमत्वाद्यत्तु नैवं तन्नैवं यथा सम्प्रतिपन्नम् । न च नार्थप्रमितौ साधकतमः सन्निकर्षः । तस्मात्तथा । ननु सन्निकर्षप्रसिद्धौ किं प्रमाणं यतो नाश्रयासिद्धता हेतोः स्यादिति चेत् । उच्यते । स्पर्शनादीन्द्रियेषु सन्निकर्षस्तावदविवादसिद्धस्तेषामसन्निकृष्टानुपलम्भकत्वात् । लोचन एव त्वावयोर्विप्रतिपत्तिः । सापि बाह्येन्द्रियत्वादिना साधनेन स्पर्शनादिवच्चक्षुषः प्राप्यकारित्वसिद्धेरा निरस्तावकाशैवेति सिद्धः सन्निकर्षः । स चैवं प्रमाणप्रतिपन्नस्वरूपः सन्निकर्षः षोढा । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, उक्तसम्बन्धसम्बद्धवस्तुविशेषणविशेष्यभावश्चेति । तत्र द्रव्यं चक्षुषा त्वगिन्द्रियेण च संयोगात् गृह्यते, द्रव्यसमवेतानि गुणकर्म्मसामान्यानि संयुक्तसमवायात् गृह्यते, गुणकर्मसमवेतानि सामान्यानि संयुक्तसमवेतसमवायादवबुद्ध्यन्ते, चक्षुषा हि संयुक्तं द्रव्यं तत्र समवेतानि गुणकर्म्माणि गुणकर्मसु च समवेतानि तत्सामान्यानीति समवायाच्छब्दः परिच्छिद्यते, विशिष्टादृष्टाधिष्ठितः कर्णशष्कुल्यवच्छिन्नो व्योमद्रव्यैकदेशो

हि श्रोत्रम्, तत्र च समवेतः शब्दः अम्बरगुणः शब्द इति सिद्धान्तात्। शब्दत्वसामान्यं समवेतसमवायादवसीयते श्रोत्राकाशसमवेते शब्दे तद्धि समवेतमिति । उक्तसम्बन्धसम्बद्धवस्तुविशेषणविशेष्यभावादभावः समवायश्च निश्चीयते । तद्यथा । संयुक्तविशेषणत्वादभावग्रहणमफलवर्ता शाखेति । चक्षुषा हि संयुक्ता शाखा तस्या विशेषणं फलाभावः । एवमघटं भूतलमित्यादीन्यप्युदाहरणानि द्रष्टव्यानि संयुक्तविशेष्यत्वादिह शाखायां फलाभाव इति । संयुक्तसमवेतविशेषणत्वात् पटगतः शुक्लगुणो रूपशून्य इति संयुक्तसमवेतविशेष्यत्वादिह शुक्लगुणे रूपाभाव इति । संयुक्तसमवेतसमवेतविशेषणत्वात् गुणगतं सामान्यं सामान्यान्तरशून्यमिति । संयुक्तसमवेतसमवेतविशेष्यत्वादिह गुणगतसामान्ये सामान्यान्तराभाव इति । समवेतविशेषणत्वात् गुणशून्योऽयं शब्द इति । समवेतविशेष्यत्वादिह शब्दे गुणाभाव इति । समवेतसमवेतविशेषणत्वाच्छब्दत्वादिसामान्यं सामान्यान्तरशून्यमिति । समवेतसमवेताविशेष्यत्वादिह शब्दत्वादिसामान्ये सामान्यान्तराभाव इति। एवं[२] समवायस्यापि यथासम्भवमुदाहरणानि दर्श्यन्ते। तद्यथा संयुक्तविशेष्यत्वात् समवायस्य ग्रहणम्। इह पटे रूपसमवाय इति। संयुक्तविशेषणत्वाद्रूपसमवायवानयं पट इति । संयुक्तसमवेतविशेष्यत्वादिह गुणे जातिसमवाय इति । संयुक्तसमवेतविशेषणत्वाज्जातिसमवायवानयं गुण इति । संयुक्तसमवेतसमवेते गुणगतजातिविशेषेऽधिकरणभूते वस्त्वन्तरसमवायाभावात् संयुक्तसमवेतसमवेताविशेष्यत्वविशेषणत्वाभ्यां समवायस्य ग्रहणोदाहरणे न सम्भवतः । समवेतविशेष्यत्वादिह शब्दे शब्दत्वादिजातिसमवाय इति । समवेतविशेषणत्वादिह जातिसमवायवानयं शब्द इति । समवेतसमवेते शब्दत्वादिसामान्ये वस्त्वन्तरसमवायस्याभावात् समवेतसमवेतविशेष्यविशेषणनिबन्धनं समवायग्रहणं नास्ति तस्मादितः परमिहापि

२ 'एवं' इति नास्ति प. पुस्तके।

श्रोत्रेन्द्रियसम्बन्ध उदाहर्तुं न शक्यते । ततः समवायस्य कचिदेवोदाहरणं सम्भवति नाभावस्येव पंचस्वपि सम्बन्धेष्विति षोढा सन्निकर्षः । तत्र बाह्ये विषये रूपादौ चतुष्टयसन्निकर्षाज्ज्ञानं समुत्पद्यते आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति । सुखादौ तु त्रयसन्निकर्षाज्ज्ञानमुत्पद्यते तत्र चक्षुरादिव्यापाराभावात् । आत्मा मनसा संयुज्यते मनोलक्षणं चेन्द्रियं सुखादिना संयुक्तसमवायेन सम्बध्यते मनसा संयुक्त आत्मा तत्र समवेतं सुखादिकमिति । आत्मनि तु योगिनां द्वयोरात्ममनसोरेव संयोगादुत्पद्यते ज्ञानमिति । सोऽयं प्रत्यक्षज्ञानं प्रति सन्निकर्षः प्रोक्तः । अनुमानादिकं तु प्रति द्वयोरेवात्ममनसोः सन्निकर्ष इति ।

तदित्थमर्थप्रमितिप्रसिद्धये नैं सन्निकर्षः करणं न युज्यते ॥
तत्र प्रमाणत्वममुष्य मन्यतां विमुच्य मात्सर्यमकार्यचेष्टितम् ॥३८॥
इत्यक्षपादानुगतैः प्रमाणमाख्यायि यः षड्विधसन्निकर्षः ॥
स्याद्वादसान्द्रामृतपानशौण्डैः संयुज्यते नैव विचार्यमाणः ॥ ३९ ॥

तथाहि यत्तावदर्थव्यवसितावसाधकतमत्वादिति हेत्वेकदेशासिद्धता-विध्वंसकानुमानेन तस्माद्दारुढधीभावस्वभावे फले परश्वधादिवदर्थनिश्चितिरूपे फले सन्निकर्ष एव करणं तस्यैव तत्र घटमानत्वादित्यादि तन्नावदातम् । तस्यैवेत्यादिहेतोरसिद्धत्वात् । सन्निकर्षातिरिक्तस्य भावेन्द्रियविशेषस्यैव करणत्वेन तत्र घटमानत्वात् । इह खलूभयं भावेन्द्रियं लब्धिरुपयोगश्च, 'लब्ध्युपयोगौ भावेन्द्रियम्' इति वचनात् । तत्रार्थग्रहणशक्तिर्लब्धिः । तन्निमित्त आत्मव्यापारपरिणामविशेष उपयोगः । तच्च द्वयमप्यात्मनः फले योग्यत्वाद्व्याप्रियमाणत्वाच्च प्रसिद्धम् । तदुक्तम् ।

'भावेन्द्रियाणि लब्ध्यात्मोपयोगात्मानि जानते ।
स्वार्थसंविदि योग्यत्वाद्व्याप्तृत्वाच्च संविदः ॥ १ ॥'

१ 'वंशस्थम्' २ 'स' इति प. पुस्तके पाठः । ३ तत्त्वार्थसू. २–१८. ४ तत्त्वार्थश्लोकवार्तिके २–१८ श्लो. १ ।

संविद इति संविदात्मा तस्य । तथाहि लब्धिस्वभावं भावेन्द्रियं स्वार्थसंविदि योग्यत्वादात्मनः सतः प्रतिपद्यते । नहि तत्रायोग्यस्यात्मनस्तदुत्पत्तिराकाशवत् । स्वार्थसंविद्योग्यतैव च लब्धिः । एतच्चेन्द्रियमत्रानौपाधिकमुपयोगरूपस्यैव तस्य प्रस्तुतोपयोगित्वात्तस्यैव प्रमितौ साधकतमत्वात् । तत्पुनरात्मनो व्यापारमन्तरेण स्वार्थसंविदोऽनुपपत्तेः प्रतीयते । नह्यव्यापृत आत्मा स्पर्शादिप्रकाशको भवितुमर्हति । सुषुप्तस्यापि तत्प्रसङ्गात् । नच सुषुप्तावस्थायां स्पर्शनादीन्द्रियसन्निकर्षाभावादेव न तत्प्रसङ्ग इति जल्पनीयम् । अतिमसृणनूलिकाताम्बूलमालतीमांसलामोदसुन्दरगेयशब्दादिसन्निकर्षस्य स्पर्शनादीन्द्रियाणां तदानीमपि भावात् । नापि मनसस्तदानीमिन्द्रियसन्निकर्षाभावात्तदप्रसङ्गः । त्वदुक्तस्याणुपरिमाणस्य मनसो निरासेनाशेषात्मप्रदेशव्यापिनः पौद्गलिकस्य तस्य व्यवस्थापयिष्यमाणत्वादिन्द्रियैः संयोगसिद्धेः । न चात्मनो व्यापकत्वेन व्यापाराभावः । परिस्पन्दात्मकस्यैव तस्य ततस्तत्राभावसिद्धेः । ज्ञानरूपस्य तु तस्य तद्विलक्षणत्वात् । न च हेतुरप्यत्र सिद्धः । आत्मनि व्यापकत्वस्य व्याहतत्वेन निर्देक्ष्यमाणत्वात् । यदि वा आत्मा कंचन व्यापारं विनैव प्रमितिप्रारंभप्रागल्भ्यमभ्यस्येत् तर्हि कारकान्तरमपि निर्व्यापारमेव स्वस्वकार्योपार्जनचर्यैतामाबिभ्रीत । तथा च यावत्सत्त्वं कुठारादिश्छेदनं कुर्यात् ततोऽस्ति कश्चिदात्मनः प्रमितौ व्यापारः । इतोऽप्यस्ति यदसन्निधाने कारकान्तरसन्निधानेऽपि यन्नोत्पद्यते तत्तत्करणम् । यथा परश्वधासन्निधाने व्रश्चनादिसन्निधाने दारुदारणमनुत्पद्यमानं परश्वधकरणकम् । नोत्पद्यते च प्रस्तुतेन्द्रियासन्निधानेऽर्थसंवेदनमुपकरणसद्भावेऽपि । न चात्र हेतोरसिद्धिः । अतिकर्कशतर्कशास्त्रपरामर्शैकतानस्य प्रमातुः पुरःपरिचलदचलशिखरानुकारिकुञ्जरकुञ्जरेणेन्द्रियसन्निकर्षसम्भवेऽपि प्रस्तुतेन्द्रियासन्निधाने तद्गोचरपरिच्छेदानुत्पादात् ।

---

१ 'वर्धताम्' इति म. पुस्तके पाठः । २ 'अपि' इत्यधिकं प. म.पुस्तकयोः । ३ 'कुञ्जर' इति नास्ति प. पुस्तके ।

इन्द्रियमनःसन्निकर्षोऽपि च तत्र पूर्ववत् प्रकटनीयः । नन्वेवमप्युपयोगस्य त्वन्मतेन कर्तुरभेदात् स एव कर्त्ता तदेव करणमित्यायातमेतच्च विरुद्धमित्यलमेनं दुःशिक्षितक्षत्रियपुत्रमिव स्वजनकविरोधदायिनं स्वीकृत्येति चेत् तदनिपुणम् । परिणामपरिणामिनोर्भेदविवक्षायां तदभिधाने विरोधासम्भवात् । ज्ञानपरिणामो हि करणमात्मनः कर्तुः कथञ्चिद्भिन्नम् । अन्यथा स्वप्रज्ञयैव शास्त्रसंदर्भगर्भमेनमवैमीति विभक्तकर्तृकरणनिर्देशानुपपत्तेः ।

ज्ञानात्मनोः कथञ्चिद्भेदस्याभेदस्य च सिद्धिः।

स्यान्मतं ज्ञानमात्मनः सर्वथाभिन्नं गुणत्वात्सुखादिवदिति चेत् तदयुक्तम् । हेतोः कालात्ययापदिष्टत्वात् । प्रत्यक्षतो ज्ञानकरणस्यात्मनः कर्तुः कथञ्चिदभिन्नस्य प्रतीतेः संबद्धत्वात् । तत्र तथाप्रतीतिरिति चेत् ननु न तावत्संयोगः । सम्बन्धः । तस्य गुणत्वेन द्रव्यमात्रवृत्तितया गुणरूपे ज्ञाने सम्भवाभावात् । संयोगाच्च तथाप्रतीतिस्वीकृतौ कोपाटोपसंघटमानमेषयुग्मेऽप्यसौ स्यात् । समवायः पुनः कथञ्चित्तादात्म्यादपरः कश्चिन्नास्त्येव । तथाहि यद्यसौ समवायिभ्यः सर्वथा भिन्नः । तर्हि कथं तेषां सम्बन्धिनामयं संबन्ध इति व्यपदिश्येत । सम्बन्धान्तराच्चेत् तदपि यदि सम्बन्धिभ्यः सर्वथा पृथक् तर्हि तस्यापि तत्सम्बन्धित्वे किं नाम निमित्तम् । यदि सम्बन्धान्तरमेव ब्रुवीथाः तर्हि कतमामातिथेयीमनवस्थादौस्थ्यातिथये समुपस्थिताय कुर्वीथाः । सुदूरमपि गत्वा यदि सम्बन्धसम्बन्धिनोः कथञ्चिदैक्यमाख्यायते तदा समवायसमवायिनोरपि तदिष्यताम् । तथाच सिद्धं ज्ञानात्मनोरपि कथञ्चित्तादात्म्यम् । समवायिभ्यामभिन्नस्य समवायस्यैव तत्त्वादिति ज्ञानात्मनोः कथञ्चिदभेदप्रतीतेः कालात्ययापदिष्टो हेतुः । दृष्टान्तश्च साध्यविकलः

१ 'तस्य' इत्यधिकं प. पुस्तके । २ 'तत्तापौरुषेयः शब्दोऽमूर्तत्वाद्व्योमवदिति' साध्यधर्मविकलदृष्टान्तः (प्र. लो. ६-६०)

सुखादेरप्यात्मनः कथञ्चिदभेदसिद्धेः । ततः सिद्धं ज्ञानं करणमात्मनः कथञ्चिद्भिन्नम् ।

ज्ञानस्याथ प्रमाणत्वे फलत्वं कस्य कथ्यते ।
स्वार्थसंवित्तिरस्त्येव ननु किं न विलोक्यते ॥ ४० ॥

५ स्यात्फलं स्वार्थसंवित्तिर्यदि नाम तदा कथम् ।
स्वपरव्यवसायित्वं प्रमाणे घटनामियात् ॥ ४१ ॥

उच्यते—

स्यादभेदात्प्रमाणस्य स्वार्थव्यवसितेः फलात् ॥
नैव ते सर्वथा कश्चिद्दूषणक्षण ईक्ष्यते ॥ ४२ ॥

१० आश्चर्यमाश्चर्यमहो तदेतद्विलोक्यतां शुक्लपटाङ्कितानाम् ॥
ज्ञानं यदेकं नितरां विरुद्धप्रमाप्रमाणत्वपदं वदन्ति ॥ ४३ ॥

अत्रोच्यते—

आश्चर्यमाश्चर्यमहो तदेतद्विलोक्यतां भस्मकणाङ्कितानाम्
कथञ्चिदेकत्र मतौ वदन्ति प्रमाप्रमाणत्वविरुद्धतां यत् ॥४४॥

१५ यदि हि तदेकान्तेनैकरूपमुपेयेमहि, यदि च येनैव रूपेण प्रमाणं तेनैव वा फलं येनैव फलं तेनैव वा प्रमाणमाचक्षीमहि, तदा स्यादेव विरोधसम्बन्धदुर्गन्धता । न चैवम् तस्यानैकान्तात्मकत्वेनैव कक्षीकारात् । आत्माऽनेन जानातीति साधकतमस्वभावेन ज्ञाने प्रमाणत्वव्यपदेशाज्ज्ञप्तिक्रियारूपतया तु फलत्वाभिधानस्य स्वीकाराच्च । यथा प्रदीपः प्रकाशात्मना प्रकाशयतीत्यत्र साधकतमः प्रकाशात्मा करणं क्रियात्मा फलमिति । सप्रपञ्चं चैतत् पुरस्तात् प्रपञ्चयिष्यते । तदित्थमुपयोगात्मकं भावेन्द्रियमेव प्रमितौ साधकतमत्वेन घटते न सन्निकर्षः ।

ज्ञानात्मनोर्भेदस्याभेदस्य वा एकान्तस्य स्वीकरणमसङ्गतम् ।

केचित्तु 'ततोऽर्थग्रहणाकारा शक्तिर्ज्ञानमिहात्मनः। करणत्वे
लब्धीन्द्रियं प्रमाणमिति विनिर्दिष्टा न विरुद्धा कथञ्चन ॥ १ ॥' इति
केषांचिन्मतस्य खण्डनम्। परमार्थतो भावेन्द्रियस्यैवार्थग्रहणशक्तिलक्षणस्य
साधकतमतया करणताध्यवसायादिति च ब्रुवाणा लब्धीन्द्रियं प्रमाणं
समगिरन्त, तन्न समगंस्त। उपयोगात्मना करणेन लब्धेः फले व्यव- ५
धानात्। सन्निकर्षादिवदुपचारत एव प्रमाणतोपपत्तेः।

किञ्चेयं यदि ज्ञानशक्तिः प्रत्यक्षा कक्षीक्रियते तदा शक्तीनां
परोक्षत्वसमर्थनमनवसरमेव जैनानां भवेत्। अथाप्रत्यक्षासौ, तदा तस्याः
करणज्ञानत्वे प्रभाकरमतापत्तिः। तत्र करणज्ञानस्य परोक्षत्वव्यवस्थितेः
फलज्ञानस्य च प्रत्यक्षतोपगमात्। ततः प्रत्यक्षं करणमिच्छता न १०
तच्छक्तिरूपमेषितव्यं स्याद्वादिना। अथ न जैनानामेकान्तेन किञ्चित्
प्रत्यक्षमप्रत्यक्षं वा। तदिह द्रव्यार्थतः प्रत्यक्षा ज्ञानशक्तिः। पर्यायार्थ-
तस्तु परोक्षा। अयमर्थः—स्वपरपरिच्छित्तिरूपात्फलात् कथञ्चिदपृथग्भूते
आत्मनि परिच्छिन्ने तथाभूता तज्जननशक्तिरपि परिच्छिन्नैवेति।
नन्वेवमात्मवर्त्तिनामतीतानागतवर्त्तमानपर्यायाणामशेषाणामपि द्रव्या- १५
र्थतः प्रत्यक्षत्वाद्यथा ज्ञानं स्वसंविदितमेवं तेऽपि स्वसंविदिताः किं न
स्युः। तथाच बौद्धान् प्रति सुखादीनां स्वसंविदितत्वप्रतिषेधप्रयासो
निःसार एव स्यात्। तदिह यत् स्वयमात्मानं वेत्ति तत् स्वसंविदित-
मुच्यते। उपयोग एव च तादृशो न शक्तिः सुखादयश्च। शक्तिर्हि
द्रव्याधिगमद्वारग्रहणा सुखादयः पुनरुपयोगाख्यपर्यायान्तरसमधि- २०
गम्याः। किञ्च यदि द्रव्यार्थतः प्रत्यक्षत्वात् स्वसंविदिता ज्ञानशक्तिः।
तदाऽहं घटज्ञानेन घटं जानामीति करणोल्लेखो न स्यात्। नहि
कलशसमाकलनवेलायां द्रव्यार्थतः प्रत्यक्षत्वेऽपि प्रतिक्षणपरिणामिनाम-
तीतानागतानां च कुशूलकपालादीनामुल्लेखोऽस्ति। तत उपयोग एव
साधकतमः प्रत्यक्षेऽपि प्रमां प्रतीत्यसिद्धः। तस्यैव तत्र घटमानत्वा- २५
दिति। यदपि प्रदीपेन व्यभिचारोद्भावनमकारि तदप्यचारु। यतः

प्रदीपस्य पदार्थपरिच्छित्तौ करणत्वं मुख्यत उपचारतो वा स्वीक्रियते। न तावन्मुख्यतः। प्रदीपस्य नयनमनोरूपमुख्यकरणसहकारितयोपचारत एव करणत्वव्यवहारात्। अथोपचारत एव करणत्वमस्येष्यते। नास्ति तर्हि व्यभिचारः। यथार्थपरिच्छित्तौ करणत्वमस्योपचारतः समस्ति तथा स्वपरिच्छित्तावपि तद्विद्यत एव। नयनादेरर्थसंवेदनमिव प्रदीपसंवेदनमप्युपजनयतः प्रदीपस्य सहकारित्वाविशेषेणार्थप्रकाशनवत् स्वप्रकाशनेऽपि करणतोपचारव्यवस्थितिः। नयनादिनाऽनेकान्त इत्यपि न कान्तम्। यतस्तेनापि द्रव्येन्द्रियरूपेण भावेन्द्रियरूपेण वाऽनेकान्तः स्यात्। न तावदाद्येन। तस्य भावेन्द्रियोपकरणरूपस्योपचारेणैव करणत्वात्। नापि द्वितीयेन तस्यापि लब्ध्यात्मन उपयोगात्मकभावकरणकारणत्वेन करणत्वव्यवहारात्। उपयोगात्मकस्य तु तस्यार्थपरिच्छित्ताविव स्वपरिच्छित्तावपि करणत्वसद्भावात्। न चैतादृशमिन्द्रियमसिद्धम्। अनन्तरमेव प्रसाधितत्वात्। ततो न नयनादीन्द्रियेणापि स्वनिश्चितावकरणत्वादिति हेतोरनेकान्तः। एवं च सन्निकर्षे करणत्वप्रतिषेधस्य प्रतिषेद्धुमशक्यत्वात् स्वपरव्यवसायिज्ञानस्य करणतयोपपादितत्वाच्च सन्निकर्षः प्रमाणमर्थप्रमितौ साधकतमत्वादित्यत्र हेतोरसिद्धिः सिद्धा भवति। अपि च यत्र प्रमात्रा व्यापारिते सत्यवश्यं कार्यमुपजायते तदन्तरेण तु नोपजायत एव तत्तत्र साधकतममिति व्यपदिश्यते यथा च्छिदायां दात्रादि।

आकाशादौ नयनसंनिकर्षस्य सत्त्वेऽपि प्रत्यक्षानुत्पत्तेर्न तस्य साधकतमत्वमित्युपपादनम्।

न च नयननभःसन्निकर्षसद्भावेऽपि संवेदनं कदाचिदाकाशगोचरे मुन्मज्जति। ततः कथं सन्निकर्षः क्वचिदपि ज्ञाने साधकतमतया व्यपदिश्येत। न च नभसि नयनसन्निकर्ष एव नास्तीति वक्तव्यम्। अन्यतरकर्मजस्य संयोगस्य तत्र सद्भावात्। अन्यथा समस्तमूर्त्तद्रव्यसंयोगाद्गगनसर्वगतत्वसाधनविरोधात्। अथाभिधीयते वियति विलोचनसन्निकर्षस्य योग्यताविरहाद्न ज्ञानोत्पत्तिः। ननु किमिदं योग्य-

तानामधेयं तत्त्वमिष्टमायुष्मतः । शक्तिरिति चेत् सा तर्हि सहकारिसान्निध्यस्वरूपैवात्र स्वीकर्त्तव्या । स्वरूपशक्तेः सन्निकर्षे सत्त्वात् । तस्यां च वक्ष्यमाणकारकसाकल्यपक्षनिक्षिप्तसमस्तदोषानुषङ्गः । सहकारिसान्निध्यस्य कारकसाकल्यान्नाममात्रेण भिन्नत्वात् । किञ्च किमत्र द्रव्यं गुणः कर्म पदार्थधर्मः कश्चिदभावो वा सहकारितया कथ्येत । द्रव्यं चेत् । व्यापकमव्यापकं वा । व्यापकं तावदात्मादि चक्षुरन्तरिक्षसान्निकर्षस्य सहकारि समस्त्येव । अव्यापकमपि तन्मनो नयनमालोको वा कलशचक्षुःसन्निकर्षस्येव तत्सन्निकर्षस्य सहकारि विद्यत एव ।

गुणोऽपि प्रमातृगतः प्रमेयगत इन्द्रियगतो वा तत्सहकारी स्यात् । यदि प्रमातृगतः सोऽपि धर्मविशेषोऽन्यो वा । धर्मविशेषस्तावद्विद्यत एव । न खलु गगननयनसन्निकर्षस्य धर्मविशेषेण सह विरोधो येन तत्सद्भावे धर्मविशेषस्यानुत्पादः प्रध्वंसो वा भवेत् । विरोधे वा कुम्भाद्युपलम्भोऽपि न कदाचिदुत्पद्येत । विरोधिगगननयनसन्निकर्षस्य सदा सद्भावेन तदुत्पत्तिसहकारिणो धर्मविशेषस्यासम्भवात् । अथ गगनगोचरज्ञानोत्पादकेनैवधर्म्मविशेषेण व्योमनयनसन्निकर्षस्य विरोधो न पुनः कुम्भादिविषयविज्ञानोत्पादकेनेति वियद्गोचरस्यैवोपलम्भस्याभावो नतु कुम्भादिविषयस्येति । ननु कुत एतन्निश्चितम् । नयनगगनसन्निकर्षसद्भावेऽपि गगनगोचरस्यैव ज्ञानस्यानुत्पत्तेरिति चेत् । मैवम् । किमियं तदुत्पादकधर्म्माविशेषाभावाद्विद्यद्विषयकविज्ञानस्यानुत्पत्तिरुताहो तस्य साधकतमत्वाभावादिति । न तदनुत्पत्तिः सन्दिग्धाऽनैकान्तिकत्वकलङ्कितत्वात् । अपरोऽपि प्रयत्नादिः प्रमातृगुणस्तत्सहकारी न नाम नास्ति । अथ प्रमेयगतो गुणः सन्निकर्षसहकारी स्वीक्रियते । नन्वसावपि समस्त्येव । व्योमनयनसन्निकर्षे द्रव्यत्वेन व्योम्नो गुणसङ्गित्वात् । अथ न गुण इत्येव सहकारी किन्तु गुणविशेषः । स किं महत्त्वं रूपमुभयं वा ।

गुणसहकारित्वपक्षस्य खण्डनम् ।

१ 'न' इति नास्ति म. प. पुस्तकयोः । २ 'तदनुत्पत्तेः' इति प. म. पुस्तकयोः पाठः । ३ ' न नानाऽस्ति ' इति प. पुस्तके पाठः ।

महत्त्वं तावद्द्योन्नि परमप्रकर्षपर्यन्तप्राप्तं सन्निकर्षसहकारि समस्त्येवेति सुतरां तदुपलब्धिः स्यात् । रूपमपि यत्र द्रव्ये समवेतं तस्यैवोपलब्धौ सन्निकर्षसहकारि स्यात् । तद्वर्त्तिनामन्येषामपि द्रव्यत्वादीनां वा । आद्यभेदे सामान्यादीनां कथं कदाचिदप्युपलब्धिः । तेषामद्रव्यत्वेन रूपसमवायासम्भवात् । यत्र द्रव्ये समवेतं रूपं तद्वर्त्तिनामन्येषामपि द्रव्यत्वादीनामुपलब्धौ सन्निकर्षसहकारि तदिति पक्षेऽपि कथं क्वापि रूपस्योपलम्भः । नहि तत्र रूपान्तरमस्ति । यत्तदुपलब्धौ सहकारि स्यात् । यावत् द्रव्यभाविसमानजातीयगुणद्वयस्य युगपदेकत्र त्वयानभ्युपगमात् । न च तदेव रूपं स्वोपलब्धौ सहकारीति वक्तव्यम् । एवं विहायसोऽपि नयनसन्निकर्षे सहकारित्वप्रसङ्गेनोपलम्भो भवेत् । रूपमपि हि रूपान्तरमन्तरेणैव स्वरूपमात्रेण स्वोपलब्धिं विधत्ते । तच्चान्तरिक्षेऽप्यक्षुण्णमस्त्येव । किञ्च यदि रूपं तत्सहकारि कथन्तर्हि पार्थिवादिपरमाणौ रूपवत्यपि नोपलब्धिः । अथ महत्त्वं रूपं चेत्युभयमपि तत्सहकारि न च परमाणौ तदस्ति । सत्यपि तत्र रूपमात्रेऽनुपचरितापरिमाणाधिकरणत्वेन महत्त्वशून्यत्वात् । तथा च सूत्रम् । ' महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः ' इति । तदपि विचारासहम् । महतो रूपवतोऽपि सन्तप्तयोवर्त्तिनस्तेजोवयविनः सत्यपीक्षणरश्मिसन्निकर्षेऽनुपलम्भात् । अथ न महत्त्वसहचरितं रूपमात्रमेव सन्निकर्षसहकारि किन्तूद्भूतरूपं न च तन्नीरवर्त्तिनि तेजसि समस्तीति कौतस्कुती तदुपलब्धिः । तदपि नोपपन्नम् । महत उद्भूतरूपस्य परिकरितनेत्रगोलकस्य तिमिरादिरोगावयविनो विद्यमानेऽपि नेत्ररश्मिसन्निकर्षेऽनुपलम्भात् । न च तत्र रश्मिसन्निकर्ष एव नास्तीति वक्तव्यम् । तेनासंयुक्तानां तेषां कुम्भादिभावप्रकाशनाय बहिर्निःसरणासम्भवात् । न खलु स्वच्छसूर्यकान्तशिलासङ्घातघटितामित्त्या संसर्गमनासाद्य चक्षूरश्मयस्तत्परभागभागिनो भावानवभासयन्ति । भित्त्यनवभासप्रसङ्गात् ।

---

१ ' सन्निकर्ष ' इत्यधिकं प. म. पुस्तकयोः ।

न च तिमिरे सति रश्मिप्रसरणमेव नास्तीति वाच्यम् । दूरासन्न-तिमिरयोः सतोर्दूरासन्नवर्तिवस्तूपलम्भस्यामावप्रसक्तेः। तन्न प्रमेयगतोऽपि गुणः सन्निकर्षसहकारी । नापीन्द्रियगतः । तस्य कलशादिवद्व्यि-त्यपि चक्षुःसन्निकर्षसहकारिणः सद्भावात् । तद्गुणस्य गगनेनाविरोधात्। विरोधे वा तस्य सदा सत्त्वेन लोचने कदाचिदपि गुणानुत्पत्त्या रूपमात्रो- ५
पलम्भस्याप्यभावात्कष्टमिदानीमस्तमितस्त्रैलोक्यां प्रकृतिप्रसन्नसज्जन-वदनारविन्दावलोकनमहोत्सवः । तन्न गुणोऽपि तत्सहकारी ।

नापि कर्म । तस्योन्मीलनादेर्विलोचनगतस्य तत्रापि सम्भवात् । विषयगतस्य तूपलब्धि प्रत्यनङ्गत्वात् । अन्यथा
कर्म पदार्थधर्मोऽभावो वा सन्निकर्षसहकारीति पक्षस्य खण्डनम् ।
स्थिरपदार्थानां कथमुपलम्भो भवेत् । अथ पदार्थ- १०
धर्मः कश्चित्सहकारी सोऽपि न नाम नयनगगन-सन्निकर्षे नास्ति । प्रमातृस्थस्य सन्तृप्तत्वादेरिन्द्रियस्थस्य नैर्मल्यालोक-सहकृतत्वादेर्विद्यमानत्वात् । प्रमेयस्थोऽपि दृश्यस्वभावतारूपोऽसौ नभसि सम्भवत्येव । कथमन्यथा शूलिनस्तदुपलम्भः । विरूपाक्षापेक्षया दृश्य-स्वभावताधर्मादपर एवायमस्मादक्षापेक्षया । नचासौ नभसि विद्यत इति १५
कुतस्तदुपलब्धिरिति चेत् । तर्हि त्वादृशो यदि कदाचिद्योगित्वमाप-त्स्यते तदा न द्रक्ष्यत्यन्तरिक्षम् । तथात्वे वा त्वन्निदर्शनेनैव न विरू-पाक्षादपरस्य कस्यचिद्विश्ववेदिता स्यादिति सर्वथा व्यर्थस्तदर्थः प्राणिनां प्रयासः स्यात् । तस्मादस्त्येव त्वादृक्षाप्रेक्षया-प्यन्तरिक्षे दृश्यस्वभावता । नच योगिदशायामेवासौ तस्य समुत्प- २०
द्यत इति वाच्यम् । पूर्वमपरस्वरूपत्वेन गगनस्यानित्यत्वप्रसङ्गात् । तन्न पदार्थधर्मोऽपि सहकारी नाप्यभावः । सोऽपि हि नयने कृचकामलादिदोषाभावस्वभावो नभसि तु स्तम्भकुम्भाद्यावरणाभाव-स्वभावः सन्निकर्षसहकारी समस्ति न च गगनगोचरसंवेदनोदयः ।

अथ प्रमातृगतस्य प्रतिबन्धकापगमरूपस्य तस्य सन्निकर्षसह-
कारित्वं स्वीक्रियते तदपि न समगतम् । प्रमातुः
खलु प्रमामुपजनयतः सन्निकर्षः प्रतिबन्धका-
पगमश्च सहकारीत्येव युक्तम् । प्रतिबन्धकापगमः
सन्निकर्षसहकारीति तु कौतस्कुती नीतिः । नहि दाह्यसंयोगसहकारिणः
कृपीटयोनेः स्फोटं घटयतो मणिमन्त्रादिप्रतिबन्धकाभावः संयोगस्य
सहकारीति वक्तुं युक्तम् । ननु प्रमोपजनने प्रमातृसहकारिणश्चक्षुषो
व्याप्रियमाणस्याञ्जनादिकं चक्षुष एव सहकारि न प्रमातुरेवमत्रापि
प्रतिबन्धकापगमः सन्निकर्षस्यैव सचिवो भविष्यतीति चेत् मैवम् ।
अञ्जनादिकं हि चक्षुषस्तिमिराद्यभावस्वभावातिशयविशेषं पोषयतीति
तत्रैव तस्य साचिव्यमुपपद्यते । प्रक्रान्ते तु नैवमुभयस्यापि प्रमां प्रत्येव
व्यापारात् । तथापि सन्निकर्षमेव प्रतिप्रतिबन्धकापगमस्य सहकारित्व-
कल्पने तच्छिद्रैणैव विपर्ययपाटच्चरः प्रविशन्नशक्यः प्रतिरोद्धुम् ।
तथाच प्रतिबन्धकापगम एव साधकतम एवं स्यात् । नन्वेवं प्रति-
बन्धकापगमस्य साधकतमत्वसिद्धौ बद्धकक्षाणां वः स एव
प्रमाणं स्यात् तथा चोपयोगस्यादितः प्रमाणत्वसमर्थनमनर्थायैव
भवेदिति चेत् नैवम् । प्रतिबन्धकापगमे साधकतमत्वस्य
प्रतिबन्धिन्यायेनैवाभिधानात् । यदि प्रमातृसहकारितायामुभयोरविशि-
ष्टायामपि सन्निकर्षस्यैव साधकतमत्वमिष्यते तदा प्रतिबन्धकापगमस्यैव
किं न स्यादिति । तत्त्वतस्तु यत्फलं प्रत्यत्यन्ताव्यवहितव्यापारं
तदेव साधकं साधकतमम् । अत एव च प्रमाणम् । तच्च नोपयोगादपर-
मुपपद्यते । अयं चोपयोगः स्वपरप्रमितिरूपस्तस्या एव व्यापारांशमा-
श्रित्य प्रमाणताव्यवहारादिति ज्ञानमेव प्रमाणम् । प्रमाणभूतस्य ज्ञानस्य
हेतुत्वात् सन्निकर्षस्यापि प्रामाण्यं प्रतिजानीमह इति चेत् ।

प्रतिबन्धकापगमः सन्नि-
कर्षसहकारीति मतस्य
खण्डनम् ।

---

१ ' प्रमातुः खलु ' इत्यस्य स्थाने ' तस्य तु ' इति म. पुस्तके पाठः ।
२ प्रतिप्रश्नेन समाधानं यत्र क्रियते तत्र प्रतिबन्धिन्यायोऽवतरति ।

किमपि कौतुकमेतदहो जनाः शृणुत यूयममुष्य मनस्विनः ।
कवलितोत्कटहालहलोऽपि सन्नवसुधारसमुद्गिरतीह यत् ॥ ४५ ॥
प्रामाण्यं मुख्यया वृत्त्या ज्ञानस्यैव सुसंगतम् ॥
गौण्या तु सन्निकर्षस्य को हि धीमान्न मन्यते ॥ ४६ ॥
तस्मादवस्थितमिदं नियतमसिद्धया कटाक्षितो हेतुः ।
अर्थप्रमितावित्यादिलक्षणः पूर्वमुक्तो यः ॥ ४७ ॥

अगतिकगतिनीत्या यस्तु हेतोरसिद्धा-
दपि वदति विशुद्धामत्र साध्यस्य सिद्धिम् ।
स खलु गलितबुद्धिर्वन्ध्यसीमन्तिनीतः
स्पृहयति भुवनानां भूषणं पुत्ररत्नम् ॥ ४८ ॥

नैयायिकाभिमतसन्निकर्ष-षट्कस्य खण्डनम् ।

यत्तु सन्निकर्षप्रसिद्धौ बाह्येन्द्रियत्वादिनेत्यादि गदितम् । तच्चक्षुः-प्राप्यकारित्वपराकरणप्रस्तावे सविस्तरमपाकरिष्यते । यदपि प्रपञ्चतः सन्निकर्षषट्कघोषणमकारि । तदपि स्वसिद्धान्तश्रद्धालुताप्रसूतप्रक्रियामात्रम् । तथाह्यप्राप्यकारित्वेन चक्षुषः समर्थयिष्यमाणत्वान्न कुम्भादिना संयोगः सम्भवति । तदभावान्न संयुक्तसमवायादिः । यदि च संयुक्तसमवायाच्चक्षुषा रूपादि परिच्छिद्यते । तर्हि तदविशेषान्नभसि शब्दः, सहकारफलादौ रसादिः, सहस्रदीधितौ कर्म च तेन परिच्छिद्येत । संयुक्तसमवेतसमवायाच्च रूपत्व इव रसत्वादावपि चाक्षुषज्ञानमुपजायेत । समवायाच्च श्रवणेन्द्रियस्य ध्वनाविव व्योम्नो महापरिमाणादिगुणेऽपि । समवेतसमवायात्तु शब्दत्व इव महापरिमाणत्वादिसामान्यसमूहेऽपि प्रमितिः समुत्पद्येत । न्यायस्य समानत्वात् । अथ योग्यतामाहात्म्यात्प्रतिनियत एव वस्तुनि नयनादीन्द्रियाणां संवेदनमुन्मीलति तेन नातिप्रसङ्ग इति निगद्यते । तर्हि धीमन् योग्यतामेव सर्वत्र नियामिकामङ्गीकुरु । किमनया प्रतिपदं विचारतो विशीर्यमाणया सन्निकर्षकथाकंथया । यस्तूक्तसम्बन्धसम्बद्धवस्तुविशेषणविशेष्यभावाभिधानः

षष्ठः सन्निकर्षः । सोऽपि संयोगादिसम्बन्धान्तरनिराकरणादेव निरस्तः । न हि संयोगसमवाययोरन्यतरेण सम्बन्धेनासम्बद्धयोर्वस्तुनोर्मलयहिमालयशैलयोरिव स सङ्गच्छते । यदप्यसन्निकृष्टस्य ग्रहणे सर्वस्य सर्वत्रार्थे ज्ञानमुत्पद्येतेति नैयायिकैरुद्भ्रीवमुद्भीर्यते । तदप्येतेन प्रक्षिप्तम् । असन्निकृष्टस्य योग्यस्यैव ग्रहणाभ्युपगमात् । कथमन्यथा सन्निकृष्टेऽपि सर्वत्रार्थे ज्ञानं नोत्पद्येत । एवं च सति यस्मिन् सत्यपि यन्नोपजायते न तत्तत्करणम् । यथा सत्यपि शालिबीजेऽनुपजायमानः कोद्रवाङ्कुरः । सत्यपि सन्निकर्षे नोपजायते चार्थप्रमितिरितीदमनवद्यं सन्निकर्षप्रामाण्यबाधाविधायि साधनमवतरति । ततस्तत्र बाह्ये विषये रूपादौ चतुष्टयसन्निकर्षाज्ज्ञानमुत्पद्यते इत्याद्यपि व्योमकमलिनीकुसुमसुकुमारताश्लाघां नातिशेते ।

किञ्च

यदि निगदसि विद्वन्मानतां सन्निकर्षे
कथय कथमिदानीमस्तु सर्वज्ञवार्ता ।
असति न खलु तीतानागते वस्तुजाते
प्रमितिजननहेतुः सन्निकर्षः समस्ति ॥ ४९ ॥

अथो भवेज्जन्म यदैव यस्य संवेदनं तस्य तदैव च स्यात् ।
इत्थं कथं हन्त मृगाङ्कमौलेः सर्वज्ञता कल्पशतैरपि स्यात् ॥ ५० ॥
वर्त्तमानविषयानथ सर्वान् वेत्ति विश्वविदुरत्वमतश्चेत् ।
नैव भाविविषयाणि वचांसि स्युः प्रमाणमिह तस्य तदानीम् ॥ ५१ ॥

ततश्च

तदुपदेशवशेन विशंकिताः कथय कोविद भाविफलार्थिनः ।
कचन कर्माणि किं कलितोद्यमाः स्युरिति तस्य भवेत्कथमाप्तता ॥५२॥

---

१ ' कारणम् ' इति भ. पुस्तके पाठः । २ 'तीतानागते' शब्देऽकारलोपे प्रमाणं मृग्यम् । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।' इति भागुरिमतेनावाप्योरेवाकारलोपस्यानुशासनादतीत्युपसर्गगताकारलोपस्याननुशासनाच्च । कदाचिच्छन्दोभङ्गभिया अकारलोप आहृतः स्यात् ।

अथ वेदनमिष्यतेऽस्य नित्यं न ततो दूषणमम्बरप्रसङ्गः ।
कुरु मैवमलीकचापलोक्तिं नित्यैकान्तविकृष्टनात्पुरस्तात् ॥ ५३ ॥

व्याप्तिस्तथानुमितिहेतुरियं बुधानां
दिग्देशकालनियमेन विनाऽप्रसिद्धा ।
तस्याश्च न ग्रहणकारणमस्य किञ्चित्
नैयायिकस्य कृपणस्य विलोकयामः ॥ ५४ ॥

तथाहि

इन्द्रियाधीनमभ्यक्षमुत्पद्यते सन्निकृष्टे यथागोचरे जन्मिनाम् ।
मानसाभ्यक्षमप्येवमेवेत्यतस्तेन नैवाविनाभावसंवेदनम् ॥ ५५ ॥

इति

यदपि प्रभाकरमतमाविष्कुर्वन् शालिकः प्रमाणपारायणे ।

प्रभाकरानुसारिशालिकमतखण्डनम् ।

' मानत्वे संविदो बाह्यहानादानादिकं फलम् ॥
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ १ ॥'

इति कारिकां विवृण्वन् ' यदा मितिर्मानमिति भावसाधनं मानमाश्रीयते । तदा संविदेव प्रमाणम् । तस्याश्च व्यवहारानुगुणस्वभावत्वाद्धानादानोपेक्षाः फलम् । मीयते अनेनेति तु करणसाधने मानशब्दे आत्मनः सन्निकर्षान्मनोज्ञानस्य ज्ञायते ज्ञप्तिर्जन्यतेऽनेनेति व्युत्पत्तिबलात्प्रमाणत्वे तद्बलभाविनी फलसंविदेव बाह्यव्यवहारोपयोगिनी सती ' इति प्राह । यदपि च ।

' आपेक्षिकं च करणं मन इन्द्रियमेव वा ॥
तदर्थसन्निकर्षो वा मानं चेत्पूर्वकं फलम् ॥ १ ॥'

इति कारिकां व्याख्यायन् 'यदा तु साधकतमस्य करणत्वात्तमप्रत्ययार्थस्यवातिशयस्य बाह्यापेक्षत्वादालोकाद्यपेक्षं मन इन्द्रियमेव वा तस्य वा विषयसन्निकर्षस्तस्य चात्मनः

---

१ मालभारिणी । २ अत्र छन्दोभङ्गो दृश्यते तच्च लेखकप्रमादादिति मन्ये । अतः 'नियतैकान्त' इति युक्तं विभावयामि । ३ प्र. पं. प्र. ५ प. १ पृ. ६४ प. १

सन्निकर्षः प्रमाणम् । तदापि संविदेव फलम् । तदर्थं प्रवृत्तत्वात् साधनानाम् ' इत्याह तत्रात्ममनःसन्निकर्षस्येन्द्रियविषयसन्निकर्षस्येन्द्रियमनःसन्निकर्षस्य वा प्रामाण्यमेतेनैव सन्निकर्षप्रामाण्यपराकरणेन प्रत्यादिष्टम् । यच्च मनस इन्द्रियस्य वा प्रामाण्यमुक्तम् । तदपि पूर्वमेव वाचस्पतिमपहस्तयद्भिर्हेतुमात्रोक्तावपि यः साक्षादुपलब्धौ हेतुरिन्द्रियादिः स एव चेत् प्रमाणतयाभिप्रेतः सूक्ष्मदर्शिनोऽस्य तदा स्वपरव्यवसायिज्ञानमेव तथाभ्युपगन्तुमुचितमित्यादिना दत्तनिर्वचनम् । यदपि यदा मितिर्मानमिति भावसाधनं मानमाश्रीयते तदप्यस्य विशेषोत्प्रेक्षणैकबद्धकक्षस्याप्यत्यन्तमार्जवम् । प्रमितौ साधकतमत्वेन हि प्राप्तप्रमाणाभिख्ये प्रमाणे विप्रतिपत्तेस्तस्यैव स्वरूपं प्ररूपणीयं प्रामाणिकेन । तत्साध्यायास्तु प्रमितिरूपायाः क्रियायाः प्रामाण्यमुपदिश्यमानं कथं सङ्गच्छेत । कथं वा प्रमितिस्वरूपफलरूपां क्रियामेव प्रमाणत्वेन प्रतिपाद्य तस्या अपि हानोपादानोपेक्षारूपफलाभिधानं साधीयः । हानोपादानोपेक्षासु प्रमितेः साधकतमत्वाच्चेत् तर्हि त्यक्तमिदानीं मितिर्मानमिति भावसाधनो मानशब्द इति । मितेरपि हानादौ फले साधकतमतया करणत्वेन मानशब्दवाच्यत्वाभ्युपगमात् । एवमभ्युपगमे च न काचिदावयोर्विप्रतिपत्तिः । अस्माभिरपि स्वपरव्यवसायिनः संवेदनस्य हानादिफलसाधकस्य प्रमाणतया स्वीकृतत्वादिति ।

सन्निकर्षस्य नैवातश्चिन्त्यमानं कथञ्चन ।
गौणीं वृत्तिं परित्यज्य प्रामाण्यमुपपद्यते ॥ ५६ ॥
सुशिक्षितास्तु प्रतिपादयन्ति नैयायिकाः *स्वस्य रहस्यमेतत् ।*
प्रमासमुत्पादककारकाणां साकल्यमेवेह समस्तु मानम् ॥५७॥

तथा च सन्देहव्यभिचारशून्यवस्तूपलब्धिहेतुर्बोधाबोधस्वभावा सामग्र्येव प्रमाणम् । सामग्रीति कारकसाकल्यमिति चैक एवार्थः । प्रामाण्यसिद्धिश्चास्याः सामग्री प्रमाणमर्थप्रमितौ साधकतमत्वात् । यत्तु नैवं न तदेवं यथोमयाभिमतम् ।

सामग्रीप्रमाणमिति व्यवस्थापनम् ।

न चार्थप्रमितावसाधकतमा सामग्री ततः प्रमाणमित्यतोऽनुमानात् । न चात्र हेतोरसिद्धिः। फलोत्पादाविनाभावित्वभावाव्यभिचारित्वं हि साधकतमत्वम्। तच्च सामग्र्यंतर्गतस्य न कस्यचिदेकस्य वक्तुं शक्यते । सामग्र्यास्तु सुवचम्। सन्निहिता चेत्सामग्री सम्पन्नमेव फलमिति सैव साधकतमा। ननु प्रमामुपजनयतो मुख्यस्य प्रमातुः प्रमाविषयीभूतस्य मुख्यस्य प्रमेयस्य च फलोत्पादाविनाभावित्वभावमव्यभिचारित्वलक्षणसाधकतमत्वमस्त्येव । प्रमितिसम्बन्धमन्तरेण तयोस्तथात्वाभावात् । प्रमिणोतीति हि प्रमाता भवति । प्रमीयत इति च प्रमेयम् । न चानयोः प्रमाणतोपगता त्वेत्याभ्यां व्यभिचारः साधनस्येति चेत् । न व्यभिचारः । साकल्यप्रसादलब्धप्रमितिसम्बन्धनिबन्धनो हि प्रमातृप्रमेयधर्मास्त्यस्वरूपलाभः । साकल्यापाये च प्रमित्यभावाद्द्वीणे प्रमातृप्रमेये संपद्यते । एवं च साकल्यमन्तरेण यदि प्रमितिः कल्प्येत भवेद्व्यभिचारो नत्वसौ तथा दृश्यत इति। ननु यदि सामग्र्याः साधकतमत्वं स्यात्तदावश्यमस्याङ्करणविभक्तिनिर्देशो दृश्येत । नचैवम् । नह्येवं वक्तारो भवन्ति लौकिकाः सामग्र्या पश्याम इति किन्तु दीपेन पश्यामश्चक्षुषा वीक्षामह इत्याचक्षते । तन्न सूक्ष्मम् । सामग्री हि संहतिः सा च संहन्यमानव्यतिरेकेण न व्यवहारपदवीमवतरति । तेन सामग्र्या पश्याम इति न व्यपदेशः । यस्तु दीपेन्द्रियादीनां तृतीयया निर्देशः स फलोपजननाविनाभावित्वाख्यसामग्रीस्वरूपसमारोपनिबन्धनः । अन्यत्रापि च तद्रूपसमारोपणेन स्थाल्या पचतीति व्यपदेशो दृश्यत एव । ननु कर्तृकर्मापेक्षया करणसामग्री मध्यमाऽप्ययोश्च कर्तृकर्मणोः स्वरूपप्रध्वंसतोऽसम्भवात् तदपेक्षया कथं साकल्यस्य करणत्वमिति । एवं च प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृषु विधासु तत्त्वं परिसमाप्येत इति रिक्ता वाचोयुक्तिः । अयुक्तमेतत् । साकल्यमध्यपतितत्वेऽपि कर्तृकर्मणोः स्वरूपानपायात् । साकल्यं खलु सकलकारकाणां स्वकीयो धर्म्मो न च स्वकीयो धर्म्मः स्वरूपध्वंसाय जायते । साकल्यदशायामपि कारकाणां स्वरूपस्य प्रत्यभिज्ञायमानत्वा-

दिति कथंविधश्चतुष्टयप्रक्षयः । तथाच समाचष्ट भट्टजयन्तः पल्लवे-[1]

तत्रासन्दिग्धनिर्बाधवस्तुबोधविधायिनी ।
सामग्री चिदचिद्रूपा प्रमाणमभिधीयते ॥ १ ॥
फलोत्पादाविनाभावित्वभावाव्यभिचारि यत् ।
तत्साधकतमं युक्तं साकल्यान्न परञ्च तत् ॥ २ ॥
साकल्यात् सदसद्भावे निमित्तं कर्तृकर्म्मणोः ।
गौणमुख्यत्वमित्येवं न ताभ्यां व्यभिचारिता ॥ ३ ॥
संहन्यमानहानेन संहतेरनुपग्रहात् ।
सामग्र्या पश्यतीत्येवं व्यपदेशो न दृश्यते ॥ ४ ॥
लोचनालोकलिङ्गादेर्निर्देशो यस्तृतीयया ।
स तद्रूपसमारोपाद्[2]पथा पचतीतिवत् ॥ ५ ॥
तदन्तर्गतकर्मादिकारकापेक्षया च सा ।
करणं कारकाणां हि धर्म्मोऽसौ न स्वरूपवत् ॥ ६ ॥
सामग्र्यन्तःप्रवेशेऽपि स्वरूपं कर्तृकर्म्मणोः ।
फलवत् प्रतिभातीति न चतुष्टं विनंक्ष्यति ॥ ७ ॥' इति ।

ततः साकल्यमेव प्रमाणं न पुनर्ज्ञानं तस्य फलरूपत्वात् । फलस्य च प्रमाणत्वमनुपपन्नं तस्य प्रमाणात् पृथग्भूतत्वात् । अथ पृथग्भूतफलोत्पादकमपि स्वकीयहेवाकात् ज्ञानरूपमेव प्रमाणमिष्यते । तदा शब्दलिङ्गादेः समस्तजनस्वीकृताज्ञानस्वरूपस्याप्रमाणत्वप्रसङ्गः । तस्मात् ज्ञानमपि साकल्यान्तर्गतमेव विशेषणज्ञानभेव विशेष्यप्रत्यक्षे लिङ्गज्ञानभिव लिङ्गिज्ञानानुमाने सादृश्यदर्शनभिवोपमाने शब्दज्ञानमिव शाब्दार्थज्ञाने प्रमाणतामास्तिघ्नुते, एवं च—

---

१ अधुना मुद्रितायां न्यायमञ्जर्यामिदं नोपलभ्यते । न्यायमञ्जर्येव पल्लवसंज्ञया श्रीवादिदेवसूरिभिः संमन्यते । २ उषाशब्दोऽग्निवाचकः । 'उष दाहे' इत्यस्मात्पाणिनीयधातोर्निष्पन्नः भ्वा. ग. धा. ६९७.

बाधं नैव समाश्रिता कथमपि श्लिष्टा न या शङ्कया
तामर्थप्रमितिं सदा विदधती बोधेतरात्मस्थितिः ।
सामग्री भवति प्रमाणमनघं नैयायिकानां मते
ज्ञानं केवलमेव ये पुनरमी प्राहुर्न ते तार्किकाः ॥ ५८ ॥

कारकसाकल्यमहो जल्पन्तोमी प्रमाणमिति निपुणाः । ५
वैकल्यं किमपि गताः स्मरन्ति यन्नैव नीतिमार्गस्य ॥ ५९ ॥

तथाहि यत्तावत्कथितमर्थप्रमितौ साधकतमत्वादिति साधनस्या-
सिद्धताध्वंसनाय फलोत्पादाविनाभावित्वभावा-
नैयायिकोक्तस्य सामग्री-प्रामाण्यखण्डनस्य खण्डनम् । व्यभिचारित्वं हि साधकतमत्वमिति तत्र फलो-
त्पादेन विना सामग्री न भवतीति कोऽर्थः । किं १०
फलोत्पादेन विना सामग्री नोत्पद्यते पावकेनेव विना धूमः । किंवा
फलोत्पादेन विना सामग्री न सत्तामनुभवति यथा वृक्षत्वेन विना शिंश-
पात्वम् । यद्वा फलोत्पादेन विना फलमनुत्पाद्य सामग्री नावतिष्ठते
यथा सातिशयोन्नतिशाली जलभृद्घर्षमकृत्वा । न तावदाद्यः पक्षः पेशलः
परम्पराश्रयपराहतत्वात् उत्पन्नायां हि सामग्र्यां फलोत्पादः समुत्पन्ने १५
च फले सामग्री समुत्पत्स्यत इति । नापि द्वितीयः । असिद्धत्वात् ।
यदि हि वृक्षत्वेन शिंशपात्वस्येव फलोत्पादेन सामग्र्याः सदैव सहचा-
रित्वं स्यात् द्वितीयविकल्पपरिकल्पना । न चैवम् । तत्त्वे हि फलादि-
व्यपदेश एव न भवेत् समकालभाविनि व्यापाराभावात् । तृतीयाविक-
ल्पेऽप्यर्थप्रमितिस्वरूपस्य फलस्याव्यवधानेनोत्पादिकायाः सामग्र्याः २०
साधकतमत्वमुच्यते व्यवधानेन वा । आद्यकल्पे हेतोरसिद्धिः । सामग्र्याः
सकाशादर्थप्रमितेरव्यवधानेनोत्पादायोगात् । ज्ञानेन तत्र व्यवधिसम्भ-
वात् । न च किमनेनान्तराले गलितप्रमाणप्रसादेन ज्ञानेन परिकल्पि-
तेनेत्यभिधानीयम् । तस्योपयोगरूपभावेन्द्रियस्वभावस्य साक्षात्फले व्याप्रि-
यमाणस्य यदसन्निधान इत्यानुद्यमानतः पूर्वं प्रसाधितत्वात् । अथ २५
व्यवधानेन फलोत्पादिकायाः सामग्र्याः साधकतमत्वमत्र विवक्षितम् ।

तत्किं मुख्यमौपचारिकं वा भवेत् । न तावन्मुख्यम् । अन्यव्यवहित-व्यापारस्य कारकस्य मुख्यकरणव्यवहारागोचरत्वात् । तथाहि यद्यत्रान्येन व्यवहितं तत्तत्र न मुख्यसाधकतमत्वव्यवहारगोचरः । यथा दारुदारणकर्म्मणि कुठारेण व्यवहितो लोहकारः । अर्थप्रमितौ विज्ञानेन व्यवहिता च सामग्रीति । अथौपचारिकं सामग्र्याः साधकतमत्वं साधनत्वेनोपदिष्टम् । मुख्यं ह्यर्थप्रमितौ साधकतमत्वं ज्ञानस्य । तस्य जनकत्वात्तु सामग्र्यामपि तदुपचर्यते । कारणे कार्योपचारात् तण्डुलान्वर्षति पर्जन्य इतिवत् । एवं तर्हि तस्याः प्रामाण्यमप्यौपचारिकमेव सिद्ध्येत् । न स्वरूपचरितधूमत्वादतिसमुद्भूरसमीरसमुत्पाटितपारावतपतत्रधूसरधूलिपटलीविशेषादनुपचरितचित्रभानोः कणस्यापि प्रसिद्धिः । अथौपचारिकमेव प्रामाण्यं सामग्र्या सिषाधयिषितम्,

साधु साधु सुधियाऽवधारितं यत्समागतभिहाभ्वनि क्षणात् ।
एवमेव तव जल्पतः सखे वारयन्तु दुरितानि देवताः ॥ ६० ॥

अव्यवहितव्यापारत्वेन साधकतमत्वाज्ज्ञानं प्रमाणं तद्धेतुत्वात्तु सामग्र्यपि प्रमाणमिति हि को नाम प्रामाणिको नाभ्युपैति । एवं च प्रतिज्ञायाः सिद्धसाध्यतावतारः । अपि च कारकसाकल्यस्य सद्भावेऽपि क्वचित्प्रमारूपं फलमुत्पद्यमानं नावलोकितमिति कुतोऽस्य कुत्रापि साधकतमत्वं सिद्ध्येत् । आः किमिदमदृष्टपूर्वमुच्यते यत्साकल्यसद्भावेऽपि न प्रमोत्पत्तिरिति । अलमावेगेन । यतः पश्य वयस्य विहायस्येव तावत्तत्सद्भावेऽपि न प्रमोत्पत्तिरिति । नन्वसिद्धः कारकसाकल्यसद्भावस्तत्रेति चेत् कुतोऽसिद्धः । प्रमातुरवहितस्य प्रमेयस्याऽव्यवहितस्य प्रमेयेण साकं हृषीकसन्निकर्षस्य च सद्भावात् । ननु गगने योग्यता नास्ति तत्कुतस्तत्र तत्साकल्यस्यावैकल्यमिति चेत् । नैतद्युक्तम् । विचारितत्वात्पूर्वं योग्यतायाः । एवं चासिद्धं साधकतमत्वं सामग्र्याः । ततश्च यदसिद्धताप्रतिबन्धकमभिदधे तच्च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य

---

१ हृषीकं—इन्द्रियम् ।

वक्तुं शक्यत इत्यादि । तदपास्तम् । यदपि मुख्यप्रमातृप्रमेयाभ्यां व्यभिचारमाशङ्क्य साकल्यप्रसादलब्धप्रमितिसम्बन्धनिबन्धनो हि प्रमातृप्रमेययोर्मुख्यस्वरूपलाभ इत्याद्यभाणि तदपि न भणनीयम् । अनवधानव्यवधानपराधीने हि प्रमातृप्रमेये गौणस्वरूपे सती न प्रमाणमुपजनयत इति प्रमोत्पत्त्यर्थं स्वस्य प्रमेयस्य च मुख्यं ह्यवधानाव्यवधानरूपम्वरूपं प्रार्थयन्ते प्रमातारः । यदा तु प्रमासम्बन्धनिबन्धनो मुख्यस्वरूपलाभः । तदा पूर्वं गौणाभ्यामपि प्रमातृप्रमेयाभ्यां सकाशात् प्रमा समजनि । संजातायां च प्रमायां किमनेन तत्सम्बन्धनिबन्धनेन मुख्यस्वरूपलाभेन कृतक्षौरस्य नक्षत्रपरीक्षणप्रायेण पश्चात्कर्त्तव्यम् । प्रमित्यर्थं हि प्रार्थ्यतेऽसौ सा चैनमन्तरेणापि समुत्पन्नैव । भवतु वा प्रमितिसम्बन्धनिबन्धनः प्रमातृप्रमेययोर्मुख्यस्वरूपलाभः । तथापि तयोः प्रमोत्पत्तौ व्यापारोऽस्ति न वा । न तावन्नास्ति । तयोः प्रमातृप्रमेयस्वरूपत्वाभावप्रसङ्गात् न खलु परश्वधादिकं छिदायामव्यापारयन्नेव देवदत्तच्छेदको नाम । नापि द्वैधीभावमननुभवदेव पादपादिकं छेद्यम् । अथास्ति तयोस्तत्र व्यापारः । तर्हि यत्तस्यामवस्थायां तयोः स्वरूपं तेन कलिते प्रमातृप्रमेये फलोत्पादाविनाभाविस्वभावाव्यभिचाररूपसाधकतमत्वसुभगे भवतो न च तयोः प्रमाणतेति हेतोः स्पष्टस्ताभ्यां व्यभिचारः । यदप्यवादीः सामग्री हि संहतिरित्यादि । तत्र यदि संहन्यमानव्यतिरेकेण व्यवहारपदवीमनवतीर्णायाः सामग्र्याः सामग्र्या पश्याम इति व्यपदेशो नास्ति । माभूत् । यस्तु दीपेन्द्रियादीनां तृतीयया निर्देशः स फलोपजननाविनाभावित्वाख्यसामग्रीस्वरूपसमारोपनिबन्धन इति तु दुश्चरितं कथं प्रस्थापयिष्यते । मुख्यत्वेन हि क्वचित्किञ्चिन्निश्चितं सदन्यत्र समारोप्यत इति तावदशेषवादिपरिषदामुपनिषत्[1] । अत्र तु सामग्र्यां करणविभक्तिमप्रयुञ्जानैर्जनैर्न फलोपजननाविनाभावित्वं तत्स्वरूपं कदाचिन्निश्चितमिति कथं दीपादौ

[1] उपनिषत्-रहस्यम् ।

पक्षैकदेशं गदितानुमानयुग्मे तदध्यक्षमपाकरोति ।
एवं च मुञ्च व्यवसायिमानं संवेदनं सर्वमिमां दुराशाम् ॥ ६९ ॥
अहो महासाहसमस्य भिक्षोर्यत्स्वीयशस्त्रस्य बलं न वेत्ति ॥
स्पर्द्धानुबन्धादथ च त्वरावान् पक्षैकदेशक्षपणाय मुग्धः ॥७०॥

तथाहि । यदवादि स्वसंवेदनप्रत्यक्षेण तस्य कल्पनाशून्यस्यैवानुभूयमानत्वादिति । तत्कोऽपानप्रत्यायनीयम्[1] । नीलमहं विलोकयामीत्युल्लेखशेखरं व्यवसायात्मकमेव हि प्रत्यक्षं सर्वदा सर्वत्र सर्वैरनुभूयते । यदप्यवादि प्रत्यक्षस्य शब्दविकलनीलाद्यर्थसामर्थ्येनात्मलाभादिति । तदपि नावदातम् । नहि निःशब्दकार्थजनितमित्येतावतैव ध्वनिं विना कृत्यमभिधातुं पार्यते । अन्यथा ह्यचेतनवस्तुसमुत्पादितमित्यचेतनमपि तद्भवेत् ।

प्रत्यक्षस्य निर्विकल्पकत्वमिति बौद्धतमस्य खण्डनम् ।

अथ चेतनस्वरूपमनस्कारसहितादर्थात् समुत्पन्नं विज्ञानमतो नाचेतनं तद्भवितुमर्हतीति प्रतिपादयेथाः । तथा सत्यभिलापसंपृक्तमनस्कारव्यापारात्साभिलापमपि तत्किन्न स्यात् । यदपि स्वलक्षणनिनादयोरित्यादिना वृत्तेन तादात्म्यतदुत्पत्तिसम्बन्धनिराकरणद्वारेणार्थे प्रतिभासमाने शब्दाप्रतिभासादविकल्पकत्वं प्रत्यक्षस्य प्रत्यपादि । तदप्यसत् । तादात्म्यतदुत्पत्तिसंम्बन्धविधुराणामपि परस्परं बहूनामर्थानां युगपदेकत्र ज्ञाने प्रतिभासनात् । यच्चोक्तं यदि जनकनीलाद्यर्थोपयोगेऽपीन्द्रियजं ज्ञानं तमर्थं न परिच्छिन्द्यादित्यादि सुषुप्तप्रायं जगज्जायेतेति पर्यवसानम् । तदपि सकलमफलम् । भवत्पक्षेऽपि समानत्वात् । तथा हि स्वलक्षणगोचरे निर्विकल्पकप्रत्यक्षे समुत्पन्नेऽपि न यावद्विधिनिषेधद्वारा पश्चाद्भाविविकल्पयुग्मं समुल्लसति । न तावदिदं नीलं नेदं पीतमिति इदन्तयाऽनिदन्तया वा प्रतिनियतपदार्थव्यवस्थानमास्थीयते **तथागतैः** **'यत्रैव जनयेदेनां तत्रैवाऽस्य प्रमाणता'** इति वचनात् उत्पन्नस्यापि

1 शपथेन विभावनीयम् ।

निर्विकल्पकस्य व्यवहारं प्रत्यनुत्पन्नप्रायत्वात् । तच्च व्यवस्थापकं प्रत्यक्षपृष्ठभाविविकल्पयुगलकं प्रतिपत्तुः प्राक्प्रवृत्तसंकेतकावसरसमवधारितं शब्दसामान्यमनुस्मरत एव भवितुमर्हति । शब्दसामान्यस्मरणहेतुश्च वासनारूपः संस्कारः कुतः प्रबुध्यत इति अभिधातव्यम् । यदि तादृशार्थदर्शनादित्यभिधत्से । तदसत् । तदपि हि दर्शनं निर्विकल्पकत्वेनार्थान्न विशिष्यते । ततः कथं शब्दसामान्यगोचरस्मरणहेतुभूतं संस्कारं तत्प्रबोधयेत् । अप्रबुद्धः संस्कारः कथं स्मरणमुत्पादयेत् । अनुत्पन्नं स्मरणं कथं शब्दं योजयेत् । अयोजिते शब्दे कथमर्थो विकल्प्येत । अविकल्पितोऽर्थः कथं व्यवहारवीथीमवतरेत् । तामनवतीर्णो नादृष्टाद्विशिष्येत तदविशिष्टश्च सुषुप्तता जगतः सूचयतीति सर्वं त्वत्पक्षेऽपि समानम् । तस्माद्यथा स्वात्मनिश्चयाभावतः स्वयं प्रतीतमपि निर्विकल्पकज्ञानं कयाचिदचिन्त्यया शक्त्या संस्कारप्रबोधद्वारेण पश्चाद्धाविविधिप्रतिषेधविकल्पयुगलमुत्थाप्य स्वकीयव्यापारं कतिपयांशविषयमभिलापयति । तथार्थोऽपि यद्यप्रतीत एव स्वयं तथास्वभावत्वान्नयनादिसामग्यन्तःपातित्वेन संकेतकालभाविस्वाभिलापसामान्यविषयात्मसंस्कारबोधद्वारेणात्मविषयमभिलापं संसृष्टसंवेदनभाविर्भावयेत्तदा नातिमात्रमसमंजसमालोकयामः । नन्वेवं प्रत्यक्षस्य सविकल्पतां समर्थयमानैर्भवद्भिः शब्दब्रह्मवादिभिरिव शब्दसंसृक्तमेव प्रत्यक्षं समर्थितं स्यात् । भैवं वोचः ।

यतः—

शब्दब्रह्मास्त्यपक्षादपि तदतितरामक्षमं क्षीणबोधै-
र्बुद्धेर्यत्प्रोच्यते स्म व्यवसितिरहितं सर्वथाऽध्यक्षमानम् ।
एतत्सन्दर्शनार्थं निबिडपरिचयः कल्पितोऽध्यक्षबोधे
तत्त्वन्यायेन नासौ भवति करणजे वेदने स्पष्टरूपे ॥ ७१ ॥

स्वत एव हि व्यवसायात्मकं प्रत्यक्षं न पुनः शब्दसम्पर्कापेक्षया । तदपेक्षायां हि वर्णपदव्यवसायः कथं नाम स्यात् । तद्व्यवसायेऽपि परस्य

नाम्नोऽवश्यं स्मरणेनानवस्थोपनिपातात् । नामान्तरस्मरणमन्तरेण स्वत एव वर्णपदव्यवसाये तु वस्तुव्यवसायोऽपि स्ववाचकनामस्मरणमन्तरेण स्वत एवास्तु न कार्यं शब्दसम्पर्केण एवं च शब्दसम्पर्करहितमपि विशदसंवेदनम् । यतः, सविधवर्तिनं निजांशव्यापिनं कालान्तरस्थायिनं स्थगितप्रतिक्षणपरिणाममलक्ष्यमाणपरमाणुपरिमाणं वस्त्वन्तरैः सह सदृशविसदृशाकारं कुम्भादिकं भावमवभासयतीति कृत्वा सविकल्पकमित्यभिधीयते । पराभिमतायःशलाकाकल्पक्षणक्षयिपरमाणुलक्षणग्रहणनिपुणनिर्विकल्पकप्रत्यक्षप्रतिक्षेपार्थं प्रत्यक्षस्य शब्दसम्पर्कयोग्यगोचरतासंदर्शनार्थं च । एवं चाऽध्यक्षविषयीकृते वस्तुनि व्यवहाराः संज्ञासंज्ञिसंबन्धग्रहणादयस्तत्त्ववृत्त्यैव घटन्त इति मुख्यक्तमावेदितं भवति । अन्यथा विकल्पानुत्पादेन निखिलव्यवहारविलयप्रसक्तिः । तथा हि भवदभिमतं निर्विकल्पकदर्शनं परिस्फुटप्रतिभासमपि स्मृतिहेतुभूतं संस्कारं कर्तुं न समर्थम् । तदुत्तरसमयभावि च तादृशपदार्थदर्शनं प्राक्तनसंस्कारप्रबोधनं विधातुं न क्षमम् । यतः सामान्यविकल्पोत्पादद्वारेणास्खलितं निखिलो व्यवहारः प्रवर्त्तते । क्षणिकत्वनैरात्म्यादिषु सदैव निर्विकल्पप्रत्यक्षदृष्टत्वेन स्वीकृतेष्वपि पश्चाद्भाविसामान्यविकल्पोत्पत्त्या व्यवहारप्रवृत्तेरनुपलम्भात् । तस्माद्यत्र कुत्रचिदर्थांशे पाश्चात्यव्यवहारस्य प्रवृत्तिस्तत्र प्राग्भाविसंवेदनं निश्चायकमङ्गीकर्त्तव्यम् । इतरथा क्षणिकत्वाद्यंशवन्निखिलांशेषु व्यवहारः समुच्छिद्येतेति ।

हे शौद्धोदनिशिष्य सम्प्रति ततः सद्युक्तिभिः प्रोज्झ्यताम्
प्रत्यक्षं खलु निर्विकल्पकमिति त्यक्त्वा दुराशां त्वया ।
निःशेषव्यवहारकारणतया सर्वत्र लब्धास्पदम्
विज्ञानं व्यवसायसुन्दरमिदं निःसंशयं मन्यताम् ॥ ७२ ॥

किञ्च करणव्यापारानन्तरं स्वपरव्यवसायात्मनो नीलादिविकल्पस्यैव वैशद्येनानुभवात्कौतस्कुती निर्विकल्पककल्पना । न चेदं वाच्यं युगपद्वृत्तेराशुवृत्तेर्वा विकल्पाविकल्पयोरेकत्वाध्यवसायाद्विकल्पे वैशद्यप्रती-

तिरिति । विकल्पव्यतिरेकेणापरस्याप्रतीयमानत्वात् । पार्थक्येन हि प्रतीतावपरत्रापरस्यारोप उपपन्नश्चैत्रे मैत्रारोपवत् । न चास्पष्टाभो विकल्पः स्पष्टाभं च निर्विकल्पकं प्रत्यक्षतः प्रतीतम् । तथापि परिस्फुटत्वेनानुभूयमानस्वरूपं विकल्पं परित्यज्याननुभूयमानस्वभावं निर्विकल्पकं परिकल्पयन् कथं नाम परीक्षकः स्यात् अनवस्थाप्रसक्तेः । निर्विकल्पकस्वभावादप्यन्यादृक् स्वभावं प्रत्यक्षमित्यपि कल्पनापत्तेः । युगपद्वृत्तेश्चाभेदाध्यवसाये स्वीक्रियमाणे यदा—

लास्यं लोचनगोचरे रचयतस्ताम्बूलकर्पूरयोः
स्वादं स्वादयतः स्फुटं सुमनसामाजिघ्रतः सौरभम् ।
तूर्यं संपूरयतो मृदङ्गसुभगं सङ्गीतकं शृण्वतः
किञ्चिच्चिन्तयतो भवन्ति युगपज्ज्ञानानि षट् कस्यचित् ॥७३॥

तदा रूपादिज्ञानषट्कस्यापि भवन्मते सहोत्पत्तेरभेदाध्यवसायः किं न भवेत् । अथ भिन्नविषयत्वात्तेषां तदभावः । तर्हि प्रकृतयोरपि स न स्यात् क्षणसन्तानविषयत्वेन निर्विकल्पकसविकल्पकयोरपि भिन्नविषयत्वस्याविशेषात् । आशुवृत्तेः पुनरेकत्वाध्यवसाये जिननमनमित्यादावपि नकारयोरेकत्वाध्यवसायप्रसङ्गः । यदि च विकल्पाविकल्पयोरप्रतीयमानोऽपि भेदस्त्वया स्वीक्रियते । तर्हि कापिलपरिकल्पितः कथं बुद्धिचैतन्ययोर्भेदः परीक्ष्यते । अप्रतीयमानत्वाविशेषात् । अथ विकल्पाविकल्पयोः सादृश्यादभिभवाद्वा भेदेनानुपलम्भः प्रतिपाद्यते भोस्तार्किक किं कृतमनयोःसादृश्यम् । विषयाभेदकृतं ज्ञानरूपताकृतं वा । न तावद्विषयाभेदकृतम् । सन्तानेतरविषयत्वेनानयोर्विषयाभेदासिद्धेः । नापि ज्ञानरूपताकृतं सादृश्यमभेदाध्यवसायनिबन्धनम् । एवं सति नीलपीतादिज्ञानानामपि भेदेनोपलम्भो न भवेत् । ज्ञानरूपताकृतसादृश्यतस्तत्राप्यभेदाध्यवसायप्रसक्तेः । अथाभिभवादनयोर्भेदेनानुपलम्भः प्रतिपाद्यते । ननु केन कस्याभिभवः । तिग्मभानुना विभावरीभुजंगस्येवेति चेत् , ननु विकल्पस्याप्यविकल्पकेनाभिभवः कस्मान्न भवति ।

बलीयस्त्वादस्येति चेत् कुतोऽस्य बलीयस्त्वम् । बहुविषयत्वान्निश्चयात्मकत्वाद्वा । प्रथमपक्षोऽनुपपन्नः, निर्विकल्पकविषय एव विकल्पस्य प्रवृत्तेः स्वीकरणात् । इतरथा ह्यगृहीतार्थग्राहित्वेन तस्य प्रमाणान्तरत्वप्रसक्तिः । द्वितीयपक्षेऽपि स्वरूपे निश्चयात्मकत्वं विकल्पस्यार्थरूपे वा । न तावत् स्वरूपे, सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमित्यस्य विरोधात् । नाप्यर्थरूपे, विकल्पस्यैकस्यैकस्वरूपार्थरूपे अपेक्ष्य निश्चयानिश्चयस्वभावद्वयप्रसङ्गात् । तच्च स्वभावद्वयं विकल्पाद्यदि सर्वथा भिन्नम् तदा समावयादेरनङ्गीकरणात्सम्बन्धासिद्धेर्बलवान् विकल्पो निश्चयात्मकत्वादित्यस्यासिद्धिः । अथ तत्सर्वथाप्यभिन्नं विकल्पात् तर्हि विकल्प एव भवेन्न स्वभावद्वयं तस्य तदन्तर्निगीर्णत्वात् । अथ कथमपि तादात्म्यान्निश्चयानिश्चयस्वरूपसाधारणमात्मानं प्रतिपद्यते विकल्पः, तर्हि स्वरूपेऽपि निश्चायकोऽसौ स्यात्, अन्यथा निश्चयस्वरूपेण तादात्म्यविरोधापत्तेः, न च स्वरूपमनिश्चिन्वन्विकल्पोऽर्थनिश्चायको युक्तोऽन्यथा ह्यगृहीतस्वरूपमपि ज्ञानमर्थग्राहकं भवेत् । तथा च ' अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ' इति वचः कीर्त्तेः कीर्त्तिशेषं स्यात् । कश्चानयोरेकत्वाध्यवसायः किमेकविषयत्वमन्यतरेण वाऽन्यतरस्य विषयीकरणमपरत्रेतरस्याध्यारोपो वा । न तावदेकविषयत्वम् , सामान्यविशेषविषयत्वेनानयोर्भिन्नविषयत्वात् । दृश्यविकल्पयोरेकत्वाध्यवसायादभिन्नविषयत्वमित्यपि न सङ्गतम् । एकत्वाध्यवसायो हि दृश्ये विकल्प्यस्याध्यारोप उच्यते। स च गृहीतयोरगृहीतयोर्वा दृश्यविकल्प्ययोर्भवेत् । न तावद्गृहीतयोः । भिन्नस्वभावतया प्रतिभासमानयोः स्तंभकुम्भयोरिवैकत्वाध्यवसायायोगात् । न च तयोर्ग्रहणं दर्शनेन । तस्य विकल्पाविषयत्वात् । नापि विकल्पेन, तस्य दृश्यागोचरत्वात् । नापि ज्ञानान्तरेणोभयोरपि ग्रहणम् । तस्यापि निर्विकल्पत्वे विकल्पात्मकत्वे वा प्रोक्तदोषानतिवृत्तेः । नाप्यगृहीतयोः

---

१ ' एकस्यैव स्व '-इति म. म. पुस्तकयोः पाठः ।

स सम्भवत्यतिप्रसक्तेः। सादृश्यनिबन्धनश्चारोपः समुपलब्धः वस्त्ववस्तुनोश्च दृश्यविकल्प्ययोः कल्पद्रुमनभःकुसुमयोरिव सादृश्याभावान्नासावुपपन्नः। तस्मान्नैकविषयत्वमेकत्वाध्यवसायः। अन्यतरेणान्यतरस्य विषयीकरणमपि समानकालभाविनोर्निर्विकल्पकसविकल्पकयोरपारतन्त्र्यादघटमानमेव । असमानकालभाविनोस्तु तयोः सुतरामन्योन्यं विषयीकरणाभावः । क्षणिकत्वेनैकस्योत्पत्तिसमयेऽपरस्यासम्भवात् । अपरत्रेतरस्याध्यारोपलक्षणोऽप्येकविषयत्वाध्यवसायोऽसम्भवी । तथाहि किं विकल्पे निर्विकल्पस्याध्यारोपो निर्विकल्पके विकल्पस्य वा । प्रथमपक्षे विकल्पव्यवहारच्छेदः समस्तज्ञानानां निर्विकल्पत्वप्रसक्तेः । द्वितीयपक्षे निर्विकल्पकवार्त्ताच्छेदः । सकलज्ञानानां सविकल्पकत्वप्राप्तेः। अन्यच्च विकल्पे निर्विकल्पकधर्मारोपाद्वैशद्यव्यवहारवन्निर्विकल्पके विकल्पधर्मारोपादवैशद्यव्यवहारः किं न भवेत् । अथ निर्विकल्पकधर्मेण वैशद्येन विकल्पधर्मस्यावैशद्यस्याभिभूतत्वात् कथं निर्विकल्पके तस्यारोपणेनावैशद्यव्यवहार इत्यभिधीयते । तर्हि विकल्पधर्मेणावैशद्येन निर्विकल्पकधर्मस्य वैशद्यस्याभिभूतत्वात्कथं तस्यारोपणेन विकल्पे वैशद्यव्यवहार इत्यपि व्याक्रियताम् । भवतु वा निर्विकल्पकधर्मेणैव विकल्पधर्मस्याभिभवस्तथापि तस्य कारणं वाच्यम्। समसमयभावित्वमिति चेत्,तर्हि गोदर्शनसमये भवतामभिमते तुरङ्गमविकल्पे स्पष्टप्रतिभासो भवेत् । समसमयभावित्वविशेषात् । अथानयोर्भिन्नविषयत्वान्नास्पष्टप्रतिभासमभिभूय तुरङ्गमविकल्पे स्पष्टतया प्रतिभासः। तर्हि शब्दस्वलक्षणं प्रत्यक्षेणानुभवता भवता तद्विषयं क्षणक्षयानुमानं स्पष्टमनुभूयतामभिन्नविषयत्वाविशेषान्नीलादिविकल्पवत्। अथ भिन्नसामग्रीजन्यत्वादनुमानविकल्पस्य प्रत्यक्षेणावैशद्यलक्षणस्तद्धर्मो नाभिभूयते, तर्हि सकलविकल्पानां विशदावभासिना स्वसंवेदनप्रत्यक्षेणैकसामग्रीसमुत्पाद्येनाभिभवप्रसक्तिः । अथ तत्रैकसामग्रीसमुत्पाद्यत्वं नेष्यते । विकल्पानां वासनासमुत्पाद्यत्वात् । स्वसंवेदनस्य तु संवेदनमात्रप्रभवत्वात् । तर्हि नीलादिविकल्पस्यापि प्रत्यक्षेणाभिभवाभाव-

प्रसङ्गः । तत्रापि भिन्नसामग्रीसमुत्पाद्यत्वाविशेषात् । वासनाजन्यो हि नीलादिविकल्पश्चक्षुरादिसामग्रीसमुत्पाद्यं पुनर्नीलादिप्रत्यक्षम् । अपि च विकल्पनिर्विकल्पकयोरेकत्वमध्यवस्यति किं निर्विकल्पकं विकल्पो वा । न तावन्निर्विकल्पकं, तस्याध्यवसायशून्यत्वादितरथा ५ भ्रान्तत्वप्रसक्तिः । नापि विकल्पस्तेन निर्विकल्पकस्याविषयीकरणात् । अन्यथा तस्य स्वलक्षणगोचरताप्रसङ्गात्, ' विकल्पोऽवस्तुनिर्भासात् ' इति वचो विरुद्ध्यते । न चाविषयीकृतस्यान्यत्रारोपो युज्यते । नह्यन्यत्राप्रतिपन्नपञ्चाननः क्वापि शौर्यादिगुणग्रामभाजि पुरुषविशेषे पञ्चाननत्वमध्यारोपयति । यच्चोच्यते संहृतसकलविकल्पावस्थायां रूपादि- १० दर्शनं निर्विकल्पकं प्रत्यक्षमनोऽनुभूयते ।

तदुक्तम् ।

' संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना ।
स्थितोऽपि चक्षुषा रूपमीक्षते साक्षजा मतिः ॥ १ ॥'

सर्वतः सर्वस्माद्विकल्पार्थात् । चिन्तां कल्पनाविषयिणीम् । १५ प्रतिसंहृत्य व्यावृत्य । स्तिमितेनैकार्थाप्रसक्तया निष्प्रकम्पेन । अन्तरात्मना चित्तावस्थाविशेषेण । स्थितो युक्तः प्रमाता यच्चक्षुषा रूपमीक्षते यच्चक्षुषा करणभूतेन रूपदर्शनं सा तादृश्यक्षजा मतिः प्रत्यक्षा प्रसिद्धा । तथा ।

' प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।
२० प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः' ॥ इति ॥

एतदपि प्रलापमात्रम् । तस्यामवस्थायां सन्मात्रग्राहिदर्शनसद्भावेन विशेषावभासिनो विज्ञानस्यैवाभावात् । किञ्च तुरङ्गं विकल्पयतो गोदर्शनावस्थायां त्वदभ्युपगतायां गोपिण्डसाक्षात्कारिणः प्रत्यक्षस्य निश्चयात्मकत्वमेवोपपद्यते । अनिश्चयात्मकत्वेऽप्रत्यक्षं स्वीक्रियत एव । २५ गोरित्याद्यभिधानोल्लेखी तु विकल्पः पराक्रियते ।

हंहो सखे सौगत साधु साधु सम्बुद्धयसे किञ्चन बोध्यमानः ।
यदत्र मुक्त्वा मतपक्षपातं प्रतीतिमार्गं समुपागतोऽसि ॥ ७४ ॥

एवं हि त्वया वदता न किञ्चित् प्रतिकूलमनुशीलितमस्माकम् । यतो नैव सविकल्पप्रत्यक्षाणां नामसंश्रयता स्वरूपमिति वयं साक्षिरामहे । समारोपपरिपन्थिम्पष्टग्रहणस्वलक्षणत्वात्तेषाम् । न चानिश्चयात्मनः प्रामाण्यं संगच्छते । गच्छत्तृणस्पर्शादिसंवेदनस्यापि प्रमाणत्वप्रसक्तेः । निश्चयहेतुत्वान्निर्विकल्पकस्यापि प्रामाण्यमित्यप्यशिक्षितलक्षितम् । संशयादिविकल्पजनकस्यापि प्रामाण्यप्राप्तेः । स्वलक्षणानध्यवसायित्वात् संशयादिविकल्पानां न यथोक्तदोषानुषङ्ग इति यदुच्यते तदितरत्रापि तुल्यम् । न हि नीलादिविकल्पोऽपि स्वलक्षणाध्यवसायी । तदनालम्बनस्य निर्विकल्पकस्याविषयीकरणादध्यवसायित्वविरोधात् । तथाहि यद्यनालम्बते न तत्तदध्यवस्यति यथा घटज्ञानं पटम् । नालम्बते च नीलादिविकल्पः स्वलक्षणमित्यपि । मनोराज्यादिविकल्पस्तदनालम्बनः कथं तदध्यवसायीत्यपि न वाच्यम् । मनोराज्यादिविकल्पस्यापि कथञ्चित्सत्यराज्यादिगोचरत्वेन तद्ग्राहकत्वभावताभ्युपगमात् । न च निर्विकल्पकस्य विकल्पोत्पादकत्वं घटते । स्वयमविकल्पत्वादर्थस्वलक्षणवत् विकल्पोत्पादनसामर्थ्याविकल्पत्वयोरर्थस्वलक्षणे परस्परं विरोधस्य त्वदभिप्रायेण प्रतीतेः । अथ विकल्पवासनां सहकारिणीमपेक्ष्य निर्विकल्पकमपि प्रत्यक्षं विकल्पोत्पादनसमर्थमपि स्वीक्रियते । हन्त तर्हि तथाविधसामर्थ्यसमन्वितोऽर्थ एवास्तु किमन्तर्गडुना निर्विकल्पकेन । अथाज्ञातोऽर्थः कथं विकल्पस्य जनकोऽतिप्रसङ्गात् । ननु दर्शनमपि कथमनिश्चयात्मकं सद्विकल्पजनकमित्यपि समानम् । तस्यानुभूतिमात्रेण जनकत्वे नीलादाविव क्षणक्षयादावपि विकल्पोत्पत्तिप्रसक्तिः । यत्र दर्शनं विकल्पवासनायाः प्रबोधकं तत्रैव विकल्पजनकमित्यपि न यौक्तिकम् । तस्यानुभवमात्रेण

१ ' संश्रयतां ' इति म. भ. पुस्तकयोः पाठः । २ ' तत् ' इत्यधिकं भ. पुस्तके । ' तदध्यवसायित्व ' इति म. पुस्तके पाठः ।

तत्प्रबोधकत्वे क्षणक्षयादावपि तत्प्रबोधकत्वानुषक्तेः । तत्राभ्यास-प्रकरणपाटवार्थित्वाभावान्न दर्शनं वासनायाः प्रबोधकमिति चेत् । ननु कोऽयमभ्यासो नाम । भूयो दर्शनं बहुशो विकल्पोत्पत्तिर्वा । न तावद्भूयो दर्शनम्, तस्य नीलादाविव क्षणक्षयादावपि विशेषणभावात् । अथ बहुशो विकल्पोत्पत्तिरभ्यासस्तस्य क्षणक्षयादिदर्शनस्य विकल्पवासनाप्रबोध-कत्वाभावेनाभावान्तर्हि परस्पराश्रयप्रसङ्गः । तथाहि सिद्धे क्षणक्षयादौ दर्शनस्य विकल्पवासनाप्रबोधकत्वाभावे बहुशो विकल्पोत्पत्तिस्वभावा-भ्यासस्याभावसिद्धिस्तत्सिद्धौ चास्य सिद्धिरिति । क्षणिकाक्षणिक-विचारणायां क्षणिकप्रकरणमप्यस्त्येव । पाटवं पुनर्नीलादौ दर्शनस्य किं विकल्पोत्पादकत्वं स्फुटतरानुभवोऽविद्यावासनाविनाशादात्मलाभो वा भवेत् । प्रथमपक्षेऽन्योन्याऽश्रयप्रसक्तिः । सिद्धे हि नीलादौ दर्शनस्य विकल्पोत्पादकत्वस्वरूपे पाटवे वासनाप्रबोधकत्वसिद्धिस्तत्सिद्धौ च विकल्पोत्पादकत्वस्वरूपपाटवसिद्धिरिति । द्वितीयपक्षे पुनः क्षणक्षया-दावपि वासनाप्रबोधकत्वसिद्धिः स्फुटतरानुभवस्वभावस्य पाटवस्यात्रापि विद्यमानत्वात् । तृतीयपक्षोऽप्युपेक्षणीयः परीक्षकाणाम् । तुच्छस्वभाव-स्याविद्यावासनाविनाशस्यानभ्युपगमात् कथं तस्मादात्मलाभलक्षणं नीलादौ दर्शनस्य पाटवं घटेत । अथ दर्शनस्योत्पादकानि यानि कारणानि तत्स्वभावोऽविद्यावासनाविनाशः स्वीक्रियते तस्माच्चात्म-लाभलक्षणं पाटवं सुघटमेव दर्शनस्य । नन्वेवंविधपाटवस्य विशेषा-भावाद्यथा तद्वशान्नीलादौ दर्शनस्य विकल्पवासनाप्रबोधकत्वं तथा क्षणक्षयादौ किन्न स्यात् । न चैकस्यैव दर्शनस्य नीलादिविकल्प-वासनाप्रबोधकत्वं प्रति पाटवं क्षणक्षयादिविकल्पवासनाप्रबोधकत्वं प्रति पुनरपाटवमिति प्रकटयितुं पटीयसां समुचितम् । विरुद्धधर्माध्यासतो दर्शनस्य भेदप्रसङ्गात् । तथा च **तथागतानां** सिद्धान्तः ' **अयमेव हि भेदो भेदहेतुर्वा यदुत विरुद्धधर्माध्यासः कारणभेदश्च** ' इति । किञ्च । यद्यस्मदादीनामप्यविद्यावासनांशविनाशादाविर्भूतं दर्शनं विकल्प-

वासनाप्रतिबोधहेतुस्तर्हि समस्ताविद्यावासनाप्रलयात्प्रस्तुतं सुगत-संवेदनं सुतरां विकल्पवासनोद्बोधहेतुः सम्पद्यते । ततश्च ।

' विधूतकल्पनाजालगम्भीरोदारमूर्त्तये ।
नमः समन्तभद्राय समन्तस्फुरणत्विषे ॥ १ ॥ '

इति प्रमाणवार्त्तिकस्य[1] प्रथमश्लोके विधूतकल्पनाजालेति विशेषणं वन्ध्यास्तनन्धयसमानं प्रसज्येतेति । अर्थित्वमप्यभिलषितत्वं जिज्ञासितत्वं वा । न तावत्प्रथमपक्षः परीक्षाक्षेत्रम् । कुत्रचिदनभिलषितेऽपि वस्तुनि दर्शनस्य वासनाप्रबोधकत्वदर्शनात्, चक्रकक्रकचपातप्रसङ्गश्च । अभिलषितत्वस्य वस्तुनिश्चयपूर्वकत्वात् । वस्तुनिश्चयस्य च वासनाप्रबोधपूर्वकत्वात्, वासनाप्रबोधस्य चाभिलषितत्वपूर्वकत्वात्, ततो यावन्न वस्तुनिश्चयस्तावन्नाभिलषितत्वं सिद्ध्यति यावन्नाभिलषितत्वं न तावद्वासनाप्रबोधो यावच्च नायं न तावद्वस्तुनिश्चयो यावन्नासौ न तावदभिलषितत्वमिति । द्वितीयपक्षे तु क्षणक्षयादौ तद्वासनाप्रबोधप्रसक्तिः, नीलादाविवात्रापि जिज्ञासितत्वाविशेषात् । ननु यावन्मात्रं वस्त्वनुभूतं निर्विकल्पकेन यदि तावन्त एव निश्चये निर्विकल्पकवादिनां प्रामुवन्तीति प्रेर्यते तर्हि सविकल्पकप्रत्यक्षवादिनामपि प्रतिवाद्युपन्यस्तस्य समस्तव्यापिमात्रावर्णपादादेः स्वकीयेच्छासादिसङ्ख्यायाश्च विशेषेण स्मरणं प्रसज्यते स्मरणकारणस्य निश्चयात्मनोऽनुभवस्य सर्वत्राविशेषात्[2] ।

परमतमविदित्वा मूढ **ताथागत** त्वं
प्रबलतरनिरूढाहंकृतिग्रस्तबुद्धिः ॥
कृतरभसमिदानीं स्पर्द्धसे सार्द्धमुद्य-
न्मतिविभवसमर्थैस्तीर्थनाथस्य शिष्यैः ॥ ७५ ॥

१ प्रमाणसमुच्चयग्रन्थस्य धर्मकीर्तिना प्रमाणवार्तिकाख्या टीका विरचिता ।
२ ' प्रसज्यते ' इति म. पुस्तके पाठः ।

अवग्रहेहावायज्ञानादनभ्यासात्मकादन्यदेव ह्यभ्यासात्मकं धारणाज्ञानस्वरूपं प्रत्यक्षं तैः कक्षीक्रियते तदभावात्परोपन्यस्तसमस्तमात्रावर्णादाववग्रहादित्रयसद्भावेऽपि स्मरणानुत्पत्तिः । तत्सद्भावे तु स्यादेव सर्वत्र तत् । यथाधारणं स्मरणाभ्युपगमात् । न च सौगतानामप्ययं युक्तः, दर्शनभेदाभावात् । एकस्यैव दर्शनस्य क्वचिदभ्यासादीनामितरेषां च तैरभ्युपगमात् । अस्य चाभ्युपगमस्याघटमानत्वात् । तथा चावाचि प्रकरणचतुर्दशशतीसमुत्तुङ्गप्रासादपरम्परासूत्रणैकसूत्रधारैरगाधसंसारवार्द्धि निमज्जज्जन्तुजातसमुत्तारणप्रवणप्रधानधर्मप्रवहणप्रवर्त्तनकर्णधारैर्भगवत्तीर्थिकरप्रवचनावितथतत्त्वप्रबोधप्रस्तुतप्रवरप्रज्ञाप्रकाशतिरस्कृतसमस्ततीर्थिकचक्रप्रवादध्वान्तप्रचारैः प्रस्तुतनिरतिशयस्याद्वादविचारैः श्रीहरिभद्रसूरिभिः[1] शास्त्रवार्त्तासमुच्चये 'एकत्र निश्चयोऽन्यत्र निरंशानुभवादपि । न तथा पाटवाभावादित्यपूर्वमिदं तमः' इति । न च तद्व्यावृत्तिद्वारेणैकस्यापि दर्शनस्याभ्यासेतरादियोगः । स्वयमतत्स्वभावस्य तदन्यव्यावृत्तिसम्भवे पावकस्य शीतादिव्यावृत्तिप्रसङ्गात् । तत्स्वभावस्य तदन्यव्यावृत्तिकल्पने फलाभावात् । प्रतिनियततत्स्वभावस्यैवान्यव्यावृत्तिरूपत्वात् ।

स्यान्मतमभ्यासादिसापेक्षं तन्निरपेक्षं वा दर्शनं न विकल्पकस्योत्पादकं प्राचीनविकल्पवासनाप्रभवत्वात्तस्य । तदावासनाया अपि तदावासनाप्रभवत्वमनादित्वाद्विकल्पजनकवासनासन्तानस्येति ।

प्राचीनविकल्पवासनाप्रभवत्वमेव विकल्पस्येति बौद्धशङ्कानिरासः ।

सभासदः सादरमेतदेकं विलोक्यतां कौतुकमस्य भिक्षोः ॥
उपेक्ष्य पक्षं सहसा स्वकीयं यदल्पधीर्वक्ति विलूनशीर्णम् ॥७६॥

निर्विकल्पकस्य हि विकल्पाजनकत्वे 'यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता' इत्यस्य विरोधानुषङ्गः । कथं वा वासनाविशेषप्रभवाद्विकल्पा-

---

१ १४४४ ग्रन्था हरिभद्रकृता इति प्रथितिः । २. चतुर्थस्तवके श्लो. २५.

त्प्रत्यक्षस्य रूपादिविषयत्वनियमो मनोराज्यादिविकल्पादपि प्रत्यक्षस्य रूपादिविषयत्वनियमप्रसक्तेः । प्रत्यक्षसहकारिणो वासनाविशेषादुत्पन्नाद्रूपादिविकल्पात्प्रत्यक्षस्य रूपादिविषयत्वनियमेऽभ्युपगम्यमानेऽनुमानसाध्यत्वाभिमतक्षणिकताविषयत्वनियमोऽपि यथोक्तहेतोरुत्पन्नात् । क्षणिकत्वविकल्पादेवाभ्युपगम्यताम् । अन्यथा रूपादिविषयत्वनियमोऽप्यतो मा भूदविशेषात् । तथा च क्षणिकत्वगोचरो विकल्पः प्रत्यक्षस्य क्षणिकत्वगोचरत्वनियमहेतुत्वान्यथानुपपत्तेरिति प्रसज्यते । रूपाद्युल्लेखित्वाद्विकल्पस्य तद्बलात्तन्नियमस्यैवाभ्युपगमे प्रत्यक्षस्याभिलापसंसर्गोऽपि तद्धेतुरनुमीयेत विकल्पस्याभिलापोल्लेखितयोत्पत्त्यन्यथानुपपत्तेः । किञ्च निर्विकल्पकदर्शनस्याप्रमाणसिद्धत्वादात्मैवाहंप्रत्ययप्रसिद्धः प्रतिबन्धकापायेऽभ्यासाद्यपेक्षो विकल्पोत्पादकोऽस्तु किमदृष्टपरिकल्पनया ।

अपि च सविकल्पकप्रत्यक्षस्याप्रामाण्यं किं स्पष्टाकारविकलत्वात्, गृहीतग्राहित्वात्, असति प्रवर्तनात्, हिताहितप्राप्तिपरिहारासमर्थत्वात्, कदाचिद्विसंवादात्, समारोपस्यानिषेधकत्वात्, व्यवहारानुपयोगात्, स्वलक्षणागोचरत्वात्, शब्दसंसर्गयोग्यप्रतिभासत्वात् शब्दप्रभवत्वाद्वा स्यात् । न तावदस्पष्टाकारत्वात्तस्याप्रामाण्यं अप्रसिद्धत्वात्, अनुमानस्याप्रामाण्यानुषङ्गाच्च । नापि गृहीतग्राहित्वात् । अनुमानाप्रामाण्यानुषङ्गादेव व्याप्तिज्ञानयोगिसंवेदनाभ्यां गृहीतस्यार्थस्य तेन ग्रहणात् । कथं वा शब्दविषयस्य क्षणक्षयानुमानस्य प्रामाण्यं शब्दरूपावभास्यध्यक्षावगतक्षणक्षयविषयत्वात् । नाप्यसति प्रवर्त्तनात् निर्विकल्पकस्याप्रामाण्यानुषङ्गात्तद्विषयस्यापि तत्काले सत्त्वाभावविशेषात् । हिताहितप्राप्तिपरिहारासमर्थत्वात् इत्यप्यसम्भाव्यमेव । सविकल्पकप्रत्यक्षादेव हिताहितप्राप्तिपरिहारासिद्धेः । कदाचित्तदभावः पुनर्निर्विकल्पकेऽपि समानः । कदाचिद्विसंवादादित्यप्यसाम्प्रतम् । निर्विकल्पकस्याप्यप्रामाण्यप्रसङ्गात् । तिमिराद्युपहतचक्षुषोऽर्थाभावेऽपि तत्प्रवृत्ति-

सविकल्पकप्रत्यक्षस्याप्रामाण्यहेतवो विकल्प्य खण्डिताः ।

दर्शनात्, भ्रान्तादस्य भेदोऽन्यत्रापि समानः । समारोपा-निषेधकत्वादित्यप्यरमणीयम् । विकल्पविषये समारोपासम्भवात् । नापि व्यवहारानुपयोगात् । सकलव्यवहाराणां विकल्पमूलत्वात् । स्वलक्षणागोचरत्वादित्यसमीक्षिताभिधानम् । अनुमानेऽप्यप्रामाण्यप्रसङ्गात् । त्वन्मत्या विकल्पस्यैवानुमानस्यापि सामान्यगोचरत्वात् । न चानुमानग्राह्यस्य सामान्यरूपत्वेऽप्यध्यवसेयस्य स्वलक्षणरूपत्वाद्दृश्यविकल्प्यावर्थावेकीकृत्य ततः प्रवृत्तेरनुमानस्य प्रामाण्यम् । प्रकृतविकल्पेऽप्यस्य समानत्वात् । शब्दसंसर्गयोग्यप्रतिभासत्वादित्यप्यसमीचीनम् । अनुमानेऽपि तुल्यत्वात् । शब्दप्रभवत्वादित्यप्यसाम्प्रतम् । शब्दस्वलक्षणाध्यक्षस्याप्यप्रामाण्यप्रसङ्गात् । ग्राह्यार्थं विना शब्दमात्रप्रभवत्वं त्वसिद्धमस्माकं नीलादिविकल्पानामर्थे सत्येव भावात्, कस्यचित्तु तमन्तरेणापि भावो निर्विकल्पकेऽपि समानः । द्विचन्द्रादिनिर्विकल्पकस्यार्थाभावेऽपि भावात् । भ्रान्तादभ्रान्तस्य भिन्नत्वमत्रापि तुल्यम् ।

एवं तावत्परेषामुपशमपदवीं प्रापिताः सर्वतोऽमी
स्याद्वादस्वाददिग्धैः करणकृतमतैर्निर्विकल्पप्रवादाः ।
एवं चाध्यक्षबाधा भवतु कथमिव प्रोक्तपक्षैकदेशे
सिद्धा सन्तस्ततश्च व्यवसितिसुभगा मानभूतेह बुद्धिः ॥७७॥

अत्राहुः **शब्दब्रह्मवादिनः** ।

शब्दब्रह्मवादिमतं सविस्तरमुद्भाव्य खण्डितम् ।

प्रियं प्रियं नः सकलापि बुद्धिः
प्रमाणभूता व्यवसायिनी यत् ॥
न युज्यते तु व्यवसाय एव
शब्दानुवेधं परिमुच्य जातु ॥ ७८ ॥

शब्दसम्पर्कपरित्यागे हि प्रत्ययानां प्रकाशरूपताया एवाभाव-

१ ' अपि ' इत्यधिकं भ. म. पुस्तकयोः । २ ' चासिद्धं ' इति म. पुस्तके पाठः ।

प्रसक्तिः । वाग्रूपता हि शाश्वती प्रत्यवमर्शनी च तदभावे प्रत्ययानां नापरं रूपमवशिष्यते । तदुक्तम् ।

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन वर्त्तते ॥ १ ॥
वाग्रूपता चेत् व्युत्क्रामेत् अवबोधस्य शाश्वती ।
न हि बोधः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥२ ॥' इति

सा चेयं वाक् त्रैविध्येन व्यवस्थिता वैखरी मध्यमा पश्यन्तीति । तत्र येयं स्थानकरणप्रयत्नक्रमव्यज्यमानाकारादिवर्णसमुदायात्मिका वाक् सा वैखरीत्युच्यते । तदुक्तम् ।

' स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥ १ ॥ '

अस्यार्थः । स्थानेष्विति तालवादिस्थानेषु । वायौ प्राणसंज्ञे । विधृतेऽभिघातार्थं निरुद्धे सति कृतवर्णपरिग्रहेति हेतुद्वारेण विशेषणं ततः ककारादिवर्णरूपस्वीकारात् वैखरीसंज्ञा वक्तृभिर्विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः । वाक्प्रयोक्तॄणां सम्बन्धिनी । यद्वा तेषां स्थानेषु तस्याश्च प्राणवृत्तिरेव निबन्धनं तत्रैव निबद्धा सा तन्मयत्वादिति । या पुनरन्तःसङ्कल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते । तदुक्तम् ।

' केवलं बुद्ध्युपादानात्क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्त्तते ॥ १ ॥'

अस्यार्थः । स्थूलां प्राणवृत्तिं हेतुत्वेन वैखरीवदनपेक्ष्य केवलं बुद्धिरेवोपादानं हेतुर्यस्याः सा प्राणस्थत्वात्क्रमरूपमनुपतति । अस्याश्च

---

१ वाक्यपदीये प्रथमकाण्डे श्लो. १२४, १२५. २ 'प्रकाशः प्रकाशेत' इति भ. प. पुस्तकयोः पाठः । ३ ' उपादानां ' इति भ. पुस्तके तथा 'उपादान' इति प. पुस्तके पाठः ।

मनोभूमाववस्थानं, वैखरीपश्यन्त्योर्मध्ये भावान्मध्यमा वागिति । या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते । तदुक्तम् ।

'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥ १ ॥'[1]

अस्यार्थः । पश्यन्ती यस्यां वाच्यवाचकयोर्विभागेनावभासो नास्ति सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देशकालकृतो यत्र क्रमविवर्त्तशक्तिस्तु विद्यते । स्वरूपज्योतिः स्वप्रकाशा वेद्यते वेदक्रमभेदातिक्रमात् । सूक्ष्मा दुर्लक्ष्या । अनपायिनी कालभेदास्पर्शादिति । अपि च सकलमेवेदं वाच्यवाचकतत्त्वं शब्दब्रह्मण एव विवर्त्तो नान्यविवर्त्तो नापि स्वतन्त्रमिति । यथोक्तम्-

अनादिनिधनं शब्दब्रह्मतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥'[2]

अनादिनिधनं हि शब्दब्रह्म उत्पादविनाशाभावात् । अक्षरं चाकारादक्षरस्य निमित्तत्वात् । अनेन वाचकरूपता । अर्थभावेनेत्यनेन तु वाच्यरूपता सूचिता । प्रक्रियेति भेदाः, शब्दब्रह्मेति नामसंकीर्त्तनमिति । व्यवहारोऽपि सकलः शब्दानुविद्ध एवानुभूयते । न हि भोक्ष्ये दास्यामीत्याद्यनुल्लिखितशब्दः कश्चिदपि स्वयं भोजनदानादिनिष्पत्तये प्रयतते । परं वा भुंक्ष्व देहीत्यादिशब्दं विना प्रवर्त्तयति । जीवितमरणस्वरूपाविर्भावोऽपि शब्दाधीन एव । तथाहि सुषुप्तिदशायामनुल्लिखितशब्दस्वरूपत्वान्न कश्चित्पञ्चतां प्राप्ताद्विशिष्यते। तदुत्तरसमयं तु कुतश्चिच्छब्दात् प्रबुद्धः पुमान् शब्देनैवान्तर्जल्पात्मनात्मानमनुसन्धानो जीवितमनुव्रजति । न चाद्वयरूपे तत्त्वे कथमाविर्भावतिरोभावादिरूपभेदप्रपञ्चप्रतिभासः स्यादिति वचनं चेतसि निधेयम् । अविद्या-

---

१ 'नु' इति म. प. पुस्तकयोः पाठः । २ वाक्यप. कां १. श्लो. १.

तस्तत्र तत्प्रतिभासाविरोधादाकाशवत् । यथैव हि तिमिरतिरस्कृतलोचनो जनो विशुद्धमप्याकाशं विचित्रतरेखानिकरकरम्बितमिव मन्यते । तथाऽनादिनिधनमभिन्नस्वभावमपगतनिखिलभेदप्रपञ्चमपि शब्दब्रह्माविद्यातिमिरविधुरितविवेकलोचनः प्रादुर्भावतिरोभावादिभेदप्रपञ्चान्वितमिव प्रतिपद्यते । तदुक्तम् ।

' यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥१॥
तथेदममलं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं[1] भेदरूपं तु पश्यति ॥ २ ॥ '

इति । सकलविद्याविलासविलये तु योगिनस्तत्प्रपञ्चानन्वितं यथावत्तत्स्वरूपं प्रतिपद्यन्ते । यथा च वीचीबुद्बुदफेनरूपो वारिविकारः सारभूतममलं जलमाविर्भावतिरोभावार्थमपेक्षते तथा व्यावहारिकः स्थूलोऽयमकारादिशब्दभेदप्रपञ्चः परमसूक्ष्मप्रतिभासमात्रैकरूपं सर्वशब्दविषयविज्ञानप्रसवनिमित्तं काप्यनियमितैकनिजस्वभावं शब्दमयं ब्रह्मापेक्षते । उक्तं च—

'अनुविद्धैकरूपत्वाद्वीचीबुद्बुदफेनवत् ।
वाचः सारमपेक्षन्ते शब्दब्रह्मोदकाद्वयम् ॥ १ ॥ ' इति ॥

वाग्रूपतामवगणय्य जगत्सु नैव
कस्यापि किञ्चन कदाचन संचकास्ति ।
संवेदनं तदिह शब्दमयं प्रसिद्धं
स्यादन्यथा कथमिवास्य ननु प्रकाशः ॥ ७९ ॥

एतत्समीरणसमीरितनीरबिन्दु-
नाशं विनश्यतु सतां पुरतः समस्तम् ॥
यस्मात्प्रमाणपरिपन्थि निरुप्यमाणं
दारेषु गौरवमुपैति न कोविदेषु ॥ ८० ॥

---

१ 'आपन्न' इति प. म. पुस्तकयोः पाठः ।

तथाहि यत्तावदवादि शब्दानुवेधं परिमुच्य जात्वित्यादि । तत्र कोऽयं शब्दानुवेधो नाम । बोधस्य शब्देन संयोगविशेषः पारदेनेव ताम्रादेरिति चेत् । तदिदमतिरभसेन विस्मृत्य स्वमतमुक्तमायुष्मता । शब्दाद्वैतवादी हि भवान् न च तत्र शब्दो बोधश्चेति द्वयमस्ति । द्वैतप्रसक्तेः द्वैताभावे च शब्दबोधयोरसम्भवी संयोगविशेषः । तस्य द्वैतेनैव व्याप्तत्वात् । न चाद्वैतवाददुर्विदग्धानां संयोगोऽपि कश्चिदस्ति द्वैतप्रामेरेवेति । न संयोगविशेषोऽनुवेधशब्दवाच्यः शब्देन बोधस्य तादात्म्यमनुवेधो नीलगुणेनेव पटादेरिति चेत् । तदप्यविशदम् । शब्द-बोधयोरेकान्तेन तादात्म्येऽनुवेधशब्दप्रयोगस्यायोगात् । न हि प्रयुञ्जते यौक्तिकाः कुम्भस्य कुम्भेनानुवेध इति । ननु कथं पटादेरनुवेधो नीलगुणेनेति प्रयुक्तिरिति चेत् । न गुणगुणिनोस्तादात्म्यैकान्तस्य निराकरिष्यमाणत्वात् । अस्तु वाऽनुवेधशब्दाभिधेयमेकान्तेन तादात्म्यं तदापीदं शब्दबोधयोर्नोपपद्यते । सति ह्यस्मिन् बोधस्याचेतनत्वं स्यादचेतनशब्दतात्म्येनावस्थितत्वात्तथा चानुभवविरोधः । शब्दस्य वा बोधमात्रतापत्तिरिति बोधमात्रवादसिद्धिः स्यात् । तथा च जिनदत्तेन प्रोक्तः शब्दः समीपवर्तिनापि जिनदासेन न श्रुयेत । जिनदत्तबोध-तादात्म्येन तस्यावस्थिततया जिनदासश्रवणसरणिं यावदनुसरणासम्भवात् । अथ बोधात्माप्ययमनुसरति तां तेन श्रवणान्यथानुपपत्तेरितीष्यते तर्हि यः कश्चित् कस्यचिद्बोधः स सकल एकस्यापि शब्दस्य श्रवणे श्रोत्रा प्रतीयेत । तस्य सकलप्रमातृबोधतादात्म्येनावस्थितत्वात् । तथा च सकलः श्रोता परचित्तपरिच्छेदकः स्याच्छब्दस्यैव चित्तत्वात् । तथा चाभाणि समन्तभद्रेण ।

'बोधात्मता चेच्छब्दस्य न स्यादन्यत्र तच्छ्रुतिः ।
यद्बोद्धारं परित्यज्य न बोधोऽन्यत्र गच्छति' ॥१॥ इति,
'न च स्यात्प्रत्ययो लोके यः श्रोत्रा न प्रतीयते ।
शब्दाभेदेन सत्येवं सर्वः स्यात्परचित्तवित् ॥ २ ॥' इति,

'अथाभिधीयते योऽयं शब्दात्मा विदितः सताम् ।
चेतनोऽचेतनश्चायमित्यभ्युपगमो मम ॥ ३ ॥

सिद्ध्यत्वेष तवायुक्तानिःप्रत्यूहतया यतः ।
विश्ववैचित्र्यमेवेत्थं शब्दशब्देन शब्दितम् ॥ ४ ॥

विवादो न च नामास्ति नाम्नि वस्तुपरीक्षिणाम् । ५
कश्चिन्न कंचिदाचष्टे राममन्यस्तु रावणम् ॥ ५ ॥

तन्नैकान्ततादात्म्यं शब्देनानुवेधो बोधस्याभिधातुं युक्तः । अपि चानयोस्तादात्म्यं कुतः प्रत्येयम् । न तावत् प्रत्यक्षात् तस्य स्वस्माद्भेदेनैव शब्दग्रहणे शब्दाद्भेदेनैव स्वग्रहणे प्रवृत्तेः । नाप्यनुमानात्तस्य निर्बाधस्य कस्यचिदसम्भवात् । अथ शब्दार्थयोस्तादात्म्यप्रसिद्धेः १०
सिद्धमेव शब्देन बोधस्य तादात्म्यं बोधस्यार्थत्वादिति चेत् । तन्नोपपन्नम् । शब्दार्थयोस्तादात्म्यस्य कुतोऽप्यप्रसिद्धेः । यत्प्रतीतावेव यत्प्रतीयते तयोस्तादात्म्यं यथा वृक्षत्वशिंशपात्वयोः । शब्दप्रतीतावेव प्रतीयते च तदर्थ इत्यतोऽनुमानात्तत्सिद्धिरिति चेत् । तदचतुरस्रम् । त्वन्मतेन शब्दार्थयोस्तादात्म्यमिति शब्दार्थस्याघटनात्तथाहि। शब्दार्थ- १५
योस्तादात्म्यमिति कोऽर्थः । यदि तदात्मनोर्भावस्तादात्म्यमेवं तर्हि तौ द्वावपीष्टावेव पृथग्भावाभिधानादिति नानयोरैक्यमेव । अथ यत्र भवतामर्थ इति प्रसिद्धिरसौ शब्दपरिणाम एव । न खलु शब्दात्पृथगर्थः कश्चिदस्ति । शब्दब्रह्मपरिवर्तमात्रत्वाज्जगत इति कुतो द्वैते दृष्टिरस्माकं स्यादिति चेत् । नन्वेवं कथं तदात्मनोः शब्दार्थात्मनोर्भाव- २०
स्तादात्म्यमिति द्विवचनाभिधानं न विरोधमधिरोक्ष्यति । शब्दाद्भिन्नस्यार्थात्मनः कस्यचिदभावात् । अथ तदात्मनो भावस्तादात्म्यमित्यभिधीयते । नन्वत्रापि वक्तव्यं कस्यायमात्मा यदात्मनो भाव इति

१ 'कश्चित्' इति प. पुस्तके तथा 'कश्चित्कदाचित्' इति म. पुस्तके पाठः ।

भाषसे । यदि शब्दस्य तदा तद्व्यतिरेकेणार्थाभावात् सर्वस्य शब्दमात्रत्वाच्छब्दार्थयोस्तादात्म्यमिति न न्यायसङ्गतम् । न हि देवदत्तवन्ध्यासुतयोस्तादात्म्यमित्यभिदधति सुधियः । अथार्थस्य तदाप्येतदेव दूषणम् । अर्थाद्वैतापत्त्या शब्दाद्वैताभावप्रसक्तिश्च । इति न शब्दार्थयोस्तादात्म्यमिति शब्दार्थ उपपद्यते । अपि च शब्दार्थयोस्तादात्म्यं प्रत्यक्षप्रतिक्षिप्तम् । चाक्षुषप्रत्यक्षं हि पटकुटादिपदार्थसार्थं परिच्छिन्दत् शब्दाद्भिन्नमेव परिच्छिनत्ति । श्रोत्रप्रत्यक्षमपि शब्दं साक्षात्कुर्वत्कुटादिभ्यो भेदेनैव साक्षात्करोति । अनुमानबाधितं च तत् । तथाहि । नास्ति शब्दार्थयोस्तादात्म्यं भिन्नदेशत्वाद्भिन्नकालत्वाद्भिन्नाकारत्वाद्वा स्तम्भकुम्भवत् । न च भिन्नदेशत्वमसिद्धम् । कर्णकुहरे हि शब्दः समुपलभ्यते भूतलादौ त्वर्थः । अभिन्नदेशतायां त्वनयोः शब्दोपलब्धौ प्रमातुर्नार्थे प्रवृत्तिः स्यादस्ति चेयम् । तथाहि ।

अहो दिष्ट्या प्राप्तास्तदिह चरणाम्भोजरजसा
पवित्रीकुर्वन्तः क्षितितलमिदं धर्मगुरवः ।
इति श्रुत्वा केऽपि प्रकृतसुकृतास्तत्प्रणतये
प्रवर्तन्ते तूर्णं प्रकटपुलकालंकृतिभृतः ॥ ८१ ॥

भ्रान्तिमात्रमिति चेत् । धिग् धिक् त्वामपह्नुतोऽसि यदेतदपि भ्रान्तं भाषसे । नह्यत्र किञ्चित्प्रमाणमस्ति । अथास्त्येव प्रमाणं तयोस्तादात्म्यमिति चेत् । तदिदमसिद्धमसिद्धेन साधयन्नयं निर्मर्यादशिक्षणीयः परीक्षकाणामिति नासिद्धं शब्दार्थयोर्भिन्नदेशत्वम् । नापि भिन्नकालत्वं स्तम्भादिभावानाम् । तच्छब्देभ्यः पूर्वमपि तेषामुपलम्भात् । नापि भिन्नाकारत्वम् । तस्य शब्दार्थयोराबालमपि प्रसिद्धत्वादिति । अमुनाप्यनुमानेन बाध्यते तयोस्तादात्म्यम् । तथाहि । यो यत्साध्यं

---

१ 'धिक्' इति नास्ति प. भ. पुस्तकयोः । २ 'शब्दो' इति भ. पुस्तके पाठः ।

प्रयोजनं न निष्पादयति न स तेन तादात्म्यमनुभवति यथा रूपेण रसो न निष्पादयति च कृपाणप्रभृतिपदार्थसाध्यं प्रयोजनं कर्त्तनादिकं शब्द इति । न च शब्दस्य पदार्थप्रयोजनाप्रसाधकत्वमसिद्धम् । तत्त्वे कृपाणपाषाणादिशब्दसमुच्चारेण वक्त्रादीनां कर्त्तनाभिघातादिप्रसक्तेः । अथ यथा शब्दातिरिक्तार्थवादिनामतिनिशितनिष्ठुरधाराग्रस्यापि मण्डलाग्रस्य यत्नेन वक्त्रावेशे विधीयमाने कर्त्तनादेरभावस्तद्वदस्थाविशेषहेतुकत्वात्तस्य । तत्सत्तामात्रहेतुकत्वे तु न कश्चिदकृन्तद्वक्त्रः स्यात्सत्तामात्रस्य सर्वान् प्रत्यविशिष्टत्वात्तथा शब्दाद्वैतवादिनां तच्छब्दोच्चारणेऽपि तदभावो भाविष्यति तत एवेति नोक्तदोषानुषङ्ग इति चेत् । मैवम् । शब्दातिरिक्तार्थवादिनां हि मते मण्डलाग्रादीनामवस्थानभेद उपपद्यते तद्व्यतिरिक्तभेदकभावात् । सन्ति हि पुरुषप्रयत्नादृष्टादयः खड्गादीनां भेदका इति । शब्दब्रह्ममात्रतत्त्ववादिनस्तु मते नास्ति शब्दब्रह्मव्यतिरिक्तं किञ्चिद्भेदकं नाम । न चैतद्वाच्यं स्वयमेवैतद्विचित्रस्वभावं शब्दब्रह्मेति । शब्दब्रह्मसम्बन्धिनः स्वभावस्यापि शब्दब्रह्ममात्रत्वात्तस्य च पुरुषप्रयत्नादिरूपतया विचित्रत्वाभावात् । विचित्रत्वे च जगद्वैचित्र्यस्वरूपस्यैव ब्रह्मेति नाम कृतं स्यादिति नासिद्धिः पदार्थप्रयोजनाप्रसाधकत्वसाधनस्येति । इतोऽप्यनुमानात् शब्दार्थयोस्तादात्म्यं बाध्यते । तथाहि । न शब्दार्थयोस्तादात्म्यं विभिन्नेन्द्रियजनितज्ञानग्राह्यत्वाद्रूपरसवत् । नात्रापि साधनमसिद्धिधूमितम् । न हि नायनं विज्ञानं शब्दे प्रवर्त्तते रसादिज्ञानवत् । अन्यथेन्द्रियान्तरपरिकल्पनावैयर्थ्यम् । नायनविज्ञानस्यैव समस्तार्थग्राहकत्वप्रसक्तेः । नापि श्रौत्रं संवेदनं बाह्येष्वर्थेषु प्रवर्त्तत एव इति न शब्दार्थयोस्तादात्म्यमिति प्रतिज्ञा श्रेयसी । शब्दप्रतीतावर्थस्य प्रतीयमानत्वादिति हेतुरप्यसिद्धः । केनचिद्विज्ञानेन शब्द-

१ ' चक्र ' इत्यधिकं म. प. पुस्तकयोः । २ ' पदार्थसार्थसाध्यं ' इति प. म. पुस्तकयोः पाठः । ३ ' एव ' इति नास्ति म. पुस्तके ।

संस्पर्शशून्येनापि पदार्थप्रतिपत्तेः । न खलु निखिलवस्तुवेदनानि समुल्लिखितशब्दान्येवेत्युक्तं प्राक् । अथाभिदधीथाः यथा सषुप्तावस्थायामनुपलक्ष्यमाणोऽपि सूक्ष्मः समस्ति बोधः प्रबुद्धावस्थायां तस्यैव स्थूलभावात् तथा त्वया शब्दसंस्पर्शशून्यत्वेनाभिमते ज्ञानेऽपि समस्त्येव सूक्ष्मः शब्दः । कथमन्यथाऽसौ घटोऽयमित्युल्लेखेनोर्ध्वं स्थूलभावं भजेत् । तदप्यसङ्गतम् । सुषुप्तबोधेदृष्टान्तावष्टम्भेन दार्ष्टान्तिकसिद्धेरत्र सविप्रत्वात् । न हि सुषुप्तादिबोधः सूक्ष्मः सन्नन्यूनातिरिक्तः प्रबुद्धावस्थायां स्थूलो भवत्येकान्तैकरूपस्य तदन्यप्रतिबन्धककर्मणोऽभावेऽवस्थाभेदानुपपत्तेः । प्रतिबन्धककर्मसद्भावे च तत्कृतश्चैतन्यक्रियानिषेधः तदभावे च तत्क्रिया । न चैवं शब्दात्मनि किञ्चिदतिरिक्तमस्तीति न सूक्ष्मस्य स्थूलभावः । न खलूपचयकर्तृदलाभावे सूक्ष्मस्य सतः कस्यापि स्थूलतोपलब्धचरीति । किञ्च तज्ज्ञानंरूपगतः सूक्ष्मः शब्दः किं बोधरूप एव किंवा बोधातिरिक्तरूपः । यदि बोधरूपस्तर्हि कथमकथि **'अनुविद्धमिव ज्ञानं सर्वं शब्देन वर्त्तते'** इति । बोधमात्रसद्भावेन शब्दानुविद्धत्वशब्दार्थानुपपत्तेः । आत्मनात्मानुवेधाभिधानस्यात्यन्तमसम्बद्धत्वात् । अथ बोधातिरिक्तरूपस्तर्हि तेन सूक्ष्मशब्देन बोधस्यानुवेधे समस्तवस्तुस्तोमस्यापि सूक्ष्मस्य तत्र सत्त्वापत्तिस्तस्य सूक्ष्मशब्दतादात्म्येनावस्थितत्वात् । अथ कोऽयं प्रसङ्गोऽभ्युपगम्यत एव हि मतौ सूक्ष्मोऽर्थ इति चेत् ।

कल्लोलिनीकाननकाञ्चनाद्रिरत्नाकरैः कीर्णमिदं समस्तम् ।
ब्रह्माण्डमप्यस्ति मतौ सुसूक्ष्मभेतत्सखे जल्पति कस्त्वदन्यः ॥८२॥

अत्यन्तमलौकिकं ह्येतद्बोधे सूक्ष्मोऽर्थ इत्यसिद्धं शब्दप्रतीतावेवेत्यादिसाधनम् । वृक्षत्वाशिंशपात्वयोरिति निदर्शनमपि साध्यशून्यम् । तत्रैकान्ततादात्म्यस्यासम्भवात् । कथञ्चिद्भेदानिबन्धनस्य कथञ्चित्तादा-

१ 'प्रबोध' इति म. पुस्तके पाठः । २ 'रूप' इति नास्ति म. पुस्तके ।

त्म्यस्यैवोपपत्तेः । वृक्षत्वशिंशपात्वे हि विशिष्टौ वस्तुधर्मौ कथञ्चिद्भेदाभेदवृत्ती नान्यथाऽनयोस्तादात्म्यम् । तदा हि यदि वृक्षत्वमेव शिंशपात्वं शिंशपात्वमेव वा वृक्षत्वं तदाऽनयोर्व्याप्यव्यापकभावाभावः स्यात् । प्रथमपक्षे धवाद्यभावप्रसंगस्तत्र वृक्षत्वस्य विद्यमानत्त्वात्तस्य च शिंशपात्वात् । अथ विशिष्टमेव वृक्षत्वं शिंशपात्वं तच्च धवादौ न विद्यते कुतो धवाद्यभावप्रसङ्ग इति चेत् । ननु किमस्य विशेषणं यतो वैशिष्ट्यं स्यात् । शिंशपात्वमेवेति चेत् । अहो अस्य तार्किकत्वं यच्छिंशपात्वगोचर एव पर्यनुयोगे शिंशपात्वाविशिष्टं वृक्षत्वं शिंशपात्वमुच्यत इत्यभिधत्ते । अभिदधातु वा तथापि सिद्धं शिंशपात्वं कथञ्चिदन्यत् वृक्षत्वात् । अन्यथा तेन तस्य वैशिष्ट्यमित्युक्तेरेवायोगादिति साध्यविकलमुदाहरणम् । साधनविकलं च । न खलु शिंशपात्वप्रतीतावेव वृक्षत्वं वृक्षत्वप्रतीतावेव वा शिंशपात्वं प्रतीयत इत्यवश्यम्भावः । धवादिषु शिंशपात्वप्रतीतिमन्तरेणापि वृक्षत्वस्य वृक्षत्वप्रतीतिमन्तरेणापि वा क्वचन शिंशपात्वस्य प्रतीतिसद्भावात् । तदेवं शब्दार्थयोस्तादात्म्यस्याप्रसिद्धेः कथमेतद्बोधार्थयोरपि सिद्धयेत् ।

इत्थं च बोधस्य विचार्यमाणं मुहुर्मुहुर्युक्तिसहस्रशोऽपि ॥
शब्दानुविद्धत्वमिदं कथञ्चिन्न नाम सम्यग्घटनामुपैति ॥ ८३ ॥

एवं च यदवादि ' **न सोऽस्ति प्रत्ययो लोके** ' इत्यादि । तदपि व्यतिसृष्टादेशमवसेयम् । यदपि वाचस्त्रैविध्यमभ्यधायि । तदप्यस्माकं चातुर्विध्येन सम्मतायाः वाचः प्रकारत्रयमाकृष्य स्वकीयाभिधानदानेनास्य नाटकोपाध्यायस्येव नूतनार्थोपदर्शनं न पुनस्तत्त्वतः । तथाहि ।

द्रव्यभावभिदया द्विधात्र वाग् द्रव्यवागपि मतोभयी सताम् ॥
द्रव्यपर्यायभिदादिमानयोः शब्दपुद्गलकदम्बकात्मिका ॥ ८४ ॥

कर्णकोटरकुटुम्बिनी पुनः प्रोच्यते निनदपर्यायात्मिका ।
वैखरीति कथयन्तु तां परे नाममात्रपरिकल्पपण्डिताः ॥ ८५ ॥

भाववागपि मता मनीषिणां व्यक्तिशक्तिविधया द्विधा पुनः ।
व्यक्तिवागिह विकल्पिका मतिः श्रोत्रगम्यवचसां निबन्धनम् ॥८६॥
मध्यमेत्युपदिशन्ति तां पुनर्यें निवारयति कः सुधीरमून् ।
वस्तुतत्त्वघटनैकलम्पटः को हि नाम्नि कलहायते बुधः ॥ ८७ ॥
वाग्वेदनावारककर्मनाशवशेन येयं भवतीह वक्तुः ।
सा शक्तिरस्याः खलु भाववाचो वदन्तु पश्यन्त्यभिधानमन्ये ॥८८॥

अपि च शब्दातिरिक्तभेदकवादिनो जैना एव वाचः प्रकारान् प्रदर्शयन्तः शोभन्ते। एकान्तेनैकरूपशब्दब्रह्मवादिनः पुनरमी तपस्विनस्तदतिरिक्तभेदकदरिद्राः कथं वाक्त्रैविध्यं संवाहयिष्यन्ति न स्वरूपं भेदकमिति च पूर्वमेव प्रकटितम् ।

यदवाचि सकलमेवेदं वाच्यवाचकतत्त्वं शब्दब्रह्मण एव विवर्त्त इत्यादि । तदपि नानवद्यम् । शब्दब्रह्मणः सकलवाच्यवाचकतत्त्वं शब्दब्रह्मविवर्तरूपमिति मतस्य खण्डनम्। सद्भावे प्रमाणाभावात् । तथाहि तत्सद्भावः प्रत्यक्षेण प्रतीयेतानुमानेनागमेन वा । यदि प्रत्यक्षेण, तत्किमिन्द्रियप्रभवेणातीन्द्रियेण वा । तत्राद्यपक्षो न समीचीनः । यतः सकलदेशकालार्थाकारनिकरकरम्बितस्वरूपं शब्दब्रह्म भवतामभिमतम् । एवंविधस्य चास्य सद्भावः किं श्रवणेन्द्रियप्रभवप्रत्यक्षेण प्रतीयेत तदितरेन्द्रियजनिताध्यक्षेण वा । न तावच्छ्रवणेन्द्रियप्रभवप्रत्यक्षेण । तस्य शब्दस्वरूपमात्रविषयतया स्वाविषयेण सकलदेशकालार्थाकारनिकरेणान्वितत्वं ब्रह्मणि प्रतिपत्तुमसमर्थत्वात् । तथाहि । यद्यदविषयं न तत्तेनान्वितत्वं कस्यचित्प्रतिपत्तुं समर्थं यथा चक्षुर्ज्ञानं रसेन । सकलदेशकालार्थाकारनिकराविषयं च श्रवणेन्द्रियप्रभवप्रत्यक्षमिति । तदविषयेणापि तेन तदन्वितत्वप्रतिपत्तावतिप्रसक्तिः । एतेन तदितरेन्द्रियजनिताध्यक्षेणापि तत्प्रतीतिः प्रतिक्षिप्ता । शब्दाविषयत्वेन तस्याः तत्प्रतीतावपर्याप्तत्वात् । तन्नेन्द्रिय-

प्रत्यक्षेण शब्दब्रह्मप्रतीतिः । नाप्यतीन्द्रियप्रत्यक्षेण । तस्यैवात्रासम्भवात् । योगिनां योगजं तत्सम्भवतीति चेत् । न । योगियोगतत्प्रभवप्रत्यक्षाणां सम्भवे सत्यद्वैताभावप्राप्तेः । न तत्प्राप्तिर्योग्यवस्थायामात्मज्योतीरूपस्यास्य स्वयं प्रकाशनादित्यपि बालप्रलपितम् । योग्यवस्थावज्ज्योतीरूपं च स्वयं प्रकाशनं चेत्येवं लक्षणस्य त्रयस्य सम्भवे सत्यद्वैताभावस्य तदवस्थत्वात् । अपि च योग्यवस्थायामतीन्द्रियप्रत्यक्षस्य ब्रह्मस्वरूपप्रकाशनस्वीकारे ततः प्राक्तद्रूपं प्रकाशते न वा । यदि प्रकाशते, तदानीमनायासनिष्पन्नः सर्वदा सर्वेषां मोक्षः स्याज्ज्योतिःस्वभावब्रह्मप्रकाशो हि मोक्षः स चायोग्यवस्थायामप्येवं प्रामुयात् । अथ न प्रकाशते, तदा तत्किमस्ति न वा । यदि नास्ति कथं तन्नित्यं कादाचित्कत्वादविद्यावत् । अथास्ति तर्हि कस्मान्न प्रकाशते । ग्राहकाभावादविद्याभिभूतत्वाद्वा । तत्र प्रथमपक्षो न क्षोदक्षमः । ब्रह्मण एव तद्ग्राहकत्वात् । तस्य च नित्यतया सदा सत्त्वात् । द्वितीयपक्षोऽपि न श्रेयान् । अविद्याया विचार्यमाणाया अनुपपद्यमानत्वात् ।

प्रसङ्गादविद्यायाः खण्डनम्। ततः शब्दब्रह्मसाधकानुमानादिविचारः।

सा हि शब्दब्रह्मणः सकाशाद्भिन्ना भवेदभिन्ना वा । भिन्ना चेत् किमसौ वस्तु अवस्तु वा स्यात् । न तावद्वस्तु, अर्थक्रियाकारित्वात् ब्रह्मवत् । तत्कारित्वेऽप्यस्या अवस्तुत्वे ब्रह्मणोऽप्यवस्तुत्वप्रसङ्गः । अथार्थक्रियाकारित्वमप्यस्या नेष्यते तत्कथं वस्तुत्वापत्तिरित्यभिधीयते । हन्त कथमेवमविद्यया कलुषत्वमिवापन्नमित्यादि वचो घटेत । आकाशे च वितथप्रतिभासहेतुभूतं वास्तवमेव तिमिरहेतु प्रसिद्धमविद्यायाश्चावास्तवत्वेन ब्रह्मणि विचित्रप्रतिभासहेतुत्वानुपपत्तितो दृष्टान्तदार्ष्टान्तिकयोः साम्यासम्भवाद्यथा विशुद्धमाकाशमित्याद्यपि दुरुपपादमेव । न चानाधेयातिशयस्य शब्दब्रह्मणोऽविद्यासामर्थ्या-

१ ' योगावस्थायां ' इत्युचितं भाति।

द्धेदेन प्रतिभासो ज्यायान् । अतिप्रसक्तेः । नाप्यवस्तुमाहात्म्याद्वस्तुनोऽन्यथाभावो भवति । अतिप्रसक्तेरेव । अथ वस्त्वविद्या, तन्न वाच्यमभ्युपगमहानिप्रसङ्गात् । ब्रह्माविद्यालक्षणवस्तुद्वितयप्राप्त्याद्वैताभावप्रसक्तेः । अथाभिन्ना, तदानीमविद्यायाः सत्यरूपतापत्तिः । सत्यरूपाद्ब्रह्मणः सकाशादभिन्नत्वात्तत्स्वरूपवत् । ततश्च कथमविद्याया मिथ्यात्वप्रतीतिनिमित्तत्वं । ब्रह्मवदिति नास्त्यविद्या असत्या वा । न ज्योतिःस्वभावस्य ब्रह्मणः कथमप्यभिभवः कर्तुं शक्यते । ततोऽसत्त्वादेवायोगिव्यवस्थायामात्मज्योतिःस्वरूपस्य शब्दब्रह्मणोऽप्रकाशनं न पुनरविद्याभिभूतत्वादिति । अयोगिदशायां तद्रूपस्य ब्रह्मणोऽसत्त्वे च योगिदशायामपि कुतः सत्त्वं स्याद्यतोऽतीन्द्रियप्रत्यक्षेण तत्प्रतीयेत । तन्न प्रत्यक्षेण शब्दब्रह्मणः सद्भावः प्रतीयते । नाप्यनुमानेन, तस्य तत्सद्भावावेदकस्य कस्यचिदसम्भवात् । अथास्त्येव यद्विकारानुस्यूतास्ते तन्मया यथा घटघटीशरावोदञ्चनादयो मृद्विकारा मृन्मयाः, शब्दविकारानुस्यूताश्च सर्वे पदार्था इति । नैवमस्यानुमानाभासत्वात् । तथाहि शब्दमयत्वमत्र कीदृशं साधयितुमभिप्रेतम् । शब्दपरिणामरूपत्वं घटस्य मृन्मयत्ववत्, शब्दादुत्पन्नत्वं वा यथान्नमयाः प्राणा इति । तत्र न तावदाद्यः कल्पः कल्पयितुमुचितः । परिणामस्यैवात्रायोगात् । शब्दात्मकं हि ब्रह्म नीलादिरूपतां प्रतिपद्यमानं स्वाभाविकं शब्दस्वरूपं परित्यज्य प्रतिपद्येतापरित्यज्य वा । आद्यपक्षे तस्यानादिनिधनत्वविरोधः । पौरस्त्यस्वरूपविनाशात् । द्वितीयपक्षे पुनर्नीलादिसंवेदनकाले बधिरस्यापि शब्दसंवेदनापत्तिर्नीलादिवस्त्वव्यतिरेकात्तत्स्वरूपवत् । शब्दस्वरूपस्यासंवेदने वा नीलादेरप्यसंवेदनप्रसङ्गस्तादात्म्याविशेषात् । अन्यथा विरुद्धधर्माध्यासतः शब्दस्य नीलादेः सकाशाद्भेदप्रसङ्गः । न ह्येकस्यैक-

१ ' अयोगावस्थायां ' इत्युचितं भाति । २ ' यदाकारा ' इति म. पुस्तके पाठः । ३ ' शब्दाकारा ' इति म. पुस्तके पाठः । ४ ' पदार्थसार्था ' इति म. पुस्तके पाठः ।

दैकप्रमात्रपेक्षया ग्रहणमग्रहणं च युक्तम्। विरोधात्। किञ्चासौ शब्दात्मा परिणामं प्रतिपद्यमानः प्रतिपदार्थं भेदं प्रतिपद्येत न वा। तत्राद्यकल्पे शब्दब्रह्मणोऽनेकत्वप्रसक्तिः। विभिन्नाऽनेकार्थस्वभावात्मकत्वात् तत्स्वरूपवत्। द्वितीयविकल्पे तु सर्वेषां नीलादीनां देशकालस्वभावव्यापारावस्थादिभेदाभावः प्रतिभासभेदाभावश्चानुपज्येत। एकस्वभावाच्छब्दब्रह्मणोऽभिन्नत्वात् स्वरूपवत्। तन्न शब्दपरिणामरूपत्वं शब्दमयत्वं। नापि शब्दादुत्पन्नत्वम्। तस्य नित्यत्वेनाविकारित्वादविकारिणश्च कार्योत्पादविरोधात्। किञ्च। कार्यमस्मादुत्पद्यमानमर्थान्तरमनर्थान्तरं वोत्पद्येत। तत्रार्थान्तरस्योत्पत्तौ कथं शब्दब्रह्माद्वैतवादः। कार्यस्य ततो द्वितीयस्य सद्भावात्। अनर्थान्तरभूतस्य तु कार्यग्रामस्योत्पत्तौ शब्दब्रह्मणोऽनादिनिधनत्वविरोधः। तदुत्पत्तौ तस्याप्यनर्थान्तरभूतस्योत्पद्यमानत्वादुत्पन्नस्य चावश्यं विनाशित्वादिति। अर्थानां शब्दमयत्वाघटनादसम्भवि साध्यम्। शब्दाकारानुस्यूतत्वं साधनमप्यसिद्धम्। प्रत्यक्षेण हि नीलादिकं प्रतिद्यमानः प्रतिपत्ता शब्दाकारासम्पृक्तमेव प्रतिपद्यत इति कथं शब्दाकारानुस्यूतत्वं सिद्धयेत्। किञ्च शब्दाकारानुस्यूतत्वं शब्दानुविद्धत्वमभिधीयते। तच्चार्थानां न युक्तमिति प्रोक्तं प्राक्। ततोऽपि च कथमेतत्सिद्धयेत्। कल्पितत्वाच्चास्यासिद्धिः। परमार्थतः शब्दाकारानुस्यूतत्वलक्षणधर्माधाराणां पदार्थानामसत्त्वेऽपि हि तेषु तदाकारानुस्यूतत्वं त्वया परिकल्प्यते परिकल्पिताच्च हेतोः कथं पारमार्थिकं ब्रह्म सिद्धयेत्। साध्यसाधनधर्मविकलश्च दृष्टान्तः। कुम्भादीनामपि सर्वथैकमयत्वस्यैकाकारानुस्यूतत्वस्य चासिद्धेः। समस्तार्थानां समानासमानपरिणामात्मकत्वात्। तन्नानुमानेनापि शब्दब्रह्म समधिगन्तुं पार्यते। नाप्यागमेन, 'सर्वं खल्विदं ब्रह्म'[1] इत्याद्यागमस्य ब्रह्मणः सकाशादर्थान्तरभावे द्वैतसिद्धिप्रसङ्गात्।

[1] छां. उ. ३-१४.

अनर्थान्तरभावे तद्वदागमस्यापि असिद्धिप्रसङ्गः । तन्न शब्दस्वभावस्य ब्रह्मणः सद्भावः कुतश्चित् प्रमाणादुपपद्यते ।

इत्थं शब्दब्रह्मणो दूषणौघं दर्शं दर्शं दूरमुज्जृम्भमाणम् ।
नैवं श्रद्धां कोऽपि कुर्वीत विद्वान् शब्दात्मत्वे सर्वथा प्रत्ययानाम् ॥८९॥

५ यत्तावद्बुद्धशिष्यैर्निजसमयवशान्निर्विकल्पत्वमुक्तं
प्रत्यक्षे तत्पुरैव प्रतिहतिपदवीं प्रापितं सप्रपञ्चम् ।
शब्दानुस्यूतिरुक्ता मतिषु तदपरैर्यापि सापि व्यपास्ता
तस्माज्ज्ञानं समस्तु व्यवसितिसुभगं मानतासम्मतं यत् ॥९०॥ ॥७॥

समारोपपरिपन्थित्वादित्युक्तमिति समारोपस्वरूपनिरूपणायाह-

१० **अतस्मिँस्तदध्यवसायः समारोप इति ॥ ८ ॥**

अतस्मिन्नतत्प्रकारे वस्तुनि । तदध्यवसायस्तत्प्रकारत्वनिश्चयो यः स समारोप इति ॥ ८ ॥

अथास्य प्रकारानाह—

स विपर्ययसंशयानध्यवसायभेदात् त्रेधेति ॥ ९ ॥

१५ स्पष्टम् ॥ ९ ॥

अथैतत्सूत्रनिर्देशक्रमेण विपर्ययस्वरूपमादौ निरूपयति—

विपरीतैककोटिनिष्टंकनं विपर्यय इति ॥ १० ॥

विपरिताया एकस्या एव कोटेरंशस्य निष्टङ्कनं निश्चयनं विपर्ययः॥१०॥

उदाहरणमाह—

२० **यथा शुक्तिकायामिदं रजतमितीति ॥ ११ ॥**

यथेत्युदाहरणोपन्यासार्थः । शुक्तिकायामरजताकारायामिदं रजतमिति रजताकारतया ज्ञानम्, विपर्ययो विपरीतख्यातिरित्यर्थः। इतिशब्द

उल्लेखार्थः । उदाहरणसूत्रं चेदमन्येषामपि प्रत्यक्षयोग्यविषयविपर्ययाणां तादितरप्रमाणयोग्यविषयविपर्ययाणां चोपलक्षणार्थम् । तथाहि । बाष्पपांसुपटलमशकवार्त्तिप्रभृतिभिः कुतोऽपि भ्रान्तिनिबन्धनाद्धूमत्वेनावधारितैर्द्धनञ्जयविनिर्मुक्तेऽपि प्रदेशे तत्परिज्ञानमनुमानविपर्ययः । निबिडकुदर्शनाभ्यासाविर्भूतभावनाप्रभावाच्चागमविपर्ययोऽपि सम्भवति । तद्यथा—

स्याद्वादन्यायबाह्येषु शाक्यनैयायिकमीमांसककापिललौकायतिकसंसारमोचकादिशास्त्रेषु यत्किञ्चिदेकान्ताभिनिवेशेनोपदिश्यते तत् प्रमाणमिति ज्ञानं तेषां विपर्ययः । तथाहि । क्षणिकाक्षणिके वस्तुनि सर्वथा क्षणभङ्गुरत्वाभिमतिर्विपर्ययः शाक्याभिक्षूणाम् । भिन्नाभिन्नयोर्द्रव्यपर्याययोर्भेदैकान्ताहंकृतिर्विपर्ययो नैयायिकानाम् । नित्यानित्यात्मके शब्दे सर्वथा नित्यत्वमतिर्विपर्ययो मीमांसकानाम् । कर्त्तर्यात्मन्यकर्तृताप्रतीतिर्विपर्ययः कापिलानाम् । सत्सु स्वर्गापवर्गात्मधर्मादिषु वस्तुषु नास्तिताप्रतिपत्तिर्विपर्ययो लोकायतानाम् । अधर्मनिबन्धने प्राणिवधे धर्मनिबन्धनत्वबुद्धिर्विपर्ययः संसारमोचकानाम् । तथा स्याद्वादिनामपि केषाञ्चित् प्रचुरतरपापोदयादागमविपर्ययः सम्भवति । यथोपपद्यमानमुक्तौ स्त्रीजातौ मुक्त्यभावाभिमानः संभाव्यमानभुक्तौ भगवति केवलिनि भुक्त्यभावकदाग्रहश्च विपर्ययः क्षपणकानाम् । विपर्ययत्वं चैषामशेषाणामपि कदभिप्रायाणां प्रमाणैः प्रतिहन्यमानत्वादवगन्तव्यमिति ।

शाक्यादिमतानिदेशः ।

अस्यां समस्ति विपरीतमतौ मतानां
भेदः परैः स्वरुचिभिः परिकल्पितानाम् ।
तत्र प्रभाकरमतानुगता विवेक-
ख्यातिं विवेकविकलाः परिकल्पयन्ति ॥ ९१ ॥

---

१ संसारमोचकाः—ब्रह्माद्वैतवादिनः । एतेऽपि चित्तशुद्धयर्थं प्राणिवधमयज्ञानभिमन्यन्ते । २. दिगम्बराणाम् ।

तथाहि । ते प्राहुः । इदं रजतमित्यादिविपरीतप्रत्ययोत्पत्तौ न किमपि कारणमालोक्यते । तदुत्पत्तौ हि कारणमिन्द्रियमन्यद्वा भवेत् । न तावदन्यत् । निवृत्तेन्द्रियव्यापारस्यापि तथाविधबोधोत्पत्तिप्रसक्तेः । नापीन्द्रियम् । तद्धि रजतसदृशे शुक्तिशकले सम्प्रयुक्तं सत्तत्र निर्विकल्पकमुपजनयत्सविकल्पकमपि तत्रैवोपजनयेन्न रजते । रजतस्येन्द्रियेणासम्प्रयोगात्तत्रावर्त्तमानत्वाच्च । न चाऽसंपृक्तमवर्तमानं चेन्द्रियपरिच्छेद्यम् **'सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना'** इत्यभिधानात् । अन्यथा व्यवहितसमस्तवस्तूनामपि तत्परिच्छेद्यत्वप्रसक्तितोऽयत्ननिष्पन्नं सर्वस्यापि सर्वज्ञत्वं भवेत् । यदि चेन्द्रियं विपरीतप्रत्ययमुत्पादयति तर्हि सर्वदैव किमिति नोत्पादयति । न च दोषाणां सकलमपीदं विलसितमिति जल्पनीयम् । दुष्टं हि कारणमौत्सर्गिककार्यविहितौ प्रतिहतसामर्थ्यं सम्पन्नमिति तदेवमाजीजनत् । कुतः पुनर्विपरीतकार्यविहितये प्रवर्त्तितुमुत्सहते । न हि कलमबीजं तैलकलुषितमपि कदलाङ्कुरकरणकौशलमवलम्बते । किञ्च किमिदं दोषविलसितं नाम । इन्द्रियसामर्थ्यस्य प्रतिस्खलनं विनाशो वा । पक्षद्वयमप्यनुपपन्नम् । इन्द्रियसामर्थ्यस्य प्रतिस्खलने विनाशे वा सर्वथा कार्यानुत्पत्तिप्रसक्तेः । न खलु मणिमन्त्रादिना ज्वलनसामर्थ्यस्य प्रतिस्खलने विनाशे वा स्फोटादिकार्योत्पत्तिः समुपलब्धा । तस्मात्कारणाभावान्नार्थं विपरीतप्रत्ययः सङ्गच्छते । तर्किं हन्त शुक्तिकायां रजतप्रतिभासः सम्यक्प्रत्यय एव । अथि मुग्ध केन कर्णे तव न्यवेशि शुक्तिकायां रजतप्रतिभास इति । इदं रजतमिति हि ग्रहणस्मरणरूपं सम्यक्प्रत्ययद्वयम् । विभिन्नकारणजन्यत्वाद्विन्नगोचरत्वाच्च । इन्द्रियं हीदमंशोल्लेखवतोऽध्यक्षस्य कारणम् । साधारणभास्वररूपदर्शनप्रतिबोध्यमानः संस्कारश्च रजतमिति स्मरणस्य । तथा इदमिति बोधस्य पुरोवर्त्तिशुक्तिकाशकल-

प्रमस्थले विवेकाख्याति स्वीकुर्वतां प्रभाकरमतानुयायिनां सविस्तरं खण्डनम् ।

---

१ मी. श्लो. वा. सू. ४ प्रत्यक्षसूत्रे श्लो. ८४.

मालम्बनम् । रजतमिति तु बोधस्य व्यवहितं हट्टपट्टादिव्यवस्थितं रजतम् । रजताकारं हि संवेदनं रजतगोचरमेव युज्यते न शुक्तिशकलालम्बनम् । अन्याकारस्य संवेदनस्यान्यालम्बनत्वानुपपत्तेः । तदुपपत्तौ च समस्तप्रतिभासः सकलालम्बनः स्यादित्यशेषस्याशेषदर्शित्वप्रसक्तिः । प्रयोगो विवादापन्नं रजतसंवेदनं रजतगोचरमेव तदाकारत्वात् । यद्यदाकारं संवेदनं तत्तद्गोचरमेव यथा स्तम्भाकारं स्तम्भगोचरमेवेति । यदि चान्याकारमपि संवेदनमन्यगोचरं स्यात्तदाऽस्य स्वार्थव्यभिचारतः सर्वत्राप्यविश्रम्भान्न कस्यापि क्वचन प्रवृत्तिर्निवृत्तिर्वा कुतश्चिद्भवेदित्यखिलव्यवहारप्रलोपप्रसङ्गः । तस्माद्रजताकारसंवेदनं रजतगोचरमेवाङ्गीकर्त्तव्यम् । तदा च तत्र न रजतं पुरतः स्थितं समस्तीत्यनीतमेव तत्स्मर्यत इति पारिशेष्यात्प्रसिद्धम् । तथाहि । न तावद्रजतनयनसम्प्रयोगसमुपजातमेव तद्रजतज्ञानमिति साम्प्रतम् । अतिविप्रकृष्टविषये सन्निकर्षासम्भवादिन्द्रियाणाम् । असति च लिङ्गाद्युपलम्भे जायमानस्यास्यानुमानादिभावो न शङ्कितुमपि शक्यः । ततः परिशेषतः स्मरणमेवैतदाश्रयणीयम् । अपि चेदं स्मरणमनाकलितरजतस्य प्रतिपत्तुरनुत्पद्यमानत्वात् । यदित्थं ततथा यथाभवद्बाधविवादास्पदं रजतस्मरणम् । न चेदं वाच्यं न स्मरणमिदं तदंशवैधुर्यात्सम्प्रतिपन्नग्रहणवदिति । इह भूतले घटो नास्तीत्यनुल्लिखिततदंशस्यापि स्मरणस्य स्वीकरणात् । भूयसां च पदपदार्थस्मरणानामनुल्लिखिततदंशानामेवोपलम्भात् । अथेदं प्रेर्येत यद्यतीतं रजतमत्र स्मर्यते तदा स्यात्तीतत्वेन प्रतिभासः स्यान्न चासावस्ति । एतदपि सुकुमारशेमुषीविलसितम् । यतः काचकामलप्रमुखकरणोद्भवदोषसमूहमाहात्म्याद्वर्त्तमानस्य शुक्तिशकललक्षणार्थस्य ग्राहकं ज्ञानं शुक्तिलक्षणमर्थं शुक्तिकेयमिति स्वस्वरूपेण प्रतिपत्तुमसमर्थं शुक्तित्वलक्षणासाधारणधर्मस्य रजताच्छुक्तेर्भेदकस्यानेनाग्रहणात् चाकचक्यादिसाधारणधर्मात्मना तु रजतान्वयिना पुरास्थितं वस्तु रजतादगृहीतभेदं प्रतिपद्यमानं रजत-

स्मृतिज्ञानस्य कारणतां प्रतिपद्यत इति रजतशुक्तिकाशकलयोः स्मरण-ग्रहणयोश्च भेदेनाग्रहणान्नातीततया रजतप्रतिभास इति । अत एव रजतमिदमिति सामानाधिकरण्यं सत्यसन्निहितरजततुल्यव्यवहारश्च न दुरुपपादः । नन्वेवमख्यातिपक्षे प्रतिज्ञायमाने नेदं रजतमिति बाधक-प्रत्ययः पश्चाद्भावी सनुपलभ्यमानः कस्य बाधकत्वेन व्यवस्थापयिष्यते सर्वस्यापि संवेदनस्य यथार्थत्वेन भवतामभिमतत्वात् । अयि सरलमते कोऽयमियान् सन्त्रासः । न हि बाधकप्रत्ययेन न रजतमिति किन्तु प्रागप्रतिपन्नो विवेकः प्रकाश्यते नेदं रजतं यदेवेदं पुरोवर्ति शुक्तिका-शकलं तदेव रजतमित्येतन्न किन्त्विदमिदं रजतं रजतम् । एतदुक्तं भवति । इदमन्यद्रजतमन्यदिति सोऽयं विवेकः प्रकाशितो भवति । अथैवं पर्यनुयुज्यते भवतु स्मरणानुभवयोर्विवेकस्याग्रहणमिदं रजत-मित्यादौ । स्वप्ने पुनः कथमिदमुपपादयिष्यते न हि तत्र द्वयमस्ति स्वप्नज्ञानस्यैकत्वात् । भीरो किं संवृत्तं स्वप्ने । इदं रजतमित्यादौ हि स्मरणानुभवौ न विवेकेनावधार्येते । स्वप्ने तु स्मृतिरेवैका स्मरण-रूपतया न ग्रहीतुं शक्यत इति सुव्यक्तमेव स्मृतिस्वरूपस्य स्वप्नस्य स्वप्नेऽपि विवेकेनाग्रहणमिति । सदृशदर्शनमन्तरेण स्वप्नदशायां स्मृतिरेव न सम्भवतीति मावमंस्थाः । नानाविधनिमित्तप्रभवत्वा-त्स्मरणानाम् । निद्रोपद्रुतं एव हि मनः स्वप्ने स्मरणसमुत्पत्तौ निमित्ती-भवत्येव । यद्येवं शशधरद्वितयातिक्तशर्करादिसंवेदनेषु स्मृतिप्रमोषः कथं कथयिष्यते । आः कुमते न वयं सर्वत्र स्मृतेरेव प्रमोषं मन्यामहे किन्तु विवेकाख्यातिम् । सा च क्वचित्कथञ्चित्कस्यचिदुपपादयितुं शक्यत एव । तथाहि । क्वचिदनुभवस्मृत्योर्विवेकस्याग्रहणं यथेदं रजत-मित्यादौ । क्वचित् स्मरणस्य स्वरूपेणाग्रहणं यथा स्वप्नावस्थायाम् । क्वचित्तु तिमिरादिदोषेण द्विधाकृती नायनी वृत्तिः श्वेतकिरणमैक्येन ग्रहीतुं न शक्नोति यथा द्विचन्द्रप्रत्यये । क्वापि रसनेन्द्रियसम्पृक्तपित्त-

१ ' एव ' इति नास्ति भ. पुस्तके । २ 'स्वप्ने' इति नास्ति भ. म. पुस्तकयोः।

धातौ तिक्तत्वं परिच्छिन्दानः प्रतिपत्ता मधुरद्रव्याश्रितं माधुर्यं परिच्छेत्तुं न पारयति । यच्च तिक्तत्वं परिच्छिनत्ति तत्परमार्थतः पित्तधात्वधिकरणमेव न तु मधुरद्रव्यगतं ततु समास्वादयन्नयं प्रमाता दोषवशान्नैव विवेक्तुं शक्नोति यथा तिक्तशर्कराप्रत्यये । एवं पीतः शङ्ख इत्यादावपि । तत्र हि विनिर्गच्छन्नयनरश्मिवर्त्तिनः पित्तधातोः पीतिमानमाकलयन् प्रमाता नयनदोषवशात् कम्बुसमाश्रितं शुक्लत्वमाकलयितुं न शक्नोति । यत्तु पीतिमानं परिच्छिनत्ति स परमार्थतः पित्तधातुसमाश्रित एव न तु कम्बुवर्त्ती दोषवशात्तु प्रतिपत्ता नेत्थं विभागं कर्तुं पटीयानिति । एवं च सति सर्वत्र सम्यग्ग्रहणमेव विवेकाख्यातिः सिद्धा भवति । तथा च कोऽपि स प्रत्ययो नास्ति यो विपर्ययाख्यां लभेत । ये तु विवेकाख्यातेर्द्विषन्तः शुक्तौ रजतप्रतीतिं ख्यापयन्ति न ते सङ्ख्यावि[1]दः । इत्थं हि तेषां बाह्यार्थसिद्धिर्न प्राप्नोति । प्रस्तुतरजतसंवेदनदृष्टान्तेन समस्तसंवेदनानां निरालम्बनत्वप्रसक्तेः । यथैव हि प्राकरणिकं रजतसंवेदनं रजताभावेऽपि रजतं प्रकाशयति तथा सकलानि घटादिबाह्यार्थसंवेदनानि बाह्यार्थाभावेऽपि तं प्रकाशयिष्यन्तीति ज्ञानाद्वैतवादिमतसिद्धिर्निःप्रत्यूहा वर्त्तमाना केन वार्येत । ततस्तामनिच्छता तत्र विवेकाख्यातिरेव स्वीकर्त्तव्या ।

विवेकेनाख्यातिस्तदियमधुना सिद्धिसदनं
समारूढा प्रौढप्रमितिपृथुनिश्रेणिवशतः ।
प्रमाणेनोन्मुक्तां पुनरितरथा ख्यातिमपरे
प्रकामं जल्पन्तः कथमिह सतां ग्राह्यवचनाः ॥ ९२ ॥

क्षिप्तं वेदानीं निशितनिशितान्युक्तिबाणानशेषान्
शून्यां मन्ये त्वमसि कृतवान् स्वान्तनूर्णीं स्वकीयाम् ।
सम्प्रत्यत्रावहिति पदवीं सर्वथारोपय त्वं
श्रीजैनानामयि ऋजुमते तत्प्रतीकारकेलीः ॥ ९३ ॥

---

१ पण्डिताः ।

तथाहि यत्तावदभिहितमिदं रजतमित्यादिविपरीतप्रत्ययोत्पत्तौ न किमपि कारणमालोक्यत इत्यादि । तदाकुलम् । कामलादिदोषदूषित-नेत्रादिसामग्र्या एव तत्कारणत्वेनावलोकनात् । यत्पुनरिन्द्रियपक्षे प्रोक्तं तद्धि रजतसदृशे शुक्तिशकले सम्प्रयुक्तं सत्तत्रेत्यादि । तदनभ्युपगमो-पालम्भमात्रम् । शुक्तिकाशकलस्यैवेदं रजतमिति ज्ञानगोचरत्वेनाभ्युप-गमात् । स्थगितनिजवपुरुपगृहीतरजतरूपा शुक्तिकैव ह्यत्र प्रकाशत इति स्याद्वादिनां मुद्रा । अपि च न कार्यप्रतीतौ कारणाभावाशङ्का युक्ति-मती । तथा च प्रामाणिकाः 'कार्यं चेदवगम्येत किं कारणपरीक्षया । कार्यं चेन्नावगम्येत किं कारणपरीक्षया' इति । प्रतीयते चात्रेदं रजतमित्याकारकज्ञानलक्षणं कार्यं ततोऽस्यावश्यं कल्पनीयं किञ्चि-त्कारणम् । तच्च कल्पितमेव दोषकलुषितेन्द्रियादिसामग्रीरूपम् । यद-प्यवादि दुष्टं हि कारणमौत्सर्गिककार्यविहितावित्यादि । तदप्यचतुर-स्रम् । दावदाहदोषदूषितशक्तीनां वेत्रबीजानां वेत्राङ्कुरविपरीतकदला-ङ्कुरलक्षणकार्यकरणकौशलावलोकनात् ।

अथ दावदाहस्य वेत्राङ्कुर एव कर्त्तव्ये दोषता । कदलाङ्कुरे तु गुणभाव एवेत्युच्यते । तर्ह्यत्रापि काचकामलादेः सम्यग्ज्ञाने कर्त्तव्ये दोषता । मिथ्याज्ञाने पुनः साधुतैवेति सर्वं समानम् । तस्मादौत्सर्गिक-कार्यकरणे प्रतिहतसामर्थ्यानां करणानां विपरीतकार्योत्पादकत्वमुपल-भ्यमानं भवताभ्युपगन्तव्यम् । अन्यथा स्वमतव्याघातः । तथाहि रजतमिति स्मरणस्य पूर्वानुभवदेशाबाधितप्रवृत्तिरूपौत्सर्गिककार्याति-क्रमेण शुक्तिकादेशे प्रवृत्तिजनकत्वं भवतैवाङ्गीकृतम् । तच्चैवमुच्यमाने कथं सङ्गच्छेत । भेदाग्रहसहकारिरहितस्य तत्तस्यौत्सर्गिकं कार्यं तत्स-हचरितस्य त्विदमेव तथेति चेत् । ममापि दोषरहितस्येन्द्रियादेस्तदौ-त्सर्गिकं कार्यं दोषसहितस्य त्विदमेव तथेति समानम् । स्मरणस्य प्रवृत्ति-रौत्सर्गिकं कार्यं सा च यत्र क्वचिद्यथा तथा भवतु तथापि न तदति-क्रम इति चेत् । ममापीन्द्रियादेर्ज्ञानमौत्सर्गिकं कार्यं तच्च यत्र क्वचिद्यथा

तथा भवतु तथापि न तदतिक्रम इति समः समाधिः । यच्चोक्तं किमिदं दोषविलसितं नामेन्द्रियसामर्थ्यस्य प्रतिस्खलनमित्यादि । तत्र विनाशपक्ष एव कक्षीक्रियते । न तत्र सर्वथा कार्यानुत्पत्तिप्रसक्तिः । शक्त्यन्तरोत्पादस्यातीन्द्रियशक्तिप्रतिष्ठायां वक्ष्यमाणत्वात् । यदपि तर्किं हन्त शुक्तिकायां रजतप्रतिभासः सम्यक्प्रत्यय एवेत्याङ्क्य अयि मुग्ध केन कर्णे तव न्यवेशीत्यादिना शुक्तिशकलालम्बनमिति पर्यन्तमुदैर्घत । तत्र विभिन्नकारणजन्यत्वादिभ्यः सामग्र्यन्तर्गतानेककारणभेदात् प्रस्तुतकार्यभेदः सिषाधयिषितः सामग्रीभेदाद्वा । आद्यभेदे दत्तः संवेदनानामैक्याय जलाञ्जलिः । सामग्र्यन्तर्गतैकरूपालोकलोचनादिभिरनेकैः कारणैरुत्पद्यमानस्य स्तम्भादिसंवेदनस्याप्यनेकत्वप्रसक्तेः । नं चेयमिति तैरनेकान्तः । द्वितीयकल्पे पुनरसिद्धिः सामग्रीभेदस्यात्रासम्भवाच्चक्षुरादिकारणकदम्बकस्यैव प्रकृतरजतज्ञानकारणत्वादथ इदमिति रजतमिति च प्रत्यक्षः स्मृतिरूपः कार्यभेदो अत्र सम्भाव्यत एव । तत्र सामग्रीभेदोऽनुमीयत इति मतिः । नेयं सा परस्पराश्रयदोषप्रसक्तेः । सिद्धे हि सामग्रीभेदे इदं रजतमित्यत्र प्रत्यक्षस्मृतिरूपतया कार्यभेदसिद्धिस्तत्सिद्धौ च सामग्रीभेदसिद्धिरिति । योऽपि भेदसिद्धौ विभिन्नगोचरत्वादिति हेतुरुपन्यस्तः । सोऽप्यसिद्धः । शुक्तिशकलस्यैव प्रस्तुतरजतज्ञानगोचरत्वात् । पुरोवर्त्तमानं हि शुक्तिशकलं लोचनादयः काचकामलादिदोषपरिप्लवाद्रजताकारतया दर्शयन्ति । कथमन्यथा शुक्तिसान्निध्यमनपेक्षमाणमेव हि प्रस्तुतरजतज्ञानं नोत्पद्येत । यदप्युक्तमन्याकारस्य संवेदनस्यान्यालम्बनत्वानुपपत्तेस्तदुपपत्तौ वेत्यादि । तदेतद्दुःशिक्षितयन्त्रवाहकस्येवास्य स्ववधायोपस्थानम् । एवं वेत्राङ्कुरः हेतुभ्यो वेत्रबीजेभ्यो दावदग्धेभ्योऽपि कथमन्यकारणकार्यः कदलाङ्कुरः समुत्पद्यते । समुत्पत्तौ वा तत एव सकलकार्योत्पत्तेर्वेत्रबीजकरणा-

१ न चेत्यादि प्रसक्तिरित्यन्तं नास्ति म. प. पुस्तकयोः। तथा 'द्वितीयपक्षे स्फुटमन्योन्याश्रयः इति म. पुस्तकेऽधिकः पाठः।

द्वैतसिद्धिप्रसङ्गः । यदपि प्रस्तुतरजतज्ञानस्य रजतगोचरतासाधनाय-विवादापन्नं रजतसंवेदनं रजतगोचरमेव तदाकारत्वादित्यनुमानमवादि । तदपि प्रत्यभिज्ञाविप्रतिक्षिप्तपक्षत्वादुपेक्षार्हम् । तथाहि बाधकप्रत्यय-समनन्तरं यदेव शुक्तिशकलं कलधौतरूपेण मया प्राक्प्रत्याकलितं तदेवेदमिति प्रत्यभिज्ञानमात्मलाभमनुभवदनुभूयते । तथा विवादापन्नं शुक्तिशकलं रजतज्ञानालम्बनं रजतोपायव्यतिरेकित्वे सति रजतार्थिनां प्रवृत्तिविषयत्वात् । यद्यदेवं तत्तत्तथा यथा सम्यग्रजतम् । यथोक्तसाधनसम्पन्नं च विवादापन्नं शुक्तिशकलम् । तस्माद्यथोक्तसाध्याधार-मिति । तथा शुक्तिशकलं विवादास्पदरजतज्ञानालम्बनं नेदं रजतमिति प्रत्ययविषयत्वात् । यदेवं न भवति न तदेवं यथा सम्यग्रजतम् । न च न तथेदं तस्मादुक्तसाध्यसमन्वितमिति । तथा विवादापन्नं रजतसं-वेदनं पुरोवर्त्तिशुक्तिशकलगोचरमेव तत्रैव प्रवृत्तिनिमित्तत्वाद्यत्रैव प्रवृत्तिनिमित्तं तत्तद्गोचरमेव यथा सम्यग्रजते रजतज्ञानम् । पुरोवर्तिन्येव शुक्तिशकले प्रवृत्तिनिमित्तं चेदं ज्ञानं तस्मात्तद्गोचरमेवेति । अति-क्रान्तकलधौतालम्बनत्वे तु न शुक्तिकाशकले प्रवृत्तिनिमित्तत्वं स्यात् । अथातिक्रान्तकलधौतालम्बनत्वेऽप्यस्य दोषमहाम्यादतिक्रान्तकलधौतस्य शुक्तिशकलतो भेदस्याग्रहणात्तत्र प्रवृत्तिनिमित्तत्वं युज्यते । एतदप्य-विचारीतरमणीयम् । यतो भेद एव । कोऽत्राभिप्रेत आयुष्मतः । किं वस्तुस्वरूपमात्रं परस्पराभावो व्यावर्त्तकधर्मयोगो वा । पौरस्त्यपक्षे ग्रहणस्मरणाभ्यां पुरोवर्त्तिपूर्वानुभूतवस्तुस्वरूपग्राहिभ्यां भेदो गृहीत एव । अन्यथाकारं वा ग्रहे विपरीतख्यातिरेव स्यात् । द्वितीयस्तु पक्षः प्रमाकरैरभावानङ्गीकारादनभ्युपगत एव । अभ्युपगमे वा विपणि-वीथ्यादावगतस्य रजतस्य मुक्ताकरंडीरगतशुक्तिकायामभावः स्फुट एव । अनियतदेशं विगलिततद्विशेषं रजतं स्मृतं तदभावश्च नात्रा-धिगत इति चेत् । हन्त पूर्वमनियतदेशमेव रजतमात्रमाभासितम् । दोषवशाद्वा नियतदेशमप्यवगतमनियतदेशतया स्मर्यते । न तावदाद्यः

पक्षः। अनियतदेशप्रतीत्यभावेन तस्य पराहतत्वात्। द्वितीये तु विपरीतख्यातिर्नियतस्यानियतत्वेनाभासनात्। देशो न स्मर्यते रजतमात्रं तु स्मृतमिति कुतो विपरीतख्यातिरिति चेत्। तथापि यत्तावत्तेन पूर्वमवगतं तस्याभावः स्फुट एवेत्युक्तम् पूर्वावगते हि रजते स्मर्यमाणे केवलाधिकरणोपलब्धिरेव तस्याभावोपलम्भः। यद्यपि वणिग्वीथ्यादिगोचराणां रजतानामभावः स्फुटतरस्तथापि शुक्तिकादेशस्थस्य तस्य नावगत इति चेत्। न। शुक्तिकादेशे न रजतं तावदवगतमेव। अनवगतं च न स्मृतिविषयः। अस्मर्यमाणस्य चाभावग्रहोऽपि न प्रवर्त्तकः। प्रवर्त्तकत्वे वा यस्यैव कस्यचिदभावो नावगतस्तत्तदर्थिनः प्रवृत्तिः स्यादविशेषात्। अथ व्यावर्त्तकधर्माग्रहो भेदाग्रहः। तथा च वणिग्वीथ्यादावेवावगतस्य रजतस्यात्र स्मरणं व्यावर्त्तकास्तु देशकालजात्यादिभेदा न गृह्यन्ते। एवं च सति परस्परामावो गृह्यतां मा वाग्राहि नास्त्युभयथापि विरोधः। एतदपि न मनोहरम्। स्मर्यमाणवस्तुनि रजतत्वस्यैव व्यावर्त्तकधर्मस्य प्रतिभासनात्। व्यावर्त्तकत्वं च तस्य पुरोवर्त्तिन्यविद्यमानत्वात्। अविद्यमानस्यापि च प्रतिभासे विपरीतख्यातिः। स्यादेतद्यद्यपि गृह्यमाणात् स्मर्यमाणस्य व्यावर्त्तको धर्मोऽवगतस्तथापि गृह्यमाणस्य स्मर्यमाणान्नावगतः। न खलु शुक्लत्वादयो धर्मा यावन्तः प्रतिभान्ति शुक्तिकायां तावद्भिः सा व्यावर्त्तयितुं शक्यते। तेषां रजतसाधारणत्वात्। एतदपि नास्ति। देशकालावस्थाशून्यतया स्मर्यमाणाद्रजतात् पुरोवर्त्तिनोऽनुभूयमानस्य व्यावर्त्तकानां कालदेशावस्थाविशेषाणां प्रमीयमाणत्वात्। अथैवं मन्येथाः शुक्तिकारजतयोर्यौ परस्परभेदकौ धर्मौ तयोः प्रतिभानं निवृत्तिहेतुप्रतिभानं तु प्रवृत्तिहेतुरिति सिद्धम्। न च देशभेदास्तादृशास्तेषां शुक्तिकायामिव रजतेऽपि समानत्वात्। रजतत्वशुक्तिकात्वे पुनस्तादृशी ते च न प्रतिभाते। ततश्च युक्ता प्रवृत्तिरिति। एतदपि नोपपद्यते। रजतं स्मरतो रजतार्थिनः पाषाणत्वसामान्यविशेषानुपलम्भे पाषाण-

व्यक्तिदर्शने तत्र प्रवृत्तिप्रसक्तेः । चाकचक्यादिसादृश्याभावात्तत्र न प्रवर्त्तत इति चेत् । न । क्षीरोदकल्पान्तकल्लोलकलितमहिम्नि हिमांशुकिरणधाम्नि तुहिनाचले प्रवृत्तिप्रसङ्गात् । पर्वतत्वविशेषस्तत्र प्रतीत इति चेत् । न । दूरत्वादिदोषाच्छरदभ्रानुकारिणि तस्मिन्प्रतिभातेऽपि पर्वतत्वाप्रतिभासनात् । सामान्यविशेष इव परिमाणभेदोऽपि व्यावर्त्तकस्तत्र यद्यपि नाम सामान्यविशेषो न प्रतिभातस्तथापि परिमाणविशेषप्रतीतिः केन वार्यत इति चेत् । हन्त परिमाणं सर्वद्रव्यसाधारणं कथमिव व्यावर्त्तकं भवेत् । जात्या साधारणमप्यवान्तरभेदात्तथा भवतीति चेत् । नन्वनेन न्यायेन कालदेशविशेषोऽपि जात्या साधारणोऽप्यवान्तरवर्त्तमानत्वपुरःप्रदेशत्वादिभेदाद्व्यावर्त्तकस्तथा च सति तत्प्रतिभाने भेदोऽपि प्रतिभात इति कुतो भेदाग्रहः । इदमपरमालोच्यतां तादात्म्यप्रतीतिरुपजायमाना क्वचित् किमाकारा किं सामानाधिकरण्येन प्रतीतिराहोस्वित्परस्परभावविरहितत्वेन विषयसंवेदनम् । आद्ये कल्पे विपरीतख्यातिः । इदं रजतमिति समानाधिकरणतयैव प्रतीतेरुत्पादात् । नतु परमार्थतः सामानाधिकरण्यमस्ति प्रकृते किन्तु भेदाग्रहमात्रेण तथाभिमन्यन्ते प्रतिपत्तारः । तथा चावाचि शालिकेन ।

' सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या ।
भेदानध्यवसायादियमपि तादृक्परिस्फुरति ' इति ।

हन्त परमार्थतो व्यधिकरणेऽपि प्रतीती यदि सामानाधिकरण्येनाभिमन्येते प्रतिपत्तृभिस्तदा विपरीतख्यातिरेव तदहो निर्लज्जता अन्यथाख्यातिर्नेष्यते भेदानध्यवसायादियमपि तादृक्परिस्फुरतीत्येतच्चाभिधीयते । अपि च यथा सन्निहितरजतमतितुल्यता विवादास्पदरजतमतेः कथ्यते तथा वर्त्तमानत्वानवभासितयाऽतीतरजतावभासिज्ञानतुल्यताप्यस्या अस्तीति तुल्यतथा पुरुषाग्र-

---

१ प्रकरणपञ्जिकायां नयवीथ्याख्ये चतुर्थप्रकरणे कारिका ४१.

वृत्तिनिमित्तमपि भवेद्विशेषाभावात् । तथा चायं रजतज्ञानवान् प्रतिपत्ता पुरोवर्त्तिनि शुक्तिशकललक्षणेऽर्थे सन्देहदोलान्दोलितमतिः किं प्रवर्त्तेत निवर्त्तेत वा । युगपत्परस्परविरुद्धप्रवृत्तिनिवृत्तिलक्षणक्रियाद्वयं कर्त्तुमापन्नः किं नाम कुर्वीतेति कष्टां काञ्चिद्दशामाविष्टोऽसौ तपस्वी । परस्परा-भावविरहितत्वेन विषयसंवेदनमिति द्वितीये तु पक्षे त एवं प्रष्टव्याः । किं सर्वथा परस्परभावविरहिततया रजतस्य शुक्तिशकले प्रतिभासः । किं वा शबलतया । आद्ये पक्षे तादात्म्यग्रहणप्रसङ्गस्तथा च विपरीत-ख्यातिः । द्वितीये तु प्रवृत्तिर्दुरुपपादा । न हि शबलतया वस्तुनि प्रतीते प्रतिनियतरजतार्थिनः प्रवर्त्तन्त इति । अपि च न तावज्ज्ञान-मुपजातमात्रमेव सत्तामात्रेण प्रवृत्तिमुपजनयति किं तर्हीच्छाद्वेषजनना-नन्तरोपजाततदनुरूपप्रयत्नद्वारेण । तौ च प्रयत्नं जनयन्तौ स्वकारणी-भूतज्ञानविषय एव जनयतः न हि करकमलचालनेच्छायाः कदाचिदपि शरीरचालनानुरूपः प्रयत्नो जन्यमानो दृष्टः । तदत्र रजतविज्ञानेनापि स्वविषय एवेच्छा तया च प्रयत्नो जन्यः स्वविषय एव न वा क्वचिदपि इत्यास्थेयम् । तथा च पुरोवर्त्तिनि रजतज्ञानस्याविषये नेच्छा कारणा-भावात् । अत एव न प्रयत्नस्तदभावाच्च न प्रवृत्तिरिति । इदमिति पुरोवर्त्तिवस्तुगोचरमपि ज्ञानमस्तीतिचेत् । नैवम् । तस्य हानोपादान-योरनङ्गत्वात् । न हीदमिति कृत्वा प्रवर्त्तन्ते निवर्त्तन्ते वाऽपि तु विशेषतो ज्ञात्वाऽनेनार्थक्रियां निष्पादयिष्याम इति हृदि निधाय । इदमिति ज्ञानेनागृहीतभेदं स्वरूपतो रजतज्ञानमेवेच्छां तादृशीं प्रसूत इति चेत् । न भेदाग्रहेऽपि स्वरूपानतिवृत्तेः । न हि शालिबीज-मगृहीतभेदं कोद्रवबीजात्कोद्रवोचितमङ्कुरमुपजनयति । नापि रत्नं प्रदीपकुड्मलादगृहीतभेदं स्पृश्यमानं दहतीति । तदर्थं प्रमाणार्थः । विवादाध्यासितं ज्ञानं न स्वविषयमन्तरेणेच्छां जनयति ज्ञानत्वादुभय-वादिसिद्धसत्यज्ञानवदिति । स्यादेतत् । सर्वेषां प्रत्ययानां यथार्थत्वं प्रमाणसिद्धम् । तच्चान्यथा न निर्वहतीत्येतावता ग्रहणस्मरणभेद-

मालम्बमानाः समर्थितवन्तः । तथा च प्रयोगः । विवादाध्यासितः प्रत्ययो यथार्थः प्रत्ययत्वात्सम्प्रतिपन्नप्रत्ययवदिति । तदवद्यम् । तथाहि किमिदं यथार्थत्वं नाम सिषाधयिषितम् । किं विषयसमुत्थत्वमात्रं विवादास्पदरजतसमुत्थत्वमबाधितविषयत्वं वा । नाद्य पक्षः । सिद्ध-
५ साधनत्वात् । पुरोवर्त्तिशुक्तिशकलविषयत्वात् तदुत्पत्तेरुपेतत्वात् । नापि द्वितीयो, यतोऽत्र किं रजतज्ञानस्य साक्षाद्रजतसमुत्थत्वं साध्येत परम्परया वा । आद्यपक्षे प्रत्यक्षबाधः । प्रत्यक्षेणैव रजताभावस्य तत्र प्रतीयमानत्वात् । पुरोवर्तिशुक्तिशकलविषयत्वात् । द्वितीये तु सिद्ध-साधनम् । पूर्वरजतानुभवजनितसंस्कारप्रबोधप्रभवस्मरणद्वारेण रजत-
१० मिदमिति ज्ञानं प्रति रजतस्यापि कारणत्वेनेष्टत्वात् । तृतीये तु प्रत्यक्षबाधः स्फुट एव । नेदं रजतमिति बाधकस्य स्वसंविदितस्य विद्यमानत्वात् । नेदं ज्ञानस्य बाधकं किन्तु व्यवहास्येति चेत् । हन्त कोऽयं व्यवहारो नाम । उपादानमिति चेत् । नन्वेतज्ज्ञानरूपम्, कायपरिस्पन्दादिरूपं वेति वाच्यम् । आद्ये कल्पे कथं रजतार्थिनस्त-
१५ त्रानुपादेये वस्तुन्युपादेयबुद्धिर्न विपरीतख्यातिः । कथं वा तज्ज्ञान-बाधः सकलज्ञानानां यथार्थत्वाभ्युपगमेन बाध्यत्वासम्भवात् । द्वितीये तु यस्य न परिस्पन्दो न च तथाविधः प्रयत्नो न च शब्दप्रयोगः प्रेक्षावतां तत्प्रत्ययश्च नेदमिति जातस्तत्र तेन किं बाध्यते । न ताव-द्व्यवहारः । तस्याप्रसक्तत्वात् । नापि विषयः । तस्याप्येवं स्वरूपत्वात् ।
२० ज्ञानेनासंयत इति चेत् । नन्वेवमेव ब्रुवद्भ्योऽस्मभ्यं किमिति कुप्यसि । नन्वशेषकारणसन्निधाने सति जायमाने विज्ञाने यदेव प्रतिभाति स एव तस्य विषय इष्यते तदत्र रजते प्रतिभासमाने शुक्तिका विषय इति बुद्धिविरुद्धमिति । नैष दोषो विकल्पासहत्वात् । तथाहि पुरोवर्तिवस्तु प्रतिभाति न वेति भवानेव प्रष्टव्यः । प्रतिभाति चेत्तत्र
२५ किमस्माभिस्तदुल्लङ्घनेनान्य एव विषयोऽभिधीयते येन विषयवैप्यम्य-प्रसङ्गः स्यात् । सर्वत्रैव हि साक्षात्कारिविज्ञाने पुरोगतः पदार्थो गोचरः

केनचिदात्मना । येन च स्वरूपेन बुद्धौ विपरिवर्त्तते तेनैव वेद्योऽपि स्वरूपान्तरेण तु वेद्यतायां भवेद्विरोधो न चैवमातिष्ठामहे । न हि पुरोवर्त्तिवस्तु रजततयाऽवभासमानं शुक्तिकात्वेन विषय इति प्रतिजानीमहे । तदेव हि रजतमिति विलोक्य हर्षभयतरलतारचक्षुश्चतुर्दिशमवलोकयन्नुत्सङ्गे गोपयति रजतं तु न भवति । अत एव भ्रान्तिरिति लौकिकपरीक्षकैर्गीयते । एतेन न प्रतिभातीति द्वितीयपक्षः प्रत्युक्तो वेदितव्यः । पुरोवर्तिवस्तु रजततया प्रतिभात्येव केवलं स्मरणमिति कल्पयित्वा पुरोवर्त्तिविषयादन्यत्र नेतव्यम् । प्रत्ययत्वादिति हेतुश्चासौ नैकान्तिकोऽप्यन्यथानुपपत्तेरनिश्चितत्वात् । न खलु यथार्थत्वमन्तरेण प्रत्ययत्वं नोपपद्यत इत्येवं प्रमाणमस्ति । एवं चायुक्तमुक्तमतिक्रान्तकलधौतस्य शुक्तिकाशकलतो भेदस्याग्रहणात्तत्र प्रवृत्तिनिमित्तत्वमिति । ततश्च शुक्तिकाशकलस्यैवेदं रजतमिति ज्ञानालम्बनत्वमवबोद्धव्यम् । ततः कथं शुक्तिसकलमेवालम्बनमभिधीयते न हि विभिन्नाकारस्य स्तम्भकुम्भगोचरज्ञानद्वयस्यैक एव विषयः प्रतिपादयितुमुचित इति । तदनुपपन्नम् । यतो नाकारभेदादपि ज्ञानस्य भेदः सङ्गच्छते प्रत्यभिज्ञानेन व्यभिचारात् । तद्धयनेकाकाराक्रान्तमप्येकमिति सर्वपरीक्षकसम्प्रतिपन्नम् । एवमिदं रजतमित्यादिविपर्ययज्ञानमप्येकमवसेयम् । तथैव तत्स्वरूपप्रकाशनात् न हि प्रतिभासोपारूढमुभयत्र कञ्चन विशेषमुपलभामहे । एतत्तु प्रतिपद्यामहे यदुतैकं प्रमाणं यथावस्थितवस्तुस्वरूपपरिच्छेदकत्वात् । अन्यत्वप्रमाणं तद्विपर्ययात् । एवं च विवादापन्नं रजनसंवेदनं रजतगोचरमेव तदाकारत्वादित्यत्र पक्षस्य प्रत्यभिज्ञानादिबाधा सिद्धैव । एतेन चानुमाननिरासेन यदवादि शालिकेन ।

"अत्र ब्रूमो य एवार्थो यस्यां संविदि भासते ।
वेद्यः स एव नान्यद्धि विद्याद्वेद्यस्य लक्षणम् ॥ १ ॥

---

१ प्रकरणपञ्जिकायां नयवीथ्याख्ये चतुर्थप्रकरणे श्लो. २३, २४, २५.

इदं रजतमित्यत्र रजतं चावभासते ।
तदेव तेन वेद्यं स्यान्नतु शुक्तिरवेदनात् ॥ २ ॥
तेनान्यस्यान्यथाभावः प्रतीत्यैव पराहतः ।
परस्मिन् भासमाने हि न परं भासते यतः ॥ ३ ॥' इति, ।

तन्निरस्तमवगन्तव्यम् । यच्चावाचि यदि वान्याकारमपि संवेदनमन्यगोचरमित्यादि । तदपि न पेशलम् । एवं हि क्वचित्प्रदेशे कदलाङ्कुरो दावदाहदूषितबेत्रबीजजन्योऽपि न तज्जन्यो भवेत् । अन्यकार्यकारणस्यान्यकारणकार्यकारित्वानुपपत्तेः यदि हि अन्यकार्यकारणमप्यन्यकारणकार्यं कुर्यात्तदाऽस्य कार्यं प्रतिनियततामावतः सर्वत्र कार्येऽविश्रम्भमात्रसम्भवात् क्वचित् कस्यचित् प्रवृत्तिर्न स्यादिति प्रतिनियतकार्यकारणव्यवहारप्रलयप्रसङ्गः । यदपीदं स्मरणमनाकलितरजतस्य प्रतिपत्तुरनुत्पद्यमानत्वादित्याद्यनुमानमवादि । तत्रापि पक्षस्य प्रत्यक्षबाधितत्वम् । प्रकृतरजतसंवेदनस्य विशदावभासितया स्फुटतरं स्मरणाद्भेदेनानुभूयमानत्वात् । अनाकलितरजतस्य प्रतिपत्तुरनुत्पद्यमानत्वादिति हेतोश्च रजतगोचरेण समीहितसाधनतानुमानेन संस्कारेण रजतशब्दोल्लेखिप्रत्यक्षेण वाऽनैकान्तिकत्वम् । तथाहि समीहितसाधनमेतद्रजतं रजतजातीयत्वात् सम्प्रतिपन्नरजतवदिति समीहितसाधनतानुमानमनाकलितरजतस्य नोत्पद्यतेऽथ च स्मरणं तन्न भवति । तथा रजतसंस्कारो रजतशब्दोल्लेखि प्रत्यक्षं चागृहीतरजतस्य नोत्पद्यते न चैतत् स्मृतिरिति ।

हेतुस्ततोऽयं न हि साध्यसिद्धिं शक्तो विधातुं व्यभिचारदुष्टः ॥
विपक्षपक्षेऽपि निबद्धबुद्धिर्भृत्योऽथवा किं प्रभुकार्यशक्तः ॥९४॥

यदपि तदंशवैधुर्यादित्यस्मरणसाधनेऽनैकान्तिकत्वमुक्तम् । तदप्यनभ्युपगतोपालम्भमात्रम् । इदं चानुमानं प्रकृतरजतज्ञानस्य स्मरणरूपताप्रतिषेधाय बोद्धव्यम् । प्रकृतरजतज्ञानं स्मरणभवभावं न भवति

विशदावभासित्वाद्यदित्थं तदित्थं यथा सम्प्रतिपन्नं ज्ञानं तथा चेदं तस्मात्तथा । एवं च यतः काचकामलेत्यादि न दुरुपपाद इत्यन्तं कदर्थितं मन्तव्यम् । किञ्च भवताऽपि संवित्तिः स्वप्रकाशा स्वीक्रियत एव । तत्रेयं रजतसंवित्तिस्तपस्विनी केन स्वभावेन प्रकाशतामिति विभावनीयम् । यदि स्मृतिरूपेणेत्युच्यते, हन्त तर्हि कः प्रमोषशब्दस्यार्थः । अथानुभवरूपेण प्रथते, तर्हि विपरीतख्यातिरेवेयं समायाता स्मृतेरनुभवत्वेन प्रथनात् । अथ संविन्मात्रतयैव रजतसंवित्तिः प्रतिभाति । तदपि न निरवद्यम् । रजतमिति विषयोल्लेखस्यानुभूयमानत्वात् । स्मरणानुभवलक्षणविशेषशून्यायाश्चात्र प्रघट्टके विषयसंवित्तेरनुपपद्यमानत्वात् । यच्च प्रागप्रतिपन्नो विवेकः प्रकाश्यत इत्यादिकमिदमन्यद्रजतमन्यदिति सोऽयं विवेकः प्रकाशितो भवतीति पर्यन्तं बाधकप्रत्ययव्याख्यानं कृतम् । तद्व्याख्यानमात्रमेव । तथाबाधकप्रत्ययस्यानुभूतेः । न ह्येवं बाधकज्ञानमुत्पद्यते यदविविक्तं तद्विविक्तमिति किन्तु पूर्वानुभवविषयीकृतस्य रजतस्य प्रतिषेधमेव बोधयन्नेदं रजतमिति । किञ्च नेदं रजतमिति बाधकज्ञानं यदेवेदं पुरोवर्त्ति शुक्तिकाशकलं तदेव रजतमिति एतन्न किन्त्विदमिदं रजतं रजतमित्येवं व्याख्यानयता भवतापि तत्र प्रसक्तस्यैव रजतस्य प्रतिषेधोऽभ्युपेयः । यतो यद्यत्र प्रतिषिध्यते तत्तत्र प्रसक्तमेव यथा क्वचित्प्रदेशे घटः । प्रतिषिध्यते च पुरोवर्त्तिशुक्तिकाशकले तादात्म्येन रजतमिति विना चानुभवं कुतस्तत्र तत्प्रसक्तिः । यदि च सर्वथाऽननुभूतमप्रसक्तमपि च कलधौतं प्रतिषिध्यते । तर्हि तदिव च चामीकरमपि किमिति न प्रतिषिध्यते । यत्पुनरलीकशौर्यातिरेकमात्मन्यभिमन्यमानेन प्रभाकरेणाभिहितम् । भीरो किं संवृत्तं स्वप्न इत्यादि । तदपि न क्षोदं क्षमते । स्वप्ने हि यदि स्मृतेः स्मृतित्वेन न ग्रहणमिति विवेकाख्यातिरभिधीयते । तर्हि केन रूपेण ग्रहणमिति परामर्शनीयम् । रूपान्तरेण ग्रहणे विपरीतख्यातिरेवावतिष्ठते । सर्वात्मना

त्वग्रहणे स्वप्नस्मरणयोरविशेषप्रसङ्गः । अनुभवप्रत्ययश्च स्वप्ने संवेद्यते न तु स्मरणमुल्लेखमात्रमिति कदाग्रह एव । तन्न विवेकाख्यातिः प्रख्यातिप्रख्यापनम् । यदपि विप्लुतानुरूपकोपातिरेकादाक्रोशपुरःसरमाः कुमते न वयं सर्वत्र स्मृतेरेव प्रमोषं मन्यामह इत्यादिना स्वप्नक्रिया-
५ कथां कथयित्वा कथितं क्वचित्तु तिमिरादिदोषेण द्वेधाकृता नायनीवृत्तिः श्वेतकिरणमैक्येन ग्रहीतुं न शक्नोति यथा द्विचन्द्रप्रत्यय इति । तदपि यदि न गदितं परं स्वपरिषदि गौरवं प्राप्नोति न पुनर्विवेकेषु । द्विधाकृता हि तिमिरेण नायनीवृत्तिर्यदि नाम कुमुदबन्धोरेकत्वं नावबुध्यते । नावबुध्यताम् । विपरीतस्तु द्वित्वानुभवस्तत्र परिस्फुरन्
१० केन तिरोधातुं शक्यः । अथ नयने तिमिरेण सीमन्तिते समाश्रितं परमार्थतो द्वित्वं नतु निशीथिनीनाथे नयनसमाश्रितत्वेन तु द्वित्वस्य यदग्रहणमियमेव विवेकाख्यातिरिति ब्रूषे ।

सन्तः कुतोऽयमिह जल्पति जञ्जपूको
लज्जाकरं कृतिजनस्य मनीषिमानी ।
१५ हुं तत्त्वमत्र विदितं यदमुष्य साधोः
श्रद्धालुतातिमहती स्वमतप्रसिद्धौ ॥ ९५ ॥

तथाहि सर्वत्र परोक्षायामपि नेत्रवृत्तौ तद्वत्तत्वेन द्वित्वं प्रतिभासत इति यदुच्यते तन्नूनं वक्तुः श्रद्धालुतामेव ध्वनयति । न ह्येककलानिधेर्बोधेऽपि नयनवृत्तेरेकत्वं प्रतीयते । अनवबुध्यमानैव हि करणानां
२० वृत्तिः सर्वत्र रूपादीन् बोधयति । यदपि मधुरद्रव्यतिक्तत्वप्रत्यये विवेकाख्यातिसमर्थनतृष्णया कापि रसनेन्द्रियसम्पृक्तपित्तधातावित्यादिकमवादि । तदपि न सहृदयहृदयसंवेद्यम् । यदि नाम मोहात्पित्ताधिकरणत्वेन तिक्तत्वं नावबुध्यते मावबोधि मधुरद्रव्ये तु तिक्तत्वबुद्धिः किं निबन्धना । तुल्याधिकरणतया हि तिक्तं मधुरद्रव्यमिति तिक्तत्व-
२५ बुद्धिराविर्भवन्ती सर्वैरनुभूयते । पित्तं पुना रसनेन्द्रियगतं नयनाश्रित-

---

१ ' गदितम् ' इति म. पुस्तके नास्ति ।

तिमिरमिवानवगम्यमानमपि विपरीतप्रत्ययमुत्पादयति । कायाश्रितमिव शिरःपीडाज्वरसन्तापप्रमुखमिति । यत्त्वेवं पीतः शङ्ख इत्यादि प्रत्यपादि । तदपे पूर्वोक्तयुक्त्यैव प्रत्यादिष्टम् । यदि नाम प्रसरन्नायनरश्मिसमाश्रितपित्तधातोः पीततां प्रतिपद्यमानः प्रतिपत्ता तिमिरादिदोषकलुषितलोचनतया शङ्खाश्रितं श्वेतिमानं न गृह्णाति मा ग्रहीत् । पीतताप्रतीतिः पुनरस्य कम्बौ किंनिबन्धना । समानाधिकरणतया हि पीतः शङ्ख इति पीतताप्रतीतिः समस्तप्रतिपत्तॄणां समुल्लसति । यत्पुनः प्रमातुर्नेत्रकिरणाधिकरणपित्तधातुसम्पृक्तायाः पीतताया: प्रतिभासनमभिधीयते तदतीवानुपपन्नम् । पित्तधातुपीतिमा हि लोचनं निरुन्धानः कज्जलकालिमेव प्रमातुः कथं नाम स्वगोचरं लोचनोद्भवं प्रतिभासनमाविर्भावयितुं समर्थः । अथातिस्वच्छतया कज्जलकालिम्नः सकाशाद्विलक्षणोऽयं पित्तधातुपीतिमेति नयनमनिरुन्धान एव स्वविषयं संवेदनमुत्पादयति प्रतिपत्तुरिति प्रतिपादयेथाः । तदपि न पेशलम् । अतिप्रसक्तेः । स्वच्छतानिमित्तयां हि नेत्रनिरोधितायां विज्ञानोत्पादकत्वेन प्रतिपद्यमानायां नेत्रोपरि परिस्फुरन्नीरबिन्दुगोचरं संवेदनमुत्पादयन् केन प्रतिहन्यते । प्रसरन्नयनदीधितिसम्बन्धश्च प्रसारिणोः पित्तपीतिमपयःपृषतोरविशिष्टस्तस्मादतिदूरवर्तितासामीप्यस्याप्यदर्शनहेतुत्वादग्रहणमुभयोरपि प्रामाणिकानुकूलमालोकभायः । एवं च ।

'पीतशङ्खावबोधे च पित्तस्येन्द्रियवर्त्तिनः ॥
पीतिमा गृह्यते द्रव्यरहितेष्विव तिग्मता ॥ १ ॥
शङ्खस्येन्द्रियदोषेण शुक्लिमा नैव गृह्यते ॥
केवलं द्रव्यमात्रं तु प्रथते रूपवर्जितम् ॥ २ ॥'[1]

इत्यादि शालिकोक्तमपास्तम् । अपि चेदं रजतमिति यदिदं संवेदनद्वयमभ्युपगम्यते । तस्य किं यौगपद्येन पर्यायेण वा प्रादुर्भावः स्यात् । न तावद्यौगपद्येन । स्वकृतान्तप्रकोपप्रसङ्गात् । पर्यायेणापि

[1] प्रकरणपञ्जिकायां नयबीथ्याख्ये चतुर्थप्रकरणे श्लो. ४८, ४९.

प्रादुर्भूताविदमिति प्रत्यक्षात्पूर्वमुत्तरत्र वा रजतस्मरणमुद्भवेत् । तत्राद्यः पक्षः प्रेक्षाचक्षुषां न लक्षयितुमुचितः । इदमिति प्रत्यक्षात्पूर्वं स्मृतिबीजस्य संस्कारस्य प्रबोधकत्वानिबन्धनात् । प्रबुद्धे च संस्कारे स्मृतिरुत्पद्यते नाप्रबुद्धेऽतिप्रसक्तेः । अथ निर्विकल्पकज्ञानात्तत्संस्कारप्रबोध इष्यते । तदयुक्तम् । निर्विकल्पकज्ञानस्य सविकल्पकज्ञानसिद्धिप्रघट्टके विघट्टितत्वात् । अथेदमिति प्रत्यक्षादुत्तरत्र रजतस्मृतिः प्रादुर्भवतीत्यभिमन्यते । तन्न शोभनम् । यस्मादिदमिति प्रत्यक्षात्पश्चात्प्रादुर्भवन्ती रजतस्मृतिर्विपरीतव्यापारेऽपि चक्षुषि प्रादुर्भवेत् । एवं च सति निमीलितलोचनस्यापि रजतस्मृत्यनुभवः स्यात् । पर्यायेण च भवदभिमतज्ञानद्वयस्य प्रादुर्भावः प्रतीतिविरुद्धः । न खलु पुरोवर्तिवस्तु गृहीत्वा पश्चाद्रजतं स्मरामीति रजतं वा स्मृत्वा पुरोवर्त्तिवस्तु गृह्णामीति शुक्तिग्रहणरजतस्मरणयोः स्वस्वदशायामपि पर्यायेण प्रतीतिः समस्ति । रजतात्मकं पुरोवर्त्तिवस्तु सकृदेव प्रतिभातीति सकललौकिकानां प्रतीतेः । अपि च

पृच्छामि किञ्चिदि कोपपाटलं करोषि न श्रोत्रिय भोः स्वमाननम् ॥
तत्त्वं प्रशान्तैः सह येन कोविदैर्विचार्यमाणं घटनामुपेयते ॥ ९६ ॥

क एष स्मृतेः प्रमोषो नाम, किं प्रध्वंसः, उत प्रत्यक्षेण सहैकत्वाध्यवसायः, आहोस्वित्प्रत्यक्षरूपतापत्तिः, उतचित्तदित्यंशस्यानानुभवः, तिरोभावमात्रं वा भवेत् । तत्र यदि प्रध्वंसः । तदा साध्यसाधनसम्बन्धस्मृतेः साध्यावसायसमये प्रध्वंसात्तत्रापि स्मृतिप्रमोषः स्यात् । न च भवद्भिरपि तत्रैवं व्यवहारः प्रवर्त्यते । अथ प्रत्यक्षेण सहैकत्वाध्यवसायोऽस्याः प्रमोषः । ननु कुतः स्मृतेः प्रत्यक्षेण सहैकत्वाध्यवसायो विषयैकत्वाध्यवसायात् स्वरूपैकत्वाध्यवसायाद्वा । प्रथमपक्षे क एष विषयैकत्वाध्यवसायो नाम,अन्यतरविषय आरोपश्चेत्, किं प्रत्यक्षविषयस्य स्मृतिविषये तद्विषयस्य वा प्रत्यक्षविषय आरोपः स्यात् । तत्र प्रथमविकल्पे स्मर्यमाणरजतदेशे विपणिवीथ्यादौ शुक्तिशकलस्य स्पष्टत्वेन प्रतिभासो भवेत् । न

पुनरिदमित्युल्लेखेन पुरोवर्त्तितया । विपणिवीथीव्यवस्थितस्मर्यमाणरजते शुक्तिसकलस्यारोप्यमाणत्वात् । यत्र यदारोप्यते तद्देशे तस्य प्रतिभासो भवति । यथा मरीचिकायामारोप्यमाणस्य नीरस्य मरीचिकादेशे । स्मृतिविषये रजत आरोप्यते च प्रत्यक्षविषयः शुक्तिशकलमिति । द्वितीयविकल्पे पुनरिदन्तया स्पष्टः प्रतिभासो न प्राप्नोति । तत्रारोप्यमाणस्य स्मृतिविषयस्यास्पष्टत्वात् । तन्न विषयैकत्वाध्यवसायात्स्मृतेः प्रत्यक्षेण सहैकत्वाध्यवसायो युक्तः । नापि स्वरूपैकत्वाध्यवसायात्, स्वरूपैकत्वं हि स्मृतिप्रत्यक्षाभ्यामेवाध्यवसीयेत अन्येन वा । न तावत्स्मृतिप्रत्यक्षाभ्याम्, तयोः स्वसंविदितत्वेन परस्परविविक्तं स्वस्वरूपं वेदयमानयोरेकत्वाध्यवसायस्य विरुद्धत्वात् । नाप्यन्येन ज्ञानेन, यतस्तेन तद्वयस्याप्रतीतस्यैकत्वमध्यवसीयते प्रतीतस्य वा । न तावत्प्रतीतस्य, तद्वयप्रतीतौ तदेकत्वाध्यवसायस्य विरोधात् । नाप्यप्रतीतस्य, अतिप्रसक्तेः । अथ यदैव तद्वयं ज्ञानान्तरेण प्रतीयते न तदैव तदेकत्वाध्यवसायो येन विरोधः स्यात् । किन्तु पूर्वं तद्वयं प्रतीत्य पश्चादेकत्वेनाध्यवसीयत इति । तदयुक्तम् । संवेदनस्य क्षणमात्रस्थायित्वादियन्तं समयमवस्थानायोगात् । तन्न प्रत्यक्षेण सहैकत्वाध्यवसायः स्मृतेः प्रमोषः । नापि प्रत्यक्षरूपतापत्तिः, तद्रूपतापत्तौ हि तस्याः स्मृतिरूपतापरिक्षयात् प्रत्यक्षरूपतैव स्यान्न स्मृतिरूपता । तत्कथमस्याः प्रमोषः । अन्यथा मृत्पिण्डस्यापि घटरूपतापत्तौ मृत्पिण्डरूपतापरिक्षयेऽपि मृत्पिण्डत्वप्रसक्तेर्मृत्पिण्डप्रमोषोऽपि स्यात् । अथात्र प्रत्यक्षबाधा, साऽन्यत्रापि समाना । अथ तदित्यंशस्याननुभवः स्मृतेः प्रमोषः । तद्रजतमित्याकारा हि प्रतीतिः स्मृतिः, तच्छब्दस्यानुभूतपरोक्षार्थालम्बनत्वात् । स यत्र नानुभूयते तत्र स्मृतिः प्रमुष्टेत्यभिधीयत इति । तदलौकिकम् । एवं हि रजताकारस्याप्यनुभवाभावप्रसक्तेः । तद्रजतमिति हि निरंशमेकमेवेदं स्मरणं भवतेप्यते । तत्र तदित्यस्य प्रमोषे रजतमित्यस्यापि प्रमोषः स्यात् । निरंशस्यैकदेशेन प्रमोषानुपपत्तेः ।

अपि च प्रमोषशब्दस्य कोऽर्थोऽभिप्रेतः प्रज्ञाशालिनः । किमेकदेशापहारः सर्वापहारो वा । न तावदेकदेशापहारः, तत्र प्रशब्दप्रयोगस्य निरुपयोगत्वात् । एकदेशेन तस्करैर्द्रविणापहरणे मोषशब्दप्रयोगो लोके निरूढः । ततः सर्वापहार एव प्रमोषशब्दस्यार्थ उपपन्नः । प्रकृष्टो मोषः प्रमोष इति मोषस्य चैष प्रकर्षो यत्सर्वात्मना वस्तुनोऽपहार इति । एवं च स्ववचनव्याघातः स्मृतिरस्ति किन्तु प्रमुष्टेति । यदि हि साऽस्ति कथं प्रमुष्टा । प्रमुष्टा चेत् कथमस्तीति । अथ तिरोभावः स्मृतेः प्रमोषः । सोऽपि ज्ञानयौगपद्ये सिद्धे सति सिद्ध्येत् । न च भवतः ततस्तत्सिद्धम् । अपसिद्धान्तप्रसक्तेः । किञ्च स्मृतेस्तिरोभावः किं कार्याकर्तृत्वं स्यादावृतत्वमभिभूतस्वरूपतयाऽवस्थानं वा । आद्यविकल्पे किं हि स्मृतेः कार्यं यदकर्तृत्वात्तिरोभावस्तस्याः स्यात् । परिच्छित्तिश्चेत् । ननु सा तत्रास्त्येव । रजतपरिच्छित्तेरनुभूयमानत्वात् । द्वितीयविकल्पोऽप्यनुपपन्नः । ज्ञानस्यात्रियमाणत्वानुपपत्तेः । चिरस्थायिनो हि पदार्थस्यात्रियमाणत्वं दृष्टम् । न च ज्ञानं चिरस्थायितया त्वया स्वीक्रियते ' क्षणिका हि सा न चिरकालमवातिष्ठते' इति स्वसमयप्रकोपात् । तृतीयविकल्पोऽप्यघटमानः । बलवता हि दुर्बलरूपाभिभवो दृष्टः प्रभाकरेणेव तारानिकरस्य । दुर्बलत्वं च स्मृतेः समतिक्रान्तविषयत्वाद्बाध्यमानत्वाद्वा भवेत् । प्रथमपक्षे क्षय एव स्मृतिवार्त्तायां भवेत् । सर्वस्याः समतिक्रान्तविषयतया दुर्बलत्वतो वर्त्तमानवस्तुप्रतिभासज्ञानेन स्वरूपाभिभूतिप्रसक्तेः । बाध्यमानत्वं पुनर्विपरीतख्यातिमन्तरेण नोपपद्यत इत्यवोचाम । ततः स्मृतिप्रमोषाग्रहं परित्यज विपरीतख्यातिरेवाभ्युपगन्तुमुचिता । यदि चेयं नाभ्युपगम्यते । तदा यदेतच्छास्त्रश्रवणानन्तरमावि सर्वं क्षणिकमित्यादिज्ञानं तस्य रूपं चिन्तनीयम् । किमिदं विपर्ययरूपमाहोस्वित्स्मृतिप्रमोषरूपमिति । तत्र यदि विपर्ययरूपं तदा किमर्द्धजरतीयन्यायेन[1] ।

---

१ अर्धा जरती अर्धा युवतिस्तदिवेति न्यायस्वरूपम् ।

रजतादिज्ञानमपि विपर्ययरूपमेषितव्यम् । अथ स्मृतिप्रमोषरूपम्, तदप्यनुचितम् । शास्त्रश्रवणानन्तरभावित्वेन स्मृतिरूपतानुपपत्तेः । न खलु शास्त्रश्रवणजनितं विज्ञानं स्मरणं युक्तम् । अक्षादिजनितज्ञानस्यापि तथात्वप्रसक्तेः । किञ्च पूर्वमनुभूतमेव पश्चात्स्मर्यते । न चासच्छास्त्रश्रवणादर्वाक्कुदर्शनाभ्युपगतक्षणिकत्वाद्यनुभवः प्रादुर्भूत इति नेदं स्मरणम् । तदभावाच्च कस्य प्रमोष इति । यदपि जल्पितं प्रस्तुतरजतसंवेदनदृष्टान्तेन समस्तसंवेदनानां निरालम्बनत्वप्रसक्तेरित्यादि । तदपि निरुपयोगम् । प्रस्तुतरजतसंवेदनेऽपि शुक्तिशकलालम्बनत्वस्य सविस्तरमनन्तरमेव समर्थितत्वान्निरालम्बनत्वाप्रसिद्धिरिति कथं तद्दृष्टान्तावष्टम्भेन सकलसंवेदनानां निरालम्बनत्वमभिधीयमानं सुधियां[1] मनः प्रीणाति । अथ समस्तप्रत्ययानां सालम्बनत्वे स्ववाचैव यथार्थत्वमस्माभिरिव भवद्भिरपि प्रतिपन्नं स्यात्तत्कथं विपरीतख्यातिः सिद्ध्यतीति मन्यते । तदपि न तथ्यम् । यथार्थत्वेन सह सालम्बनत्वस्यान्यथानुपपत्तेरसिद्धेः । न हीदं रजतमित्यादिज्ञानानि शुक्तिकाद्यालम्बनान्यपि यथार्थानि सम्भवितुमर्हन्ति । नेदं रजतमित्यादिबाधकप्रत्ययैस्तेषां बाध्यमानत्वस्य प्रतिपादितत्वात् । यत्र तु पाश्चाद्भाविनो बाधप्रत्यया न प्रादुर्भवन्ति तानि ज्ञानानि यथार्थत्वेन व्यवस्थितानीत्यलमतिविस्तरेण ।

एवं तावत्तव किल पुरः पक्षपातानपेक्षं
भेदाख्यातिं खलु वयमिमां मानतः क्षिप्तवन्तः ।
भ्रातः प्राभाकर यदि भावनभ्यधादत्र काश्चित्
युक्तिं शक्तां स्वमतविषये तत्त्वमेव प्रमाणम् ॥ ९७ ॥

तस्मात्त्वं चेत्तार्किकाणां कदाचित्कर्तुं गोष्ठीमिच्छसि स्वच्छबुद्धे ॥
भेदाख्यातौ दोहदं दोषवत्यां मा कुर्वीथाः सर्वथाऽस्यां तदानीम् ॥ ९८ ॥

[1] मन्दाक्रान्ता ।

भ्रान्तिमख्यातिमाचख्युः सङ्ख्याविन्मानिनः परे ॥
प्रकटीकुर्वते तत्र यां युक्तिं सा प्रदर्श्यते ॥ ९९ ॥

तथाहीदं रजतमिति प्रस्तुतज्ञाने रजतसत्ता विषयभूता तावन्नास्ति। अभ्रान्तत्वप्रसक्तेः। रजताभावोऽपि न तज्ज्ञानस्यालम्बनम्। रजतविधिपरत्वेन तस्य प्रवर्त्तनात्। अत एव शुक्तिखण्डमपि न तदालम्बनं युक्तम्। नापि रजताकारेण शुक्तिखण्डमालम्बनत्वेन प्रतिपादयितुमुचितम्। अन्यस्यान्याकारेण ग्रहणाप्रतीतेः। न खलु स्तम्भाकारेण कुम्भस्य ग्रहणं प्रतीतम्। तस्मान्न किञ्चिदत्र ज्ञाने ख्यातीति ॥

५ भ्रमस्थलेऽख्यातिवादिनां मतस्य सविस्तरं खण्डनम्।

तस्मादख्यातिरियं ख्यातिप्रासादशिखरमधिरूढा ॥
सम्प्राप्य युक्तिमेतां सोपानपरम्पराप्रायाम् ॥ १०० ॥

अत्रोच्यते—

किमख्यातिप्रतिष्ठायामेवं पर्याकुलाः स्थ भोः ॥
तस्याः प्रतिज्ञामात्रेण सिद्धेवाख्यातिरत्र च ॥ १०१ ॥

एवं हि स्वीक्रियमाणे विशेषतो व्यपदेशाभावप्रसक्तिः। यत्र हि स्वरूपं पररूपं वा न किञ्चिदपि प्रतिभासते तत्केन विशेषेण रजतज्ञानमन्यद्वा व्यपदिश्येत। तथा च।

वितथविदि यदि त्वं भाषसेऽख्यातिमित्थं
रजतमिति विशेषेणाभिधानं कथं स्यात्।
तदिह किमभिदध्याः कोविदानां सभाया-
मयमनुभववन्ध्यं लज्जते यन्न जल्पन् ॥ १०२ ॥

भ्रान्तिसुप्तावस्थयोरविशेषप्रसङ्गश्च। नहि भ्रान्तेः प्रतिभासमानार्थव्यतिरेकेण सुप्तावस्थातोऽन्योऽस्ति विशेषः। प्रतिभासमानार्थाभ्युपगमे च कथं निरालम्बनत्वेनाऽख्यातिरूपताऽस्याः स्यात्।

अख्यातिरियमेवं च पातिता ख्यातिसौधतः ॥
तत्साधनप्रवीणायाः कामं युक्तेः कदर्थनात् ॥ १०३ ॥

असत्ख्यातिं समाख्यान्ति सुसूक्ष्मप्रेक्षिणः परे ॥
तत्रोपपत्तिमेतां तु खेदयन्ति समुद्धताः ॥ १०४ ॥

तथाहीदं रजतमिति प्रतिभासमानं वस्तु ज्ञानमर्थो वा भवेत् । न तावज्ज्ञानम् । अन्तर्मुखाकारतयाऽहं रजतमित्यहङ्कारसामानाधिकरण्येनाप्रतिभासमानत्वात् । इदं रजतमिति बहिर्मुखाकारतया प्रथमानत्वाच्च । नाप्यर्थः । तत्साध्यार्थक्रियाकारित्वाभावात् । नेदं रजतमिति बाधकप्रत्ययेन वितथज्ञानविषयीकृतस्य वस्तुनोऽर्थताया बाध्यमानत्वाच्च । ततोऽसदेव तत्तत्र प्रतिभातमित्यसत्ख्यातिः ।

असत्ख्यातिमतखण्डनम् ।

एवमसत्ख्यातिरियं स्वयंवरा सुंदरीव तरुणेन ॥
अनुगृह्यतेऽत्र गाढं दृढोपपत्तिप्रपञ्चेन ॥ १०५ ॥

इमामसत्ख्यातिमुपैति लम्पटः प्रवक्ति युक्तीर्न तु तत्र निश्चलाः ॥
चिराद्भविष्यन्ति तदन्यधीमतां कपोलपाल्यः स्मितलोचनोत्सुकाः ।१०६।

तथा ह्यसत्ख्यातिरिति कोऽर्थः । किमेकान्तासतोऽर्थस्य प्रथनमथ देशान्तरे विद्यमानस्य । उत्तरस्मिन्पक्षे विपरीतख्यातिरेवेयम् । देशान्तरे विद्यमानस्य रजतस्य शुक्तिकादेशे प्रतिभासस्वीकारात् । एकान्तासतस्त्वर्थस्य प्रथनं नभोरुहवन्न समर्थयितुं शक्यम् । अपि चासत्सत्त्वेन प्रतिभातीत्यसत्ख्यातिरपि न विपरीतख्यातिमतिक्रामति । यद्यपीदं रजतमिति हि प्रतिभासमानं वस्तु ज्ञानमर्थो वेति विकल्पद्वयमकारि । तत्राद्योऽनभ्युपगमान्निरस्तः । द्वितीयस्त्विष्यत एव । तत्र च यदुक्तं तत्साध्यार्थक्रियाकारित्वाभावादिति । तन्न पेशलम् । अर्थनिबन्धनाभिलाषप्रवृत्त्याद्यर्थक्रियाकारित्वस्य तत्रापि सम्भवात् । कथं तर्ह्यत्रार्थक्रियाकारित्वेऽपि रजतस्य भ्रान्तत्वमभिधीयत इति च

नाभिधेयम्। चरणाभरणभाजनादितदर्थक्रियाकारित्वाभावात्तस्य भ्रान्तत्वोपपत्तेः । द्विविधा ह्यर्थक्रियाऽर्थमात्रनिबन्धनाऽर्थविशेषनिबन्धना च । तत्राभिलाषादिरूपाऽर्थमात्रनिबन्धना । चरणाभरणभाजनप्रभृतिस्त्वर्थविशेषनिबन्धना । अर्थविशेषनिबन्धनार्थक्रियाकारिण एवार्थस्य व्यवसायकं संवेदनमभ्रान्तमितरत्तु भ्रान्तम् । यच्चोक्तं नेदं रजतमिति बाधकप्रत्ययेन विषयीकृतस्य वस्तुनोऽर्थतायां बाध्यमानत्वादिति । तदपि न साधीयः। न हि बाधकप्रत्ययो मिथ्याज्ञानविषयीकृतस्य वस्तुनोऽर्थतां बाधते । किं तर्हि मिथ्यारजतधियः स्वविषयपरित्यागेन विषयान्तरोपसर्पणान्मिथ्यात्वं ख्यापयति ।

असत्ख्यातिरियं तस्मान्न प्रमाणेन केनचित् ।
स्वीक्रियते विदग्धेन दुर्भगेव कदाचन ॥ १०७ ॥

वावदूकाः प्रसिद्धार्थख्यातिमाहुः परे पुनः
तेषामपि स्फुटाटोपः किञ्चिदेष प्रकटयते ॥ १०८ ॥

तथाहि प्रतीतिसिद्धमेव वस्तु विपर्ययज्ञाने चकास्ति । न चास्य विचारताऽसहत्वादविद्यमानत्वं वचनीयम् । प्रतीतिं परित्यज्यान्यस्य विचारस्यैवानुपपत्तेः । पाणिपल्लवन्यस्तनिस्तुलस्थूलमुक्ताफलादेरपि यतः प्रतीतिसामर्थ्येनैव विद्यमानत्वं व्यवह्रियते । सा च प्रतीतिरितरत्रापि न नृपतिशासननिरुद्धा । न चेदं वाच्यं दूरतः शुक्तिकाशकलादौ कलधौतादेर्वस्तुनः प्रतिभासस्य तद्देशोपसर्पणे सत्युत्तरकालं प्रतिभासस्याभावादविद्यमानत्वमिति । यतो यदि नामोत्तरसमयं तद्वस्तु न प्रतिभासते तथापि यत्समयं प्रतिभासते तदा तावद्विद्यत एव । इतरथा तोयबुद्बुदादेरपि स्वप्रतिभाससमये सत्त्वसिद्धिर्न भवेत् ।

प्रसिद्धार्थख्यातिमतखण्डनम् ।

तस्मादित्थं प्रसिद्धार्थख्यातिरेषा न मुञ्चति ॥
कदाचनापि सभ्यायं कौमुदाव कलानिधिम् ॥ १०९ ॥

एतदत्र प्रसिद्धार्थख्यातौ यद्युक्तिपञ्जरम् ॥
जैनयुक्तिमदाघातस्तत्करोत्येष जर्जरम् ॥ ११० ॥

एवं हि स्वीक्रियमाणे भ्रान्ताभ्रान्तसंवेदनोदन्तसमुच्छेदप्रसक्तिः । न खलु यथावस्थितवस्तुव्यवसायित्वाविशेषेऽपि किञ्चित्संवेदनं भ्रान्तमभ्रान्तं च किञ्चिदिति निर्निमित्ता व्यवस्थितिः कर्तुं युक्ता यौक्तिकस्य । स्वैरचारित्वप्रसक्तेः ।

तथा च—

इयं भ्रान्ता संविद्भ्रमविरहिताऽसौ पुनरिति
प्रसिद्धाऽऽस्ते तावन्निखिलजनतायां व्यवहृतिः ।
अयं त्वेतां सम्यक्कथमिव तपस्वी घटयिता
यतः सत्यार्थत्वं वदति सकलज्ञानविषयम् ॥ १११ ॥

यत्पुनरुक्तं यदि नामोत्तरसमयं तद्वस्तु न प्रतिभासते । तथापि यत्समयं प्रतिभासते तदा तावद्विद्यत एवेति । तन्न निरवद्यम् । यतः प्रतिभाससमये कलधौतादेर्वस्तुनो विद्यमानत्वं किं देशान्तरे विपणिवीथ्यादावभिमतं शुक्तिकादिदेशे वा । प्रथमपक्षे विपणिवीथीव्यवस्थितस्यैव तस्य प्रतिभासः स्यात्तत्रैव विद्यमानत्वस्वीकरणात् । यत्खलु यत्र देशे सत्तामनुभवति तस्य तत्रैव प्रतिभासः सम्भवति । न हि स्तम्भदेशे कुम्भः कदाचिदुपलभ्यते । अथान्यदेशालम्बिनोऽपि कलधौतादेः सामग्रीविशेषमाहात्म्यतः शुक्तिकादेशे प्रतिभासोऽभ्युपगम्यते । हन्त तर्हि समायाता सेयं तपस्विनी विपरीतख्यातिरेव । अन्यदेशस्य वस्तुनोऽन्यदेशतया प्रतिभासाऽभ्युपगमात् । ततः प्रसिद्धार्थख्यातिरिति नाममात्रं विशिष्यते । न च तत्र विवादः कोविदानाम् । अथ शुक्तिकादेशे तस्य विद्यमानत्वमङ्गीक्रियते । तदप्यनुपपन्नम् । तद्देशोपसर्पणे सत्युत्तरकालं तत्प्रतिभासस्याभावात् । न च तोयबुद्बुदादेरिव क्षणभङ्गुरत्वं कियत्कालस्थायिनः कलधौतादेः

प्रतीयते । येन स्वप्रतिभाससमयानन्तरमेव सर्वथा परिक्षयादुत्तरकालं प्रतिभासस्तस्य न सम्भवेत् । नेदं रजतमित्यादेर्बाधकस्य च शुक्तिकादिदेशे कलधौतादिवस्तुनिषेधकस्य प्रवर्त्तमानत्वान्न तत्र तस्य विद्यमानत्वं कथञ्चिदास्थां बह्वातीति ।

तदियं प्रसिद्धवस्तुख्यातिरिह प्रमितिमार्गमकलङ्कम् ॥
अनुसरति नैव कथमपि कुलटेव सुनिर्मलं शीलम् ॥११२॥

आत्मख्यातिमतखण्डनम् ।

आत्मख्यातिं ख्यातिमार्गानभिज्ञाः
श्रद्धावन्तः ख्यापयन्तीह केचित् ॥
तस्यां तावत्तन्मतं युक्तिमार्गं
सम्प्रत्येतं दर्शयामस्तथा हि ॥ ११३ ॥

शुक्तिशकले कलधौतमिदमिति चकास्ति । तस्य च बाह्यतया प्रतिभानं नोपपत्तिमन्नेदं रजतमिति बाधकेन तद्बाह्यताया बाध्यमानत्वात् । न हि यत्प्रकारतया योऽर्थः प्रतिभासते तत्प्रकारतैव स्वीकर्तुं समुचिता सताम् । भ्रान्तत्वाभावप्रसक्तेः । ततो ज्ञानात्मन एवायमाकारोऽनादिवासनामाहात्म्याद्बहिरिव परिस्फुरतीति ।

आत्मख्यातिरियं तस्मादानीता सिद्धिपद्धतिम् ॥
बाह्यस्य भासनाभावाद्भावस्य परमार्थतः ॥ ११४ ॥
उक्तं यद्वक्तव्यं त्वया सखे निखिलमात्मनः ख्यातौ ॥
अत्राकर्णय सम्प्रति जैनानामुत्तरसमृद्धिम् ॥ ११५ ॥

तथाहि यत्तावदवादि तस्य च बाह्यतया प्रतिभानं नोपपत्तिमन्नेदं रजतमिति बाधकेन तद्बाह्यताया बाध्यमानत्वादित्यादि । तदसुन्दरम् । नेदं रजतमिति बाधकेन न रजतस्य बाह्यता बाध्यते किन्तु विपणिवीथ्यादौ वर्त्तमानस्य बाह्यस्यैव सतः शुक्तिकादेशस्थता । यदपि न्यगादि ज्ञानात्मन एवायमाकारोऽनादिवासनामाहात्म्याद्बहिरिव परिस्फुरतीति । तदप्यवाच्यम् । वासनाया एव त्वन्मते-

१ 'तस्य' इत्यधिकं म. पुस्तके ।

ऽनुपपत्तेः । तथाहि इयं वासना अवस्तुरूपा वा वस्तुरूपा वा । तत्र यद्यवस्तुस्वरूपा, तदा नभस्तामरसतुल्यायास्तस्याः कथं काञ्चन व्यवस्थां प्रति हेतुभावः सम्भवति । अथ वस्तुस्वरूपा, सापि ज्ञानाकारात्पार्थक्येन स्वरूपमाबिभर्त्ति अन्यथा वा । प्रथमपक्षे ज्ञानाद्वैतक्षतिः । ज्ञानाकारात्पृथग्भूताया वासनायाः समायातत्वात् । तथा च यथा वासना ज्ञानाकारात्पृथक्स्वरूपाऽपि घटते । तथा कलधौतादिर्बाह्योऽर्थः परमार्थतया यदि भविष्यति तदापि न किञ्चिदनुचितमालोचयामः । अथ न पार्थक्येन स्वरूपमाबिभर्त्ति । तर्हि ज्ञानाकार एवायमिति ज्ञानाकारमाहात्म्याद्बहिरिव प्रतिभासत इति तदेव साध्यं तदेव च साधनमभिहितं भवेत् । तन्न वासना नाम कदाचन स्वरूपमामुखयन्ती प्रतीयत इति तत्सामर्थ्याज्ज्ञानाकारस्य बाह्यविज्ञानप्रतिभासनमनुपपन्नमिति ।

किञ्च स्वरूपमात्रसंविदि तन्निष्ठायामाकारधारितायां च प्रसिद्धायां ज्ञानस्यात्मख्यातिः सिद्धिमासादयेत् । न चैते प्रसिद्धे । पुरस्तादनयोः सविस्तरं पराकरिष्यमाणत्वात् । स्वाकारमात्रग्राहित्वे च निखिलज्ञानानामिदं भ्रान्तमिदं चाभ्रान्तमिति विवेको बाध्यबाधकभावश्च न स्यात् । तत्र कस्यचिदपि व्यभिचाराभावात् । ज्ञानात्मस्वरूपतया च रजताद्याकारस्य संवेदनेऽहं रजतमित्यन्तर्मुखाकारतैव रजतसंवित्तिः स्यान्न पुनरिदं रजतमिति बहिर्मुखाकारतया । अनादिवासनावशाद्बहिर्निष्ठत्वेन शुक्तिस्थो रजताद्याकारः प्रतीयत इत्युच्यमाने तु विपरीतख्यातिरेवेयं स्यात् । ज्ञानादभिन्नस्य रजताद्याकारस्यान्यथात्वेनाध्यवसितत्वात् । अपि च स्वाकारमेव रजतादि बहीरूपतया ख्यापयन्ति भ्रान्तय इत्यत्र न प्रमाणमस्ति । अथानुभवः प्रमाणमिति चेत् । नैवं वाच्यम् । विकल्प्यमानस्य तस्यानुपपद्यमानत्वात् । तथा ह्यनुभवः प्रमाणत्वेन प्रतिपाद्यमानः कलधौतप्रत्ययो वा स्याद्बाधकप्रत्ययो वा । तत्र न तावत् कलधौतप्रत्ययः । स हीदन्तया कलधौतस्य न ज्ञानाकारतयापि । अथ

बाधकप्रत्ययः कलधौतस्य ज्ञानाकारतामवभासयतीत्यभिमन्यसे । मैवम् । बाधकप्रत्ययोऽपि हि शुक्तिशकले कलधौताकारतामेव प्रतिषेधति न पुनः कलधौतस्य ज्ञानाकारतामपि ज्ञापयति ।

अथायमाशयस्ते पुरोवर्त्तिशुक्त्याकारत्वप्रतिषेधे कलधौतस्य सामर्थ्याद्बोधाकारतासिद्धिरिति । तदपि न चतुरस्रम् । शुक्त्याकारत्वप्रतिषेधे कलधौतस्य बोधात्पृथग्भूतस्य सामर्थ्याद्देशान्तरादौ सत्त्वसिद्धिरित्येवं कस्मान्न कल्प्यते । किमर्थं दृष्टातिक्रमेणादृष्टस्य ज्ञानाकारत्वस्य परिकल्पनमिति । अथानुमानेन कलधौतस्य बोधाकारतासिद्धिः । तथाहि यत्प्रकाशते तद्विज्ञप्तिमात्रं यथा सुखादिकम् । प्रकाशते च कलधौतमिति । तदसत् । अस्य विज्ञानवादे विघटयिष्यमाणत्वात् । अपि च बाह्यतया स्वाकारगोचरत्वाङ्गीकरणे विभ्रमाणामिदं शुक्तिशकलं प्रत्याकलितं मयेति प्रत्यभिज्ञानानुत्पत्तिप्रसङ्गः । किन्त्वेवं प्रत्यभिज्ञानं भवेदान्तरं कलधौतं बहीरूपतया मया प्रतिपन्नमिति । किं च नेदं कलधौतमपि तु शुक्तिकाशकलमित्युल्लेखेन निषेधानुपपत्तिः । आत्मख्यातिपक्षे शुक्तिशकले कलधौतस्यासक्तत्वात् । किन्त्वेवं स्यान्नेदं कलधौतं बहिरपि त्वान्तरमिति । यदि च ज्ञानस्य बाह्यार्थविषयत्वं नेष्यते । तर्हि यथा रजताकारोल्लेखेन तत्प्रवर्त्तते तथा नीलाद्याकारोल्लेखेनापि किमिति न प्रवर्त्तते । नियामकस्याभावात् । अथानादिवासनैव तन्नियामका । कथमेवं देशादिनियमेन तस्योत्पत्तिः स्यात् । अथास्या इदमेव माहात्म्यं यदसदपि देशादिनियमेन ज्ञाने प्रदर्शयतीत्यभिधीयते । तन्न युक्तम् । असत्ख्यातित्वप्रसक्तेः । कथं वात्मख्यातिवादिनश्छेदाभिघातादिप्रतीतिः स्यात् । स्वरूपमात्रसंवित्तौ तदसम्भवात् । न खलु विज्ञानरूपस्य सुखादेः संवित्तौ तत्प्रतीतिर्दृष्टेति ।

नात्मख्यातिः प्रकृतरजतोद्भासिनि भ्रान्तिबोधे
युक्ता वक्तुं कथमपि परैस्तद्विनापि प्रमाणम् ।

---

१ 'एवं' इति प. पुस्तके पाठः ।

न्यायापेतं न खलु सुधियः सञ्चरन्ते कदाचित्
न्यायश्चात्र प्रकृतिसुभगः ख्यापितो नैव कश्चित् ॥ ११६ ॥

अनिर्वाच्यख्याति-खण्डनम् ।

केचित्पुनरनिर्वाच्यख्यातिं भ्रान्तिमुपागमन् ॥
युक्तिमार्गममुञ्चैतत्प्रवेशे निरदीदिशन् ॥११७॥

तथाहि शुक्तिशकले प्रतिभासमानस्य कलधौतस्य यदि सत्त्वं स्यात्तदा तद्बुद्धेरभ्रान्तत्वप्रसङ्गः, सत्यकलधौतबुद्धिवत् । असत्त्वे पुनर्गगननलिनादिवत् प्रतिभासप्रवृत्त्योरविषयत्वप्रसक्तिः । अथैतदभिधीयते शुक्तौ प्रतिभासमानं रजतं न सद्रूपं नासद्रूपं किन्तु सदसद्रूपमिति । तदपि नोपपन्नम् । प्रागुक्तोभयपक्षनिक्षिप्तदोषानुषक्तेः । उक्तं च 'प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न स' इति । सदसतोरैकात्म्यविरोधाच्च नायं पक्षः परीक्षां क्षमते । यदि हि सद्रूपं कथमसद्रूपम् । असद्रूपं तत्कथं सद्रूपम् । तन्न सदसद्रूपमपि निर्वक्तुं शक्यत इति ।

एवं च—

यतः सत्त्वासत्त्वप्रभृतिभिदया भद्र घटते
क्वचित् भ्रान्तिर्ज्ञाने न खलु विषयो युक्तिकलितः ।
अनिर्वाच्यख्यातिः श्रयति तदियं सिद्धिसरणिं
समुन्मीलद्युक्तिव्यतिकरवशादप्रतिहता ॥ ११८ ॥

श्रितेयं यैरनिर्वाच्यख्यातिः ख्यातिविरोधिनी ।
अनिर्वाच्या न ते न स्युर्न्यायविस्तरवेदिनाम् ॥ ११९ ॥

तथाहि । शुक्तिशकले न किञ्चित्कलधौतं नाम ख्याति । किं तर्हि शुक्तिखण्डमेव कलधौततया । तथैव प्रत्यभिज्ञानानुमानानां विवेकाख्यातिप्रतिक्षेपे प्रदर्शितत्वात् । तच्च शुक्तिकाखण्डं सत्त्वासत्त्वाभ्यां नानिर्वचनीयम् । तद्धि स्वरूपेण सत्पररूपेण चासद्दोषवशा-

त्कलधौततया प्रतिभातीति । यथा च सर्वं वस्तु स्वरूपेण सत्पररूपेण पुनरसदित्यभिधीयते न च विरुद्ध्यते तथा कथयिष्यामः स्याद्वादसिद्धिप्रघट्टक इति मा त्वरिष्ठाः । एवं च यदवाचि शुक्तिशकले प्रतिभासमानस्य कलधौतस्येत्यादि तत्सर्वं प्रतिक्षिप्तमवगन्तव्यम्।

किञ्च शुक्तिशकले कलधौतं प्रतिभातीति कथञ्चिन्न घटते विकल्पैर्विघटमानत्वात् । तथाहि । देशान्तरादिस्थितमेव कलधौतं शुक्तिकाशिरसि परिस्फुरति किं वा देशान्तरादायातमुताहो शुक्तिकायामेव सम्पन्नमिति । तत्र न प्रथमविकल्पः कल्पनार्हः । देशान्तरादिस्थितस्य कलधौतस्यात्र करणजभ्रान्तिबोधाविर्भावे कर्मकारकत्वायोगात् । नापि द्वितीयो विकल्पः । भ्रान्तिज्ञानोत्पादकाले देशान्तरादागच्छतः कलधौतस्यानवलोकनात् । तृतीयोऽपि विकल्पो न समुचितः। शुक्तिकायां कलधौतस्योत्पादकारणानुपपत्तेः । न हि परिणाम्यादिकारणसामग्रीं विना पारमार्थिकस्य कार्यस्योत्पत्तिरुपपद्यते । अथ शुक्तेरज्ञानमेव तत्र प्रतीयमानस्य कलधौतस्य परिणामिकारणमिति मतिः । दुर्मतिरेवेयम् । अज्ञानस्य केवलपरिणामिकारणत्वायोगात् । अज्ञानं हि सम्यग्ज्ञानस्य प्रागभावो मिथ्याज्ञानं वा । द्वयमपि केवलं न परिणामिकारणम् । द्रव्यस्यैव तत्पर्यायपरिकरितस्य परिणामिकारणत्वप्रसिद्धेः । तर्ह्यात्मद्रव्यमेव सम्यग्ज्ञानप्रागभावलक्षणपर्यायाविष्टं मिथ्याज्ञानस्वरूपपर्यायाक्रान्तं वा शुक्तिशकले कलधौतस्य परिणामिकारणं भविष्यतीत्यपि न सम्भावनीयम् । चेतनस्याचेतनं प्रति कथञ्चन परिणामिकारणत्वानुपपत्तेः । स्यादाकूतं भवतः । नाज्ञानं सम्यग्ज्ञानप्रागभावो नापि मिथ्याज्ञानं किन्तु ताभ्यामर्थान्तरमेव मायाविद्यादिपर्यायप्रतिपाद्यमिति । तन्न हृदयङ्गमम् । भवदभिमतमायास्वभावाज्ञानसद्भावे प्रमाणाभावात् । तस्मादसुन्दरमुच्यते । शुक्त्यविद्याजनितं रजतं भ्रमज्ञाने परिस्फुरतीति ।

अपि चानिर्वचनीयख्यातिरित्यत्र ख्यातिरिति किमयं ' ख्या प्रकथने ' इत्यस्य प्रयोगः ' ख्यां प्रथने ' इत्यस्य वा । उभयत्रापि न त्वन्मतसिद्धिः । सदसद्रूपस्य वस्तुनः कथनीयतायाः प्रथमानतायाश्च युज्यमानत्वात् अन्यथा सर्वव्यवहारविलोपप्रसङ्गः । किञ्च किं निरुक्तिविरह एवानिर्वचनीयत्वमाहोस्विन्निरुक्तिनिमित्तविरहः । न प्रथमः कल्पः कल्पनार्हः । इदं रजतं नेदं रजतमिति निरुक्तेरनुभूयमानत्वात् । नापि द्वितीयो निरुक्तेर्हि निमित्तं ज्ञानं वा स्याद्विषयो वा । न प्रथमस्य विरहः । **'रजतं भाति यद्भ्रान्तौ तत्सदेके परे त्वसत् । अन्येऽनिर्वचनीयं तदाहुस्तेन विचार्यते'** इति **इष्टसिद्धिकारिकायां ' रजतं भाति यद्भ्रान्तौ '** इत्यनेन वचसा विपरीतख्यातेः स्वयमेवाभ्युपगमात् । नापि द्वितीयस्य विरहः । यतो विषयः किं भावरूपो नास्त्यभावरूपो वा । प्रथमकल्पनायामसत्ख्यात्यभ्युपगमप्रसङ्गः । द्वितीयकल्पनायां तु सत्ख्यातिरेव । उभावपि न स्त इति चेत् । ननु भावाभावशब्दाभ्यां लोकप्रतीतिसिद्धावेव तावभिप्रेतौ विपरीतौ वा । प्रथमपक्षे तावद्यथोभयोरेकत्र विधिर्नास्ति तथा प्रतिषेधोऽपि । परस्परविरुद्धयोर्मध्यादेकतरविधिनिषेधयोरन्यतरनिषेधविधिनान्तरीयकत्वात् । द्वितीयपक्षे तु न काचित् क्षतिः । न ह्यलौकिकविषयसहस्रनिवृत्तावपि लौकिकज्ञानविषयनिवृत्तिस्तन्निरुक्तिनिवृत्तिर्वा । अथापि निःस्वभावत्वमनिर्वचनीयत्वम् । अत्रापि निसः प्रतिषेधार्थत्वेन स्वभावशब्दस्यापि भावाभावयोरन्यतरार्थत्वे पूर्ववत् प्रसङ्गः । प्रतीत्यगोचरत्वं निःस्वभावत्वमिति चेत् । अत्र स्ववचनविरोधः प्रतीत्यगोचरत्वं प्रतीयते चेति । यथा प्रतीयते न तथेति चेत्, अत्र न विप्रतिपद्यामहे । विपरीतख्यातेरेवमभ्युपगमे समागतत्वादिति ।

---

१ पाणिनिधातुपाठेऽदादिगणे धा. १७. २ अयं धातुः पाणिनिव्याकरणे नोपलभ्यते ।

एवं च—

यतो मिथ्याबुद्धौ रजतमिदमित्यत्र सततं
नृणां रूप्यत्वेन स्फुरति सदसच्छुक्तिशकलम् ।
अनिर्वाच्यख्यातावनुभवविरुद्धाभ्युपगतौ
तदेतस्यामाशां श्लथयथ कथं नैव सुधियः ॥ १२० ॥

अच्छेकमीमांसकवेधसाऽत्र प्रकल्पितां नूतनसृष्टिकल्पाम् ।
निर्मूलनाशार्थमिमामिदानीमलौकिकख्यातिमुपक्षिपामः ॥ १२१ ॥

तथाहि स प्राह । येयं शुक्तिशकले कलधौतप्रतीतिर्विपरीतख्यातिरिति तद्वादिनां सम्मता सा तथा न भवति । सम्यक्कलधौतप्रतीतिवदिहापि प्रतिभासमानस्य कलधौतस्य विद्यमानत्वात् । विशेषः पुनर्लौकिकत्वालौकिकत्वकृतः । कलधौतसंवेदनसंवेद्यं हि कलधौतमभिधीयते तत्र यद्विपणिवीथ्यादिव्यवस्थितं तल्लौकिकं, तस्मादपरमलौकिकमिति ।

अलौकिकख्यातिमत-निराकरणम् ।

अतः सतां मानसकाननोदरे गभीरयुक्तिप्रवरप्रसाधना ।
अलौकिकख्यातिरियं निरङ्कुशा करोतु केलीं करिणीव निर्भराम् ॥ १२२ ॥

एतामलौकिकख्यातिमच्छेकः[1] प्रतिपादयन् ।
अलौकिकत्वं स्वस्यैव सूचयत्येष केवलम् ॥ १२३ ॥

तथाहि । यद्यलौकिकरजतप्रतिभासः प्रस्तुतरजतज्ञाने स्यात्तदा प्रवृत्त्यभावप्रसक्तिः प्रतिपत्तृणाम् । अथालौकिकस्यापि लौकिकत्वं मत्वा प्रतिपत्तारः प्रवर्त्तिष्यन्त इति मतिः । नन्वेवं सैव विपरीतख्यातिर्भवतः सुभगतामागता । अन्यच्च यदीयं रजतमतिरलौकिकरजतालम्बना तदा तस्य दृश्यस्वभावत्वात् प्रत्यासन्नमागच्छता प्रतिपत्त्रा सविशेषं दृश्येत तत् । तथाहि दवीयोदेशवर्तिना यः पदार्थः परिच्छिद्यते स नेदीयोदेशवर्त्तिना सविशेषमवसीयते शैलादिवत् । तथेदमपि भवेत् इन्द्रियादेरप्यलौकिकरजतगोचरज्ञानजनकस्य कारक-

---

१ छेकः अवसरज्ञः । २ 'अपि' इति नास्ति प. म. पुस्तकयोः ।

चक्रस्य तदवस्थत्वात् । तथा लौकिकस्येवालौकिकस्यापि पारमार्थिककल-
धौतत्वाङ्गीकारे नेदं रजतमिति बाधकाभावप्रसक्तिः । अथ बाधकप्रत्यये-
नालौकिकस्य लौकिकत्वनिषेधः क्रियत इत्यभिमतम् । तन्न सुन्दरम् ।
नेदं रजतमिति हि रजतं प्रतिषेधयत्येष प्रत्ययो न विद्यमानस्य रजतस्या-
लौकिकत्वमवद्योतयति नेदं रजतं लौकिकमपि त्वलौकिकम् इति । किञ्च ५
प्रसक्तं प्रतिषिध्यते । न च लौकिकरजतं तत्र प्रसक्तम् । प्रसक्तं चेत्,
तर्हि विपरीतख्यातिरेव ख्यातिसौधमधिरोहति । अपि चास्मिन् पक्षे
इदं शुक्तिशकलं कलधौताकारतया मया पूर्वं परिच्छिन्नमित्येवं प्रत्य-
भिज्ञा नोत्पद्येत । किन्त्वेवं स्याद्यदेवालौकिकं कलधौतं तन्मया
लौकिकाकारेण परिच्छिन्नमिति । अन्यच्च किमिदमलौकिकत्वं नाम १०
सम्मतमायुष्मताम् । किमन्यस्वभावत्वमर्थस्य, अन्यार्थक्रियाकारित्वं,
अन्यकारणजन्यत्वं, अकारणजन्यत्वं वा । न तावदन्यस्वभावत्वम् । यादृश
एव हि सम्यक्कलधौतस्य स्वभावः प्रतिभासते तादृश एवेतरस्यापि ।
अन्यस्वभावावभासित्वे च विपरीख्यातेरेवालौकिकख्यातिरित्यभिधानं वि-
हितं भवेत् । नाप्यन्यार्थक्रियाकारित्वम् । अन्यस्यार्थस्यान्यार्थक्रियाकारित्वे १५
कारणान्तरपरिकल्पनानर्थक्यप्रसक्तेः । एकस्मादेव कारणात् सकलकार्या-
णां समुत्पत्तिसद्भावात् । एतेनान्यकारणजन्यत्वपक्षोऽपि प्रतिक्षिप्तः ।
समानसमाधानत्वात् अकारणजन्यत्वपक्षे पुनरलौकिकतया सम्मतस्य
रजतस्य भावरूपत्वमभावरूपत्वं वा भवेत् । भावरूपत्वेऽस्य
नित्यत्वप्रसङ्गः । सद्रूपस्य कारणादनुपजायमानस्यानित्यत्वानुपपत्तेः । २०
अथाभावरूपत्वम्, तर्हि कथमिदं रजतमिति विधिमुखेन तस्य प्रतीतिः ।
न खलु कुम्भाभावेऽयं कुम्भ इति विधिद्वारा प्रतीतिः स्वप्नदशायामप्य-
नुभूयते । अथाभावरूपस्यापि तस्य कुतश्चित् भ्रान्तिनिमित्ताद्भावरूपतया
प्रतीतिर्भवतीत्यङ्गीक्रियते । तर्हि सखे सैवेयं विपरीतख्यातिर्भूयोऽपि
प्रसभं वल्लभमिव भवन्तं भजत इति । किञ्चायं लौकिकालौकिकविवेकः २५
प्रतीतिनिमित्तो वा भवेत् व्यवहारभावाभावनिमित्तो वा । न तावत्स-

भ्रमः पक्षः, तथाप्रतीतेरभावात् । क्वापि रूप्यं क्वापि च रूप्याभावः प्रतीयते न पुनरिदं लौकिकं रूप्यमिदं त्वलौकिकमिति । अथेदं व्याह्रियते यत्र व्यवहारः प्रवर्त्तते तल्लौकिकमितरत्त्वलौकिकमिति । ननु कोऽयं व्यवहारः सम्मतः शेमुषीशालिनः । यदि ज्ञानाभिधानस्वभाव इत्यभिधीयते । स तावन्नास्त्येव । नहीदं लौकिकमिति कश्चिज्जानीतेऽभिधत्ते च लौकिकः । अथ रजतार्थक्रियाकरणं[1] व्यवहारः स तु प्रस्तुते रजते नास्तीत्यलौकिकं तदुच्यते । हन्तैवमुत्पत्तेरनन्तरं विनष्टः कुम्भोऽप्यलौकिकः स्यात् । स्वसाध्यसलिलाहरणधारणाद्यर्थक्रियाया अकरणात् । तन्नायं लौकिकालौकिकविभागः कथञ्चिद्विचारवर्त्तनीमनुवर्त्तत इति ।

तदेवमेवंविधदोषदूषितां विस्मृतिताशेषपरोक्तयुक्तिकाम् ।
न कश्चिदप्यत्र विसंस्थुलामिमामलौकिकख्यातिमुरीकरोति ॥ १२४ ॥

ख्यात्युत्तराणि तदिमानि विचारितानि
युक्त्या कथञ्चिदपि नैव घटामटन्ति ।
तस्मान् भ्रमेषु नियतं विपरीतवस्तु
ख्यातिः प्रमाणकलितेह समभ्युपेया ॥ १२५ ॥

सिद्धान्तभूतविपरीतवस्तुख्यातिमते परोपदर्शितदूषणानां निरासः ।

किं किं जल्पस्यन्यथाख्यातिरेव
स्वीकर्त्तव्या तार्किकैर्भ्रान्तिबोधे ।
दूरोपता सर्वथैव त्वदाशा
दोषेष्वेवं जागरूकेषु सत्सु ॥ १२६ ॥

तथाहि तस्याः किमालम्बनं कलधौतं शुक्तिकाशकलं वा । कलधौतं चेन्नन्वेवमसत्ख्यातिरेषा भवेन्न पुनर्विपरीतख्यातिः । असतः कलधौतस्य तत्र प्रतीतेः । अथान्यदेशकालं सदेव तत्तत्र प्रतिभासते ततोऽयमदोषः । तदसमीचीनम् । एवं सतीदं रजतमित्युल्लेखेन ज्ञानानुत्पत्तिप्रसक्तिः । नह्येतद्देशकाले रजते विप्रकृष्टे चाक्षुषं

[1] ' कारणं ' इति भ. पुस्तके पाठः ।

ज्ञानं भवितुमर्हति । अन्यथा सर्वत्र चाक्षुषज्ञानोत्पादप्रसङ्गेन जगतोऽपि तद् ग्राहकं भवेत् । तन्न विपरीतख्यातेः कलधौतमालम्बनम् । नापि शुक्तिका । रजताकारतयोपजायमानत्वात् । न चान्याकारायाः संवित्तेरन्यदालम्बनं युक्तम् । अतिप्रसक्तेः । यदि चेयं संवित्तिः शुक्तिकालम्बना कथमस्याः भ्रान्तित्वं भवेत् । अथेदमभिधीयते अन्यदालम्बनमन्यच्च प्रतिभाति । तथा ह्यालम्बनं शुक्तिशकलं कलधौतन्तु प्रतिभासत इति । एतदप्यसाधीयः । यतः शुक्तिशकलस्यालम्बनत्वं प्रतिभासमानत्वेन यदि नाभ्युपगम्यते तदा कथं तत्स्यादिति वाच्यम् । सन्निहितत्वेन चेत्, तर्हि तत्सन्निहितस्य विश्वम्भराप्रदेशस्यापि तदालम्बनत्वप्रसक्तिः । तन्न सन्निहितत्वनिबन्धनमालम्बनत्वम् । किं तर्हि प्रतिभासनिबन्धनम् । एवं च यदेवास्यां प्रतीतौ प्रतिभासते तदेव रजतमालम्बनतयाऽभ्युपगन्तुं युक्तं तच्च तत्रासदेव । एवं चासत्ख्यातिरियमायाता न विपरीतख्यातिरिति ।

विपरीतख्यातिमिमां समन्ततो दोषदूषितशरीराम् ।
अपरख्यातिगुणानामनभिज्ञो यदि परमुपैति ॥ १२७ ॥

किं ब्रूमहेऽस्य निरपत्रपताममूषु
यत्ख्यातिषु प्रतिहतास्वपि पक्षपाती ।
निःशेषदोषविमुखे स्वधियान्यथार्थ-
ख्यातिभ्रमेऽपि परिजल्पति दोषमालाम्[1] ॥ १२८ ॥

तथाहि यदुक्तं तस्याः किमालम्बनमित्यादि । तत्र रजतमेवालम्बनमित्येके । न चैवमसत्ख्यातित्वप्रसक्तिः । देशान्तरादौ कलधौतस्य विद्यमानत्वात् । असत्ख्यातिपक्षे हि सर्वथाऽप्यसतोऽर्थस्य प्रथनमास्थीयते । अत्र पुनर्देशान्तरादौ विद्यमानस्येत्यनयोर्महद्वैलक्षण्यं लक्ष्यते । ननु तत्राविद्यमानस्य रूप्यस्य नयनासन्निकृष्टस्य कथं प्रतिभानं

1 ' दोषमालाः ' इति भ. म. पुस्तकयोः पाठः ।

भवेदिति न विभावनीयम् । अतद्देशकालस्यापि कलधौतस्य दोषमहिम्ना सन्निहितत्वेन प्रतिभासविषयतोपपत्तेः । अत एव हि तत्प्रतीतेर्विपरीतख्यातिरूपतेत्यङ्गीक्रियते । न चातद्देशकालस्यास्य ग्रहणे विश्वस्यापि ग्रहणप्रसक्तिरित्यभिधानीयम् । सदृशार्थदर्शनसमुद्भूतस्मरणोपस्थापितस्यास्य प्रतिभासस्वीकारात् । न च विश्वस्य तदुपस्थापितत्वमस्तीति कथं तद्ग्रहणाशङ्कापि । तदुपस्थानं चेति चेतसि परिस्फुरतः पदार्थस्य बहिरवभासनमुच्यते न पुनः पशोरिव रज्जुनियन्त्रितस्योपढौकनम् । न वचनीयमेवं तर्हीयमात्मख्यातिरसत्ख्यातिर्वा सम्पन्नेति । संवेदनात् पृथग्भूतस्य पदार्थस्यात्र परिस्फुरणात्, अत्यन्तासतः प्रतिभासाभावाच्च । ननु रजतमिदमित्यादिज्ञानस्य प्रत्यक्षरूपत्वेन स्मरणानपेक्षत्वात् कुतस्तदुपस्थापितार्थावभासित्वमिति । इदं नाभिधेयम् । प्रत्यक्षाभासत्वेनास्यैवंप्रकारपर्यनुयोगानधिकरणत्वात् । ततः सिद्धमिदं, स्मरणोपढौकितं कलधौतमस्याः संवित्तेरालम्बनमिति ।

रजतभ्रमस्थले संवृत्तस्वाकारा समुपात्तकलधौताकारा च शुक्तिकैवालम्बनमिति स्वसिद्धान्तानुकूलस्य वृद्धमतस्य प्रतिपादनम् ।

संवृतस्वाकारा समुपात्तकलधौताकारा च शुक्तिकैवालम्बनमिति तु वृद्धाः । वस्तुस्थित्या हि शुक्तिरेव सा त्रिकोणत्वादिविशेषग्रहणाभावात्तु संवृतस्वाकारा चाक्चिक्यादिसमानधर्मदर्शनोपजनितरूप्यस्मरणारोपितरूप्याकारत्वाच्च समुपात्तरूप्याकारेत्यभिधीयते । ननु कथं कलधौताकारायाः संवित्तेः शुक्तिकालम्बनत्वं युक्तमतिप्रसक्तेरित्यप्यपरीक्षकलक्षितम् । अङ्गुल्यादिना हि निर्दिश्यमानं कर्मतया ज्ञानस्य जनकमालम्बनमुच्यते । एतच्च शुक्तिकायां समस्त्येव । कथमितरथा प्रस्तुतज्ञानेनेयमपेक्ष्येत । सा चैतेन नूनमपेक्षणीया । अन्यथा शुक्तेरसन्निधानेऽपि प्रस्तुतज्ञानमुत्पद्येत । एवञ्च अथेदमभिधीयते इत्यादिना शङ्कामुत्पाद्यान्यदालम्बनमन्यच्च प्रतिभातीति यद्दूषितं तदपि परास्तं प्रतिपत्तव्यम् । अन्य-

दालम्बनमन्यच्चकास्तीत्यस्यानङ्गीकरणात् । शुक्तिकाया एवालम्बनत्वेन सादृश्यवशाद्रजताकारतया प्रतिभासमानत्वेन च समर्थितत्वात् । यदि च शुक्तिकैवालम्बनं नेष्यते तदानीमुत्तरकालं तद्विषयप्रत्यभिज्ञानस्य बाध्यबाधकभावस्य चानुपपत्तिः । तथाहि यत्पूर्वं मया रजतत्वेन प्रतिपन्नं तदेवेदं शुक्तिशकलमिति प्रत्यभिज्ञानं प्रतिप्राणिप्रसिद्धं प्रकृतकलधौतधियः कलधौतालम्बनत्वे कथमात्मानं लभेत । नेदं रजतमपि तु शुक्तिकेत्येवमाकारेण शुक्तिकाज्ञानेन बाधा च कथं घटेत । भिन्नगोचरयोः स्तम्भकुम्भोपलम्भयोर्बाध्यबाधकाभावानुपलब्धेः।

अत्राह परः—

धीमन् करोमि न करोमि करोमि यद्वा
कश्चित्तवापि बत पर्यनुयोगमत्र ।
नो चेत् प्रकुप्यति भवानथवाऽप्यवज्ञां
नैव क्षणं गजनिमीलिकया करोति॥१२९॥

बोधानां बाध्यबाधकभावो नास्तीति पूर्वपक्षस्य सविस्तरं खण्डनम् ।

तथा हि कोऽयं बाध्यबाधकभावो नाम बोधानाम् । किं सहानवस्थानम् किमु वध्यघातकभावः किं वा विषयापहारः, उतचित्फलापहार इति । तत्र च यद्याद्यः पक्षस्तदा सम्यक्प्रत्ययेन मिथ्याप्रत्ययस्येव मिथ्याप्रत्ययेनापि सम्यक्प्रत्ययस्य सहानवस्थानसम्भवादविशेषेणैव बाध्यबाधकभावप्रसक्तिः । द्वितीयपक्षेऽप्ययमेव दोषः । वध्यघातकभावस्यापि द्वयोरपि सम्यङ्मिथ्याप्रत्ययोरविशिष्टत्वात् । नापि तृतीयः पक्षः। विषयस्य प्रतिपन्नत्वेनापहर्तुमशक्यत्वात् । नहि बाधकज्ञानमित्थमुत्पद्यते यत्प्रतिपन्नं तन्न प्रतिपन्नमिति । नापि फलापहारलक्षणो बाधः । उपादानादिसंविदः प्रमाणफलस्योत्पन्नत्वेनानपहरणीयत्वात् । नहि यदुत्पन्नं तदनुत्पन्नमित्यभिदधाति बाधकः ।

किञ्च तुल्यगोचरयोर्बाध्यबाधकभावः पृथग्गोचरयोर्वा भवेत् । न

---

१ गजो नेत्रे निमील्य जलस्नानादि करोति । नेत्रनिर्मीलनेन न किंचित्करोमीति भावयति च तद्वत् । २ 'च' इति भ. प. पुस्तकयोः पाठः ।

तावत्तुल्यगोचरयोः । धारावाहिज्ञानेष्वपि बाध्यबाधकभावप्रसक्तेः । नापि पृथग्गोचरयोरयं युज्यते । स्तम्भकुम्भोपलम्भयोस्तदनुपलम्भादिति। अत्राभिधीयते । प्रथमद्वितीयविकल्पौ तावदिहानङ्गीकारेणैव प्रतिहताविति तत्र वाग्विस्तरः केवलं कण्ठशोषार्थमायुष्मतः सम्पन्नः। विषयापहारस्तु बाधः स्वीक्रियते । विषयस्य च न प्रतिपन्नत्वमपह्नियते किन्तु प्रतिपन्नस्यासत्त्वं ख्याप्यत इत्यपहारार्थः । असत्त्वमपि नेदानीमुपनतमस्य ख्याप्यतेऽपि तु तदैव तदसदिति प्रकाश्यते । ततश्च न पूर्वोपलब्धमुद्वरदलितकलशाभावज्ञानं इवात्राप्यबाधा शङ्कनीया । ननु प्रथमज्ञानेन तदानीं कलधौतस्य सत्त्वं गृहीतं बाधकेन तु तदैवासत्त्वं ख्याप्यत इति स्वरूपेणैव तस्य सत्त्वमसत्त्वं च परस्परविरुद्धं युगपद्द्वयमापतितमिति । तदसत् । प्राक्प्रतिपन्नाकारोपमर्दद्वारेण बाधकप्रत्ययोत्पत्तेः । यन्मया तदा रजतमिति प्रतिपन्नं तद्रजतं न भवत्यन्यदेव तद्वस्त्विति । न चेदमाशङ्कनीयम् । स्वकालनियतत्वात् ज्ञानानां कथमुत्तरस्य ज्ञानस्य पूर्वज्ञानोत्पादकालावच्छिन्नतद्विषयाभावप्रतिपत्तिसामर्थ्यमिति । स्वसामग्रीतस्तथैवोत्तरस्य बाधकप्रत्ययस्योत्पद्यमानस्य प्रतीतेः । न च प्रमाणप्रतीतमपि प्रतिनियतकार्यकरणसामर्थ्यं पदार्थानां कदर्थयितुं केनापि शक्यमिति । फलापहारोऽपि बाधः सम्भाव्यत एव । बाधकप्रत्ययोत्पादे सत्युपादानादिबुद्धिरूपस्य प्राचीनज्ञानफलस्य निवर्त्तमानत्वेनानुभूयमानत्वात् । ततः फलापहारात् प्राक्तनसंवेदनं बाधितं भवत्येव । एवं चोपादानादिसंविदः प्रमाणफलस्योत्पन्नत्वेनानपहरणीयत्वादिति निरस्तम् । यदपीदमगादि तुल्यगोचरयोर्बाध्यबाधकभावः पृथग्गोचरयोर्वेत्यादि । तस्य तुल्यगोचरयोरेव ज्ञानयोर्बाध्यबाधकभावमभिदध्महे । न चैवं धारावाहिज्ञानेष्वपि तत्प्रसक्तिः । एकस्मिन् धर्मिणि विरुद्धाकारावबोधकयोर्बोधयोर्बाध्यबाधकभावाभ्युपगमात् । न च धारावाहिज्ञानान्येकत्र विरुद्धाकारावबोधकानीति कथं तेषु बाध्यबाधकभावाभिधानं साधीयः । अनुभूयमानत्वाच्च बाध्यबाधकभावो बुद्धीनां न

विरोधमधिरोहति । अथ मिथ्यैवायमनुभव इत्यभिदधासि । हन्त वक्तव्यं कुत इति । बाध्यमानत्वादिति चेत् । एवं तर्हि समाधाय स्वान्तं विनिमील्य लोचने विमुच्य स्वदर्शनाभिनिवेशवैशसं स्वयमेव विवेचयत्वायुष्मान् किमस्ति बुद्धीनां बाध्यबाधकभावो न वेति । तदेवं बाध्यबाधकभावानुभवस्य बाध्यमानत्वेऽबाध्यमानत्वे वोभयथापि बोधाना बाध्यबाधकभावः सिद्धिसौधमध्यास्त एव । ततः सिद्धमिदम् । संवृतम्वाकारा सम्पुपात्तकलधौताकारा च शुक्तिकैवालम्बनमिति । एवमपरेष्वपि दिनकरकरनिकरनीरावसायगन्धर्वनगरनीरदनिवहग्रहणरजनिजानियुगलावलोकनरज्जुभुजङ्गमावगमकम्बुपीतिमप्रत्ययशर्करातिक्तताप्रतिभासप्रभृतिषु विभ्रमेषु निगूहितनिजाकारं परिगृहीतजलाद्याकारं च वस्तु विषयतयावबोद्धव्यम् ।

स्वप्नादिज्ञानानां परोक्षालम्बनं खण्डयित्वा स्वमतेन तदुपपादनम् ।

अथ स्वप्नदशायां स्तम्बेरमादिप्रत्ययस्य किमालम्बनमिति चेत्, तद्देशवर्त्ती शय्यादिपदार्थ एवेत्येके । तदनुपपन्नम् । प्रमाणाभावात् । न हि सन्निहितत्वादेव ज्ञानस्य विषयः । किन्तर्हि यस्तत्र प्रतिभासते स चोत्तरकालभाविना प्रत्यभिज्ञानेन बाधकेन व्यवस्थाप्यते । न च शय्यादावित्थं प्रत्यभिज्ञानमुन्मज्जति यदुत यदेव गजादिरूपतया पूर्वं मया प्रतिपन्नं तदेवेदं शय्यादि नाप्येवं तत्र बाधकमुज्जिहीते नेदं गजादिकं किन्तु शय्यादीति । तस्मान्न तत्र शय्यादिकमालम्बनं किं तर्हि पूर्वोपलब्धोऽनुपलब्धो वा विद्यमानोऽविद्यमानो वा यः प्रतिबुद्धावस्थायां बाधकप्रत्ययेनानुसन्धीयते स खलु देशकालस्वभावान्यत्वेन स्वप्नज्ञाने प्रतिभासमानस्तस्यालम्बनमित्युच्यते । तथाहि प्रतिबुद्धः सन् कथयति मयाद्य स्वप्ने देशान्तरस्थः पुत्र इह स्थित इति दृष्टः । पिता पुनर्मृतोऽपि जीवतीति दृष्टः । तथाऽन्धोऽनन्ध इत्येवमादि । केशकूर्चाकारज्ञानेऽप्यविद्यमानः केशसमूहः सदाकारतया प्रतिभासमानः सन्नालम्बनम् । बाधकोत्पत्तौ तथाऽनुसन्धानात् । ननु चाविद्यमान-

स्यालम्बनत्वायोगान्निर्विषयमेतज्ज्ञानं प्राप्तमिति । मैवं वादीः । अतीतानागतयोरविद्यमानत्वेऽप्यालम्बनत्वात् । निरालम्बनत्वे ह्यख्यातिरेव स्यात् तत्र चोक्तो दोषः । अतीतानागतस्वप्नादिज्ञानानामविद्यमानार्थालम्बनत्वाविशेषात् भ्रान्ताभ्रान्तसंवेदनविशेषानुपपत्तिरिति चेत् । मैवं मंस्थाः । तद्रूपातद्रूपव्यवसितित्वेन तयोस्तयोर्विशेषोपपत्तेः । न हि विद्यमानाविद्यमानार्थालम्बनत्वेन तत्त्वज्ञानेतरविभागः । किं तर्ह्यविद्यमानोऽप्यर्थो यथा तथा च तेनैवाविद्यमानाकारेण निश्चीयते तदा तद्विषयं तत्त्वज्ञानमेव । तद्रूपाव्यभिचारात् । यदा पुनर्विपरीतेन सदाकारेणाऽसन्नर्थो व्यवसीयते । तदा भ्रान्तिरिति ।

एवं चैष विपर्यस्तख्यातिरूपो विपर्ययः ।
इत्थं समर्थितोऽस्माभिः परोपालम्भभञ्जनात् ॥ १३० ॥११॥

विपर्ययानन्तरं संशयस्वरूपमुपदर्शयन्नाह—

साधकबाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शि ज्ञानं संशय इति ॥ १२ ॥

साधकबाधकप्रमाणाभावात् । उल्लिख्यमानस्थाणुत्वपुरुषत्वाद्यनेकांशगोचरयोः साधकबाधकप्रमाणयोरनुपलम्भात् । अनवस्थितानेककोटिसंस्पार्शी अनवधारितनानांशावलम्बि विधौ प्रतिषेधे वा न समर्थमित्यर्थः । ज्ञानमिति बोधविशेषः । किमित्याह संशयः सामिति समन्तात्सर्वप्रकारैः शेत इवेति संशय इति व्युत्पत्तेः ॥ १२ ॥

उदाहरणमाह—

यथाऽयं स्थाणुर्वा पुरुषो वेति ॥ १३ ॥

अयमत्र भावार्थः । दूरात्प्रत्यक्षगोचरे पुरोवर्त्तिनि धर्म्मिणि स्थाणुपुरुषयोरारोहपरिणाहलक्षणस्य साधारणधर्ममात्रस्य दर्शने समानधर्मदर्शनमबुद्धसंस्कारतया विशेषस्मरणे च सति स्थाणुत्वपुरुषत्वगोचरयोर्व-

ककोटरादिकरचरणादिविशेषधर्मोपलम्भरूपसाधकबाधकप्रमाणयोरभावात् यदा स्थाणुरयमिति निर्णेतुमभिलषति तदा पुरुषविशेषानुस्मरणेन पुरुषे समाकृष्यते यदा पुनः पुरुषोऽयमिति निश्चेतुमिच्छति तदा स्थाणुविशेषानुस्मरणेन स्थाणावाकृष्यत इत्येवमनेकार्थे समाकृष्यमाणस्य प्रतिपत्तुरनवस्थितरूपतया दोलायमानः स्थाणुर्वाऽयं स्यात्पुरुषो वेति प्रत्ययः प्रादुर्भवतीत्ययं प्रत्यक्षविषये संशयः । परोक्षविषये तु यथा क्वापि विपिनप्रदेशे शृङ्गमात्रदर्शनात् किं गौरयं स्याद्गवयो वेति । जम्बूनिम्बकदम्बादितरुकदम्बकान्तरितपिण्डस्य हि समान्येन शृङ्गमात्रदर्शनानुमितस्य गोत्वगवयत्वगोचरसाधकबाधकप्रमाणाभावेन संशयविषयत्वात्परोक्षविषयोऽयं संशयः । तथा पिशाचोऽत्रास्ति न वेति गृहे स्थितस्य वाप्यामापः सन्तीत्यादि च ज्ञानं नित्यपरोक्षपिशाचकदाचित्परोक्षवार्षीपयःप्रभृतिपदार्थभावाभावलक्षणानेककोटिसंस्पर्शात्संशय एव । ननु गृहे स्थितस्य वाप्यामापः सन्तीति ज्ञानं जलभावरूपमेकमेवांशं स्पृशतीति कथमस्यानेककोटिसंस्पार्शित्वं यतः संशयः स्यादिति चेत् । साधकबाधकप्रमाणाभावापेक्षयेति ब्रूमः । तथाहि यद्यत्र साधकबाधकप्रमाणे स्यातां तदा निर्णयरूपमेवेदं भवेत् । तदभावे तु सामर्थ्यादपरोऽपि न सन्तीत्यंशोऽन्तर्निर्गीर्णः स्फुरतीति सिद्धं संशयत्वसाधकमनेककोटिसंस्पार्शित्वमस्यापीति ।

अत्राह कश्चित्—

संशयज्ञानमस्वीकुर्वतो मतस्य खण्डनम् ।

न संशयो नाम समस्ति वस्तुतः[1]
स्फुरत्प्रमाणप्रतिलब्धमूर्त्तिकः ।
न लक्षणं वक्तुमतोऽस्य युज्यते
तुरङ्गशृङ्गं किमु लक्ष्यते क्वचित् ॥१३१॥

तथाहि संशयज्ञाने धर्म्मी धर्मो वा प्रतिभासते । यदि धर्म्मी स तर्हि तात्त्विकोऽतात्त्विको वा । यदि तात्त्विकः । कथं तर्हि

---

1 'वस्तुनः' इति म. पुस्तके पाठः ।

तद्बुद्धेः संशयरूपता । तात्त्विकार्थव्यवसितिरूपत्वात् करतल-कलितकुवलयादिव्यवसायवत् । अथातात्त्विकः । तदाप्यतात्त्विकार्थ-गोचरत्वात् केशकूर्चादिज्ञानवद्विपर्यय एव संशयः प्राप्तः । अथ धर्म्मः, स स्थाणुत्वलक्षणः पुरुषत्वलक्षण उभयं वा । पक्षत्रयेऽपि तात्त्विका-
५ तात्त्विकपक्षयोः पूर्ववद्दोषः । अथैकस्य तात्त्विकत्वमन्यस्यातात्त्विकत्वम् । तथापि तद्विषयं ज्ञानं भ्रान्तमभ्रान्तं चेत्युभयरूपं प्राप्तम् । अथ सन्दिग्धोऽर्थस्तत्र प्रतिभासते । तत्रापि तात्त्विकातात्त्विकत्वविकल्पयोः स एव दोषः ।

तदयं संक्षेपः—

१० यदत्र किञ्चिद्वितसंशये स्फुरत्यतात्त्विकं तत्किमथापि तात्त्विकम् ॥
अतात्त्विकं चेत् स भवेद्विपर्ययः परत्र पक्षे पुनरस्य मानता ॥१२॥

तन्न संशयः कोऽपि विचार्यमाणः प्रतीतिपद्धतिमध्यारोहतीति ।

आः कुण्ठवर्य तदिमामलीकवाचालतां कलयताऽत्र ॥
उद्वेजिता नितान्तं भवता मनोऽनभिज्ञेन ॥ १३ ॥

१५ यतः संशयः सकलप्राणिनामनवस्थितानेककोटिसंस्पर्शिप्रतिपत्त्या-त्मकत्वेन स्वात्मसंवेद्यो वर्त्तते स च धर्म्मिविषयो धर्मविषयो वा भवतु किमेभिरप्रमाणमूलैर्गजविकल्पकल्पैर्विकल्पैरस्य स्वरूपमपह्नोतुं पार्यते । तथाहि कश्चिद्धौतः कुतर्कमुखरखट्वरखण्डिककुडम्बकादिकलको-लाहलाकर्णनमात्रवातूलः कथमपि नृपतिमन्दिरद्वारमुपागतः प्रथम-
२० जलधरनीरन्ध्रधाराधोरणीधौतसमुद्भुराङ्गनगिरिशृङ्गसोदरं सपदि विद-लितकुन्दकलिकावदातदन्तमुशलद्वितयरमणीयमनुगलविगलदविरलमद-जलाकुलकपोलस्थलममन्दमन्दरोन्मथ्यमानमहाम्भोधिध्वनिगभीरगर्जित-मूर्जितप्रभञ्जनप्रेर्यमाणध्वजपटप्रान्तप्रचलत्कर्णतालमन्तरालस्थूलचलनच-तुष्टयप्रतिष्ठितमनवरतपरिचलत्प्रबलसुण्डादण्डडामरमनतिनिकटनिषण्ण-

१ ‘ खडिक ’ इति म. पुस्तके पाठः ।

निरन्तरभयङ्करहुङ्कारमुखरमहामात्रप्रदीयमानस्थूलकवलकवलनाव्याकुलं मदकलमवलोक्य विकल्पयति किमिदमन्धकारनिकुरम्बं मूलकान् कवलयति, किं वा वारिवाहोऽयं बलाकावान् वर्षति गर्जति च । यद्वा बान्धवोऽयं 'राजद्वारे स्मशाने च यस्तिष्ठति स बान्धवः' इति परमाचार्यवचनात्। अथवा योऽयमासन्नमेदिनीपृष्ठप्रतिष्ठायी पुरुषस्तस्य च्छायेयं स्त्यानीभूतेति ।

दूषयति च । नाद्यः पक्षोऽन्धकारस्य सूर्पयुगलप्रस्फोटनाभावात् । नापि द्वितीयः, स्तनथित्नोः स्तम्भचतुष्टयाभावात् । नापि तृतीयः, बन्धोरस्मद्दर्शननिबन्धनलगुडभ्रमणासम्भवात् । नापि तुरीयः, न हि नरशिरःशतोद्गिरणनिगरणं सम्भवति छायायाः । ततो न किञ्चिदेतदिति । न चैतावता मतङ्गजस्वभावो व्यावर्त्तते । एवं धर्मादिविकल्पैरपि न सन्देहस्वरूपं व्यावर्त्तते । प्रत्यक्षप्रतिपन्नस्यापि पदार्थस्वरूपस्यापलापे सुखदुःखादेरप्यपलापः प्रसज्येत । कथं च धर्म्मिविषयो धर्मविषयो वेत्यादिप्रश्नसमुत्पादकसन्देहमेदिनीधरशिखरसमधिरूढ एवायं संशयं निराकुर्यान्नो चेदाकुलप्रज्ञः । अथोत्पत्तिकारणाभावादसाधारणस्वरूपाभावाद्विषयाभावाच्च संशयः प्रतिक्षिप्यते । तदसत् । तदुत्पत्तिकारणस्य साधकबाधकप्रमाणाभावलक्षणस्य सद्भावात् । अनवस्थितानेककोटिसंस्पर्शिप्रतिपत्तिलक्षणस्यासाधारणस्वरूपस्य संशये विद्यमानत्वात्। प्रोक्तनिदर्शनेषु संशयविषयस्य स्पष्टं दर्शितत्वाच्च । ततश्च—

यस्माज्जन्मनिमित्तमस्य सुघटं यस्मादसाधारणं
रूपं सम्यगमुख्यविश्वविदितं युक्तोऽस्य यद्गोचरः ।
यस्मादप्यनुयोगमत्र कुरुषे त्वं संशयानः सखे
तस्मादेष निजं स्वरूपमयतां निःसंशयः संशयः ॥१३४॥१३॥

अथ क्रमायातमनध्यवसायं साधयन्नाह—

किमित्यालोचनमात्रमनध्यवसाय इति ॥ १४ ॥

किमित्यालोचनमात्रं अस्पष्टविशिष्टविशेषज्ञानमात्रम् । किमित्याह ।

अनध्यवसायमन्तनीयः समारोपभेदः अध्यवसायाद्विशेषोल्लेखिज्ञानादन्य इति कृत्वा ॥ १४ ॥

उदाहरणमाह—

यथा गच्छत्तृणस्पर्शज्ञानमिति ॥ १५ ॥

गच्छतो व्रजतः सतः प्रमातुस्तृणस्पर्शविषयं ज्ञानं तृणस्पर्शज्ञानमन्यत्रासक्तचित्तत्वादेवंजातीयकमेवंनामकमिदं वस्त्वित्यादिविशेषानुल्लेखि किमपि मया स्पृष्टमित्यालोचनमात्रमित्यर्थः । एतदुदाहरणदिशा चापरोऽपि प्रत्यक्षयोग्यविषयश्चानध्यवसायोऽवसेयः । तद्यथा, मञ्जुगुञ्जन्मुभगभृङ्गावलीवलयिनकपोलपालिमलीलपरिचलन्मदकलचक्रवाले खरखुरशिखरसमुत्खातक्षोणितलनुरगनिकुरम्बेऽनणुमणिकिङ्किणीकाणरमणीयैजयन्तीविसरप्रसाधितस्यन्दनकदम्बके करतलकलितनिशिततरवारिवीरविसरसम्पत्तिपरिसङ्ख्याने गतेऽपि प्रसिद्धे कचन काश्यपीपतौ कोऽप्यनेन पथा गत इति ज्ञानमात्रव्यासङ्गादनुल्लिखितविशेषं प्रत्यक्षयोग्यविषयोऽनध्यवसायः । तथा नालिकेरद्वीपवासिनः कस्यचिदपरिज्ञातगोजातीयस्य पुंसो देशान्तरमायातस्य कचन वननिकुञ्जे सास्नामात्रदर्शनात् सामान्येन पिण्डमात्रमनुमाय को नु खल्वत्र प्रदेशे प्राणी स्यादिति जातिविशेषानुल्लेखि ज्ञानं परोक्षविषयोऽनध्यवसायः । नन्वयमनध्यवसायः संशयान्न विशिष्यते । विशेषानवधारणात्मकत्वादिति न तर्कणीयम् । स्वरूपभेदात् । अनवस्थितानेककोटिसंस्पर्शित्वं हि संशयस्य स्वरूपं सर्वथा कोट्यसंस्पर्शित्वं चानध्यवसायस्येति महाननयोर्भेदः ।

सोऽयमनध्यवसायः सम्यग्भेदप्रभेदतोऽभिहितः ॥
व्यवसायग्रहणेन प्रमाणसूत्रे निरस्तो यः ॥ १३५ ॥

एवं च—

संशयविपर्ययाऽनध्यवसायात्मा स्फुटं समारोपः ॥
एष त्रिविधोऽप्युक्तः शिष्यव्युत्पत्तिसिद्ध्यर्थम् ॥ १३६ ॥

---

१ 'वैरि' इति प. पुस्तके पाठः ।

ननु विपर्ययादिस्त्रिप्रकारः समारोपः प्ररूपितस्तत्र विपर्ययस्य तावत्समारोपत्वं प्रतीतमेवातस्मिँस्तद्ग्रहस्वरूपत्वात् । संशयस्य पुनः कथं तद्योऽयते तद्विलक्षणत्वादिति । तदसत् । तद्विलक्षणत्वस्यासिद्धेः संशयोऽप्यतस्मिन्ननवस्थितानेकांशविकले स्थाण्वादिवस्तुनि तद्ग्राहितया प्रवर्त्तत इत्यतस्मिंस्तद्ग्रहस्वरूपत्वाद्भ्रमवत्येव समारोपः । ५

अनवस्थितानेककोटिसंस्पर्शित्वविशेषेण पुनरेककोटिसंस्पर्शिनो विपर्ययाद्भिन्नतयाऽसौ सूत्रितः । नन्वनध्यवसायस्य तर्हि कथं समारोपरूपता स हि वस्त्वेव न भवति कुतोऽतस्मिंस्तद्ग्रहस्वरूपम् । अभिहितं चास्यावस्तुत्वं **भट्टेन 'वस्तुत्वाद्विविधस्येह सम्भवो दुष्टकारणात्'** इति संशयविपर्ययययोरेव वस्तुत्वमभिदधता । तदसत् । यतः कुतोऽस्यावस्तुत्वमुच्यते । सम्यग्ज्ञानानुत्पत्तिरूपतया तदभावस्वभावत्वादिति चेत् तर्हि संशयविपर्ययोरपि तत्प्राप्नोति । तयोरपि यथार्थध्यवसायास्वभावत्वात् । तयोरनेकांशानवस्थितप्रतिभासविपरीताकाराध्यवसायस्वरूपत्वाद्वस्तुस्वरूपत्वेऽकिञ्चित्करवेदनरूपत्वादनध्यवसायस्य कथमवस्तुत्वम् । तस्य सकलस्य स्वभावशून्यत्वेन कथमप्रमाणविशेषत्वं प्रमाणं न भवतीत्यप्रमाणमिति । प्रमाणप्रतिषेधमात्रेणेति चेत् । ननु कोऽस्य प्रमाणप्रतिषेधस्याधारो यत्र प्रतीतिः स्यात् । विकल्पमात्रमिति चेत् तर्हि विकल्पमात्रमिदं प्रमाणं न भवतीति प्राप्तम् । पुरुषोऽयं ब्राह्मणो न भवतीति यथा । ततश्च नावस्तुरूपत्वमनध्यवसायस्य । ब्राह्मणविविक्तपुरुषमात्रवत् प्रमाणत्वविविक्तविकल्पमात्रस्य वस्तुत्वसिद्धेः । किञ्च न विकल्पमात्रस्यानध्यवसायत्वेनाप्रमाणत्वं युक्तम् । तस्याध्यवसायसामान्यरूपत्वात् । संवेदनमात्रमकिञ्चित्करं प्रमाणत्वनिषेधाधिकरणमिति चेत् तर्हि प्रमाणप्रतिषेधमात्रेणापि वस्त्वेव संवेदनरूपमाश्रीयते नानध्यवसायस्यावस्तुस्वभावता । अथायमस्तु वस्तु तथापि कथमस्य समारोपत्वमतस्मिँस्तदध्यवसायस्य तल्लक्षणस्याभावादिति

१ 'हि' इत्यधिकं प. पुस्तके ।

चेत् । एवमेतन्मुख्यवृत्त्या । उपचारवृत्त्या तु समारोपत्वमस्याद्रियामहे । तथाहि यथा गोगतजाड्यमान्द्यादिगुणसदृशजाड्यमान्द्यादिगुणयोगाद्वाहीके गोत्वं गोशब्दश्चोपचर्यते गौर्वाहीक इत्येवं तथा विपर्ययसंशयलक्षणसमारोपसमाश्रितायथार्थपरिच्छेदकत्वलक्षणगुणसदृशायथार्थपरिच्छेदकत्वगुणयोगादनध्यवसायेऽपि समारोपत्वं समारोपशब्दश्चोपचर्यते । समारोपोऽनध्यवसाय इत्येवं मुख्येनार्थेन सह सादृश्यमत्र सम्बन्धः । विपर्ययसंशयाभ्यां भेदेऽप्यस्य तादृप्यप्रतीतिश्चोपचारप्रयोजनमिति ।

एवं च—

मुख्यार्थस्य च बाधे तद्योगे प्रयोजने च सति ॥
सिद्धोऽनध्यवसायोप्युपचारादिह समारोपः ॥ १३७ ॥१५॥

अथ प्रमाणसूत्रोपात्तं परशब्दं व्याख्यानयन्नाह—

ज्ञानादन्योऽर्थः पर इति ॥ १६ ॥

ज्ञानात् ग्राहकात् सकाशादन्यो ग्राह्यतया पृथग्भूतोऽचेतनः सचेतनो वाऽर्थोऽर्थक्रियार्थिभिरर्थ्यमानः कुम्भादिः । किमित्याह पर इति ।

अत्र ज्ञानवादिनः प्रत्यवतिष्ठन्ते ।

ज्ञानवादिमतपरीक्षणम् ।

विज्ञप्तिमात्रात्परमस्ति तत्त्वं
न मानसिद्धं परनामधेयम् ॥
ततः कथं तद्व्यवसायिबोधं
परे प्रमाणं परिकीर्त्तयन्ति ॥ १३८ ॥

तथा चायं विश्वस्य विज्ञप्तिमात्रताप्रसाधनेगुणः[1] प्रयोगः । ययोः सहोपलम्भनियमस्तयोरभेदो यथा तैमिरिकोपलभ्यमानमृगाङ्कमण्डलयोः । सहोपलम्भनियमश्च ज्ञानार्थयोरिति व्यापकविरुद्धोपलब्धिः । भेदे हि नियमेन सहोपलम्भो न दृष्टो यथा स्तम्भकुम्भयोः एवं च सति भेदः सहोपलम्भानियमेन व्याप्तस्तद्विरुद्धश्च सहोपलम्भनियमो दृश्यमानः स्वविरुद्धं

१ 'प्रसाधनानुगुणः' इति प. म. पुस्तकयोः पाठः ।

सहोपलम्भानियमं निवर्त्तयति। सहोपलम्भानियमश्च निवर्त्तमानः स्वव्याप्यं भेदं निवर्त्तयति। तस्मादयं हेतुर्विपक्षाद्भेदात् स्वविरुद्धसहोपलम्भानियमव्याप्तानिवर्त्तमानो राश्यन्तराभावादभेद एवावतिष्ठते इत्यविनाभावसिद्धिः। तदुक्तम् 'सहोपलम्भनियमादभेदो नीलतद्धियोः' इति। तथा प्रकाशन्ते भावा यच्च प्रकाशते तद्विज्ञप्तिमात्रं यथा सुखादिकमिति। तथा यद्येन वेदनेन वेद्यते तत्ततो न भिद्यते यथा वेदनस्य स्वरूपं वेद्यन्ते च वेदनेन नीलादयः। भेदे हि ज्ञानेनैषां वेद्यत्वं न स्यात्। तादात्म्यस्य नियमहेतोरभावात्। तदुत्पत्तेस्तु चक्षुरादिभिर्व्यभिचारित्वात्। अन्येनान्यस्यासम्बद्धस्य वेद्यत्वे चातिप्रसङ्गादिति भेदे नियमहेतोः सम्बन्धस्य व्यापकस्यानुपलब्ध्या भेदाद्विपक्षात् व्यावर्त्तमानं वेद्यत्वमभेदेन व्याप्यत इति हेतोः प्रतिबन्धसिद्धिः।

एतैः कलङ्कविकलैः कथितैः प्रमाणै—
ज्ञानार्थयोर्भिदि हठेन निराकृतायाम्॥
सद्योगिनीव सततात्मकृतप्रकाशा
विज्ञप्तिरेव बत राजति जीवलोके॥ १३९॥

अथ ब्रूयादर्थाकारो ग्राह्यत्वेनैव प्रतीयते बोधाकारस्तु ग्राहकत्वेनैवेति कथमनयोरैक्यं, एकत्वे व्यत्ययेनापि तयोः प्रतिभासस्तस्माद्भिन्न एव ज्ञानादर्थ इति।

श्रुतं मयेदं यदुतान्य एव संवेदनादर्थ इति त्वदुक्तम्॥
अयुक्तमेतत्परमार्थतो धीर्यदग्राहकमाह्यतया विमुक्ता॥१४०॥

तथाप्रतीतिव्यवस्था पुनरनाद्युपप्लववासनासामर्थ्यादेवोपपद्यते। तदुक्तम्

'अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा॥ १॥
तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत्।
यदा तदा न सम्बोधग्राह्यग्राहकलक्षणा'॥ २॥ इति

१ धर्मकीर्तिकृतप्रमाणसमुच्चये प्रथमे भागे।

अनयोरर्थः स्वरूपेणाविद्यमानवेद्यवेदकाकाराऽपि बुद्धिर्यथा भ्रान्तैर्व्यवहर्तृभिर्निरीक्ष्यते । तथैव कृतव्यवस्थेयं व्यवह्रियते । तैस्तु भ्रान्तैरियं विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा निरीक्ष्यते विभक्तलक्षणौ ग्राह्यग्राहकाकारावेव विप्लवो यस्याः सा तथोक्ता । किमिव केशादिज्ञानभेदवत् । यथा तिमिराद्युपप्लुताक्षाणां न विद्यमाना एव केशादयो बोधाद्भिन्नाः प्रतिभान्ति तद्वन्नीलाश्रयोऽपीति । यथाऽयमविद्यानिबन्धन एव बुद्धेः प्रविभागस्तदयं न सन्नोद्यग्राह्यग्राहकलक्षणा, सन्नोद्ये पर्यनुयोज्ये ग्राह्यग्राहकलक्षणे यस्याः सा तथा न भवति । न ह्यविद्यासमारोपिताकारः पर्यनुयोगमर्हतीति । तदेवं बुद्धिव्यतिरिक्तग्राह्यग्राहकासम्भवाद्बुद्धिरेवानादिवासनावशादनेकाकारा प्रतिभासते । तदुक्तम्—

'नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते' ॥ इति

स्वव्यतिरिक्तग्राह्यग्राहकविरहाद्बुद्धिः स्वयमेवात्मस्वरूपप्रकाशिका प्रकाशवदिति समुदायार्थः । ननु ज्ञाने नीलाद्याकारस्य कादाचित्कस्यान्यथाऽनुपपद्यमानत्वात् तत्प्रसिद्धये तदाकारोऽर्थः परिकल्प्यः । तदप्यसत् । वासनासामर्थ्यादेव ज्ञाने तथाभूतस्याकारस्योत्पत्तेर्नातोऽर्थसद्भावप्रसिद्धिः । अर्थाच्च तथाभूतज्ञानाकारभवस्वीकारे स्वप्नेन्द्रजालगन्धर्वनगरादिज्ञाने तदभावः स्यात् ॥ तथाहि—

गुञ्जन्मञ्जुमृदङ्गसङ्गिसुभगग्रामाभिरामं क्वणत्-
वीणावेणुपिकस्वरध्वनिलसल्लास्यं च सत्प्रेक्षणम् ।
स्वप्ने कश्चन कौतुकव्यतिकरव्याक्षिप्तचित्तः स्फुटं
पश्यत्यस्ति न वस्तु यद्विरचयेज्ज्ञाने तदा स्वाकृतिम् ॥१४१॥

---

१ 'यतः' इति भ. पुस्तके पाठः । २ धर्मकीर्तिकृतप्रमाणविनिश्चये प्रथमभागे । ३ 'विक' इति प. पुस्तके पाठः ।

ततो ज्ञानाभावे ग्राह्याकारस्यानुपलम्भात् तद्भावे चोपलम्भादन्वय-व्यतिरेकाभ्यां ज्ञानस्यैवायमवसीयते ।

एतैरित्थं प्रतिहतपरप्रेर्यपुञ्जैः प्रमाणैः
सिद्धं सन्तः सपदि सकलं वस्तु विज्ञप्तिमात्रम् ।
सर्वाः सम्प्रत्यखिलविदुषां तर्कगोष्ठीषु तस्मात्
मन्ये प्राप्ताः स्मरणपदवीं बाह्यभावप्रतिष्ठाः ॥ १४२ ॥

इत्थं बोधम्प्रति हि विमुखं किञ्चिदुच्चार्य बाह्यं
वस्तुद्वेष्टा कथयतितरां तात्त्विकं ज्ञप्तिमात्रम् ।
निन्दामज्ञस्तदनु तनुते सर्वविद्वत्सभानां
भोः प्रेक्षध्वं तदिदमसमं धाष्टर्यमेतस्य सभ्याः ॥ १४३ ॥

तथाहि ययोः सहोपलम्भ इत्यादावभेदः सतोः सदसतोर्वा सिषाधयिषितः । यदि सतोस्तदाप्यभेदः । किमैक्यमभिन्नजातीयत्वम्, भेद-प्रतिषेधमात्रं वा विवक्षितं, आद्यपक्षे पक्षैकदेशस्यानुमानबाधा । तथाहि नीलधवलादिपरस्परविरुद्धाकारावगाहि चित्रज्ञानमनुभूयते, निर्विवादं च तदेकमेवेष्यते तद्वेद्यास्तु नीलधवलाद्याकाराः परस्परविरोधित्वाद्भिन्ना एवाभ्युपगन्तव्याः ।

एवं च यदेकं न तदनेकैरैक्यमनुभवति । यथा घटस्वरूपं पटशकटादिभिः । एकं च नीलधवलाद्याकारावगाहिचित्रज्ञानं तत्कथं नीलादिभिरनेकाकारैरैक्यमनुभवेत् । ज्ञानेन साकमैक्याभावे च तेषामर्थरूपतैवेति । सकलज्ञानार्थरूपपक्षान्तःपतितयोश्चित्रज्ञानतद्विषय-नीलधवलाद्यर्थयोरैक्यासिद्धेः पक्षैकदेशस्यानुमानबाधा स्पष्टैव । तथा च विवादापन्नं ज्ञानमर्थात्पृथग् ज्ञानत्वान्नीलधवलाद्याकारगोचरैकचित्र-ज्ञानवदिति सर्वज्ञानानामर्थात्पृथक्त्वसिद्धेः पक्षस्याप्यनुमानबाधा ।

अथ बाह्यस्यैव विरुद्धधर्माध्यासाद्भेदस्तथात्वेऽपि तस्याभेदेऽर्थक्रियाणां चेतनप्रवृत्तीनां च सङ्करप्रसङ्गाद्विवेचनानुपपत्तिप्रसङ्गाच्च । न तु विज्ञा-

नस्य न हि तस्यार्थक्रियाधीनं सत्त्वमपि तु प्रतिभासमात्राधीनम् । नापि तत्रार्थक्रियार्थिनः काचित्प्रवृत्तिः, स्वरसवाहिविज्ञानप्रवाहातिरिक्ताया अर्थक्रियायास्तदर्थिनश्चाभावात् । विवेचनाभावश्चात्र परमो निर्वाहः स्वसंविदितरूपत्वादिति चेत् । तत्किमङ्ग परिणतशान्तेराश्रमपदमिव विज्ञानमासाद्य व्यालनकुलादीनामिव नीलधवलादीनां शाश्वतिकविरोधपरित्यागो निभृतविरोधानां तत्फलपरित्यागो वा । न तावत् प्रथमः पक्षः । परस्परनिषेधविधिनान्तरीयकयोर्विधिनिषेधयोर्विरोधोच्छेदप्रसङ्गात् । न चैवमस्त्वित्युत्तरेऽपि विरोधोच्छेदः । विधिनिषेधयोः परस्परनिषेधविधिनान्तरीयकतायाः कथमप्यनतिवृत्तेस्तावन्मात्रशरीरत्वाच्च विरोधस्य । तत्सिद्धिरेव च भेदसिद्धिः । अत एव च न द्वितीयो विकल्पः । यस्तु बाह्ये विरुद्धधर्माध्यासाद्भेदसाध्यसाधनाय तथात्वेऽपि तस्याभेदेऽर्थक्रियाणामित्यादिबाधकोपन्यासः कृतः । सोऽपि न पेशलः । यतो विरुद्धधर्माध्यासस्य भेदसाधकत्वे सिद्धे सत्यर्थक्रियाणां भेदसिद्धेस्तत्सङ्करप्रसङ्गो बाधकः सेत्स्यति तत्सङ्करप्रसङ्गे च बाधके सिद्धे सति विरुद्धधर्माध्यासस्य भेदसाधकत्वं सेत्स्यतीत्यन्योऽन्यसंश्रयो दोषः । अन्यच्च यथा बाह्येऽर्थक्रियासंकरः प्रसज्यत इति दण्डस्तथा ज्ञानेऽपि प्रतिभाससङ्करः प्रसज्यत इति दण्डः । ननु प्रतिभाससाङ्कर्यनियमोऽसिद्धो नीलपीतादेः सहापि क्वचित्प्रतिभासदर्शनादिति चेत् । ननु न सहाप्रतिभासमसाङ्कर्यं ब्रूमः । किन्तु नीलस्यैव पीतत्वेन पीतस्यैव नीलत्वेनाप्रतिभासं पररूपत्वेनाप्रतिभासम् । पररूपाप्रतिभास एव च मूलं सर्वविरोधानाम् । अन्यथोपलम्भानुपलम्भयोरप्यसाङ्कर्यस्यासिद्धिरेव । विशेषाभावात् । एतेन विवेचनाभावश्चात्र परमो निर्वाह इत्यपि निरस्तम् । आकारयोरसम्भेदेन वेदनस्यैव विवेचनत्वात् । अपि चार्थसंविदोः सह दर्शनमुपेत्यैकत्वैकान्तं साधयतोऽस्य दुर्निवारः स्ववचनविरोधावतारः । स्वोक्तस्य धर्मिभेदवचनस्य हेतुदृष्टान्तभेदवचनस्य चैकत्वैकान्तवचनेन विरोधात् एकत्वैकान्तवचनस्य च तद्भेदवचनेन

व्याघातः । तथा विज्ञानवादिनोऽप्रसिद्धविशेष्यत्वं प्रतिज्ञादोषः । नीलतद्धियोर्विशेष्ययोः स्वयमनिष्टेः । तस्मान्न सतोरैक्यमभेदः । नाप्यभिन्नजातीयत्वम् । तद्धि सर्वथा कथञ्चिद्वा स्यात् । न तावत्सर्वथा । तथात्वे हि तयोर्विततृष्णापनोदाय नदोदकमन्वेषयतस्तदनासादने नदोदकसंवेदनेऽपि दुर्निवारा प्रवृत्तिर्जनस्य । न चास्य तस्मिन्नन्तःस्थिते प्रवृत्तिः परिदृश्यते । बहिर्मुखमेव तस्याः सन्दर्शनात् । नापि कथञ्चित् । सिद्धसाध्यतापत्तेः । सत्त्वज्ञेयत्वादिभिर्ज्ञानार्थयोरभिन्नजातीयत्वस्यास्माकमभिप्रेतत्वात् । किञ्चाभिन्नजातीयत्वे ऐक्ये वा साध्ये विवक्षिते कथं सहोपलम्भनियमस्य व्यापकविरुद्धोपलब्धित्वं स्यादनुपलब्धीनां निषेधसाधकत्वेन समानत्वात् ।

अथ भेदप्रतिषेधमात्रं साध्योऽर्थः । सोऽप्यसाधीयान् । यदि हि सतोर्वस्तुद्वयस्य भेदो न भवेत्तत्र च द्विवचनोपादानमेव कथमुपपद्येत । नापि सदसतोरभेदः साध्यः । यतोऽसदिति सत्सदृशं किञ्चिदभिधीयते । सत्प्रतिषेधमात्रं वा । नाद्यः पक्षः । सत्सदृशस्य कस्यचित्सत्त्वात् । सद्रूपं हि विज्ञानमभ्युपगतं तत्सदृशं तु किं नाम विज्ञानमात्रवादिनः स्यात् । अथ सत्प्रतिषेधमात्रमसच्छब्दाभिधेयम् । तर्हि तस्य सतश्च परस्परमभेदसाधने ज्ञानाज्ञानाभावयोरप्यभेदसाधनप्रसक्त्या ज्ञानस्याप्यभावप्रसङ्गः । किञ्च ज्ञानं सदर्थश्चासन्निति भवतोऽत्राभिप्राय अर्थस्य चासत्त्वमद्याप्यसिद्धमिति कथपसद्रूपस्यार्थस्य धर्मित्वम् । अथैकानेकस्वभावायोगादर्थस्यासत्त्वं सिद्धमेव । न चैकानेकस्वभावायोगोऽस्यासिद्धः । तथाहि यद्ययमेकरूपस्तर्हि प्रत्यासन्नदूरवर्त्तिनां स्पष्टास्पष्टप्रतिभासभेदो न भवेत् । अथानेकरूपस्तदा परमाणुशो भेदान्न कस्यचिदेकस्य स्पष्टत्वेनास्पष्टत्वेन वा स्थूलस्य प्रतिभासः स्यादिति चेत् । तर्हि तत एव ज्ञानमात्रवादस्याप्यसिद्धेः कृतं प्रकृतेन प्रकृतिश्यामलान्त्रललनाकपोलस्थलोपकल्पितकश्मीरजपत्रभङ्गायमानेनानुमानेन । किं

भेदप्रतिषेधः सतोर्वा सदसतोर्वेति विकल्प्य खण्डनम् ।

च यद्यप्येकानेकस्वभावयोर्वस्त्वन्यभावस्तथाऽपि कथञ्चिदेकानेकात्म्यस्य स्वभावान्तरस्य तत्र सम्भवात्सत्त्वं न विरुद्ध्यते । तेनैव तस्य व्याप्तत्वात् । अथ सत्त्वं निरवयवत्वं च सावयवत्वेन प्रतिभासमानान्नीलादेः स्थूलाद्यावर्त्तमानं सत्त्वं निवर्त्तयतीति वर्ण्यते । ननु निरवयवं परमाणुपर्यन्तं तावन्नावभासते यत्पुनः कतिपयपरमाणुप्रचयात्मकं प्रतिभासते तत्सकलं सावयवं ततश्च यन्न प्रतिभाति तत्सत् यत्तु प्रतिभाति तदसदित्यतिशयशुचिवादवातूलब्राह्मणस्याशुचिलक्षणमिव तवापतितम् । विज्ञानं निरवयवं सदुपलब्धमिति चेत् । नैतदस्ति । विज्ञानस्यापि सप्रदेशादात्मनः कथञ्चिदभिन्नत्वेन निरवयवत्वासिद्धेः । तन्न सदसतोरप्यभेदः साधनीयः । प्रत्यक्षविरुद्धश्चात्रानुमाने पक्षः । तथाहि ज्ञानस्य विच्छिनार्थग्राहित्वेनानुभूयमानत्वादर्थज्ञानयोर्भेदमेव स्वसंवेदनप्रत्यक्षमुपस्थापयति । अथासत्य एव भेदोऽत्र परिस्फुरतीति कथमेतद्विरुद्धता पक्षस्य स्यात् । तदसत् । हेतोरनैकान्तिकत्वप्रसक्तेः । तथाहि भेदस्य ज्ञानेन सहोपलम्भनियमः समस्ति स चासौ ज्ञानादभिन्नः । भेदस्यासत्यस्य सत्येन ज्ञानेनाभेदायोगात् । भेदो न प्रतिभासत एवेति चेत् । एवं तर्हि विश्वजनप्रतीतिविरोधः स्पष्टः । ज्ञानार्थयोरभेद इति च स्ववचनविरोधः सहोपलम्भनियमहेत्वसिद्धिश्च । नहि भेदाप्रतिभासे सहार्थः कथमपि व्यवस्थापयितुं पार्यते । कथं च भेदाप्रतिभासे पक्षादिप्रविभागो भवेत् । कं च बोधयितुं प्रवृत्तोऽसि किमर्थं च अन्वयव्यतिरेकाप्रतीतौ किञ्च हेतोर्बलम् । कुतश्च विप्रतिपत्तिः कीदृशी वेति । विकल्पारूढ एव भेदो व्यवहाराङ्ग नानुभवारूढ इति चेत् । नन्वसावपि सत्योऽसत्यो वा तत्र प्रतिभासते । आद्ये कल्पे कथमर्थप्रतिक्षेपः । द्वितीये तु हेतोरनैकान्तिकमुक्तमेव । असत्यपि भेदे तद्गोचरो व्यवहारो विकल्पेन जन्यत इति चेत् नैवम् । व्यवहारोऽपि यद्यज्ञान-

---

१ ' वस्तुन्यभाव ' इति प. पुस्तके पाठः । २ ' प्रतिभासेत ' इति प. पुस्तके पाठः ।

रूपः कथमसंस्तेन जन्यताम् । ज्ञानरूपश्चेत्कथं नियामकं विना तद्विषयः । स्वकारणसामर्थ्यादिति चेत् । सोऽयं व्यवहार-रूपज्ञानालीकभेदयोर्नियामकान्तराभावेऽपि कारणसामर्थ्यमाश्रित्य विषयविषयिभावमिच्छति न त्वनुभवानुभाव्ययोरिति क्षीरं विहाय सौवीरे रतिररोचकग्रस्तस्य । विकल्पाकार एव भेद इति चेत् । यद्यसन्ने- ५
वासौ, कथं विकल्पाकारः तदाकारश्चेत्कथमसन्नेवेति परिभाव्यताम् । अस्तु तर्हि भेदः सन्नेवेति चेत् ।

नन्वद्वयदर्शि चेद्विज्ञानं कथं भेदप्रथा । आकारद्वयदर्शि चेत् कथमेकं सत्तद्वयात्मकम् । चित्राकारमिति
विज्ञानमद्वयदर्शि आकार-द्वयदर्शि वेति विचारः ।
चेत् । चित्रमप्येकमनेकं वेति विकल्पगिलित- १०
मेव तव पश्यतः । आकाराणामनेकत्वे हि क्व नामैकविज्ञानतादात्म्यमेषाम् । विज्ञानस्यापि यावदाकारमनेकत्वे क्व चित्राकारसंवेदनम् । स्वम्वमात्रमग्नत्वात् । एकत्वे त्वाकाराणां क्व भेदप्रतीतिः स्यात् । निराकरिष्यते च सविस्तरं पुरस्ताच्चित्रज्ञानमिति । सहोपलम्भोऽपि किं युगपदुपलम्भः क्रमेणोपलम्भाभावः एकोपलम्भो १५
वाऽभिप्रेतो यस्य नियमो हेतुः स्यात् । यदि युगपदुपलम्भस्तदा बुद्धज्ञानेन व्यभिचारी हेतुः । तथाहि यद्बुद्धस्य ज्ञेयं सन्तानान्तर-चित्तं तस्य बुद्धज्ञानस्य च सहोपलम्भनियमोऽस्ति । सन्तानान्तर-चित्तोपलम्भमन्तरेण बुद्धज्ञानस्य कदाचिदनुपलम्भात् । न च तस्य तेन सहाभेदः । अत्र धर्मोत्तरानुसारी समाधत्ते । नायं व्यभिचारश्चतुरस्रः । २०
बुद्धज्ञाने युगपदुपलम्भनियमस्यैवासम्भवात् । यो हि ज्ञानोपलम्भ एव ज्ञेयोपलम्भो ज्ञेयोपलम्भ एव ज्ञानोपलम्भः स युगपदुपलम्भनियमोऽभिधीयते । न चायमीदृशो बुद्धज्ञाने सम्भवति । पृथक् सन्तानान्तरैः स्वचित्तसंवेदनात् । तदेतदरमणीयम् । एवं पक्षैकदेशासिद्धताप्रसक्तेः । एकस्मिन्नहमहमिकया बहुभिरुप्युपलभ्यमाने मृगाङ्कमण्डले यथोक्तरूपे २५
युगपत्तदुपलम्भनियमस्यासम्भवात् । न खलु देवदत्तमृगाङ्कमण्डलज्ञानो-

पलम्भ एव मृगाङ्कमण्डलोपलम्भः । यज्ञदत्तादिमृगाङ्कमण्डलज्ञानोपलम्भस्यापि त्वन्मते मृगाङ्कमण्डलोपलम्भस्वभावत्वात् । अथ सर्व एव देवदत्तादयः स्वज्ञानांशमेव पश्यन्ति न पुनरेकं मृगाङ्कादिकं बहिर्वस्त्विति । तदेतत् कूर्प्परे गुडायितं वर्त्तते । बाह्यार्थाभावस्याद्याप्यसिद्धेः । तत्सिद्धिर्हि सहोपलम्भनियमादेव अभिधीयते तत्र चेतरेतराश्रयत्वम् । प्रतिवाद्यसिद्धश्चायं हेतुः । न खलु य एव ज्ञानोपलम्भः स एव ज्ञेयोपलम्भो य एव च ज्ञेयोपलम्भः स एव ज्ञानोपलम्भ इति जैनानामभ्युपगमः । ज्ञानस्य कर्तुः स्वोपलम्भक्रियातः सकाशाद्बहिर्वस्तूपलम्भक्रिययोः कथञ्चिद्भिन्नत्वेन तैरभ्युपगमात् । एककर्तृकाणामपि हि क्रियाणां विषयभेदाद्भेदोऽवश्यमाश्रयणीयोऽपरथैकदेवदत्तविधीयमानतिलपाकतण्डुलपाकयोरप्येकप्रसङ्गः । एवं च ज्ञानोपलम्भस्य ज्ञानविषयत्वात् ज्ञेयोपलम्भस्य च ज्ञेयविषयत्वात् विषयभेदव्यवस्थितेस्तयोर्भेद एव स्वीकर्त्तव्यः । ज्ञानात्पृथग्भूतस्य ज्ञेयस्यासत्त्वात् विषयभेदोऽसिद्ध एवेति चेत् । न तथाभूतज्ञेयासत्त्वमनोरथमहाधुराया विवादपङ्कनिमग्ने सति सहोपलम्भनियमे केनापि वोढुमशक्यत्वात् । तन्न ज्ञानोपलम्भ एवेत्यादिधर्मोत्तरोक्तव्यभिचारपरिहारः पेशलः ।

सहोपलम्भस्य विस्तरशः खण्डनम् ।

अन्यस्त्वेवं व्यभिचारपरिहारमाह । यदि सुगतचित्तेन ज्ञेयचित्तानां ग्राह्यग्राहकभावो भवेत्तदा तत्र युगपदुपलम्भनियमसद्भावेऽप्यभेदाभावाद्भवेद्व्यभिचारो न चैवम् । सर्वावरणविलयेन ग्राह्यग्राहकाकारकलङ्कविकलत्वाद्भगवच्चित्तस्य । तदुक्तं " ग्राह्यं न तस्य ग्रहणं न तेन ज्ञानान्तरग्राह्यतयाऽपि शून्यम् " इति । तदसुन्दरम् । यदि हि सन्तानान्तरैः सुगतसंवेदनस्य ग्राह्यग्राहकभावो नास्ति तदा कथं तस्य सन्तानान्तरसंवित्तिः । को नामाभ्युपैति भगवतः सन्तानान्तरसंवेदनमिति चेत् । तर्हि कथ-

---

१ कूर्परे गुडाभावेऽपि गुडबुध्या लिहन्ति बालास्तद्वत् । २ ' एकत्वप्रसङ्ग ' इति प. म. पुस्तकयोः पाठः ।

मस्यासत्ता स्यात् । गलितसकलमलपटलत्वेनात्यन्तविशुद्धत्वादिति चेत् । ननु विशुद्धत्वमपि किं कुर्वदासतायां निमित्तम् । परार्थं सम्पादयदिति चेत् । कथं परापतिपत्तौ तदर्थसम्पादनं नाम । तथापि तत्सम्पादने कौतस्कुतः प्रयोजनप्रतिनियमः । अचिन्त्यया तु शक्त्या कयाचित्तेन परप्रतिपत्तौ नीलादिरपि ग्राह्यग्राहकभावं विनै- ५
वास्मदादिभिस्तादृशशक्तिसद्भावात् ग्रहीष्यत इति स्वरूपासिद्धः सहोपलम्भनियमः सुगतस्यैवैतादृशशक्तिसद्भावो नास्मदादेरित्ययं तु शपथमात्रशरणानामुल्लापः । एतेन यदाह कमलशीलः "सर्वार्थकारित्वात्तु सर्वज्ञ इष्यत" इति तदप्यपास्तमिति । नाय- मप्यनैकान्तिकत्वकुट्टनप्रकारः । यस्तु सर्वज्ञः सन्तानान्तरं वा नेष्यते १०
तत्कथं व्यभिचार इति व्यभिचारपरिहारमाह । स केवलं विलक्षीभूतः प्रलपति । शून्यतावादस्यैवं प्रसङ्गात्तस्य च पुरस्तात्पराकरिष्यमाणत्वा- द्विज्ञप्तिमात्राभ्युपगमविरोधाच्च ।

तथा न ताथागत तत्त्वतस्त्वया तथागतश्चेत्सकलज्ञ इष्यते ।
प्रमाणभूताय जगद्धितैषिणे इति स्फुटं तर्हि स संस्तुतः कथम् ॥१४४॥ १५
अद्वैतसिद्ध्यादिषु संस्तुतोऽसौ दिग्नागमुख्यैरपि किं महद्भिः ।
मतिर्न तेषामसति स्तवाय प्रवर्त्तते यद्विलसद्विवेका ॥ १४५ ॥
विचार्य मुञ्चन्ति विपश्चितस्ते तमित्यदोषोऽयमुदीरितश्चेत् ।
नन्वस्य पश्चादपि हेयतायां युक्तं पुरैवेश्वरवत्प्रहाणम् ॥ १४६ ॥
संवेदनाद्वैतमथापि तत्त्वं तथातथा ते बत संस्तुवन्ति । २०
अलीकमेतन्न यदस्ति तत्र श्रोतृस्तुतिस्तुत्यफलादिभावः ॥ १४७ ॥

कृत्तिकाभिश्च व्यभिचारः प्रकृतहेतौ । तथा हि तासु युगपदुपल- म्भनियमोऽस्ति न चाभेदः तद्भेदस्य सर्वाविसंवादेन प्रसिद्धत्वात् ।

---

१ 'सुगतस्यैव तादृश' इति भ. पुस्तके पाठः । २ न्यायबिन्दुपूर्वपक्षसंक्षे- पाख्याया न्यायबिन्दुटीकायाः प्रणेता कमलशीलो बौद्धाचार्यः । ऐशवीय ७५० समसमये प्रादुरभूत् । ३ अयमद्वैतसिद्धिग्रन्थो दिङ्नागप्रणीतो ग्राह्यो न तु मधु- सूदनप्रणीतः मधुसूदनस्य वादिदेवसूरेः पश्चाद्भावित्वात् ।

यथा च विचारयतः कृत्तिकानां विवेकेनोपलम्भस्तथा ज्ञानार्थयोरपि । विरुद्धश्चायम् । 'इमे मुनिमतल्लिके सह समागते मद्गृहान्' इत्यादौ युगपदर्थस्य सहशब्दस्य भेदे सत्येवोपलम्भात् । अथ मनुष्यैर्भ्रान्तेरभिन्नमपि बाह्यं ज्ञानाद्भेदेनावसीयते तदपेक्षया युगपदुपलम्भ इत्युच्यते द्विचन्द्रोपलम्भवत् । वस्तुस्थित्या त्वेकस्यैवोपलम्भ इति । तदसत् । भिन्नेनारोपिताकारेण वस्तुभूतस्याकारस्याभेदसाधनविरोधात् । न ह्यारोपितपीताकारेण शङ्खरूपस्याभेदः सम्भवति । तदानीमेव नरान्तरैस्तस्य श्वेताकारस्यैवोपलम्भात् । सिद्धे चाभेदे व्यवसायस्य भ्रान्तत्वं सिद्धयेन्न चासावद्यापि सिद्धः । यत्तु धर्मोत्तरः प्राह । अनयोश्च यथाभावासङ्कल्पितभेदयोस्तात्त्विको भेदो नास्तीत्युच्यते ततः कल्पितभेदनिबन्धनः सहशब्दप्रयोग इति को विरोध इति । तदपि विकल्पारूढ एव भेदो व्यवहाराङ्गमित्याद्याशंक्य नन्वसावपि सत्योऽसत्यो वेत्यादिनाऽत्रैव तत्त्वतस्तिरस्कृतम् । क्रमेणोपलम्भाभावस्तु सहोपलम्भोऽसिद्धः क्रमोपलम्भाभावमात्रस्य तुच्छस्य वादिप्रतिवादिनोः प्रतीतत्वात् । किं च क्रमेणोपलम्भाभावमात्राद्भेद एकत्वं साध्यते भेदाभावो वा नाद्यः पक्षः । भावाभावयोस्तादात्म्यतदुत्पत्तिलक्षणसम्बन्धाभावतो गम्यगमकभावायोगात् । द्वितीयविकल्पेऽप्यभावस्वभावत्वात्साध्यसाधनयोः सम्बन्धाभावान्न गम्यगमकभावस्तादात्म्यतदुत्पत्त्योर्वा भावस्वभावप्रतिनियमात् इष्टसिद्ध्यभावश्च । सिद्धेऽपि भेदप्रतिषेधे विज्ञप्तिमात्रस्थेष्टस्यातोऽप्रसिद्धेर्भेदप्रतिषेधमात्रेऽस्य चरितार्थत्वात् ।

अथैकोपलम्भः सहोपलम्भः । ननु किमेकत्वेनैवोपलम्भ एकोपलम्भः स्यादेकेनैव वा एकस्यैव वैकलोलीभावेनैव वा । आद्यपक्षेऽसिद्धता । द्वितीयपक्षेऽपि कस्यैकेनैवोपलम्भो नीलादेस्तदुपलम्भस्योभयस्य वा । तत्राद्यपक्षेऽसिद्धिः । तथाहि जलाशयादिष्वनेकपुरुषदर्शनसाधा-

एकोपलम्भरूपस्य सहोपलम्भस्य खण्डनम् ।

---

१ प्रशस्तो मुनी । मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनीत्यमरोक्तेः । २ 'वा' इति प. पुस्तके नास्ति ।

रणस्य नीलोत्पलादेर्नैकेनैवोपलम्भः । सर्वेषामेकार्थदर्शनात् । किं च यावदन्योपलम्भप्रतिषेधो न कृतस्तावन्नैकेनैवोपलम्भो नीलादेः सिद्ध्यति । न च परोपलम्भप्रतिषेधसम्भवः स्वभावविप्रकृष्टत्वात्परचित्तानां तेन सन्दिग्धासिद्धताऽपि । स्वज्ञानांशमेव सर्वे पश्यन्ति नत्वेकं बहिर्बहुसाधारणं नीलादीति त्वद्यापि स्वगृहमान्यम् । एवं च न नीलादेरेकेनैवोपलम्भः सिद्ध्यति । नापि तदुपलम्भस्य । यावन्तो हि प्रमातारस्तावन्त उपलम्भा नीलादेः । न च तेषामेकेनैवोपलम्भः प्रातिस्विकत्वात् । एतेन नीलतदुपलम्भयोरेकेनैवोपलम्भ इत्यप्रसिद्धमुक्तम् । अथैकस्यैवोपलम्भ एकोपलम्भः । नत्वेयमप्यसिद्ध एव । नीलं विलोकयामीति नीलतदुपलम्भयोरुभयोरप्युपलभ्यमानत्वात् । एतेनैकलोलीभावेनैवोपलम्भः सहोपलम्भनियमश्चित्रज्ञानाकारवदशक्यविवेचनत्वं साधनमसिद्धं प्रतिपत्तव्यम् । अन्तर्बहिर्देशस्थतया विवेकेन ज्ञानार्थयोः प्रतीतेः । पक्षचतुष्टयेऽपि वाऽस्मिन्नायमेकार्थः सहशब्दः सङ्गच्छते । तथाप्रतीतेरभावात् । परार्थेऽनुमाने वक्तुर्वचनगुणदोषाश्चिन्त्यन्ते इति हि न्यायमुद्रा । ततश्च । परं प्रतिपादयताऽनेन साङ्केतिकशब्दार्थवादिनापि नूनं प्रतिपदार्थकः शब्द उपादेयोऽन्यथा प्रतीतेरभावात् । लोके नायमेकार्थवाचकः क्वचिदपि विलोक्यते । सन्दिग्धविपक्षव्यावृत्तिकश्च सहोपलम्भनियमहेतुः । अभेदमन्तरेणापि तस्य सद्भावात् । ग्राह्यग्राहकभावप्रतिनियमकृतो हि सहोपलम्भनियमस्तथैव तयोः स्वहेतोः समुत्पादात् । एवं च ज्ञानेनात्मार्थश्च यथा गृह्यते तथाऽर्थेनाप्यात्मार्थश्च गृह्यतां भेदाविशेषादित्यप्रकाशनीयमेव । न हि ज्ञानव्यतिरेकेणान्यस्य कस्यचित् ग्राहकस्वभावत्वमस्ति । येन ज्ञानादन्येनार्थेनाप्यर्थस्यात्मनश्चोपलम्भो भवेत् । तस्मात्सहोपलम्भनियमश्च स्याद्वेदश्चेति हेतोरभेदेन व्याप्तिसिद्धिः । तथा च स्वयमेव धर्मकीर्तिना लोकायतं प्रत्युक्तं वार्त्तिके, " देहत-

१ ' नन्वयम् ' इति प. म. पुस्तकयोः पाठः । २ धर्मकीर्तिप्रणीतः प्रमाणवार्तिककारिकाख्यो ग्रन्थोऽस्ति ।

बुद्ध्योर्विषयविषयितया सहोपलम्भो नाभेदात् " इति । तर्किं भवतो विस्मृतम् । न च बाह्याभ्युपगमेन तदुक्तमिति वाच्यम् । अयुक्तस्योपगमस्याप्यभिधाने आचार्यस्यानुचितवक्तृत्वप्राप्तेः । अधुनापि तु दोलाधिरूढस्य प्रामातुर्विघत एव तेन विषयविषयितयापि सहोपलम्भसम्भवाद्व्याप्तेरनिश्चयः । एवं च सन्दिग्धविपक्षव्यावृत्तिकत्वम् । तथाहि किमयं विषयाविषयिभावात्सहोपलम्भनियमः स्यादुताभेदादिति । ननु कथं सन्दिग्धविपक्षव्यावृत्तिकत्वम् । विपक्षे बाधकप्रमाणस्य सद्भावात् । तथा च धर्मकीर्त्तिः " प्रतिबन्धकारणाभावात् " इति । राहुल एतद्व्याख्याति "प्रतिबन्ध एव कारणं तस्याभावात् " । एतदुक्तं भवति । प्रतिबन्ध एव तादात्म्यलक्षणो मिश्रितावभासस्य कारणं तदभावे कारणाभावात्सहोपलम्भनियमाभावः स्यात् । भेदे हि न कार्यकरणाभावव्यतिरेकेणापरः सम्बन्धस्तस्य च सहोपलम्भे निमित्तत्वे कुलालादिविवेकेन घटादयो न प्रतीयेरन् । एकसामग्र्यधीनत्वात्तन्निमित्तत्वे रसादिविवेकेन रूपादयो न प्रतीयेरन् । प्रतीयन्ते च । ततो न सम्बन्धान्तरप्रयुक्तं सहसंवेदनम् । अत एव प्रतिबन्धश्चासौ कारणं चेति प्रतिबन्धकारणं तस्य संबन्धिविशेषस्य सहवेदननिमित्तस्य तादात्म्यलक्षणस्याभावादित्यर्थः । तदेतदशोभनम् । ग्राह्यग्राहकभावस्यैव प्रतिबन्धस्य ज्ञानार्थयोः सहोपलम्भनियमकारणत्वोपपत्तेरुक्तत्वात् प्रतिबन्धकारणाभावादित्यस्यासिद्धत्वात् । अभिधास्यते च सविस्तरं पुरस्ताद्यथा न तादात्म्यतदुत्पत्ती पदार्थोपलम्भे निबन्धनमिति । दृष्टान्तोऽपि प्रकृतानुमाने साध्यशून्यः । द्वितीयचन्द्रमसि भ्रान्तज्ञानेन भिन्नतया समारोपितस्वरूपे सुधांशुना[1] सहाभेदस्य साध्यस्यासंभवादिति । एवं च—

सहोपलम्भनियमादित्येतत्कीर्त्तिकीर्तितम् ॥
निकारं कमपि प्राप्ति प्रोक्तप्रोद्भटयुक्तितः ॥ १४८ ॥

---

१ ' सत्यसुधांशुना ' इति प. पुस्तके पाठः ।

यदपि प्रकाशन्ते भावा इत्यादि न्यगादि । तत्र स्वतः प्रकाशमानत्वं हेतुत्वेन विवक्षितं परतो वा । स्वतश्चेत्तर्हि प्रतिवादिनो हेतुरसिद्धः । न हि परनिरपेक्षप्रकाशाः कुम्भादयः कस्यचित्प्रसिद्धा अन्यत्र महामोहसन्तमससञ्चयसमाच्छादितविवेकप्रकाशाद्योगाचारात् ॥ ५

प्रकाशमानत्वहेतोरपाकरणम् ।

अथ प्रकाशं परतोऽभ्युपैषि हेतोस्तदा स्यान्ननु वाद्यसिद्धिः ।
न जातु जीवन्नवलम्बते यद्विज्ञानवादी परतः प्रकाशम् ॥ १४९ ॥

विरुद्धतापि पक्षेऽस्मिन् साधनस्य विभाव्यते ।
भेदे सत्येव परतः प्रकाशस्योपपत्तितः ॥ १५० ॥

अथाभिधीयते हेतुः स्वत एव प्रकाशनम् । न चासिद्धः प्रकाशोऽर्थं परस्माज्जायते न यत् ॥ १५१ ॥ १०

अर्थानां परतः प्रकाशनं न सम्भवतीति बौद्धमतस्य खण्डनम् ।

तथाहि परः प्रकाशयन् सम्बद्धोऽसम्बद्धो गृहीतोऽगृहीतो वा निर्व्यापारः सव्यापारो वा निराकारः साकारो वा भिन्नकालः समकालो वा पदार्थस्य प्रकाशकः स्यात् । न तावदसम्बद्धोऽतिप्रसङ्गात् सम्बद्धश्चेत्तादात्म्येन तदुत्पत्त्या वा । यदि तादात्म्येन, तर्हि विज्ञप्तिरूपतापत्त्या पदार्थानां सिद्धं ज्ञानाद्वैतम् । विज्ञप्तेर्वा जडरूपतापत्त्या विश्वस्याप्यन्धबधिरत्वप्रसक्तिः । अथ तदुत्पत्त्या, तर्हि ज्ञानादर्थः समुपजायेतार्थाद्वा ज्ञानम् । प्रथमपक्षेऽर्थस्य ज्ञानरूपतापत्तिर्ज्ञानादुपजायमानत्वादुत्तरज्ञानक्षणवत् । द्वितीयपक्षेऽपि समकालाद्भिन्नकालाद्वाऽर्थाज्ज्ञानमुपजायेत । न तावत्समकालात्, समसमयमाविनोर्वामेतरविषाणयोरिव कार्यकारणभावस्याभावात् । भावे वा ज्ञानस्याप्यर्थं प्रति कारणत्वप्रसक्तिरविशेषात् । भिन्नकालात्तु ततस्तदुपजनने ज्ञानस्याहेतुकत्वप्रसङ्गः । तत्कालेऽर्थस्या- १५ २०

---

२ योगाचरः—बौद्धभेदः । यतो बौद्धाश्चतुर्भेदाः । वैभाषिकसौत्रान्तिकमाध्यमिकयोगाचार इति भेदचतुष्टयेन ।

सत्त्वात् । गृहीतश्चेत् प्रकाशकः परः किं स्वतः परतो वा । स्वतश्चेत्, स्वरूपमात्रप्रकाशनिमग्नत्वाद्बहिरर्थप्रकाशकत्वाभाव एव भवेत् । परतश्चेत्, अनवस्था । तस्यापि ज्ञानान्तरेण ग्रहणात्तथा चार्थग्रहणाभावः । अगृहीतश्चेत् प्रकाशकोऽतिप्रसङ्गः । निर्व्यापारश्चेदर्थस्यापि बोधं प्रति प्रकाशकत्वानुपपत्तेः । सव्यापारश्चेदस्माद्व्यतिरिक्तो व्यतिरिक्तो वा व्यापारो भवेत् । आद्ये पक्षे बोधमात्रमेव नापरो व्यापारः कश्चित् । न चानयोरभेदो युक्तो, धर्म्मधर्म्मितया लोके भेदप्रतीतेः । द्वितीये तु संबन्धासिद्धिस्तत्तस्योपकाराभावात् । उपकारे वाऽनवस्था । तन्निर्वर्त्तितव्यापारस्य परव्यापारकल्पनानुपपत्तेः । निराकारश्चेदतः प्रतिकर्म्मव्यवस्था न स्यात् । साकारश्चेद्बाह्यार्थपरिकल्पनानर्थक्यम् । नीलाद्याकारेण बोधेनैव पर्याप्तत्वात् । भिन्नकालश्चेत् । स्वकालेऽविद्यमानस्यार्थस्य ज्ञानेन प्रकाशे सकलप्राणिनामशेषज्ञत्वप्रसङ्गः । समकालश्चेत्तर्हि यथा ज्ञानमर्थस्य ग्राहकमेवमर्थोऽपि ज्ञानस्य ग्राहकः स्यात्समसमयभावित्वाविशेषात् । अथार्थे[1] ग्राह्यताप्रतीतेः स एव ग्राह्यो न ज्ञानमित्युच्यते । तन्न । तद्व्यतिरेकेणास्याः प्रतीत्यभावात् । स्वरूपस्य च ग्राह्यत्वे ज्ञानेऽपि तदस्तीति तत्रापि ग्राह्यता भवेत् । अथ जडत्वान्नार्थो ज्ञानस्य ग्राहकः । ननु कुतो जडत्वसिद्धिः । तद्ग्राहकत्वाच्चेत् अन्योन्याश्रयः । सिद्धे हि जडत्वे तद्ग्राहकत्वसिद्धिस्ततश्च जडत्वसिद्धिरिति ।

कृतमनल्पविकल्पकदम्बकं प्रतिहतं परतः प्रतिभासनम् ।
सकलवस्तुगणस्य ततोऽपि न प्रफलितैव मनोरथमञ्जरी ॥१५२॥

अत्रोच्यते—

स्वीयकदाशयमात्रसमुत्थाः कर्त्तुमिमे भवदीयविकल्पाः ।
सोढु वयस्य विचिन्तय शक्ताः किं परतः प्रतिभासनिरासम् ॥१५३॥

१ 'अर्थार्थे' इति भ. पुस्तके पाठः । २ 'साध्य' इति भ. पुस्तके पाठः।

तथाह्यसम्बद्धागृहीतनिर्व्यापारसाकारपक्षेप्वनभ्युपगतोपालम्भेन केवलं कण्ठक्लेशमनुभूतवानसि । सम्बद्धादिपक्षास्त्वनवद्यकुक्षयः । संबन्धो हि योग्यतास्वभाव एव ज्ञानार्थयोर्ग्राह्यग्राहकभावाङ्गं न तु तादात्म्यादि । ज्ञानं हि स्वसामग्रीप्रतिनियमात्प्रतिनियतार्थसंवेदनयोग्यमेवोपजायते । अर्थोऽपि स्वसामग्रीविशेषादेव प्रतिनियतसंवेदनवेदनावेद्यतायोग्य एव समुत्पद्यत इति । गृहीतपक्षेऽपि यदुक्तं स्वतः परतो वेत्यादि । तत्र स्वत एवेति ब्रूमः । न च स्वतोऽस्य ग्रहणे स्वरूपमात्रप्रकाशनिमग्नत्वाद्बहिरर्थप्रकाशकत्वाभावः । विज्ञानस्य प्रदीपवत् स्वपरप्रकाशकस्वभावत्वात् । सव्यापारकल्पेऽपि व्यतिरिक्तविकल्पानवकाशः । स्वपरप्रकाशकस्वभावत्वव्यतिरेकेण ज्ञानस्य स्वपरप्रकाशनेऽपरव्यापाराभावात् । तस्य च ज्ञानात्कथञ्चिदव्यतिरिक्तत्वात् । यथा च तत्र विरोधादिकुनोद्यानामनवकाशस्तथा यतिष्यते । निराकारपक्षेऽपि भवदभिमतसाकारवादप्रतिक्षेपेण निराकारादेव प्रत्ययाद्यथा प्रतिकर्मव्यवस्था तथा प्रतिपादयिष्यते । एवं च " **धियो नीलादिरूपत्वे बाह्योऽर्थः किंनिबन्धनः । धियोऽनीलादिरूपत्वे बाह्योऽर्थः किंनिबन्धनः**"॥ इति यदुच्यते । तत्प्रत्युक्तम् । भिन्नकालप्रकाशकपक्षेऽपि यदग्रादि स्वकालेऽविद्यमानस्यार्थस्य ज्ञाने प्रकाशे सकलप्राणिनामशेषज्ञत्वप्रसङ्ग इति । तदप्यसङ्गतम् । भिन्नकालस्यापि योग्यस्यैवार्थस्य ज्ञानेन ग्रहणात् । दृश्यते हि पूर्वचरादिलिङ्गप्रभवप्रत्ययाद्भिन्नकालस्यापि प्रतिनियतस्यैव शकटोदयाद्यर्थस्य ग्रहणम् । किं चैवंवादिनस्ते कथं भिन्नकालं किञ्चिदपि लिङ्गं साध्यस्यानुमापकं स्यात् । अनुमापकत्वे वा किञ्चिदेकमेव भस्मादिलिङ्गमतीतस्य पावकादेरिव समस्तस्याप्यतीतानागतानुमेयस्य प्रतिपत्तिहेतुः स्याद्भिन्नकालत्वाविशेषेऽपि किञ्चिदेव लिङ्गं कस्यचिदेवार्थस्यानुमापकमित्यदोषोऽयम् ।

१ 'वेदना' इति प. पुस्तके नास्ति । २ 'विशेषात् । अथ भिन्नकालत्वाविशेषे' इति प. म. पुस्तकयोः पाठः ।

नन्वेवं तदविशेषेऽपि किंचिदेव ज्ञानं कस्यचिदेवार्थस्य ग्राहकं किं नेष्यते। समकालविकल्पेऽपि न कश्चित् कलङ्कः। ननूक्तं तत्र।

अयि सितादिनि वस्तुनि धीर्यथा प्रवरिवर्त्ति परिग्रहणोत्सुका।
किमु मतौ न तथा तव वस्त्वपि प्रवरिवर्त्ति परिग्रहणोत्सुकम्॥१५४॥

अत्रोच्यते—

ननु यथा सहसा महसां पतिः प्रकटयत्यखिलं भुवनोदरम्।
बत तथैव न किं कलशोऽप्यदः प्रकटयत्यखिलं भुवनोदरम्॥१५५॥

अथ भवान् कथयेत्कलशार्कयोरतिशयेन विलक्षणरूपताम्।
वदति किं न तथा ग्रहणार्थयोरतिशयेन विलक्षणरूपताम्॥१५६॥

किंच स्वकारणप्रतिनियमादर्थ एव ग्राह्यो ज्ञानमेव च ग्राहकमिति समकालत्वेऽपि तयोः कथं ग्राह्यग्राहकभावव्यत्ययः स्यात्। स्वकारणक्षणान्यपि कथमर्थमेव ग्राह्यं ज्ञानमेव च ग्राहकं जनयतीति तु पर्यनुयोगे स्वभाव एवोत्तरम्। न च स्वभावः पर्यनुयोगभूमिः।

अणुमपि गुणमेव वीक्षते सुजनः सत्यपि दोषडम्बरे॥
तद्विपरीतस्तु दुर्जनः कुरुता पर्यनुयोगमत्र कः॥ १५७॥

नीलाद्याकाराणां यथा बुद्धिर्व्यापिका तथा नीलादयः किं नास्या व्यापकाः। नियतानां चैषां यथाऽसौ व्यापिका तथा सर्वेषामेव विश्ववर्त्तिनामाकाराणां किं न व्यापिकेति प्रेर्येत। तवापि स्वभावभेदादपरं किं नामोत्तरम्। यदि चार्थे ग्राह्यताप्रतीतेः स एव ग्राह्यो न ज्ञानम्। यत्पुनरत्रोक्तं तद्व्यतिरेकेणास्याः प्रतीत्यभावादिति। तन्न। तद्व्यतिरेकेणास्याः प्रतीत्यभावासिद्धेः। ज्ञानग्रहणयोग्यतालक्षणस्य कथञ्चिद्व्यतिरिक्तस्य ग्राह्यताख्यस्य धर्मस्यार्थेषु प्रतीतिसिद्धत्वात्। जडत्वादपि नार्थो ज्ञानस्य ग्राहकः। यस्तु तत्रेतरेतराश्रयः समुदीरितः। स न सङ्गतः। ज्ञानग्राहकत्वेन तस्यास्माभिर्जडत्वाप्रसाधनात्। स्वभावादेव वस्तूनां जडत्वेनाजडत्वेन च व्यवस्थित-

त्वात् । ननु यया प्रत्यासत्त्या ज्ञानमात्मानं विषयीकरोति तयैव चेदर्थं तर्हि तयोरैक्यम् । न ह्येकस्वभाववेद्यमानकं भिन्नं युक्तम् । ऐक्यस्य सर्वथाप्यभावप्रसङ्गात् । अथान्यया, तर्हि स्वभावद्वयापत्तिर्ज्ञानस्य भवेत् । तदपि स्वभावद्वयं यद्यपरेण स्वभावद्वयेनाधिगच्छति । तदाऽनवस्था । तद्वेदनेऽप्यपरस्वभावद्वयापेक्षणात् । ततः स्वरूपमात्रग्राह्येव ज्ञानं नार्थग्राहीत्यकामेनापि स्वीकर्त्तव्यमिति चेत् । तदरमणीयम् । स्वार्थग्रहणोभयस्वभावत्वाद्विज्ञानस्य यथा तत्र नाभिहितदोषानुषङ्गस्तथा स्वसंवेदनसिद्धावभिधास्यते । कथं चैवंवादिनो रूपादेर्लिङ्गस्य वा सजातीयेतरकर्तृत्वम् । तवाप्यस्य पर्यनुयोगस्य समानत्वात् । तथाहि रूपादिकं लिङ्गं वा यया प्रत्यासत्त्या सजातीयक्षणं जनयति तयैव चेद्रसादिकमनुमानं वा । तर्हि तयोरैक्यमित्यन्यतरदेव स्यात् । अथान्यया तर्हि रूपादेरेकस्य स्वभावद्वयमायातं तत्र चानवस्था । परापरस्वभावद्वयपरिकल्पनात् । न खलु येन स्वभावेन रूपादिकमेकां शक्तिं बिभर्त्ति तेनैवापराम् । तयोरैक्यप्रसङ्गात् । अथ रूपादिकमेकस्वभावमपि भिन्नस्वभावं कार्यद्वयं कुर्यात्तत्करणैकस्वभावत्वात् । तर्हि ज्ञानमप्येकस्वभावं स्वार्थयोर्ग्राहकमस्तु तद्ग्रहणैकस्वभावत्वात् । ननु व्यवहारेण कार्यकारणभावो न परमार्थतस्तेनायमदोष इति चेत् । तर्हि व्यवहारेणैवाहमहमिकया प्रतीयमानेन ज्ञानेन नीलादेरर्थस्य ग्रहणसिद्धिरित्यपि स्वीक्रियताम् । न चैवं परमार्थतो नार्थसिद्धिरिति वाच्यम् । व्यवहारस्यापि प्रमाणमन्तरेणानुपपत्तेरिति यद्व्यवहारसिद्धिः तत्पारमार्थिकमेव । न खलु निखिलोपाख्याविकलं वन्ध्यास्तनन्धयादिव्यवहारेणापि सद्रूपतया साधयितुं केनापि शक्यत इति चेष्टोत्तरमात्रमेतत्तथागतानां व्यवहारेण कार्यकारणभावो न परमार्थत इति । यदप्युच्यते । जडस्य प्रतिभासायोगादिति । तत्राप्यप्रतिपन्नस्यास्य प्रतिभासायोगः प्रतिपन्नस्य वा । न तावदप्रतिपन्नस्यासौ प्रत्येतुं शक्यः । अन्यथा सन्तानान्तरस्याप्रतिपन्नस्य स्वप्रतिभासायोगप्रसिद्धेस्तस्याप्यभावः स्या-

तथा च तत्प्रतिपादनार्थं प्रकृतहेतूपन्यासो व्यर्थः । अथ सन्तानान्तरं स्वस्य प्रतिभासयोगं स्वयमेव प्रतिपद्यते । जडस्यापि प्रतिभासयोगं तत्प्रत्येतीति किं नेष्यते । प्रतीतेरुभयत्रापि समानत्वात् । अथाप्रतिपन्नेऽपि जडे विचारात्तदयोगः । ननु तेनाप्यस्याविषयीकरणे प्रतिभासायोगप्रतिपत्तिविरोधः । विचारस्तत्र न प्रवर्त्तते तत एवं च कथं तदयोगप्रतिपत्तिः स्यादिति । विषयीकरणे वा विचारवत्प्रत्यक्षादिनाप्यस्य विषयीकरणात् प्रतिभासयोगोऽसिद्धः । न च प्रतिपन्नस्य जडस्य प्रतिभासायोगप्रतिपत्तिरित्यभिधातव्यम् । जडस्य प्रतीतिः प्रतिभासायोगश्चाम्येत्यन्योन्यं विरोधात् । किं च जडस्य प्रतिभासायोगादिति यदि प्रतिभासात्मत्वाभावसाधनायोच्यते । तदा सिद्धसाधनम् । जडस्य प्रतिभासाद्भिन्नस्वभावतयाऽस्माभिरप्यभ्युपगमात् । अथ प्रतिभाससंसर्गाभावसाधनाय तन्निरूपपत्तिकम् । हेतोः साध्याविशिष्टत्वात् । न च जडस्य प्रतिभाससंसर्गेण न भवितव्यमित्यस्ति राज्ञामाज्ञा । यथा हि च्छिदिक्रिया छेद्येन सम्बध्यते भिद्यते च । तथा ज्ञानक्रियापि ज्ञेयेन सह सम्भन्त्स्यते भेत्स्यते च । तस्मादित्थं पदार्थानां परतः प्रकाशस्यैव योगात् कथं स्वतः प्रकाशः सिद्धयेत् । ननु ज्ञानातिरिक्तस्यार्थस्य प्रसाधकप्रमाणाभावोऽस्माकं ततोऽपि परतः प्रकाशस्यानिश्चयस्त्वयाप्यर्थाभावाविर्भावकं प्रमाणमनुपदर्शयता प्रसाधकप्रमाणाभावभाषणमात्रेण न परतः प्रकाशः उत्फुंसयितुं शक्यते । न च यावदयमेकान्तेन निर्मार्ष्टितस्तावत् स्वतः प्रकाशोऽपि सर्वथा सिद्धयति । तस्मात्सन्दिग्धासिद्धोऽप्येवमयम् । न च प्रकशमानत्वमेवार्थाभावसाधनोद्धुरमित्यभिधेयम् । अस्याद्यापि विप्रतिपत्तिभूरिभरावष्टम्भत्वेन किञ्चिदपि कर्त्तुमशक्तत्वात् । अस्ति चास्माकमर्थोपस्थापनसमर्थं प्रत्यक्षमेव प्रमाणम् । तथाहि ।

---

१ सन्दिग्धासिद्धः—धूमबाष्पादिविवेकानिश्चये कश्चिदाह वह्निमानयं प्रदेशः धूमवत्त्वात् इति ।

अन्तर्मुखाकारतयैव बुद्धिर्विभासमाना निखिलासुभाजाम् ।
नीलादिकं वस्तु बहिःप्रतिष्ठं प्रकाशयत्यस्तसमस्तबाधा ॥ १५८ ॥

अथापि मोहोदयतः स्फुरन्तं प्रत्यक्षबोधेऽपि बहिः पदार्थम् ।
न मन्यसे हन्त तदा कथं नु विज्ञप्तिरप्यत्र तव प्रसिद्धयेत् ॥ १५९ ॥
तदप्रसिद्धौ च तवापि तत्त्वं समागतं सम्प्रति शून्यमेव । ५
तदप्यथ स्वीकुरुषे तदानीं तद्दूषणं श्रोष्यसि मा त्वरिष्ठाः ॥ १६० ॥

तन्न प्रकाशमानत्वं हेतुः सङ्गतः । सुखादिकमिति दृष्टान्तोऽपि साध्यविकलः, सुखादेरेकान्तेन ज्ञानरूपत्वस्य प्रतिषेत्स्यमानत्वात् । तन्न प्रकाशतामुनापि माननीया मनीषिणाम् ।

यत्तु यद्यने वेदनेनेत्यादि समावेदि । तत्र वेदनार्थयोर्भेदस्य प्रत्यक्षप्रति- १०
पन्नत्वात्प्रत्यक्षप्रबाधितत्वं प्रतिज्ञादोषः । तथा किं
वेद्यत्वहेतोः खण्डनम् । यद्वेद्यत इति कर्म्मणि प्रयोगाद्वेदनकर्तृकविदि-
क्रियारूपं वेदनकर्म्मत्वं वेद्यत्वं हेतुरिष्यते । किं वा यद्वेद्यत इति यच्छब्दस्य वेदनक्रियया सामानाधिकरण्ये भावनिर्देशाद्विदिक्रियारूपवेद-
नत्वभावत्वम् । अत्र च विकल्पेऽर्थं प्रमाणार्थः । नीलादयो वेदनादभिन्नाः १५
वेदनकर्तृकवेदनक्रियारूपत्वाद्वेदनत्वरूपवदिति । आद्यपक्षे विरुद्धो हेतुः कर्तृकर्म्मभावस्य भेदेनैव व्याप्तत्वात् । नन्वेवं त्वन्मतेऽपि वेद-
नस्यात्मानं वेदयमानस्य कथमेकस्यैव कर्तृत्वं कर्मत्वं च चतुरस्रं स्यादिति चेत् । न तस्य सर्वथैक्यासिद्धेः । अन्यो हि वेदनस्य कर्त्रंशोऽन्यश्च कर्म्मांश इति । किं च यदि वेदनादर्थस्यामेदस्तदा २०
वेदनमेव स्यान्नार्थस्तस्य तत्रैवानुप्रतिष्ठितत्वादिति कस्य कर्म्मत्वम् । तथा च वेद्यत्वादित्यसिद्धो हेतुः । वेदनत्वरूपस्य च दृष्टान्तस्य साधनविकलत्वम् । वेदनादभिन्ने तस्मिन् भेदव्याप्यस्य वेदनकर्मत्वस्य साधनस्य त्वन्मतेनासम्भवादिति । द्वितीयपक्षे तु प्रतिवाद्यसिद्धः । वेदन-
क्रियातः । पार्थक्येनार्थानां परैरभ्युपगमात् । विरुद्धश्चायम् । क्रिया- २५

कर्तृभावस्य भेदाविनाभावित्वेन विदिक्रियावेदनकर्त्रोरभेदविरुद्धभेदस्य साधनात् । साधनविकलश्चात्राऽपि पक्षे दृष्टान्तः । वेदनाख्ये कर्त्तरि तत्स्वरूपमात्रस्य क्रियात्वासिद्धेः । अपि च यदि वेदनस्वभाव एव नीलादिरर्थः स्यात्तदेक एव कश्चित्तं प्रतीयात्तद्वेदनैकस्वभावत्वान्न पुनरपरे प्रमातारः । प्रतीयते चाऽयं बहुभिरेकः । सर्वेषां तदाभिमुख्येन युगपत्प्रवृत्तौ यस्त्वया दृष्टः स मयापीति प्रतिसन्धानात् । कथं ज्ञानरूपत्वे नीलादेः सप्रतिरूपता[1] स्यात् । बहीरूपतया तस्याः प्रतिभासात् ज्ञानस्य चान्तारूपतया प्रतीतेः । यच्च भेदे नियमहेतोः सम्बन्धस्य व्यापकस्यानुपलब्ध्या भेदाद्विपक्षाद्व्यावर्त्तमानं वेद्यत्वमभेदेन व्याप्यत इत्युक्तम् । तदप्ययुक्तम् । सम्बन्धानुपलब्धेरसिद्धत्वात् । भेदेऽपि योग्यतारूपस्य नियमहेतोः सम्बन्धस्य दर्शितत्वात् । यच्चार्थाकारो ग्राह्यत्वेन प्रतीयत इत्याद्याशङ्क्य परमार्थतो धीर्यद्ग्राहकग्राह्यतया विमुक्तेत्यवाचि । तदप्यचारु । यतो यदि तत्त्वतो ज्ञाने ग्राह्यत्वं ग्राहकत्वं च नास्त्येवेति अभिधीयते । तर्हि किमपरमवशिष्टं यदस्य स्वरूपं स्यात् । न हि ग्राह्यग्राहकाकारविविक्तमपरं रूपमर्वाग्दर्शनैः साक्षात्क्रियते । साक्षात्करणे वा त्वन्नीत्या तत्त्वदर्शित्वं स्यात्तथा चायत्नमुक्ताः सकलशरीरिणः स्युः । नाप्यनुमानात्तस्या निश्चयः । अद्वयरूपे तत्त्वे वस्तुभूतस्याभावभूतस्य वा कस्यचिल्लिङ्गस्यासिद्धेः । स्यादेतन्न ग्राहकशब्देनान्तर्बोधरूपं स्वसंविदितमुच्यते येन तस्याप्यभावः स्यात्किन्तु यदेतद्विज्ञानाद्बहिरिव नीलादि भासते तस्यैकानेकविचाराक्षमत्वेनासत्त्वान्न ज्ञानव्यतिरिक्तं परमार्थतो ग्राह्यमस्ति । तदभावाच्च तदपेक्षाप्रकल्पितं बोधरूपस्य यत्कर्तृरूपमस्य ग्राह्यस्यायं ग्राहक इति तदिह ग्राहकं रूपं तन्नास्तीत्युच्यते । कर्तृकर्म्मणोः परस्परापेक्षाप्रकल्पिततत्वात् । अत एवोक्तम् । परस्परापेक्षया तयोर्व्यवस्थानादिति । बोधरूपं तु स्वसंवेदनमात्रमस्त्येव । तस्य परानपेक्षत्वे-

[1] ' सप्रतिघातिरूपता ' इति प. पुस्तके पाठः

नापरिकल्पितत्वात् । स्वहेतोरेव तस्य तथोत्पन्नत्वात् । तदेव बोधरूपं स्वसंवेदनमात्रे स्थितं यथोक्तेन ग्राह्यग्राहकद्वयेन रहितत्वादद्वयमित्युच्यते । तथा चोक्तम् ॥ " **नीलपीतादि यज्ज्ञानाद्बहिर्यदवभासते । तन्न सत्यमतो नास्ति विज्ञेयं तत्त्वतो बहिः ॥१॥ तदपेक्षया च संवित्तेर्मता या कर्तृरूपता । साप्यतत्त्वमतः संविद्द्वयेति विभाव्यते ॥२॥** " इति । एतदप्यसत् । नीलादावेकानेकविचाराक्षमत्वस्यासिद्धत्वात् । जात्यन्तरत्वेन तस्यैकानेकात्मकत्वात् । तथा च ज्ञानातिरिक्तग्राह्याभावोऽसिद्धः । अद्वयस्य स्वप्नेऽप्यननुभूयमानत्वाच्च । अनुभवे वा सर्वेषां तत्त्वदर्शनापत्त्या त्वन्नीतितोऽयत्नमुक्तिः स्यादित्युक्तम् । अथाभिधीयेताद्वयमेव बोधरूपं स्वसंवेदनसिद्धं, नैव सर्वेषां तत्त्वदर्शनप्रसक्तिः । यतो गृहीतेऽपि तस्मिन्निरंशत्वाद्बुद्धे बोधरूपे भ्रान्तिबीजानुगमनान्न यथाबोधमद्वयावसायो जायते । ततो गृहीतमपि तदगृहीतकल्पमित्यननुभूतिर्न तत्त्वत इति । नैतदेवम् । अद्वयतत्त्वस्य कदाचिदननुभूयमानत्वात् । तथाध्यवसायस्य कदाचिदनुदयात् । तदाप्यद्वयकल्पनेऽतिप्रसक्तिः । नीलाद्याकारबोधादप्यन्यरूप एव बोधोऽनुभूयते नीलादिभ्रान्तिबीजानुगमात्तु न यथाबोधमवसीयत इत्यपि वक्तुं शक्यत्वात् । किञ्चैवं परिकल्पिताद्वयरूपत्वेऽपि ज्ञानस्य तत्त्वतो ग्राह्यग्राहकत्वसिद्धिरेव । स्वात्मसंवेदनेन विज्ञानस्य कर्तृकर्म्मभावोपपत्तेरन्यथा स्वात्मसंवेदनायोगात् । न ह्यात्मनात्मनो वेदनाभावे स्वसंवेदनं नाम । नन्वेवं स्वात्मनि क्रियाविरोधः । इति चेत् । तथैवानुभवात्को नाम विरोधः । विरोधे तु कथं कर्तृकर्म्मभावस्तस्य स्यात् । अथ माभूदयमपसरत्यौषधं विनैव व्याधिरिति चेत् । फलोदये मनोरथस्ते यदि समुद्रान्तर्भग्ननिर्भरभृतयानपात्रस्वामीव मूलनाशेन न दुःस्थः स्याः, कर्तृकर्मभावाभावे हि विज्ञानस्याप्याननुभवादभाव एव च भवेत् । स्वहेतोरेव स्वसंवेदनस्वभावं तदिति चेत्, किमनेनान्वयनिवेदनेन । सर्वथा

चेत् ग्राह्यत्वग्राहकत्वाभ्यां न ज्ञानस्य कर्तृकर्मभावस्तदा नास्य स्वरूपसंवेदितत्वमिति शक्यस्यापि दुरतिक्रमम् । सति च स्वसंविदितत्वे नियमात्स्वभावविचित्र्येण कर्तृकर्मभाव इति । एतेन यदप्युच्यते गगनतलवर्त्यालोकवदकर्मकत्वं स्वयमेवैतत् प्रकाशत इत्यादि । तदपि प्रतिक्षिप्तम् । यतः प्रकाशमानं तद्बोधरूपं न चावुद्ध्यमानस्य बोधरूपता सङ्गतेत्यात्मबोधोऽभ्युपेयस्तथा च सत्युक्तदोषानतिवृत्तिः । एवमपरोक्षस्वभावमित्याद्युक्तावपि स्वप्रत्यक्षस्वभावमित्यादिशक्यार्थापत्तित उक्तदोषानतिवृत्तिरेव । तस्मात्पारमार्थिकमस्त्येव ज्ञाने ग्राह्यत्वं ग्राहकत्वं चेति ।

यत्तु तथाप्रतीतिव्यवस्था पुनरनादिवासनासामर्थ्यादेवोपपद्यत इत्यवादि । तदपि नावदातम् । यतो वासनेयमवस्तु वस्तु वा । यदवस्तु, तद्भावस्तुनः सकाशादेव प्रतीतिरिति रिक्ता वाचोयुक्तिः । अथ वस्तु, एवमपि ज्ञानाद्व्यतिरिक्ता व्यतिरिक्ता वा सा स्यात् । आद्ये भेदेऽस्याः कथं यथोक्तप्रतीतिव्यवस्थानिबन्धनत्वमुपपद्यते । उपपत्तौ वा न कदाचिदभ्रान्तता बोधस्य स्यात् । ज्ञानाद्यतिरेके वा संज्ञाते भेदमात्रं भवेदर्थो वासनेति । एतेन **धर्मोत्तरेण** यदभिदधे, **"तस्मादविद्याशक्तियुक्तं ज्ञानमसत्यरूपमादर्शयतीत्यविद्यावशात् प्रकाशत इत्युच्यत इत्यनवद्यम्"** इति । तदप्यविद्याशक्तेर्ज्ञानाद्भेदाभेदपक्षाभ्यां विचार्यमाणाया अयुज्यमानत्वान्निरस्तमवसेयम् । यच्च ननु ज्ञानेन नीलाद्याकारस्येत्याद्याशंक्य वासनासामर्थ्यादेवेत्याद्यभिधदे । तदप्यसाधु । वासनाया निराकृतत्वात् । तस्मान्न बाह्याभावे ज्ञाने नीलाद्याकारोऽपि घटते । ननु स्वापादिदशायां बहिरर्थरूपनिमित्ताभावेऽपि नीलाद्याकारभ्रान्तिरुल्लसतीत्युक्तम् । उक्तमेतत्किन्त्वयुक्तम् । तत्रापि परम्परया बाह्यार्थस्य व्यापारात् । न ह्यननुभूतेऽर्थे स्वप्नः कदाचित्किञ्चिदुत्पद्यते । अथाननु-

---

१ ' च ' इति प. पुस्तके पाठः ।

भूतेऽपि। स्वशिरश्छेदादौ स्वमदशायां ज्ञानमुत्पद्यत एवेत्युच्यते। तदप्यचारु। तत्रापि हि परशिरश्छेदो दृष्टः स्वशरीरं चानुभूतमतो दोषवशात्तु विवेकमपश्यन्नात्मशरीरे परशिरश्च्छेदमभिमन्यते। ततस्तत्राप्यनुभूतो बाह्यार्थ एव निमित्तम्। न ह्यननुभूतपरशिरश्छेदस्य तदपि संवेदनमुदयते। गन्धर्वनगरज्ञानेऽपि हि बहिर्वर्त्तिनः परमार्थतः सन्तः पाथोदा एवान्याकारतया कुतोऽपि भ्रान्तिनिबन्धनात् प्रतिभासन्ते। ततस्तदपि नानिमित्तम् बाह्यार्थापलापे च कथं प्रतिनियतदेशकालप्रमातृनिष्ठत्वेन रूपादिसंवेदनमुत्पद्येत। नियामकबाह्यार्थविरहेण सर्वत्र सर्वदा सर्वेषामनियमेनैव तत्प्रसक्तेः। कथं वा तत्रैव प्रदेशे तदवस्थस्य तस्यैव प्रमातुः कदाचिदुपाजयेत कदाचिन्न। कथं वा तिमिरान्तरितन्यनस्यैव प्रमातुः सन्ताने व्योम्नि कुन्तलकलापालोकनं न पुनरितरेषाम्। कथं वा समानेऽप्यर्थाभावे तैमिरिकोपलब्धैरेव कुन्तलैः कार्यं न क्रियते न त्वन्यैः। कथं वा जातिनियमसिद्धिः। बोधमात्रे हि विश्वे नियमकारणाभावात्कुरङ्गोऽपि तुरङ्गस्तुरङ्गोऽपि कुरङ्गः कलभोऽपि शलभः शलभोऽपि कलभः करभोऽपि शरभः शरभोऽपि करभः स्यात्। बाह्यार्थाङ्गीकारे तु तन्नियमः सुघट एव। येन हि तुरङ्गत्वजात्युपभोग्यमुखदुःखादिकारणं कर्म्म कृतपूर्वं स तत्परिणाममाहात्म्यात्तामेव जातिं समाश्रयते। एवमपरेऽपि जन्मिनस्तत्कर्म्मसामर्थ्यात्तां तां जातिं भजन्त इति।

एवं सौगत युक्तयस्तव हठान्निर्मूलमुन्मूलिताः
प्रोक्ताः शैलमुनिश्चलाः पुनरमूर्बाह्यार्थसंसिद्धये।
योगाचारमतप्रपञ्चचतुरोऽप्येतार्हि तस्मादहो
तूष्णीं तिष्ठ मुनिश्चितो ननु मया कश्चिद्भवान् वञ्चकः॥१६१॥

ततश्च—

अनुभववसुधायामत्र लब्धप्रतिष्ठः
प्रबलविविधयुक्तिप्रौढराज्ञीमनोज्ञः।

प्रकटितनिजमूर्त्तिर्बाह्यभावः सितादि-
नृप इव निजराज्यं तन्त्रयित्वात्मकार्यम् ॥ १६२ ॥

चित्रप्रतिभासामप्येकां बुद्धिं विनाऽपि बाह्येन ।
इह मन्यन्ते केचित् कुवासनातः सुगतशिष्याः ॥१६३॥

तथाहि । ते एवमाहुः । ज्ञानमेवेदं नीलाद्यनेकाकाराक्रान्तं चित्रमेकमाभासते न पुनस्तदतिरिक्तमूर्तिर्नीलादिश्चित्रो बाह्योऽर्थः कश्चित्तत्साधक-प्रमाणाभावादिति बौद्धकदेशिनो मतस्योपपादनपूर्वकं खण्डनम् । बाह्यार्थः । तत्सद्भावे प्रमाणाभावात् । यस्य हि सद्भावे प्रमाणं न विद्यते तन्नास्ति यथा तुरङ्गशृङ्गं नास्ति च नीलादिचित्रबाह्यार्थसद्भावे किञ्चित्प्रमाणमिति । न च प्रमाणाभावरूपो हेतुरत्रासिद्धः । तथाहि तद्व्यवस्थापकं प्रमाणं किं प्रमेयात्पूर्वकालभावि स्यादुतस्विदुत्तरकालभावि समकालभावि वा । प्रथमपक्षे कथमस्य प्रमेयव्यवस्थापकता । तमन्तरेणैवोत्पद्यमानत्वात् व्योमकुसुमज्ञानवत् । द्वितीयपक्षे तु प्रमाणात्पूर्वकालवृत्तित्वं नीलादेः प्रमेयस्य कुतश्चित्प्रतिपन्नं न वा । यदि न प्रतिपन्नम् । कथं सद्व्यवहारविषयः कूर्म्मरोमवत् । अथ प्रतिपन्नम् । तत्किं स्वतः परतो वा । यदि स्वतः । कथमस्य ज्ञानाद्भेदः । तस्यैव स्वतोऽवभासलक्षणत्वात् । अथ परतः । तन्न । प्रमाणाद्व्यतिरिक्तस्य प्रमेयव्यवस्थाहेतोः परस्यासम्भवात् । अथ प्रमाणमेव प्रमेयस्य पूर्वकालवृत्तित्वं प्रकाशयति । तन्न । तस्य स्वयमसतः प्रमेयकाले तत्प्रकाशकत्वायोगात् । समकालत्वे तु प्रमाणप्रमेययोः सव्येतरगोविषाणवत् ग्राह्यग्राहकभावाभावः । न च प्रमाणे नीलाद्याकारानुरागप्रतीत्यन्यथानुपपत्त्या तदनुरञ्जको बहिश्चित्रोऽर्थः समस्तीत्यभिधातव्यम् । स्वप्नदशायां तदभावेऽपि तदनुरागप्रतीतेः । तथाहि—

---

१ ' सूत्रयित्वा ' इति भ. पुस्तके पाठः ।

दर्पप्रोद्भुरगन्धसिन्धुरघटासङ्घट्टसण्टङ्कितं
तुङ्गं तुङ्गतुरङ्गभङ्गुरगुरुग्रीवाविलासोज्ज्वलम् ।
दिव्यस्यन्दनवृन्दसुन्दरगुरुप्रेङ्खत्पदातिव्रजं
साम्राज्यं कुरुतेऽत्र कश्चन किल स्वप्ने प्रमोदाञ्चितः ॥१६४॥

न च तद्दशाभाविनि करितुरगादिप्रत्ययेऽनुरञ्जको बहिरर्थोऽस्ति । स्वप्नेतरप्रत्ययानामविशेषप्रसङ्गात् । अतो बुद्धिरेवार्थनिरपेक्षा स्वसामग्रीतो विचित्राकारोद्भुरिता यथा स्वप्नदशायामुपजायते तथा जाग्रद्दशायामपि नन्वेवमप्येकस्या बुद्धेर्विचित्राकारतया प्रतिभासमानायाः कथमेकत्वं युक्तमित्यप्यचोद्यम् । अशक्यविवेचनतस्तस्यास्तदविरोधात् । तदुक्तं " नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् । अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥ १ ॥" अत्र देवेन्द्रव्याख्या । चित्रज्ञाने हि यो नीलादिः प्रत्यवभासते ज्ञानोपाधिः । ज्ञानविशेषणः अनुभवस्वात्मभूत इति यावत् । स एवैकोऽनन्यभाक् तज्ज्ञानस्वभावत्वादन्यमर्थं ज्ञानवदेव न भजते । तादृशश्च सन्नसौ तच्चित्रदर्शनप्रतिभासी तदन्यपीतादिप्रतिभासविवेकेन न केवलः शक्यते द्रष्टुम्, तस्मिन् प्रतिभासमाने सर्वेषामेव तज्ज्ञानतया तदन्येषामपि नियोगतः प्रतिभासनात् । तस्माद्यदैवैकं नीलादिकमाकारं तदन्येभ्यः पीतादिभ्योऽयं नील इति ज्ञानान्तरेण विवेचयति प्रमाता तदैव तथा विवेचयन्नसौ न तज्ज्ञानमामृशत्यतद्रूपत्वात् तस्य । किं तर्ह्यर्थे पतति । अर्थ एव तज्ज्ञानं प्रवृत्तं भवतीत्यर्थः । तस्मादेकस्मिन्नप्याकारे प्रतिभासमाने सर्वमाभाति न वा किञ्चिदपीत्यशक्यो विवेकतो दर्शने नीलादिप्रतिभास इति । ननु नीलादिर्बहिश्चित्ररूपतया प्रतीयते तस्याः कुतो ज्ञानधर्म्मतेति चेत् । अर्थधर्म्मत्वानुपपत्तेरिति ब्रूमः । तथाहि नीलादिकमवयविरूपमेकं वस्तु स्यात्तद्विपरीतं वा । प्रथमपक्षे नीलभागे गृह्यमाणे तदितरभागानामग्रहणं न स्यात् । तेषां ततो भेदप्रसङ्गात् । तथा चावयविनोऽ-

१ 'त्वङ्गत्' इति प. पुस्तके पाठः ।

प्येकरूपतानुपपत्तिर्विरुद्धधर्म्माध्यासात् जलानलवत् । नीलभागस्य तदितरभागात्मकत्वाद्वा तदग्रहे तस्याप्यग्रहणमेव स्यात् पीताद्यग्रहे तत्स्वरूपवत् । तद्विपरीतत्वपक्षे तु नीलादेः सिद्धः स्वयमेव चित्रतापायो विभिन्नाश्रयवृत्तिनीलपीतादिवत् । तन्नार्थधर्मता । किन्तु ज्ञानधर्मता । स्वकारणकलापाद्विज्ञानमुपजायमानमनेकाकारखचितमेवोपजायतेऽनुभूयते च । ततस्तथाभूतं ज्ञानमेवैकं तत्त्वमिति चित्राद्वैतसिद्धिः । सुखादेस्तु ज्ञानाभिन्नहेतुजत्वेनापि ज्ञानात्मकत्वोपपत्तिः । तथाहि ज्ञानात्मकाः सुखादयो ज्ञानाभिन्नहेतुजत्वाज्ज्ञानान्तरवत् । तदुक्तम् । **"तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः । तन्मुखादिकं विज्ञानं विज्ञानाभिन्नहेतुजम् ॥ १ ॥"** इति । एवं च—

एकं चित्रं बहिरिह यतो वस्तुभूतं न किञ्चि-
न्नानारूढं कथमपि घटाकोटिमायाति तस्मात् ।
चित्रामेकां धियमनुभवेनैव संवेद्यमानां
मुक्त्वा मिथ्याभिमतिमधुना किं न भोः स्वीकुरुध्वे ॥१६५॥

चित्राकारामेकां बुद्धिं बाह्यार्थमन्तरेणापि ॥
इत्थं ये प्रतिपन्नाः सम्प्रति तेषामियं शिक्षा ॥ १६६ ॥

तथाहि यत्तावदुक्तम् तद्व्यवस्थापकं प्रमाणं किं प्रमेयात्पूर्वकालभावि स्यादित्यादि । तदशिक्षितोत्प्रेक्षितम् । प्रकाशकस्य पूर्वोत्तरसहभावनियमाभावात् । तथाहि क्वचित् पूर्वं विद्यमानपदार्थः पश्चाद्भाविनः प्रकाश्यस्य प्रकाशको भवति । यथा कृत्तिकोदयः शकटोदयस्य । क्वचिच्च पूर्वं सतः पश्चाद्भवन्प्रकाशको दृष्टो, यथा शकटोदयः कृत्तिकोदयस्य । क्वचित्पुनः प्रकाशकः समकालमवलोक्यते यथा कृतकत्वादिरनित्यत्वादेः । अतः प्रमाणं पूर्वोत्तरसहभावनियमानपेक्षं वस्तु प्रकाशति प्रकाशकत्वात् । ततश्च यस्य हि सद्भावे प्रमाणं न विद्यते इत्याद्यनुमाने प्रमाणाभावरूपो हेतुरसिद्धः । यच्चान्यदुक्तं स्वप्नदशायां

तदभावेऽपि तदनुरागप्रतीतेरित्यादि। तदपि प्रलापमात्रम्। स्वप्नज्ञानेऽपि बाह्यार्थविषयत्वस्य पूर्वमेव विपर्ययविचारावसरे प्रसाधितत्वात् प्रसाधयिष्यमाणत्वाच्चानन्तरमेव माध्यमिकमतविचारप्रस्तावे। यदप्युक्तं, अशक्यविवेचनतस्तम्यास्तदविरोधादित्यादि। तदप्यनुपपन्नम्। बाह्यस्यापि द्रव्यस्य चित्तपर्यायात्मकस्याशक्यविवेचनत्वाविशेषाच्चित्रैकरूपतापत्तेः। यथैव हि ज्ञानस्याकारास्ततो विवेचयितुमशक्यास्तथा पुद्गलादेरपि रूपादयः। नानारत्नराशौ बाह्ये पद्मरागमणिरयं चन्द्रकान्तमणिश्चायमिति विवेचनं प्रतीतमेवेति चेत् तर्हि नीलाद्याकारैकज्ञानेऽपि नीलाकारोऽयं पीताकारश्चायमिति विवेचनं किं न प्रतीतम्। चित्रप्रतिभासकाले तन्न प्रतीयन्त एव पश्चात्तु नीलाद्याभासानि ज्ञानान्तराण्यविद्योदयाद्विवेकेन प्रतीयन्त इति चेत्। तर्हि मणिराशिप्रतिभासकाले पद्मरागादिविवेचनं न प्रतीयत एव पश्चात्तु तत्प्रतीतिरविद्योदयादिति शक्यं वक्तुम् मणिराशेर्देशभेदेन विभजनं विवेचनमिति चेत्। एतदन्यत्रापि समानम्। एकज्ञानाकारेषु तदभाव इति चेत्। मैवम्। तदभावस्यासिद्धत्वात्। चित्रज्ञानेऽपि नीलाद्याकाराणामन्योन्यदेशपरिहारेण स्थितत्वात्। एकदेशत्वे पुनरेकाकार एव समस्ताकाराणामनुप्रवेशप्रसङ्गतस्तद्वैलक्षण्याभावात्तच्चित्रता विरुद्धयेत। तथाहि यदेकदेशं न तस्याकारवैलक्षण्यं यथैकनीलाकारस्य। एकदेशाश्च ज्ञाने नीलाद्याकारा इति। तथा यत्राकारावैलक्षण्यं न तत्र चित्ररूपता यथैकनीलज्ञाने। आकारावैलक्षण्यं चैकदेशतयाभिमतानां नीलाद्याकाराणामिति। सिद्धयतु वैकज्ञानाकारेषु देशभेदेन विभजनाभावः। किन्त्वेकमण्याकारेष्वप्यसौ समस्त्येव। मणेरेकस्य खण्डने तदाकारेषु देशभेदेन विभजनमस्तीति चेत्। ज्ञानस्यास्य बुद्ध्या खण्डने तदस्त्येव। पराण्येव ज्ञानानि तानि तत्खण्डने तथेति चेत्। पराण्येव मणिखण्डद्रव्याणि मणिखण्डने तानीति समानम्। नन्वेवं चित्रज्ञानं

१ 'तत्प्रतीयत एव' इति प. पुस्तके पाठः।

विवेचयन्नर्थे पततीति तदविवेचनमेवेति चेत् । तर्ह्येकत्वपरिणतद्रव्याकारानेवं विवेचयन्नानाद्रव्याकारेषु पततीति तदविवेचनमस्तु । ततो यथैव ज्ञानाकाराणामशक्यविवेचनत्वं तथैव पुद्गलादिद्रव्याकाराणामपीति ज्ञानमिव बाह्यमपि सिद्धयत्कथं प्रतिषेध्यं येन चित्राद्वैतं सिद्धयेत् । अथ बाह्यस्य विवेच्यमानस्यानुपपद्यमानत्वाज्ज्ञानस्यैव चित्ररूपता सिद्धयति नार्थस्येति चेत् । मैवम् । एवं हि ज्ञानस्यैवाभावः प्रसज्यते । यतः स्वसंविदितचित्रज्ञानवादिमते ज्ञानमेवोपलम्भयोग्यत्वाद्विवेचयितुं शक्यते । बाह्यं पुनरत्यन्तानुपलभ्यस्वभावं कथं विवेच्यताम् । न खल्वनालोक्य लोकः सुरलोकविकसत्पारिजातमञ्जरीमञ्जुकिञ्जल्कपुञ्जपिञ्जरतायाः स्वरूपं विवेचयितुं शक्नोति । ज्ञानाकारस्य बाह्यत्वेनाभिमतस्य दृश्यत्वाद्विवेचनोपपत्तिरिति चेत् । किं तद्विवेचनात्तस्यैवाभावोऽन्यस्य वा । न तावत्तस्यैव । ज्ञानस्य निराकारत्वप्रसङ्गात् । ततश्च चित्रैकरूपव्याघातः । नाप्यन्यस्याभावः । अन्यविवेचने ह्यन्यस्याभावसिद्धौ त्रैलोक्याभावः स्यात् । किञ्च बाह्यस्यार्थस्य विवेचनं ज्ञानविषयत्वमुच्यते यस्य च ज्ञानविषयत्वं तस्य कुतोऽसत्त्वम् । सन्तानान्तरस्याप्यभावप्रसक्तेः । भ्रान्तितो बाह्यार्थस्य ज्ञानविषयत्वमिति चेत् । भ्रान्तं तर्हि विवेचनं ततोऽप्रमाणत्वान्नासत्त्वसाधकम् । भ्रान्तिरप्यर्थसम्बन्धतः प्रमेति चेत् । तदसत् । बाह्यार्थेन सह भ्रान्तेः सम्बन्धाभावात् । सम्बन्धे वा न तस्यासत्त्वमिति । अपि च नीलादेरवयविनोऽवयवबुद्धया विवेच्यमानस्यासत्त्वमुच्यतेऽवयविबुद्धया वा । न तावदवयविबुद्धया । तस्यास्तत्सत्त्वगृहीतिरूपत्वान्नीलादिबुद्धिवत् । यदि पुनस्तत्सत्त्वबुद्धया तदसत्त्वं व्यवस्थाप्यते । तदा तदसत्त्वबुद्धया तत्सत्त्वं व्यवस्थाप्यत इत्यपि स्यात्ततः साध्वी व्यवस्थितिः । अथ तदसत्त्वबुद्धया विवेच्यमानस्य तस्यासत्त्वमभिधीयते । भवत्वेवं यत्र तदसत्त्वबुद्धिरभ्रान्तास्ति । न च सर्वत्र पटाद्यसत्त्वबुद्धिरभ्रान्ता भवति ततो न सर्वत्रासत्त्वसिद्धिः । अथावयवबुद्धया

विवेच्यमानस्यासत्त्वम् । तदप्यसत्यम् । यतोऽवयवबुद्धिर्नावयविनः सत्त्वं विधातुं प्रतिषेद्धुं वा शक्नोति । तद्विषयत्वात्तस्याः । अथावयवेषूपलभ्यमानेष्ववयवी नोपलभ्यते ततोऽसौ नास्त्येवेति । एवं तर्हि स्वज्ञाने समुपलभ्यमाने पुरुषान्तरज्ञानं नोपलभ्यतेऽतस्तस्याप्यभावः स्यात् । पुरुषान्तरेण स्वज्ञानस्योपलम्भान्नाभाव इति चेत् । एवं तर्ह्यवयविनोऽप्युपलम्भान्तरेणोपलम्भभावान्नाभावः । प्रतिभाति हि लौकिकानां तन्तुभ्यः कथञ्चिद्व्यतिरिक्तस्तत्समुदायात्मकः पट इति । भ्रान्तिरेषा तेषामिति चेत् । नैवम् । सर्वलोकव्यवहाराविसंवादिनी खल्वेषा प्रतीतिर्बहुभिस्तन्तुभिरयमेकः कथंचिदात्मभूतः पटो निष्पादित इति कथं भ्रान्तिः स्यादिति न शक्यविवेचनत्वादवयविन एकत्वमपह्नोतुमशक्यविवेचनत्वात्तु चित्रज्ञानस्याभ्युपगन्तुं युक्तम् । किञ्चैते नीलाद्याकाराश्चित्रज्ञाने सम्बद्धाः सन्तस्तद्व्यपदेशहेतवोऽसम्बद्धा वा । न तावदसम्बद्धाः । अतिप्रसङ्गात् । अथ सम्बद्धाः, किं तादात्म्येन तदुत्पत्त्या वा । न तावत्तदुत्पत्त्या, समसमयवर्त्तिनां सीमन्तिनीनयनयुग्मवत् तदसम्भवात् । नापि तादात्म्येन, ज्ञानस्यानेकाकाराव्यतिरिच्यमानरूपत्वेनैकरूपत्वाभावप्रसङ्गात् । अनेकाकाराणां चैकस्माज्ज्ञानस्वरूपादव्यतिरेकादनेकत्वानुपपत्तिः । यदप्युक्तमर्थधर्मत्वानुपपत्तेरिति, तदपि प्रत्यक्षबाधितम् । चित्रपटादिबाह्यार्थधर्मतया ह्यबाधिताध्यक्षप्रत्यये चित्राकारः प्रतिभासते इति न तस्य ज्ञानधर्मता युक्ता । अतिप्रसक्तेः । यदप्यवादि नीलादिकमवयविरूपमेकं वस्तु स्यात्तद्विपरीतं वेत्यादि । तदपि प्रलापमात्रम् । सर्वथैकत्वानेकत्वयोरस्वीकारात् । न चानयोः कथञ्चित्स्वीकारे विरोधो वाच्यः । चित्रज्ञानेऽप्येवं विरोधप्रसङ्गात् । तथाहि तदेकं वा सदनेकाकारं तद्विपरीतं वा । न तावदाद्यविकल्पो युक्तः । एकस्य परस्परविरुद्धाकारैस्तादात्म्यायोगात्तावद्भिः प्रकारैस्तस्यापि भेदप्रसङ्गात् । प्रयोगो यदेकं न तस्य परस्परविरुद्धाकारैः सह तादात्म्यं यथोत्पन्नस्य क्षणस्योत्पत्त्यनुत्पत्तिभ्यां सत्त्वविनाशाभ्यां वा । एकं च चित्रज्ञानं

भवद्भिरभिप्रेतमिति । आकाराणां वा चित्रैकज्ञानतादात्म्यादनेकत्वाभावः स्यात् । अथ नीलाद्याकारवत्तज्ज्ञानमप्यनेकमिष्यते । तदापि किं कथञ्चित्सर्वथा वा । यदि सर्वथा तदा तज्ज्ञानानां परस्परमत्यन्तभेदाच्चित्रप्रतिपत्तिः स्वप्नेऽपि न प्राप्नोति । सन्तानान्तरज्ञानवत् । कथञ्चिद्भेदे तु ज्ञानवद्बहिरर्थस्यापि स्वाकारैर्विचित्रैः कथंचित्तादात्म्यमनुभवतः प्रत्यक्षादिप्रमाणेन प्रतीयमानस्य चित्रस्वभावतेष्यतां किं कदाग्रहेण । यतः—

पर्यनुयोगपराकृतिमार्गश्चित्रमतौ तव हन्त मतो यः ।
एष सखे सकलोऽपि समानश्चित्रबहिर्भववस्तुनि भाति ॥१६७॥

यदप्युक्तं ज्ञानात्मकाः सुखादयो ज्ञानाभिन्नहेतुजत्वादित्यादि । तत्र हेतुरनैकान्तिकः । यतः कुम्भादिभङ्गजः शब्दः कपालखण्डादिना तुल्यहेतुजो न च तद्रूपः । किं च सर्वथा ज्ञानाभिन्नहेतुजत्वं तेषामभिप्रेतमायुष्मतः कथञ्चिद्वा । प्रथमपक्षे हेतुरसिद्धः । सुखादीनां विशिष्टादृष्टविपाकरूपवनितादिनिमित्तजन्यत्वात्, तस्य चादृष्टविशेषविलयेन्द्रियादिकारणकलापप्रभवत्वात् । विभिन्नस्वभावत्वाच्चामीषां सर्वथा ज्ञानाभिन्नहेतुजत्वमनुपपन्नम् । तथाहि येषां विभिन्नस्वभावत्वं न तेषां सर्वथाप्यभिन्नजत्वं यथा जलानलादीनां विभिन्नस्वभावत्वं च ज्ञानसुखादीनामिति । न चात्र हेतोरसिद्धिः । सुखादेराह्लादनाद्याकारत्वाज्ज्ञानस्य च प्रमेयानुभवस्वभावत्वात् । उक्तं च "सुखमाह्लादनाकारं विज्ञानं मेयबोधनम्" इति । अथ कथञ्चिद्विज्ञानाभिन्नहेतुजत्वं विवक्षितम् । तद्रूपालोकादिना विज्ञानसहभाविना क्षणान्तरेणानैकान्तिकम् । यथैव बहीरूपालोकादेः सकाशाद्विज्ञानस्योत्पत्तिस्तथा रूपालोकादिक्षणान्तरस्यापि न च तस्य विज्ञानादभेदः । अपि चोपादानकारणापेक्षया सुखादीनां विज्ञानाभिन्नहेतुजत्वमुच्यते सहकारिकारणापेक्षया वा । तत्राद्ये पक्षे किमेषामभिन्नमुपादानकारणमात्मद्रव्यं ज्ञानक्षणो वा । न तावदात्मद्रव्यमनङ्गीकारात् अङ्गीकारे वा कुम्भादिभि-

व्यभिचारः। न चाभिन्नोपादानानां घटघटीशरावोदञ्चनादीनां स्वरूपेणाभेदोऽस्ति अथ ज्ञानक्षणोपादानत्वं विज्ञानाभिन्नहेतुजत्वं सुखादीनां मतम्। तदसिद्धम्। आत्मद्रव्योपादानत्वात्तेषाम्। न खलु पर्यायाणां पर्यायान्तरोत्पत्तौ उपादानत्वं क्वचिद्दृष्टम्। द्रव्यस्यैवान्तर्बहिर्वोपादानत्वोपपत्तेः। तदुक्तम्। "त्यक्तात्यक्तात्मरूपं यत्पौर्वापर्येण वर्त्तते। कालत्रयेऽपि तद्द्रव्यमुपादानमिति स्मृतम् ॥ १ ॥" इति आत्मद्रव्यं च पुरतः सविस्तरमात्मसिद्धिप्रस्तावे प्रसाधयिष्यते। अथ सहकारिकारणापेक्षयाभिन्नहेतुजत्वं सुखादीनां विवक्षितम्। तदपि स्वविवक्षामात्रम्। तस्य रूपालोकादिभिरनैकान्तिकत्वप्रतिपादनात्। यदि च सुखादयो ज्ञानात्सर्वथाप्यभिन्नास्तर्हि तद्वदेवैषामप्यर्थप्रकाशकत्वं स्यात्। न चात्र तदस्ति। सुखादीनामपि स्वज्ञानप्रकाश्यत्वेन बहिरर्थाविशिष्टत्वादतो विरुद्धधर्माध्यासात्कथमत्राभेदो जलानलवत्। तदेवं सुखादीनां ज्ञानरूपत्वाप्रसिद्धेस्तदतद्रूपिणो भावा इत्यादिवचः परिप्लवत इति।

बहिश्चित्रं रूपं तदिदमधुना सिद्धिसदनं
समारोपि प्रौढस्फुरदतुलयुक्तिव्यतिकरात्।
धियं चित्रामेकां तत इह कथं बाह्यविरहे
प्रपद्यध्वे यूयं प्रमितिरहितं भोः कुगतयः ॥ १६८ ॥

अन्तर्बहिर्वा न हि तत्समस्ति यच्चित्रतालिङ्गितमूर्ति वस्तु।
बुद्धिर्निरालम्बनतामुपेता तत्त्वं विशुद्धेति वदन्ति केचित् ॥ १६९ ॥

तथाहि माध्यमिकाः प्राहुः। चित्रज्ञाने नीलाद्याकारप्रतिभासस्यान्तर्बहिर्वा चित्रं वस्तु नास्ति किन्तु निरालम्बना बुद्धिरेवेति माध्यमिकमतस्य सविस्तरं खण्डनम्। विद्याशिल्पिकल्पितत्वादतात्त्विकत्वमेव। ज्ञानमात्रस्यैवैकस्य मध्यमक्षणस्वरूपस्य प्रतीतिसरणिसमधिरूढस्य तात्त्विकत्वम्। नीलाद्याकारणां हि तस्मादभेदो भेदो वा भवेत्। आद्यपक्षेऽनेकत्वविरोधस्तेषाम्। भेदपक्षे तु प्रतिभासासम्भवः। ज्ञानाद्भिन्नत्वेन जडत्वात्तेषाम्। अथ

नेऽपि प्रतिभासन्ते तर्हि तेषां संवेदनान्तरत्वापत्तिः। ततः कथं ज्ञानस्यैकस्य चित्रता स्यात्। तदुक्तम्।

" किं स्यात्सा चित्रतैकस्यां न स्यात्तस्यां मतावपि।
यदीदं स्वयमर्थानां रोचते तत्र के वयम् ॥ १ ॥ "

अत्र देवेन्द्रव्याख्या। यदि नामैकस्यां मतौ न सा चित्रता भावतः स्यात्। किं स्यात् को दोषः स्यात्। तथा च भावतश्चित्रया मत्या भावा अपि चित्राः सिद्ध्यन्ति। तद्वदेव च सत्या भविष्यन्तीति प्रष्टुरभिप्रायः। शास्त्रकार आह न स्यात्तस्यां मतावपि इति। व्याहतमेतत् एका चित्रा चेति। एकत्वे हि सत्यनानारूपापि वस्तुतो नानाकारतया प्रत्यवभासते न पुनर्भावतस्ते तस्या आकाराः सन्तीति बलादेष्टव्यम्। एकत्वहानिप्रसङ्गात्। न हि नानात्वैकत्वयोः स्थितेरन्यः कश्चिदाश्रयोऽन्यत्र भाविकाभ्यामाकारभेदाभेदाभ्याम्। तत्र यदि बुद्धिर्भावतो नानाकारैका चेष्यते। तदा सकलं विश्वमप्येकं द्रव्यं स्यात्। तथा च सहोत्पत्त्यादिदोषः। तस्मान्नैकानेकाकारा। किन्तु यदीदं स्वयमर्थानां रोचतेऽतद्रूपाणामपि सतां यदेतत्तादृप्येण प्रख्यानं तदेतद्भस्तुत एव स्थितं तत्त्वमिति। तत्र के वयं निषेद्धार एवमस्त्वित्यनुमन्यन्त इति। न च ज्ञाने चित्ररूपताया अपाये तत्स्वरूपप्रतिपत्तिर्विरुद्ध्यते। तदपायेऽपि स्वरूपस्य स्वतो गतेरुपपत्तेः। संवेदनमात्रतापाय एव तद्विरोधात्। न चानेकत्वप्रतिभासः संवेदने तात्त्विकानेकत्वे सत्येवोपपद्यत इति प्रेर्यम्। स्वप्नदशायां तदभावेऽपि तद्दर्शनात्। अतः संवेदनमात्रमेवालम्बनप्रत्ययरहितं तत्त्वम्। प्रयोगश्च। ये प्रत्ययास्ते निरालम्बना यथा स्वप्नप्रत्ययाः प्रत्ययाश्च विवादापन्नाः। न चालम्बनीभूतार्थप्रसाधकं किंचित्प्रमाणमस्ति। ततस्तद्ध्याध्यत्वमत्र पक्षस्य स्यात्। मध्यमक्षणस्वरूपसंविद्यतिरिक्तेऽर्थे समकालस्य भिन्नकालस्य वा तस्य प्रवृत्त्यनुपपत्तेः। ततः सैव परमार्थसती मध्यमा प्रतिपत्तिः

१ ' मतौ ' इत्यतः ' तस्यां ' इति यावत् भ. पुस्तके नास्ति।

सर्वधर्मनिरात्मता शून्यता च प्रोच्यते । तदाह । " **मध्यमा प्रतिपत्सैव सर्वधर्मनिरात्मता । भूतकोटिश्च सैवेयं मध्यता सैव शून्यता** " इति । सर्वधर्मराहितता च शून्यताऽपरपर्यायाऽर्थानामेकानेकस्वरूपविचारासहत्वात्सिद्धा । आत्मादिपदार्थानां ह्येकरूपतयोपगतानां क्रमवद्विज्ञानादिकार्योपयोगित्वाभ्युपगमे तावद्वा भेदप्रसङ्गात् नैकरूपतावतिष्ठते । अनेकरूपता तु नित्यैकरूपतयोपगतत्वात् नितरां नावतिष्ठते । अतः—

यथा जराजर्जरपञ्जराणि क्षणेन नश्यन्ति दृढप्रहारात् ।
द्रुतं तथैव विशरारुभावं भजन्ति भावा अपि सद्विचारात् ॥१७०॥

इति सिद्धं तेषां तद्विचारासहत्वम् । यथोक्तम् ।

भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं च रूपं तेषां न विद्यते ॥ १ ॥
तदेतन्मृनमायातं यद्वदन्ति विपश्चितः ॥
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥ २ ॥"

इति । उत्पादादिधर्मरहिताश्चैते तद्रूपतयाऽपि विचारासहत्वाविशेषात् । तथाहि भावाः स्वतः परतः उभाभ्यां अनिमित्ता वा समुत्पद्यन्ते । न तावत् स्वतः । कारणनैरपेक्ष्येणोत्पद्यमानानां तेषां देशादिनियमाभावप्रसक्तेः । परतोऽपि सतामसतां सदसद्रूपाणां वा भावानामुत्पत्तिर्भवेत् । न तावत् सताम्, कारणवत्तथाविधानामुत्पत्तिविरोधात् । नाप्यसताम्, खपुष्पवत्तेषामप्युत्पत्त्ययोगात् । नापि सदसद्रूपाणाम् । सदसद्रूपताया एकत्र विरोधात् । नाप्युभाभ्यामेषामुत्पत्तिः । उभयदोषानुषङ्गात् । अहेतुका तूत्पत्तिर्न केनचिदिष्टा । तदुक्तम्—

" **न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।**
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥ १ ॥ "

१ आदिशब्दात् व्ययध्रौव्ययोर्ग्रहणम् । २ माध्य. का. ४ ।

इति । एतेन भावानां स्थितिमङ्गावपि प्रत्याख्यातौ । तयोरपि स्वतः परतो वेत्यादिप्राक्तनन्यायेन सद्भावस्वीकारे कारणनैरपेक्ष्येण तिष्ठतां विनश्यतां च भावानां देशादिनियमाभावप्रसङ्गः इत्यादेः प्राक्तनदूषणस्य समानत्वात् । ततः शुक्तिकाशकलादौ कलधौतादिप्रतीतिवत्पदार्थेषूत्पादस्थितिभङ्गप्रतीतिर्भ्रान्तिरेव । उक्तं च—

" यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः ॥ १ ॥" इति ।

यद्येवमसतां कथं तेषां प्रतिभास इति चेत् । अनाद्यविद्यावासनाप्रभावात् । करितुरगादीनामसतां मन्त्राद्युपप्लवात्प्रतिभास इति मतस्य खण्डनम् । सामर्थ्यान्मृच्छकलादौ केषांचित्प्रतिभासवत् । यदाह ।

असतां वस्तूनामविद्याप्रभा-

" मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्वूपरहिता अपि ॥ १ ॥ " इति ।

ग्राह्यग्राहकभावादिव्यवहारोऽप्यविद्यानिर्मित एव । बुद्ध्यात्मन्यविपर्यासितदर्शनानां प्रतिपत्तृणां तथाप्रतिभासाभावात् । तदुक्तं—

" अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ १ ॥" इति ।

खरतरदिनकरकरनिकरसम्पर्कतस्तुषारनिकुरम्बस्येव तत्त्वज्ञानतः समस्ताविद्याविलासस्य विलये तु ग्राह्यग्राहकभावाद्यखिलधर्मविकलं संवित्स्वरूपमात्रमवभासते[2] । तदाह । "नान्योऽनुभाव्यो बुद्ध्यास्ति" इत्यादि ।

प्रकाशमाना स्वयमेव तस्मादाकारकालुष्यपराङ्मुखीयम् ।
स्वस्थैव संविद्भुत तत्त्वमास्तां मायोपमानं हि समग्रमन्यत् ॥१७१॥

---

१ माध्य. का. ४. २ ' आभासते ' इति म. पुस्तके पाठः ।

भो मोः तर्कवितर्कणैकरसिकाः सर्वैरपि श्रूयता-
मेतन्माध्यमिकस्य निर्मलतमप्रज्ञासमुज्जृम्भितम् ।
विश्वस्यानुभवं विहाय कुरुते यत्तर्जनीस्फोटनै-
र्मुग्धानां मतिमोहनैरभिनवां तत्त्वव्यवस्थामयम् ॥१७२॥

तथाहि यत्तावदुक्तं चित्रज्ञाने नीलाद्याकारप्रतिभासस्याविद्या- ५
शिल्पिकल्पितत्वादतात्त्विकत्वमित्यादि । तत्र यद्याकारशब्देन सारूप्यम-
भिधीयते । तदा तदतात्त्विकत्वमभिधीयमानं न नः प्रतिकूलम् ।
अथार्थग्रहणपरिणामः, तदा कुतोऽयं नीलाद्याकारप्रतिभासोऽविद्या-
निबन्धनः, किं बाध्यमानत्वात् गोचरस्यार्थक्रियाकारित्वाभावाद्वा । आद्य-
विकल्पे न सर्वत्र नीलाद्याकारप्रतिभासस्याविद्यानिबन्धनत्वसिद्धिः । १०
यत्र ह्यसौ बाध्यमानस्तत्रैवाविद्यानिबन्धनः स्यात् । यथा मरुस्थल-
प्रतिफलितेषु भास्करकिरणेषु पयःप्रतिभासो न पुनः सत्ये पयसि ।
किञ्चात्र बाधकं येन बाध्यमानत्वान्नीलाद्याकारप्रतिभासस्याविद्या-
निबन्धनत्वमभिधीयते । मध्यमक्षणस्वरूपं संविन्मात्रं चेत् । कुतस्त-
त्सिद्धिः । नीलाद्याकारप्रतिभासानामवास्तवत्वाच्चेत्, तर्हि चक्रकम् । १५
नीलाद्याकारप्रतिभासानामवास्तवत्वसिद्धौ हि मध्यमक्षणस्वरूपसंवि-
न्मात्रसिद्धिस्तत्सिद्धौ चाविद्यानिबन्धनत्वसिद्धिस्तत्सिद्धौ चावास्तवत्व-
सिद्धिरिति । तद्गोचरस्यार्थक्रियाकारित्वाभावपक्षस्त्वसिद्धो नीलादेस्तद्गो-
चरस्य लोचनानन्दाद्यर्थक्रियाविधायितयाऽतिप्रतीतत्वात् । तथाहि—

जनयति जनतायाश्चक्षुषां हर्षलक्ष्मीं २०
किमपि किल कलापः केकिना दृश्यमानः ।
अयि यदि तदबुद्धे नेयमर्थक्रियास्या-
न्ननु कथय किमन्यत्तर्हि तस्याः स्वरूपम् ॥ १७३ ॥

अथ स्वरूपानुभवनमर्थक्रिया एनां चाकुर्वतो बाह्यस्य नीलादे-
रसत्त्वात्तद्गोचरप्रतिभासानामविद्यानिबन्धनत्वमिति चेत् । एवं तर्हि २५

ज्ञानगतानां नीलाद्याकाराणां स्वरूपानुभवलक्षणार्थक्रियाकारित्वात्सत्त्व-
सिद्धौ तदुपेतस्य ज्ञानस्य चित्राकारतासिद्धिः प्रसज्यते । न हि
निराकारस्य मध्यमक्षणरूपसंविन्मात्रस्य कदाचिदप्यनुभवोऽस्ति ।
किं च संविन्नीलाद्याकारयोरेकानेकस्वभावयोः प्रतिभासाविशेषेऽपि
५ कुतः सत्येतरत्वप्रविभागः । एकाकारस्यानेकाकारेण विरोधादनेका-
कारस्यासत्यत्वे कथमेकाकारस्यासत्यस्य प्रतीतिरितरत्राप्येकाकारस्यैवा-
सत्यत्वं किन्न भवेत् । यथा चानेकाकारस्यैकाकारादभेदेऽनेकत्वं
विरुद्ध्यते भेदे तु संवेदनान्तरत्वमनुपज्यते तथैकाकारस्याप्यनेका-
कारादभेदे एकत्वं विरुद्ध्यते भेदे तु संवेदनान्तरत्वमनुपज्यत इति ।
१० एतेन नीलाद्याकाराणां हि तस्मादभेदो भेदो वा भवेदित्यादि प्रागुक्तं
प्रत्युक्तमवगन्तव्यम् ।

एवं च दुर्दर्शनपक्षपाती भिक्षुर्विलक्षः कथमेष न स्यात् ।
प्रेक्षावतां सम्प्रति यत्समक्षं परीक्ष्य सिद्धिं गमितोऽयमर्थः ॥ १७४ ॥

यदपि ये प्रत्ययास्ते निरालम्बना इत्याद्यनुमानमवादि । तदप्य-
१५ वद्यम् । यतस्तवायं वाक्योपन्यास एव न प्राप्नोति । परप्रत्यायनार्थं
हीदं वाक्यं भवता साधनत्वेनोपन्यस्तं न च भवतः परावबोधोऽस्ति ।
सत्त्वे वा परावबोधस्यैव सालम्बनत्वात् । तेनैवानेकान्तः साधनस्य ।
पराप्रतिपत्तौ च कथं तद्वतसर्वप्रत्ययानां प्रत्ययत्वं गृह्यते, नागृहीत-
पक्षधर्मत्वे हेतुर्गमक इति च भवतामेवोद्गारः । तथायमनुमानप्रत्ययः
२० समस्तं विवादाम्पदतयालम्बनीकरोति न वा । यदि करोति, तदा
तेनैव व्यभिचारी हेतुः । तस्य प्रत्ययत्वेऽपि सालम्बनत्वादिति कथं
सर्वविवादापन्नप्रत्ययानामनालम्बनत्वसिद्धिः । अथ न करोति ।
तदापि कथं तेषां तत्सिद्धिरनुमानाविषयत्वादिति विस्तरतटीकरालं-
शार्दूलान्तरालवर्त्तिनस्ते कुतः कुशलम् । निरालम्बनस्यैवास्य प्रमाण-
२५ त्वाभ्युपगमादयमदोष इति चेत् । तदमनोज्ञम् । निरालम्बनस्य प्रमा-

---

१ ' च ' इत्यधिकं प. म. पुस्तकयोः ।

णत्वायोगात् । न हि पारिभाषिकं ज्ञानस्य प्रमाणत्वं निरालम्बनत्वं किं तर्हि येन प्रत्येयं परिच्छिद्यते तत्प्रमाणम् । यत्र तु न किञ्चित् प्रतिभाति तन्निरालम्बनमुच्यते । तत्कथं नानयोर्विरोधः । स्वात्मालम्बनापेक्षया निरालम्बनत्वाभिधानाविरोध इति चेत् । तत्किमिदानीं स्वात्मापेक्षयैवास्यानुमानत्वम् । एवमिति चेत् । न तर्हि स्वात्मैकविषयेणानेन प्रत्ययान्तराणां निरालम्बनत्वं वा सिद्धयत्यविषयत्वात् । न हि यो यस्य न विषयः स तेन साधयितुं शक्यते । तत्साधने हि स एव तस्य विषयः स्यात् साध्यलक्षणत्वाद्विषयस्य । तन्नास्यानुमानस्य सर्वप्रत्ययालम्बनत्वे तदनालम्बनत्वे वा प्रवृत्तिः । अपि च निरालम्बनाः प्रत्यया इत्यत्र न किञ्चित्प्रत्ययानामालम्बनमस्तीति साध्यार्थो विवक्षितः किं वा बाह्यमालम्बनं नास्तीति यद्वा यथाप्रतिभातोऽर्थो नालम्बनमिति । आद्यपक्षे पटादिपदार्थवद्बोधमात्रस्याप्यसिद्धेरस्तंगतं जगत्स्यात् । द्वितीयपक्षे त्वात्मख्यातिप्रतिक्षेप एव विसर्जनम् । अथ यथाप्रतिभातार्थानालम्बनत्वं निरालम्बनत्वं उच्यते । एवं तर्हि बोधावभासिनोऽपि प्रत्ययस्य तदालम्बनत्वं न स्यात् । ततश्च बाह्यार्थवत् बोधस्याप्यसिद्धिरिति समायातमान्ध्यमशेषस्य जगतः । अथ स्वप्ने बाह्यत्वेन प्रतीतस्यार्थस्य प्राप्त्यनुपलम्भेनासत्त्वसिद्धेः । तत्प्रतिभासस्य निरालम्बनत्वसिद्धौ तत्समानरूपोपलक्षणात्सर्वप्रत्ययानां निरालम्बनत्वसिद्धिः । तदपि नोपपन्नम् । समानरूपोपलक्षणासिद्धेः । सर्वत्रार्थाप्राप्तौ हि समानरूपत्वं सिद्धयति । यदा तु क्वचिदर्थः प्राप्यते तदा कुतः समानरूपत्वम् । अथ नैव क्वचिदर्थप्राप्तिरिति । कुत एतन्निरणायि अर्थाभावादिति चेत् । कुतस्तदभावसिद्धिः । तदुपस्थापकत्वाभिमतप्रत्ययानां निरालम्बनत्वादिति चेत् । न । परस्पराश्रयप्रसक्तेः । अर्थाभावसिद्धौ हि निरालम्बनत्वसिद्धिस्तत्सिद्धौ चार्थाभावसिद्धिरिति । प्रत्यक्षबाधितत्वं चात्र पक्षे दोषः । जाग्रत्प्रत्ययानां स्वरूपव्यतिरिक्तभावार्थकुम्भार्थसामर्थ्ये द्योतकत्वेन सालम्ब-

नत्वस्य प्रत्यक्षतः प्रतीयमानत्वात् । हेतोश्च स्वरूपासिद्धत्वम् । हेतुस्वरूपग्राहकप्रमाणस्यापि प्रत्ययत्वेन निरालम्बनत्वात् । अथैतद्दोषपरिजिहीर्षया तद्ग्राहकप्रत्ययस्य सालम्बनत्वमङ्गीक्रियते तर्हि तेनैव प्रत्ययत्वमनैकान्तिकम् । सन्दिग्धानैकान्तिकं च, प्रत्ययत्वसालम्बनत्वयोविरोधासिद्धेः । विरुद्धं वा प्रत्ययत्वस्य सालम्बनत्वेनैव व्याप्तस्य प्रत्ययान्तरालम्बनप्रत्यये दर्शनात् । अथ स प्रत्यय एव नास्ति यः प्रत्ययान्तरालम्बनमिति कथं तत्र विपरीतव्याप्तिप्रतिपत्तिरिति चेत् । तत्किमिदानीं स्वप्नादिप्रत्ययाः पुरुषान्तरप्रत्ययाश्च न प्रतीयन्त एव । तथात्वे हि कथं व्यवहारः । अथ क एवमाह न प्रतीयन्ते । किन्तु नालम्बनीभवन्तीति ब्रूम इति चेत् । अहो तवायं तर्कवत्त्वोत्प्रेक्षणप्रकारो यत्प्रतीयन्ते न चालम्बनीभवन्तीति । न हि प्रतीयमानत्वादन्यदेवालम्बनत्वम् । संवेदनस्यापि निरालम्बनत्वप्रसङ्गात् । अपि च प्रतीयते स्वरूपं पररूपं च यैस्ते प्रत्ययास्तद्भावः प्रत्ययत्वं एवं च निरालम्बनत्वविरुद्धेन सालम्बनत्वेनैव प्रत्ययत्वस्य व्याप्तेः कथं न विरुद्धमेतत् । दृष्टान्तश्च साध्यविकलः । स्वप्नप्रत्ययस्यापि बाह्यार्थालम्बनत्वेन निरालम्बनत्वाप्रसिद्धेः । द्विविधो हि स्वप्नः सत्यस्तद्विपरीतश्च । प्रथमो देवताविशेषकृतो धर्म्माधर्म्मकृतो वा कश्चित्साक्षादर्थाव्यभिचारी । यद्देशकालाकारतया स्वप्ने प्रतिपन्नोऽर्थस्तद्देशकालाकारतया जाग्रद्दशायां तस्य प्राप्तिसिद्धेः । काश्चित्पुनः परम्परयाऽर्थाव्यभिचारी । राजादिदर्शनेन स्वप्नाध्यायनिगदितस्य कुटुम्बवर्धनादेः प्राप्तिहेतुत्वादनुमानवत् । योऽपि वातपित्तादिद्रेकजनितोऽसत्यत्वेन प्रसिद्धः स्वप्नः । सोऽपि नार्थमात्रव्यभिचारी । न हि सर्वथाप्यननुभूतेऽर्थे स्वप्नोऽपि समुपजायत इति न स्वप्नप्रत्ययो निरालम्बनो युक्तः ।

अस्तु स्वप्नमतिर्यद्वा निरालम्बनतास्पदम् ।
तथापि तदवष्टम्भात्साध्यसिद्धिर्न बन्धुरा ॥ १७५ ॥

तथाहि—

इह स्वप्नावस्थाप्रभवमतिवद्विभ्रमभवभृ-
त्प्रतीतीनां सिद्धेद्यदि किल निरालम्बनविधिः ।
तदा स्वप्नावस्थाविलसदनुमानप्रतिभया
भवेन्न भ्रान्तत्वं कथमिव समस्तानुमितिषु ॥ १७६ ॥

अथाप्ययुक्तं किमिवोपजातमेवं सतीति प्रतिपादयेथाः । ५
न किंचिदन्यद्भवदीयमेकं मुक्त्वा निरालम्बनतानुमानम् ॥ १७७ ॥
भ्रान्तं भवत्वेतदथाऽनुमानं तथापि का नाम तवार्थसिद्धिः ।
मूलाद्विलूने दशकण्ठकण्ठपीठे रघूणामधिपस्य यासीत् ॥ १७८ ॥

किं च स्वप्नप्रत्यये साध्यसाधनधर्म्मग्राहकप्रत्ययस्य निरालम्बनत्वे साध्यसाधनोभयविकलता दृष्टान्तस्य प्रसज्यते । दृष्टान्तग्राहकस्य च १०
प्रत्ययस्य निरालम्बनत्वे दृष्टान्तस्यैवाभावादसाधारणानैकान्तिकत्वं हेतोः।
साध्यधर्म्मिधर्म्मोभयप्रत्ययानां निरालम्बनत्वे वाऽप्रसिद्धविशेष्योऽप्रसिद्धविशेषणोऽप्रसिद्धोभयश्च पक्षः स्यात् । अपि च स्वप्नदृष्टान्तेनाखिलप्रत्ययानां बहिर्मिथ्यात्वाभ्युपगमे स्वरूपेऽपि तत्प्रसङ्गः । तथाहि
यत्प्रतिभासते तन्मिथ्या यथा स्वप्नः प्रतिभासते च विज्ञानस्वरूपमिति १५
प्रतिभासाविशेषेऽपि स्वरूपप्रतिभासस्य सत्यत्वाङ्गीकारेऽर्थप्रतिभासस्यापि सत्यत्वं किं नाङ्गीक्रियेत । विशेषाभावात् । ततश्च ।

अत्यन्तस्वनिजकूटकल्पनाविप्लुष्टैकमृगतृष्णिकाकुलः ।
मुग्ध माध्यमिक मा मुधाभ्रमीः स्वच्छवेदनजलौघवाञ्छया ॥१७९॥

यच्चार्थानामेकानेकस्वरूपविचारासहत्वादित्याद्युपन्यस्तम् । तदपि न २०
प्रशस्तम् । एकत्वस्यानेकत्वस्य च विचार्यमाणस्य तत्रासम्भवेऽपि जात्यन्तरस्यैकत्वानेकत्वस्य सम्भवेन सत्त्वाविरोधात्। यदप्युक्तमुत्पादादिधर्मरहिताश्चैते इत्यादि । तदप्यनुपपन्नम् । द्रव्यरूपतया सतां पर्यायरूपतया चासतां भावानामुत्पादादिधर्म्मसद्भावोपपत्तेः । सर्वथा सतामसतां वा वस्तूनामुत्पादादयो धर्माः न[1] कथञ्चिदुपपद्यन्त इति यथा- २५

1 ' न ' इति प. पुस्तके नास्ति ।

वसरं समर्थयिष्यामहे । यदि वोत्पादादयो धर्म्माः सर्वथा न सन्ति तदा त्वदङ्गीकृतस्य स्वसंवेदनमात्रस्याप्यभावः प्रसज्यते । उत्पादव्ययध्रौव्ययुक्तस्यैव सत्त्वात् । सर्वथाप्यसत्त्वे च तेषां स्पष्टप्रतिभासविषयता पुरुषविषाणस्येव कथं नाम स्यात् । स्पष्टप्रतिभासविषयत्वे वा तेषां स्वसंवित्स्वरूपस्येव सर्वथाप्यसत्त्वं न स्यात् । न च स्पष्टप्रतिभासविषयत्वमेषामसिद्धम् । कनकादौ कुण्डलाद्युत्पादादीनां महिलाहालिकगोपालमुखैरपि स्पष्टप्रतिभासविषयतया सुप्रतीतत्वात् । अपि च उत्पादादीनां धर्माणामसत्त्वे स्वीक्रियमाणे सम्बन्धाभावतस्तस्मिन् संवेद्यमाने न ते नियमेन संवेद्येरन् । यस्य येन सम्बन्धो नास्ति तस्मिन् संवेद्यमाने नासौ नियमेन संवेद्यते । यथा ज्ञानात्मनि संवेद्यमाने कूर्मरोमसमूहः । नास्ति च सम्बन्धो ज्ञानेन सार्धमसद्रूपाणामुत्पादाद्याकाराणामिति । अस्ति चैतेषां ज्ञाने संवेद्यमाने नियमेन संवेदनमतः समस्ति कश्चित्तेषां तेन सह सम्बन्धः । स च परमार्थसत्त्वमन्तरेण न सम्भवतीति सिद्धं तेषां परमार्थसत्त्वम् ।

ग्राह्यग्राहकभावविकलस्य संविन्मात्रस्य खण्डनम् ।

संवेद्यमानानामप्येषामसत्त्वे ज्ञानस्वरूपेऽप्यसत्त्वप्रसङ्गान्निखिलशून्यतापत्तिर्भवेत् । यत्तूक्तमनाद्यविद्यावासनाप्रभावादित्यादि । तदप्यसुन्दरम् । अविद्यायाः पूर्वमेव परास्तत्वात् । अपि च स्वस्थसंविन्मात्रं कुतोऽभ्युपगतम् । प्रतीतेश्चेन्नैवम् । स्वस्थसंविन्मात्रस्य कदाचिदप्यप्रतीतेः । प्रतीत्या च वस्तु व्यवस्थापयता बाह्यमपि वस्तु स्वीकर्त्तव्यम् । तस्यापि प्रतीतौ परिस्फुरणात् । न चेयमसत्यरूपा प्रतीतिः । बाधकाभावात् । विपरीतार्थोपलम्भो हि बाधको न चात्रासौ समस्ति । तद्विपरीतस्य मध्यमक्षणस्थायिनः संविन्मात्रस्य स्वप्नेऽप्युपलम्भाभावात् । अतः कथमसताऽनेनानुभूयमानस्य बाह्यार्थस्य बाधा । असतापि बाधाकल्पने नित्यनिरंशव्यापिपरमब्रह्मोपलम्भेनाऽसतापि त्वदभिमतमध्यक्षणस्थायिसंविन्मात्रस्य बाधा कथं न भवेद्विशेषाभावात् ।

वस्तुव्यवस्थितिमुपैषि यदि प्रतीत्या
बाह्यं तदा किमिति वस्तु पराकरोषि ।
बालावलाप्रभृतिरप्यखिलः पदार्थान्
बाह्यान् जनो यदवगच्छति पीतमुख्यान् ॥ १८० ॥

मिथ्याप्रतीतिरियमित्यपकर्णनीयं
यन्नास्ति काचिदपि बाधकबुद्धिरत्र ।
मध्यक्षणस्थितिमितिप्रतिभास एव
शङ्केत बाधकतया न च विद्यतेऽसौ ॥ १८१ ॥

असन् शक्तः कर्तुं कथय किमतो बाधविधुरान्
सिताद्यर्थोद्धाराननुभवसुधास्वादजनितान् ।
अथासन्नप्येष प्रभवति सखे बाधनविधौ
न किं बाधेतैवं तव मतमपि ब्रह्मणि मतिः ॥ १८२ ॥

इति संग्रहवृत्तानि[1] ।

अथ केचित्पुनः संविन्मात्रस्याप्यपलापेन सकलशून्यतामाहुः । सापि नोपपद्यते । यतस्तस्याः साधकं किञ्चित्प्रमाणमस्ति न वा । यदि नास्ति कथं सा सिद्धयेत् । प्रमाणनिबन्धनत्वाद्विदुषामिष्टसिद्धेः ।

सकलशून्यतामभ्युपगच्छतः शून्यवादिनो मतस्य खण्डनम् ।

अथास्ति, तदा कथं सकलशून्यता । प्रत्यक्षादिप्रमाणस्य तज्जनकस्येन्द्रियादेश्च सद्भावे सकलशून्यताविरोधात् । किञ्च । सकलशून्यता प्रमाणप्रमेययोरनुपलब्धितो, विचारात्, प्रसङ्गसाधनाद्वा स्यात् । प्रथमपक्षे केयं तयोरनुपलब्धिः । तद्ग्राहकप्रमाणाभाव इति चेत्, सोऽपि किं संशयादयः प्रत्यया: प्रमाणानुत्पादो वा । तत्राद्यः पक्षो न युक्तः । संशयादिसद्भावाभ्युपगमे सकलशून्यतायाः सलिलाञ्जलिदान-

१ संग्रहवृत्तानीति पदनिर्देशादेवं प्रतीयते यदिमे श्लोकाः स्वयमन्येन वा कृते संग्रहग्रन्थे प्रणीता इति ।

प्रसङ्गात् । प्रमाणानुत्पादोऽपि ज्ञातः सन् सर्वाभावं गमयत्यज्ञातो वा । न तावदज्ञातोऽतिप्रसङ्गात् । अथ ज्ञातः, कुतस्तज्ज्ञानमन्यतः प्रमाणाभावात् स्वतो वा । प्रथमपक्षेऽनवस्थातः प्रस्तुताभावस्याप्रतिपत्तिः। स्वतस्तज्ज्ञाने सर्वाभावस्यापि स्वत एव ज्ञानप्रसङ्गात् । प्रमाणाभावोपन्यासो व्यर्थः स्यात् सकलशून्यताव्याघातश्च । तथाभूतस्यास्यैव प्रमाणप्रमेयरूपत्वप्रसक्तेः प्रमाणप्रमेयपदाभ्यपदेश्यः सर्वाभाव इति न वाच्यम् । स्वतः स्वरूपं प्रतिपद्यमानस्य तस्य प्रमाणप्रमेयपदाभ्यामवश्यव्यपदेश्यत्वात् । तत्पदाभ्यपदेशत्वे च तस्यासत्त्वप्रसक्तिर्व्योमकुसुमवत् । किं चात्रानुमाने धर्मिहेतुदृष्टान्तानां ग्राहकं प्रमाणमस्ति न वा। यद्यस्ति, कथं सकलशून्यता । अथ नास्ति, कथं प्रकृतानुमानप्रवृत्तिः । प्रमाणाभावे हि धर्मिहेतुदृष्टान्तानां सिद्धेरभावादाश्रयासिद्धतादिदोषदूषितमनुमानं कथं नाम प्रवर्त्तितुमुत्सहेत । अनुमानाभावे च कथं सकलशून्यतासिद्धिः । अथ विचारात्सकलशून्यता साध्यते । ननु विचारः पारमार्थिकः समस्ति न वा । समस्ति चेत्, कथं सकलशून्यता । अथ नास्ति, कुतस्त्या तर्हि तत्सिद्धिः । अथ प्रसङ्गसाधनात् सकलशून्यतासिद्धिरास्थीयते । दुःस्थमेतत् । सकलशून्यतावादिनः स्वपरविभागासम्भवे प्रसङ्गसाधनस्यैवासम्भवात् परस्येष्टेनानिष्टापादनलक्षणत्वात्तस्य । कथं चैष दुरात्मा प्रमाणप्रमेयप्रपञ्चं प्रतीतिपर्यङ्कोत्सङ्गसङ्गतमनङ्गीकृत्य स्वप्नदशायामप्यननुभूयमानां सकलशून्यतामङ्गीकुर्वाणः प्रामाणिकपरिषदि प्रवेशमपि प्राप्नुयात् ।

तस्मादयं नीलसितादिरर्थः प्रमाणमुद्रामवलम्बमानः ।
अबाध्यमानश्च भुवि प्रसिद्धो न शून्यता नाम समस्ति काचित्॥ १८३॥

अथ **परमब्रह्मवादिनः** प्राहुः—

परमब्रह्मवादिनो वेदान्तिनो मतस्य उपपादनपूर्वकं खण्डनम् ।

भावग्रामो घटादिर्बहिरिह घटते वस्तुवृत्त्या न कश्चित्
तन्मिथ्यैष प्रपंचस्तमपि च मनुते तत्त्वभूतं जनोऽयम्।
प्रौढाविद्याविलासप्रबलनरपतेः पारवश्यं गतः सन्
आत्माद्वैतं तु तत्त्वं परमिह परमानन्दरूपं तदस्तु
॥ १८४ ॥

तथाहि समस्तं चेतनाचेतनस्वभावं वस्तु प्रतिभासान्तःप्रविष्टं प्रतिभासमानत्वात् यद्यथोक्तसाधनं तद्यथोक्तसाध्यं यथा प्रतिभासस्वरूपं प्रतिभासते च समस्तं चेतनाचेतनस्वभावं वस्तु तस्माद्यथोक्तसाध्यसम्बद्धम् । न चात्र हेतुरसिद्धः । साक्षादसाक्षाच्च समस्तवस्तुनोऽप्रतिभासमानत्वे सकलविकल्पगोचरातिक्रान्तत्वेन वक्तुमशक्तेः । आगमोऽप्यस्य प्रतिपादकः समस्त्येव **"सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचन । आरामं तस्य पश्यन्ति न तं पश्यति कश्चन ॥ १ ॥"** इत्यादि । तदेव च परमात्मरूपं सकललोकसर्गस्थितिप्रलयहेतुः तदाह। **"ऊर्णनाभ इवांशूनां चन्द्रकान्त इवाम्भसाम् । प्ररोहाणामिव प्लक्षः स हेतुः सर्वजन्मिनाम् ॥ २ ॥"** इति । अपि चेन्द्रियसन्निपातानन्तरसमुद्भूताविकल्पकाध्यक्षेण परानपेक्षतयैकत्वमेव भावानां प्रतीयते तच्चैकप्रतिभासान्तःप्रवेशाभावे तेषां कथं सम्भवेत् । भेदाः पुनः परापेक्षतया प्रतीयन्ते । ततश्चैतत् प्रत्ययरूपत्वेनाप्रमाणभूतत्वाद्भेदमसाधयन्नैकत्वं निरुणद्धि । निन्दा च श्रूयते भेददर्शिनः, **"मृत्योः स मृत्युमाप्नोति इह नानेव पश्यति"** इत्यादिना । न चाभेदशंसिनः प्रत्यक्षविरुद्धत्वमस्यागमस्य वक्तुं शक्यम् । न ह्यन्यनिषेधे प्रत्यक्षं प्रभवति । स्वरूपमात्रग्रहणपरिसमाप्तव्यापारत्वात् । पररूपनिषेधमन्तरेण च दुरुपपादत्वाद्भेदे कुण्ठमेव प्रत्यक्षमिति कथमभेदाभिधायिनमेवमागमं विरुन्ध्यात् । तदुक्तं । **"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः । नैकत्व आगमस्तेन प्रत्यक्षेण विरुद्ध्यते ॥ १ ॥"** इति । किंच क्वचिद्भावे भावान्तरेभ्यो भेदः प्रतिपद्यमानः क्रमेण यौगपद्येन वा प्रतिपद्यते । न तावद्यौगपद्येन, भेदप्रतिपत्तेः प्रतियोगिग्रहणसापेक्षत्वात्। न च प्रतियोगिभावान्तराणामशेषाणां युगपद्ग्रहणं सम्भवति । नापि

१ तत्त्वसंग्रहे पुरुषपरीक्षायां प्रथमश्लोको भूयसांशेनैतत्सदृशः । २ 'काध्यक्षतः इति प. पुस्तके पाठः । ३ 'ततश्चैतत्प्रत्ययः कल्पनाप्रत्ययरूपत्वेनाप्रमाणभूतत्वात् ' इति प. पुस्तके पाठः ।

क्रमेण, यतोऽनन्तानां प्रतियोगिनां क्रमेण प्रतिपत्तावेवोपक्षीणपुरुषायुषः प्रतिपत्ता कथं कदापि कस्यापि भेदं प्रतिपद्येत । तथाऽसौ भेदः पदार्थेभ्यो भिन्नः स्यादभिन्न उभयरूपोऽनुभयरूपो वा । यदि भिन्नः, तत्रापि किमसौ स्वतो भिद्यते भेदान्तरेण वा । यदि स्वतस्तदा पदार्थैः किमपराद्धं येनैषां स्वत एव भेदो नानुमन्यते । अथ भेदान्तरेण, तदाऽनवस्था । तस्यापि भेदान्तरेणार्थेभ्यो भेदप्रसक्तेः । अथाभिन्नः, तदा पदार्थमात्रमेव भवेत् । नाप्युभयरूपः, उभयपक्षनिक्षिप्तदोषानुषङ्गात् । भेदाभेदयोः परस्परपरिहारस्थितिलक्षणत्वेनैकत्रैकदा सम्भवाभावाच्च । नाप्यनुभयरूपः, विधिप्रतिषेधयोरेकतरप्रतिषेधेऽन्यतरविधेरवश्यंभावित्वात् । अन्यच्च समस्तार्थानां किमेक एव भेदः प्रत्यर्थं भिन्नो वा । यद्येक एव, तर्हि तस्याभेदात्तेषामप्यभेद एव स्यात् । अथ प्रत्यर्थं भिन्नः, किं स्वतो भेदान्तरेण वा । पक्षद्वयेऽपि प्राक् प्रतिपादितमेव दोषद्वयमुपढौकनीयम् । अपि च पदार्थानां भेदः किं देशभेदात्कालभेदादाकारभेदाद्वा भवेत् । न तावद्देशभेदात्स्वरूपेणाभिन्नानां भावानामन्यभेदेऽपि भेदायोगात् । नह्यन्यभेदोऽन्यत्र संक्रामति असंकीर्णभावव्यवस्थाभ्युपगमविलोपप्रसङ्गात् । किंच देशस्यापि किमपरदेशभेदतो भेदः स्वतो वा । यद्यपरदेशभेदतः, तर्हि तद्देशस्याप्यपरदेशभेदाद्भेद इत्यनवस्था । अथ स्वत एव देशस्य भेदः, तदा पदार्थभेदोऽपि स्वत एवास्तां किं देशभेदात्तद्भेदकल्पनया । ततो न देशभेदाद्भावभेदः । एवं कालाकारभेदाभ्यामपि न भावानां भेदः । प्रोक्तदोषाणामिहापि समानत्वात् ।

एवं विचार्यमाणोऽसौ भेदो न व्यवतिष्ठते ।
अविद्यानिर्मितं तस्मात् स्फुटं तत् प्रतिभासनम् ॥ १८५ ॥

भेदसिद्धौ न सामर्थ्यमेवं चास्य विभाव्यते ।
ततो नैकत्वमेतेन कथंचन विरुद्ध्यते ॥ १८६ ॥

तस्मादेकत्वसंवित्तेरन्यथानुपपत्तितः ।
एकरूपं परं ब्रह्माङ्गीकर्त्तव्यं परैरपि ॥ १८७ ॥
इदमेव परां विद्यामामनन्ति मनीषिणः ।
एतस्य श्रवणादिभ्यः प्राप्तिः समुपजायते ॥ १८८ ॥

ननु विद्यास्वभावत्वे ब्रह्मणस्तदभिन्नस्वभावानां संसार्यात्मनामपि विद्यास्वभावत्वात्तत्प्राप्त्यर्थानां श्रवणमननादीनां निरुपयोगित्वमिति चेत्, तदचारु । विद्यास्वभावत्वेऽप्यस्य श्रवणमननादीनां निरुपयोगित्वासम्भवादविद्याव्यावर्त्तनफलत्वात्तेषाम् । अविद्याव्यावर्त्तनमेव च विद्याप्राप्तिः । यत एवाविद्या ब्रह्मणोऽर्थान्तरभूता तत्त्वतो नास्त्यत एव तैर्व्यावर्त्यते । तत्त्वतस्तस्याः सद्भावे न कश्चिद्व्यावर्त्तयितुं तां शक्नुयात् ब्रह्मवत् । सर्वैरेव च वादिभिरतात्त्विकानाद्यविद्याया व्यावृत्त्यर्थं मुमुक्षूणां प्रयासः स्वीकृत एव । अस्याः स्वावच्छेदिकाया व्यावृत्तौ परमात्मैकस्वरूपतायां संसार्यवतिष्ठते, घटाद्यवच्छेदकस्य व्यावृत्तौ शुद्धाकाशरूपतायामिवाकाशम् । न च श्रवणमननादीनां भेदरूपत्वेनाविद्यास्वभावत्वात् कथमविद्याव्यावर्त्तकत्वं यतो विद्याप्राप्तिहेतुत्वमभिधीयेतेति वाच्यम् । यथैव हि रजःसम्पर्ककलुषेऽम्भसि द्रव्यविशेषचूर्णरजोरूपं प्रक्षिप्तं रजोन्तराणि प्रशमयत्स्वयमपि प्रशाम्यति स्वस्वरूपावस्थामुपनयति तथैवानाद्यविद्यासंश्लेषमलिने संसार्यात्मनि श्रवणमननादिभिरविद्याविद्यान्तराणि समुच्छिन्दती स्वयमपि समुच्छिद्यमाना परमात्मैकस्वरूपतामुपढौकयतीति । न चाद्वैते बन्धमोक्षादिभेदव्यवस्थाऽनुपपन्नेति वचनीयम् । समारोपितादपि भेदाद्भेदव्यवस्थोपपत्तेः । यथा हि द्वैतवादिनां वक्षसि मे सुखं शिरसि मे दुःखमित्येकस्यात्मनः समारोपितभेदनिमित्ता सुखादिभेदव्यवस्था तथाऽस्माकं ब्रह्मणोऽपि बन्धमोक्षादिभेदव्यवस्था भविष्यति । ननु वक्षःप्रभृतीनामेव सुखाद्यधिकरणत्वं तेषां च भेदात्तद्व्यवस्था युक्तैवेति चेत् । तदप्ययुक्तम् ।

१ ' सद्भावेऽपि ' इति भ. पुस्तके पाठः ।

तेषामन्यत्वेन भोक्तृत्वायोगात् । भोक्तृत्वे चार्वाकमतानुषङ्गः । तथा च—

शिशिरतरुमृणालीजालकैः कीर्णवक्षा-
स्तरुणतरणितापक्लान्तखल्वाटमूर्द्धा ।
अनुभवति विशिष्टां वक्षसि प्रीतिलक्ष्मीं
शिरसि किमपि कष्टं चेति तावत् प्रतीतम् ॥ १८९ ॥

तदिह यथैकत्रात्मन्यारोपितभेदहेतुका भवति ।
अद्वैतद्वेषिमते सुखादिभेदव्यवस्थेयम् ॥ १९० ॥

एकत्रैव ब्रह्मणि स्वस्थरूपे कस्यामुष्मिन् कोविदैः कीर्त्यमाने ।
तद्वन्मिथ्याभेदमादर्शयन्ती किं नेष्टा ते बन्धमोक्षव्यवस्था ॥ १९१ ॥

आधारः सुखदुःखयोरथ भवेद्वक्षःस्थलीमस्तके
तद्भेदादुपपत्स्यतेऽनुपहता भेदव्यवस्था तयोः ।
नैतद्वाच्यमचेतनादिह यतः स्यातां न ते भोक्तृणी
तत्त्वे वाभिमते कथं नु भवतश्चार्वाकता नो भवेत् ॥१९२॥

इत्यात्मब्रह्म सिद्धं परमसुखमयं नित्यचैतन्यरूपं
सर्वाविद्याविलासे प्रलयमुपगते सर्वतो यच्चकास्ति ।
तस्माद्भेदावभासस्त्रिजगति शशभृद्युग्ममाथेन्द्रजाल-
स्वप्नाद्याभासकल्पः कथमिह सुधियः कुर्वते पक्षपातम् ॥१९३॥

ब्रह्मप्रसाधनविधौ विविधं व्यधायि
यद्युक्तिपञ्जरमनन्तरमेतदेवम् ॥
तज्ज्वालजालजटिलज्ज्वलनप्रकारे
प्रत्युत्तरेऽत्र परितः पततादिदानीम् ॥ १९४ ॥

तथाहि यत्तावत्समस्तं चेतनाचेतनस्वभावं वस्तु प्रतिभासान्तः-प्रविष्टमित्याद्यनुमानमदर्शितम् । तत्र स्वतः प्रतिभासमानत्वं हेतोः परतो वा । स्वतश्चेत्, तर्हि प्रतिवादिनो भागासिद्धो हेतुः । पक्षी-

कृतचेतनाचेतनरूपवस्तुमध्याच्चेतनेष्वेव हि स्वतः प्रतिभासमानत्वं स्याद्वादिनः सिद्धं न पुनरचेतनेषु । परतश्चेत्, तर्हि विरुद्धो हेतुः । परतः प्रतिभासमानत्वस्य भेदाविनाभावित्वात् । सर्वं खल्विदं ब्रह्मेत्याद्यागमोऽपि नाद्वैतसाधनसमर्थः प्रत्युत द्वैतमेवायं साधयति । सर्वस्य प्रसिद्धस्याप्रसिद्धेन ब्रह्मत्वेन विधानात् । सर्वथा प्रसिद्धस्य विधानायोगादेकान्ताप्रसिद्धवत् । प्रसिद्धाप्रसिद्धयोश्च भेदाद्वैतसिद्धिरेव । द्वैतप्रपञ्चारोपव्यवच्छेद एवानेनागमेन क्रियत इति चेत्, नैवम् । एवमपि व्यवच्छेद्यव्यवच्छेदकयोः सद्भावसिद्धेर्द्वैतसिद्धेरनिवारणात् । किं च यथा अस्मादागमात्पुरुषाद्वैतसिद्धिस्तथा सन्त्यनन्ता जीवा इत्यागमान्नानाजीवसिद्धिरस्तु । अथ पुरुषाद्वैतविधेस्तदागमेन प्रकाशमानात् प्रत्यक्षस्यापि विधातृतया स्थितस्य तत्रैव प्रवृत्तेस्तेन तस्याविरोधात्ततः पुरुषाद्वैतनिर्णय इति चेत्, नानागमस्यापि तेनाविरोधान्नानाजीवनिर्णयोऽस्तु । तथाहि । **"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः । न नानात्वागमस्तेन प्रत्यक्षेण विरुद्ध्यते ॥ १ ॥"** यदि ह्यपरप्रतिषेधे प्रत्यक्षं प्रवर्त्तेत तदा तेन तदभावविनिश्चयाद्धवेन्नानात्वविधायकागमस्य विरोधो न चैवम् अस्य सर्वत्र विधायकत्वेनाऽत्र व्यवस्थानात् । एवं च नानेन नानात्वविधायकस्यागमस्य विरोधः सम्भवत्येकत्वविधायिन इव विधायकत्वाविशेषात् । कथमेकत्वमनिषेधत्प्रत्यक्षं नानात्मतां विदधातीति चेत् । नानात्वमनिषेधदेकत्वं कथं तद्विदधीत । तस्यैकत्वविधानमेव नानात्वप्रतिषेधकत्वमिति चेत् । तर्हि नानात्वविधानमेवैकत्वप्रतिषेधकत्वमस्यास्तीति समः समाधिः । किं पुनः प्रत्यक्षमात्मनां नानात्वस्य विधायकमिति चेत् । तदेकत्वस्य किं विधायकमित्यप्युच्यताम् । न ह्यस्मदादिप्रत्यक्षमिन्द्रियजं मानसं वा स्वसंवेदनमेक एवात्मा सर्व इति विधातुं समर्थं नानात्मभेदेषु

---

१ ' सर्वदा ' इति भ. पुस्तके पाठः । २ ' विधायकत्वेनैव ' इति प. म. पुस्तकयोः पाठः ।

तस्याप्रवृत्तेः । योगिप्रत्यक्षं समर्थमिति चेत् । पुरुषनानात्वमपि विधातुं तदेव समर्थमस्तु तत्पूर्वकागमश्चेत्यविरोधः । स्वसंवेदनमेवास्मदादेः स्वैकत्वविधायकमिति चेत् । तथाऽन्येषां स्वैकत्वस्य तदेव विधायकमनुमन्यताम् । तथाहि परेषां प्रत्यक्षं स्वैकत्वविधायकं प्रत्यक्षत्वादात्मप्रत्यक्षवत् । स्वैकत्वाविधायकत्वे वा तत्प्रत्यक्षस्य मत्प्रत्यक्षस्यापि कथं स्वैकत्वाविधायकत्वं स्यात् प्रत्यक्षत्वादित्यतः प्रत्यात्मं स्वसंवेदनस्यैकत्वविधायकत्वसिद्धेरात्मबहुत्वसिद्धिरात्मैकत्वसिद्धिर्वा । न च विधायकमेव प्रत्यक्षमिति नियमोऽस्ति । निषेधकत्वेनापि तस्य प्रतीयमानत्वादित्यनन्तरमेव निर्णेष्यते । तन्नागमवाक्यादप्यद्वैतसिद्धिः । अपि चाद्वैताभ्युपगमे पारमार्थिकमागमवाक्यं लिङ्गं वा न किञ्चित् प्रमाणभूतं भिन्नमस्ति यतः परमब्रह्मप्रतीतिः परीक्षकस्य स्यात् ।

अथ तस्य परमब्रह्मविवर्त्तत्वाद्विवर्त्तस्य च विवर्त्तिनोऽभेदेन परिकल्पनात्तत्तत्प्रतीतिरिति मन्यसे । ननु कथं परिकल्पितादागमवाक्यालिङ्गाद्वा परमार्थपथावतारिणः परब्रह्मणः प्रतीतिः परिकल्पिताद्धूमादेः । पारमार्थिकमेवागमवाक्यं लिङ्गं च परमब्रह्मत्वेनेति चेत् । तर्हि यथा तत्पारमार्थिकं तथा साध्यसममिति कथं पुरुषाद्वैतं व्यवस्थापयेत् । यथा च प्रतिपाद्यजनस्य प्रसिद्धं न तथा पारमार्थिकं द्वैतप्रसङ्गादिति कुतः परमार्थसिद्धिस्तत्तस्तामङ्गीकुर्वता पारमार्थिकमागमवाक्यं लिङ्गं च स्वीकर्त्तव्यम् तच्चाऽचित्स्वभावम् । प्रतिपादकचित्स्वभावत्वे परसंवेद्यत्वविरोधात् प्रतिपादकचित्स्वभावत्वात्तत्सुखादिवत् । प्रतिपाद्यचित्स्वभावत्वे वा न प्रतिपादकसंवेद्यत्वं प्रतिपाद्यसुखादिवत् । तस्य तदुभयचित्स्वभावत्वे प्राश्निकादिसंवेद्यत्वविरोधस्तदुभयसुखादिवत् । सकलजनचित्स्वभावत्वे वा प्रतिपादकादिभावानुपपत्तिरविशेषात् । प्रतिपादकादीनामविद्योपकल्पितत्वाददोषोऽयमिति चेत् । हन्त तर्हि यैव प्रतिपादकस्याविद्या प्रतिपादकत्वोपकल्पिका सैव प्रतिपाद्यस्य प्राश्निकादेश्चा-

---

१ 'तथा' इति प. म. पुस्तकयोः पाठः ।

विशिष्टा प्रतिपादकत्वमुपकल्पयेत् । प्रतिपाद्यस्य चाऽविद्या प्रतिपाद्यत्वोपकल्पनपरा प्रतिपादकादेरविशिष्टा प्रतिपाद्यत्वं परिकल्पयेत् । प्रतिपादकादीनामभेदात्तदविद्यानामप्यभेदात् । भेदे वा प्रतिपादकादीनां भेदसिद्धिर्विरुद्धधर्माध्यासात् । अनाद्यविद्योपकल्पित एव तदविद्यानां भेदो न पारमार्थिक इति चेत् परमार्थतस्तर्ह्यभिन्नास्तदविद्या इति स एव प्रतिपादकादीनां सङ्करप्रसङ्गः । यदि पुनरविद्यापि प्रतिपादकादीनामविद्योपकल्पितत्वादेव न भेदाभेदविकल्पसहा नीरूपत्वादिति मतम् । तदा परमार्थपथावतारिणः प्रतिपादकादय इति बलादीर्यते । तदविद्यानामविद्योपकल्पितत्वे विद्यात्वविधेरवश्यंभावित्वात् । तथा च प्रतिपादकादिभ्यो भिन्नमागमवाक्यं लिङ्गं च सकृत्प्रतिपादकादिसंवेद्यत्वान्यथानुपपत्तेरित्यचित्त्वभावं तत्सिद्धं बहिर्वस्तु तद्वत् घटादिवस्तुसिद्धिरिति न प्रतिभासाद्वैतव्यवस्था प्रतिभास्यस्यापि सुप्रसिद्धत्वात् । प्रतिभास्यसमानाधिकरणता पुनः प्रतिभासस्य कथंचिद्भेदेऽपि न विरुद्ध्यते । घटः प्रतिभासत इति प्रतिभासविषयो भवतीत्युच्यते विषयविषयिणोरभेदोपचारात् । प्रस्थप्रमितं धान्यं प्रस्थ इति यथा । ततः सामानाधिकरण्यादुपचरितान्नानुपचरितैकत्वसिद्धिः । मुख्यं सामानाधिकरण्यं क्व सिद्धमिति चेत्, संवेदनं प्रतिभास इत्यत्र । वैयधिकरण्यव्यवहारस्तु गौणस्तत्र संवेदनस्य प्रतिभासनमिति । घटस्य प्रतिभासनमित्यत्र तस्य मुख्यत्वप्रसिद्धेः । किंच कथञ्चिद्भेदमन्तरेण सामानाधिकरण्यस्यानुपपत्तेस्तत एव कथंचिद्भेदस्य सिद्धिः । शुक्लः पट इत्यत्र सर्वथा शुक्लपटयोरैक्ये हि न समानाधिकरणता । पटः पट इति यथा । नापि तयोः सर्वथा भेदे रत्नसानुरत्नाकरवदिति ।

परब्रह्मणः सकललोकसर्गप्रलयहेतुत्वमित्यद्वैतवादिवेदान्तिमतस्य निराकरणम् ।

यच्चोक्तम् । तदेव च परमात्मरूपं सकललोकसर्गस्थितिप्रलयहेतुरिति । तदप्याकाशचर्वणप्रायम् । अद्वैतैकान्ते कार्यकारणभावविरोधात् । तस्य द्वैताविनाभावित्वात् । किंच ।

---

१ ' वा ' इति प. म. पुस्तकयोः पाठः ।

ब्रह्मात्मा विदधाति चेद्व्यसनतश्चित्रां त्रिलोकीमिमां
मुग्ध ब्रूहि तदा भवेत् कथमयं प्रेक्षावतामग्रणीः ;
प्रेक्षावान् जगति प्रयोजनलवं कंचित्परित्यज्य भोः
कोऽपि क्वापि कदाचनाऽपि कुरुते किं नाम काञ्चित् क्रियाम्॥१९५॥

अथापि निष्कम्पकृपापरीतः परोपकाराय करोत्ययं तान् ।
नैतद्घटामेति यदस्य कश्चित् कारुण्यपात्रं न परः समस्ति ॥१९६॥

सत्त्वे वा न कथञ्चनापि नरकक्रोडेषु कुर्याज्जना-
न्नित्यं वैतरणीतरङ्गतरणव्यापारपीडाजडान् ।
कान्ताकुङ्कुमपङ्कपङ्कजरजोज्योत्स्नाच्छवायुच्छटा-
ताम्बूलाद्युपभोगतः प्रमुदितान् किं तर्हि निर्म्मापयेत् ॥१९७॥

सृष्टेः प्रागनुकम्पनीयजनता नास्तीति तस्यां कथं
कारुण्यं किल कल्प्य तस्य जगतः स्रष्टा भवेद्यद्वशात् ।
कारुण्यात्कुरुते प्रवृत्तिमिति च प्रख्याप्यमाने त्वया
कुर्यान्नो सुखिनां मृतिं बत तथा नो दुःखितानां स्थितिम् ॥ १९८ ॥

अथापि कर्म्मायमपेक्षमाणः करोति दुःखं जगतः सुखं वा ।
इमं विमुञ्चाग्रहमेवमस्य स्वतन्त्रतायाः प्रलयप्रसक्तेः ॥ १९९ ॥

किं च—

दुःखश्रेणीकरणनिपुणप्राणिकर्मण्यपेक्षा
युक्ता नैव प्रगुणकरुणा सान्द्रचित्तस्य तस्य ।
औदासीन्यं किमपि कुरुतां किन्तु तत्र प्रवादिन्
ब्रह्मात्मायं कथमपरथा स्यात्कृपालुः कथञ्चित् ॥२००॥

यतो महान्तः करुणासमुद्राः परेषु कांक्षन्ति न दुःखहेतून् ।
तेषां सदा दुःखितजन्तुदुःखतद्धेतुविध्वंसधिया प्रवृत्तेः ॥ २०१ ॥

तथा समर्थः स्वयमेव चेत्स्यात्परानपेक्षेत कथं कदाचित् ।
अथासमर्थः स्वयमेव चेत्स्यात्परानपेक्षेत कथं कदाचित् ॥२०२॥

अदृष्टतः स्वीक्रियते त्रिलोकीविचित्रतैषा यदि च प्रवादिन् ।
सुदुर्भगाविभ्रमसन्निभेन ब्रह्मात्मना तर्हि किमत्र कार्यम् ॥ २०३ ॥

ननूर्णनाभो यथा लालाजालकरणे स्वभावात् एव प्रवर्त्तते तथा परमात्मा जगन्निर्माण इति चेत् । तदपि सकर्णानामनाकर्णनीयम् । ऊर्णनाभो हि न स्वभावत एव प्रवर्त्तते किं तर्हि प्राणिभक्षणलाम्पट्यात्प्रतिनियतहेतुसम्भूततया कादाचित्कात् । यदप्युक्तमिन्द्रियसन्निपातानन्तरसमुद्भूताविकल्पकाध्यक्षतः परानपेक्षतया प्रतीयमानमेकत्वमेवेत्यादि । तदपि न पेशलम्, यतः—

एकव्यक्तिगतं किं वाऽनेकव्यक्तिसमाश्रितम् ॥
व्यक्तिमात्रगतं यद्वा तदेकत्वं प्रतीयते ॥ २०४ ॥
एकव्यक्तिगतं तच्चेत्तदा पर्यनुयुज्यते ॥
समानमसमानं वा न समानं विरोधतः ॥ २०५ ॥
एकव्यक्तिगतं तद्धि कथं साधारणं भवेत् ॥
अथासमानमेतन्न भेदसिद्धिप्रसङ्गतः ॥ २०६ ॥
यदसाधारणं रूपं भेदस्तस्माद्धि कोऽपरः ॥
एकव्यक्तिगतं तस्मान्नैकत्वमुपपद्यते ॥ २०७ ॥
अनेकव्यक्तिसम्बद्धं सत्तासामान्यलक्षणम् ॥
प्रत्यक्षमानतो ग्राह्यमथैकत्वमिहोच्यते ॥ २०८ ॥
व्यक्त्याधारतया तत्किं प्रतीयेतान्यथापि वा ॥
आद्यपक्षे प्रतिक्षेपः कथं भेदस्य सम्भवेत् ॥ २०९ ॥
व्यक्तेराधाररूपत्वं तस्य चाधेयतेत्ययम् ॥
आधाराधेयभावो हि भेदमाकर्षति ध्रुवम् ॥ २१० ॥
अथ तद्व्यक्त्यनाधारतया हन्त प्रतीयते ॥
अन्तरालेऽपि भासेत व्यक्तीनामग्रहे ननु[2] ॥ २११ ॥

---

१ ' च ' इति प. पुस्तके पाठः । २ ' ननु ' इति भ. पुस्तके पाठः ।

तथा—

व्यक्तिभ्यः किमु सत्तास्यं एकत्वं व्यतिरिच्यते ॥
न वा व्यक्तिस्वरूपत्वमभेदेऽस्य प्रयुज्यते ॥ २१२ ॥
असाधारणरूपत्वाद्व्यक्तिर्व्यक्त्यन्तरं न च ॥
अन्वेति तत्कथं तस्य निःशेषव्यक्तिनिष्ठता ॥ २१३ ॥
अथ तद्व्यतिरिच्येत व्यक्तिभ्यस्तर्हि नो जयः ॥
समीहितस्य भेदस्य ध्रुवमेवं प्रसिद्धितः ॥ २१४ ॥
यथा च स्तम्भकुम्भादिव्यक्तिश्चैकत्वमिष्यते ॥
अनुवृत्तमनीषायाः करणत्वान्मनीषिभिः ॥ २१५ ॥
तथैव हन्त किं तासु नानात्वमपि नेष्यते ॥
व्यावृत्तिबुद्धिहेतुत्वाद्विशेषो हि न कश्चन ॥ २१६ ॥
तस्माद्व्यक्तिषु नैकत्वं नानात्वेन विना कृतम् ॥
कथञ्चिदुपपद्येत प्रमाणेन विरोधतः ॥ २१७ ॥

तथाहि—

विवादास्पदमेकत्वं तात्त्विकानेकतात्त्विकम् ॥
एकान्तैकस्वरूपेण प्रमाणागोचरत्वतः ॥ २१८ ॥
यथा कुम्भशरावादिभेदसन्दोहसंयुतम् ॥
निर्द्रव्यैकत्वमेवं च सिद्धो भेदो हि तात्त्विकः ॥ २१९ ॥
व्यक्तिमात्रगतं तच्च पुरैकत्वं विकल्पितम् ॥
समानयोगक्षेमत्वात्तदप्येतेन चर्चितम् ॥ २२० ॥
एकां व्यक्तिमनेकां वा परित्यज्यापरस्य यत् ॥
व्यक्तिमात्रस्य नैवास्ति प्रतीतिपथचारिता ॥ २२१ ॥

यदपि गदितं भेदः पुनः परापेक्षतया प्रतीयत इत्यादि । तदपि नोपपन्नम् । एकत्वमपि हि परापेक्षतया प्रतीयते ततश्चैतत्प्रत्ययोऽपि कल्पनाप्रत्ययरूपत्वेनाप्रमाणत्वात् कथमिवैकत्वं साधयेत् । एकत्वं ह्यनेकव्यक्तिग्रहणमन्तरेण कथं ग्रहीतुं शक्यत

भेदः परापेक्षया प्रस्फुरति स न तात्त्विक इत्यद्वैतवादिवेदान्तिमतस्य निराकरणम् ।

इति परापेक्षतया गृह्यमाणत्वाद्यक्तमस्य परापेक्षत्वम् । अथैकत्वं परानपेक्षतया एवाध्यक्षेण समधिगतं परापेक्षया तु कल्पनाप्रत्ययेनानुगामिरूपतया व्यवह्रियते । तर्हि भेदोऽपि तथैव प्रत्यक्षेण परिच्छिनम्, केवलं परापेक्षया कल्पनाप्रत्ययेन व्यावृत्तस्वभावतया व्यवह्रियत इत्यप्यनिवार्यम् । किं चान्यापेक्षया भवनमेव भेदप्रत्ययस्य कल्पनात्वं स्यात्किं वा स्मरणसमनन्तरभावित्वं यद्वा शब्दानुविद्धत्वमुत जात्याद्युल्लेखित्वमथासदर्थविषयत्वमुपचाररूपत्वं वा । नाद्यः पक्षः । एकत्वप्रत्ययस्यापि कल्पनात्वप्रसक्तेः । परापेक्षामन्तरेणैव भेदस्वरूपप्रतिभासस्य समर्थयिष्यमाणत्वाच्च । नापि द्वितीयः, एकत्वप्रत्ययस्यापि स्मरणसमनन्तरभावित्वेन कल्पनात्वापत्तेः । शब्दानुविद्धत्वं च ज्ञाने शब्दब्रह्मनिर्मूलनावसरे प्रागेव प्रतिक्षिप्तम् । स्तम्भोऽयं कुम्भोऽयमित्यादिभेदप्रतिभासस्य जात्याद्युल्लेखित्वात्कल्पनारूपतायामभेदज्ञानस्यापि कल्पनारूपत्वप्रसङ्गस्तस्यापि सत्तासामान्योल्लेखित्वात् । असदर्थविषयत्वं पुनर्भेदप्रतिभासस्यासिद्धम् । अर्थक्रियाकारिणो वस्तुभूतार्थस्य तत्र प्रतिभासनात् । नापि भेदप्रतिभासस्योपचाररूपत्वं कल्पनात्वं सम्भवेत्, क्वचिदप्युपचारस्यानुपलम्भान्माणवके पावकाद्युपचारवत् । न चाभेदवादिनो मुख्यभेदाभ्युपगमोऽस्त्यपसिद्धान्तप्रसक्तेः ।"**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति**" इति निन्दावादोऽप्यनुपपन्नः । भेदाभेदग्राहित्वेनैव निखिलप्रमाणानां प्रवृत्तेः समर्थयिष्यमाणत्वात् । यथोक्तमाहुर्विधातृप्रत्यक्षमित्यादि ।

तत्र किमिदं प्रत्यक्षस्य विधातृत्वं नाम । सत्तामात्रावबोधोऽसाधारणवस्तुस्वरूपपरिच्छेदो वा । प्रथमपक्षो न क्षमः । नित्यनिरंशव्यापिनो विशेषनिरपेक्षस्य सत्तामात्रस्य स्वप्नेऽप्यप्रतीतेर्वाजिविषाणवत् । द्वितीयपक्षे न पुनः कथं नाद्वैतप्रतिपादकागमस्य प्रत्यक्षविरोधः । भाव-

प्रत्यक्षस्य विधातृत्वमेवेत्यस्य खण्डनम् ।

१ ' मुख्यमन्तरेण ' इत्यधिकं म. पुस्तके । २ ' यचोक्त ' इति प. म. पुस्तकयोः पाठः ।

भेदग्राहकत्वेनैव प्रत्यक्षस्य प्रवर्त्तमानत्वात् । अन्यथा त्वसाधारणस्वरूपपरिच्छेदकत्वविरोधोऽस्य । अथाभिदध्याः विधात्रिति कोऽर्थ इदमिति वस्तुस्वरूपं गृह्णाति नान्यस्वरूपं निषेधति प्रत्यक्षमिति, नैवम् । अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदकस्याप्यसम्पत्तेः । पीतादिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति नेतरथा । तथा चाहुः स्याद्वादबाह्या अपि । **" तत्परिच्छिनत्ति अतद्व्यवच्छिनत्ति "** इति । अपि च यदेदमिति वस्तुस्वरूपमेव गृह्णाति प्रत्यक्षमित्युच्यते । तदावश्यमपरस्य प्रतिषेधमपि तत्प्रतिपद्यत इत्यभिहितमेव भवति । केवलवस्तुस्वरूपप्रतिपत्तेरेवान्याभावप्रतिपत्तिरूपत्वात् । केवलभूतलप्रतिपत्तेरेव घटाभावप्रतिपत्तिसिद्धेः । न ह्ययं प्रतिपत्ता किञ्चिदुपलभ्यमानः पररूपैः संकीर्णमेवोपलभते । स्तम्भोऽयं कुम्भोऽयमिति तदसंकीर्णस्य समस्तस्य प्रतिभासात् । न च तैरसंकीर्णतैव । सदाद्यात्मनाऽपि तदसङ्करे तस्यासत्त्वप्रसङ्गात् । स्वपररूपोपादानापोहापाद्यत्वाद्वस्तुनो वस्तुत्वस्य । तथा चाहुर्वृद्धाः **" सर्वमस्ति स्वरूपेण पररूपेण नास्ति च । अन्यथा सर्वसत्त्वं स्यात्स्वरूपस्याप्यसम्भवः ॥ १ ॥ "** किं च विधात्रेव प्रत्यक्षमिति नियमस्यास्वीकारो विद्यावदविद्यावा अपि विधानं तवानुपज्यते । सोऽयमविद्याविवेकेन सन्मात्रं प्रत्यक्षात् प्रतियन्नेव न निषेद्धृ तदिति ब्रुवाणः कथं स्वस्थः । कथं वा प्रत्यक्षस्य निषेद्धृत्वाभावं प्रतीयात् । न तावत्प्रमाणान्तरात् , द्वैतप्रसङ्गात् । स्वतस्तु प्रत्यक्षस्य तथा निश्चये सिद्धं तस्य निषेद्धृत्वमपि । परस्याहं निषेद्धा न भवामीति स्वयं प्रतीतेः । एवं च भेदविषयमेव प्रत्यक्षम् ।

---

१ ' तद्रूपपरिच्छेदस्य ' इति म. पुस्तके पाठः । २ ' हेतोरसङ्कीर्णतैव ' इति म. पुस्तके पाठः । ३ ' अस्वीकारे ' इति प. म. पुस्तकयोः पाठः ।

भेदो मिथ्येति मतस्य भेदव्यवस्थापनेन निराकरणम् ।

यच्चोक्तं क्वचिद्भावे भावान्तरेभ्यो भेदः प्रतिपद्यमानः क्रमेण यौगपद्येन वेत्यादि । तत्र यौगपद्येनैव भेदप्रतिपत्तिरिति ब्रूमः । सदृशपरिणामस्येव विसदृशपरिणामस्यापि समस्तपदार्थानां युगपत् प्रतिभासात् । विसदृशपरिणामस्वभाव एव च भेदप्रतिभासः । यच्चात्रोक्तं भेदप्रतिपत्तेः प्रतियोगिग्रहणसापेक्षत्वादित्यादि । तदप्यनुचितम् । यतो भेदव्यवहार एव परापेक्षो न पुनस्तत्स्वरूपप्रतिभासः । स हि तथाविधक्षयोपशमविशेषात् प्रतियोगिग्रहणनिरपेक्ष एव प्रादुर्भवतीति सिद्धो युगपद्भेदप्रतिभासः । भेदः पदार्थेभ्यो भिन्नः स्यादित्याद्यपि स्याद्वादस्वीकारात् प्रतिविहितम् । भेदो हि पदार्थानां धर्मः स च तेभ्यः कथञ्चिद्भिन्नोऽभिन्नश्च । न खलु धर्मधर्मिणोः सर्वथा भेदोऽभेदो वा सम्भवतीति पुरतः प्रकाशयिष्यते । यच्चोक्तं किमेक एव भेदः प्रत्यर्थं भिन्नो वेत्यादि । तत्र प्रत्यर्थं भिन्न इति नः पक्षः । साधारणासाधारणपरिणामवतो वस्तुनोऽसाधारणपरिणामस्य प्रतिवस्तुनियतस्याभेदत्वेनेष्टेः । स चायमीदृशो भेदः स्वतो भेदान्तराद्वा न विद्यते । किन्तु प्रतिनियतादृग्स्तूत्पादककारणादेव । कारणस्यापि प्रतिनियमः स्वकीयप्रतिनियतकारणादेव । न चैवमनवस्थादोषः । एवंविधानवस्थाया बीजाङ्कुरानवस्थानवन्मूलक्षयकारित्वाभावेन दूषणत्वासम्भवात् । एतेन पदार्थानां भेदः किं देशभेदादित्याद्यपि प्रत्युक्तम् । अपि च यदीत्थं विकल्पाद्भेदो दूष्यते तदानीमभेदेऽपि भवतः का प्रत्याशा । तत्राप्येवंविधविकल्पानां सुकरत्वात् । तथा ह्यभेदः पदार्थानां किं देशाभेदात् कालाभेदादाकाराभेदाद्वा भवेत् । यदि देशाभेदात्, तदा देशस्यापि कुतः सकाशादभेदः । अन्यदेशाभेदाच्चेदनवस्थाप्रसङ्गः । स्वतश्चेत्पदार्थानामपि स्वत एवाभेदो भवतु किं देशाभेदादभेदकल्पनयेत्यादि सर्वत्रापि[1] योजनीयम् । यदपि निगदितं यत एवाविद्या ब्रह्मणोऽर्थान्तरभूता

[1] 'सर्वमत्रापि' इति प. म. पुस्तकयोः पाठः ।

तत्त्वतो नास्त्यत एव तैर्व्यावर्त्तत इत्यादि। तदप्यसारतया डिण्डीरपिण्डाडम्बरं विडम्बयति। यतो यद्यवस्तुसत्यविद्या कथमियं प्रयासतो निवर्त्तनीया भवेत्। न ह्यवस्तुसन्तः सुरसरणिसरसिजप्रमुखाः प्रयासतो निर्वर्त्तनीयतामनुसरन्तः समुपलभ्यन्ते। यद्यविद्यापि सती कथमियं निवर्त्तयितुं केनापि शक्येतेति चेत्। कातर किमत्र संत्रासेन। सतामेव हि महीरुहादीनां निवृत्तिरिह प्रतीयते। तदियमविद्या निवर्त्तनीयत्वादेकान्तनित्या माभूत्सती तु भवत्येव। सत्त्वे च द्वितीयाया अविद्यायाः सद्भावात्कथमद्वैतवादः। न चाविद्यानिर्म्मितत्वेन महीरुहादीनामपि पदार्थानां परमार्थतोऽसत्त्वमिति वाच्यम्। परस्पराश्रयदोषप्रसक्तेः। सिद्धे ह्यविद्यानिर्मितत्वे तेषां परमार्थतोऽसत्त्वं सिद्ध्यति तत्सिद्धौ चाविद्यानिर्म्मितत्वसिद्धिरिति। यच्चोक्तं यथैव हि रजःसम्पर्ककलुषेभ्यसीत्यादि। तदपि फल्गु। यतो बाध्यबाधकभावाभावे कथं श्रवणमननादिलक्षणाविद्यान्तरं प्रशमयेत्। बाध्यबाधकभावश्च सतोरेव दन्दशूकनकुलयोरिव न त्वसतोः शशकाश्वविषाणयोरिव। न वाऽविद्यात्वेन सम्मतस्य भेदस्योच्छेदो घटते। वस्तुस्वभावत्वेनाभेदस्येव तस्योच्छेतुमशक्तेः। ननु स्वप्नावस्थायां भेदाभावेऽपि भेदप्रतिभासो दृष्टस्ततो न पारमार्थिको भेद इति। अभेदेऽपि समानम्। तस्यापि तद्दशायामसतः प्रतिभासमानत्वेनापारमार्थिकत्वापत्तेः। कथं च स्वप्नावस्थायां भेदस्यासत्त्वम्। बाध्यमानत्वाच्चेत्, तर्हि तत एवाभेदस्यापि तदस्तु। यदि च तदवस्थायां बाध्यमानत्वाद्भेदस्यासत्त्वम्। तर्हि जाग्रदवस्थायां तस्याबाध्यमानत्वात्सत्त्वमस्तु।

एकत्रास्य बाध्यमानत्वोपलम्भात्सर्वत्रासत्त्वे च स्थाणौ पुरुषप्रत्ययस्य बाध्यमानत्वोपलम्भात्सर्वत्र पुरुषस्यासत्त्वप्रसङ्गः। ततो जाग्रदवस्थायां स्वप्नावस्थायां वा यत्र बाधकोदयस्तदसत्यं यत्र तु तदभावस्तत्सत्यमित्युपगन्तव्यम्। अपि च भेदप्रतिभासस्तावत्सर्वेषां भवति तस्यासत्यता कुतः प्रतीयते किं तत एव प्रतिभासान्तराद्वा। तत एवेति न युक्तम्। तस्य

भेदविषयत्वात् । न हि भिन्ना एतेऽर्था इति प्रतिभासः स्वात्मनोऽसत्यतां निश्चिनोति । तन्निश्चये हि विपर्ययात् प्रवृत्तिर्न स्यात् । अथ प्रतिभासान्तरादसत्यता निश्चीयते । तदपि प्रतिभासान्तरं स्वसंवेदने नियतं कथमन्यस्यासत्यतां वेत्ति । अथोभयगोचरं तत्, तदा कथं न भेदावगमः । उभयगोचरत्वेऽपि न भेदावगम इति स्ववचनविरोधः । पराभ्युपगमेनाभिधानादविरोध इति चेत् । स पराभ्युपगमः किं स्वाभ्युपगमादभेदेनावगतोऽथ भेदेनेति । यद्यभेदेन, तदासौ स्वाभ्युपगम एव स्यात् । अथ भेदेन, तर्हि तदवस्थ एव विरोधः । लोकव्यवहारानुवाद एष इति चेत्, स खलु लोकव्यवहारस्तत्त्वदृष्टेरर्थान्तरमनर्थान्तरं वा । यदि नार्थान्तरम्, तर्हि तत्त्वदृष्टिरेव लोकव्यवहारः । ततस्तद्व्यवहारादेव भेदसिद्धिः । अथ तत्त्वदृष्टेरर्थान्तरं लोकव्यवहारः । ततः कथं न भेदः । उपप्लव एवेति चेत् । सोऽपि तत्त्वदर्शनाद्भिन्नोऽथाभिन्न इति पूर्ववत्प्रसङ्गः । अविद्यानिर्मितः समस्ति भेद इत्यपि न युक्तम् । अविद्यापि तत्त्वदृष्टेरन्यानन्या वेत्यनिवृत्तः पर्यनुयोगः न चेत्थमनिर्वचनीयाऽविद्येत्यभिधातव्यम् । वस्तुनो भेदाभेदाभ्यां विचार्यमाणत्वोपपत्तेः । न चावस्तुत्वमस्या इत्यभिधेयम् । वस्तुत्वस्यात्रैवानन्तरं प्रसाधितत्वात् । यच्च समारोपितादपि भेदाद्भेदव्यवस्थोपपत्तेरित्याद्युक्तम् । तदप्ययुक्तम् । आत्मनः सांशत्वे सत्येव बन्धमोक्षादिभेदव्यवस्थोपपत्तेः निरंशस्यान्तर्बहिर्वा वस्तुनः सर्वथाप्यप्रतीतेरित्यात्माद्वैताभिनिवेशं परित्यज्यान्तर्बहिश्चानेकप्रकारं वस्तु वास्तवं प्रमाणसिद्धमङ्गीकर्तव्यं न पुनर्भेदप्रपञ्चः समग्रोऽपि हेय इति वाच्यमिति ।

तस्मात्तद्वैतमेतत्प्रबलपरिलसद्युक्तिभिर्विप्रयुक्तं
युक्तं किं नाम वक्तुं कथय तव सखे युक्तिमार्गानुगस्य॥

---

१ 'अर्थभेदेन'इति म. प. पुस्तकयोः पाठः । २ 'अर्थ' इति म. प. पुस्तकयोः पाठः । ३ 'तत्त्व' इति म. प. पुस्तकयोः पाठः ।

छिद्रप्रच्छादनार्थं प्रकटयति भवान्यामपीमामविद्या-
मत्यन्तं च्छिद्रिताऽसौ प्रभवति न तरां तत्समाच्छादनाय ॥ २२२ ॥

अद्यापि वादिन्यदि तुण्डकण्डूर्विडम्बयत्येव भवन्तमेषा ॥
तदा पुनर्ब्रूहि वयं तदेतत्तथैव वर्त्तेमहि हन्त सज्जाः ॥ २२३ ॥

नन्वेष ब्रवीमि । विवादविषयापन्नः प्रपंचो मिथ्या प्रतीयमानत्वाद्यदित्थं तदित्थं यथा निशीथिनीनाथद्वित्वमिति । श्रुतमिदमनुमानं परं दुर्वारमारुतप्रहततरंगिणीतुङ्गतङ्गत्तरङ्गपरम्पराप्रेरितोत्पलनालवद्दोलायते । तथाहि मिथ्यात्वमत्र कीदृक्षमाकांक्षितं सूक्ष्मदृशा, किमत्यन्तासत्त्वमुतान्यस्यान्याकारतया प्रतीतत्वमाहोस्विदनिर्वचनीयत्वमिति न तावदाद्यः पक्षः, असत्ख्यातेस्त्वयाऽनङ्गीकाराच्चन्द्रद्वित्वस्यात्यन्तासत्त्वाभावेनोदाहरणस्य साध्यविकलत्वप्रसङ्गाच्च । अथान्यस्यान्याकारतया प्रतीतत्वम्, तदपि न । विपरीतख्यातेरपि त्वयाऽनभ्युपगमात् । अथानिर्वचनीयत्वरूपं मिथ्यात्वं सिषाधयिषितम् । तदापि चन्द्रद्वित्वे तदभावात्साध्यविकलत्वमुदाहरणस्य । न हि चन्द्रद्वित्वमनिर्वचनीयत्वेन प्रतिपन्नमस्त्यनिर्वचनीयख्यातिप्रत्याख्यानप्रघट्टके विकुट्टितत्वात् । प्रत्यक्षबाधितत्वं च पक्षस्य दोषः अनुष्णस्तेजोऽवयवात्यादिवत् । तथाहि सन् घटः सन् पट इत्याद्युल्लेखवता प्रत्यक्षेण प्रपञ्चस्य सत्यत्वमेव प्रतीयते न हि घटादेः पृथक् प्रपञ्चो नाम कश्चिदस्ति । ननु पक्षस्य प्रत्यक्षबाधितत्वमसमंजसं प्रपञ्चान्तर्गतत्वेन प्रत्यक्षस्य तत्रापि मिथ्यात्वस्य साध्यमानत्वात् । न च मिथ्यारूपेण तेन किमपि बाधितुं शक्यमतिप्रसक्तेः । ततश्च यथानुमानमिथ्यात्वं साधयन्तं **लोकायतं** प्रत्यनुमानबाधा नोपपन्ना तथा प्रपञ्चान्तर्गतत्वेन प्रत्यक्षमिथ्यात्वं साधयन्तं **मायावादिनं** प्रति प्रत्यक्षबाधापीति चेत् । न । त्वदीयानुमानस्यापि प्रत्यक्षवत् प्रपञ्चान्तर्गतत्वेन मिथ्यात्वात्प्रस्तुतसाध्यसाधकत्वानुपपत्तिप्रसक्तेः । अथैवमभिधीयते प्रपञ्चमिथ्यात्वप्रसाधकमिदमनुमानमेव सन् घटः सन् पट इत्यादिप्रत्यक्षप्रतीतिं बाधते

मिथ्यात्वसाधकानुमानस्य खण्डनम् ।

तत्कथं पक्षस्य प्रत्यक्षबाधितत्वमिति । तन्न वाच्यम् । इतरेतराश्रय-
प्रसङ्गात् । प्रपञ्चग्राहिणि प्रत्यक्षे बाधिते सत्यस्यानुमानस्य प्रसवः
प्रस्तुते चास्मिन्ननुमानेऽनेनप्रत्यक्षबाधितत्वम् । किं च लिङ्गजत्वमात्र-
मिन्द्रियजत्वमात्रं वा न बाधकत्वे प्रयोजकमपि त्वनन्यथासिद्धत्वमेव ।
यत् खल्वन्यथासिद्धं तदनन्यथासिद्धेन बाध्यतेऽनन्यथासिद्धं चात्रेन्द्रि- ५
यजं विज्ञानमतो मिथ्यात्वानुमानं बाधत एव । नन्वेवमनुमानमपि
प्रत्यक्षं बाधेत विशेषाभावात् । इदमतिपरिफल्गु । विशेषाभावासिद्धेः ।
अन्यथासिद्धत्वलक्षणस्य विशेषस्य प्रस्तुतानुमाने विद्यमानत्वात् ।
तथाहि प्रतीयमानस्य प्रकृतहेतोः प्रपञ्चाख्ये धर्म्मिणि सत्यत्वेनैवान्यथा-
नुपपत्तिर्न पुनर्मिथ्यात्वेन । यदि हि घटादिप्रपञ्चो मिथ्यारूपः स्या- १०
त्तदा कथं नाम स्वविषयां प्रतीतिं जनयेत् । न खलु मिथ्याभूतं
निशीथिनीनाथद्वित्वादिकं कस्याश्चित् प्रतीतेर्जनकत्वेन सम्मतं विदु-
षाम् । प्रतीतिजनकत्वाभावे च प्रपञ्चस्य प्रतीयमानत्वमपि न स्यात् ।
तच्चेदङ्गीक्रियते तर्हि तद्व्यापकं सत्यत्वमपि प्रपञ्चस्य किन्नाङ्गीकरणीयम्
ततः सत्यत्वेनैवान्यथानुपपन्नः प्रतीयमानत्वाख्यो हेतुर्न मिथ्यात्वेनेत्य- १५
न्यथासिद्धमिदं प्रपञ्चमिथ्यात्वानुमानम् । न चैवं सन् घटः सन् पट
इत्याद्युल्लेखवतः प्रपञ्चसत्त्वग्राहकस्य प्रत्यक्षस्यान्यथासिद्धिरस्ति । गत्य-
न्तराभावात् । न खलु प्रपञ्चस्य मिथ्यात्वे प्रत्यक्षस्य कथञ्चिदुत्पत्तिः
सम्भविनी । मिथ्यारूपस्य कस्यचित्कञ्चिदपि प्रतीतिं प्रति न जन-
कत्वमित्युक्तत्वात् । तदेवमनन्यथासिद्धमिदं प्रत्यक्षमेव प्रपञ्चमिथ्या- २०
त्वानुमानमन्यथासिद्धं बाधते । ततः सिद्धं पक्षस्य प्रत्यक्षबाधितत्वम् ।
विवादास्पदीभूतः प्रपञ्चो मिथ्या न भवति असद्विलक्षणत्वाद्य एवं स एवं
यथात्मा तथा चायं तस्मात्तथेत्यनुमानबाधितत्वं च । प्रतीयमानत्वं च
हेतुत्वेनाभिमतं भवतः किं प्रतिभास्यत्वमात्रमाहोस्वित्प्रतीतिजनकत्वेन
प्रतिभास्यत्वस्य प्रपंचे भवतानभ्युपगमात् । अनैकान्तिकत्वं च, यस्मा- २५
दात्मनः प्रतीतिजनकत्वेनाभ्युपगमात् प्रतिभास्यत्वमस्ति न च मिथ्या-

त्वम् । तस्य मिथ्यात्वे वा स्वसिद्धान्तविरोधापत्तिः । साधनविकलत्वं चात्र पक्षे दृष्टान्तस्य । उदाहरणीकृते निशीथिनीनाथद्वित्वे प्रतीतिजनकत्वेन प्रतिभास्यत्वस्य साधनस्याभावात् । न हि मिथ्यारूपं चन्द्रद्वित्वं कस्यचिदपि ज्ञानस्य जनकत्वेन प्रतीतमपि त्वेकत्वमेव शुद्धांशोस्तथाविधदोषसामग्रीसमवधानसामर्थ्याद्द्वित्वोल्लेखिनीं धियमुपजनयतीत्यवोचाम विपरीतख्यातिविचारावसरे । विरुद्धत्वं चास्य हेतोः, साध्यविपरीतसाधनात् । तथाहि विवादाधिरूढः प्रपञ्चो मिथ्या न भवति प्रतीतिजनकत्वे सति प्रतिभास्यत्वाद्य इत्थं स इत्थं यथात्मा तथा चायं तस्मात्तथेति । अपि च किं सम्यक्प्रतीयमानत्वं साधनत्वेन विवक्षितं मिथ्याप्रतीयमानत्वं वा । प्रथमपक्षे वाद्यसिद्धत्वं हेतोः । सम्यक्प्रतीयमानत्वस्य प्रपञ्चे त्वयानभ्युपगमात् । अभ्युपगमे वा विरुद्धत्वं स्यात् सम्यक्प्रतीयमानत्वस्य सत्यत्वेनैवाविनाभूतत्वात् । द्वितीयपक्षे पुनः प्रतिवाद्यसिद्धित्वम् । मिथ्याप्रतीयमानत्वस्य प्रपञ्चे स्याद्वादिभिरनङ्गीकरणादिति । इदं च पर्यनुयोज्यो भवान्किमेतदनुमानं प्रपञ्चाद्भिन्नमभिन्नं वा । यदि भिन्नम्, तर्हि सत्यमसत्यं वा, यदि सत्यम्, तदा तद्दृष्टान्तबलेन प्रपञ्चस्यापि सत्यत्वं स्यात् । अनुमानस्यापि हि सत्यत्वं प्रतीयमानत्वादेव भवद्भिरभ्युपेयं तच्च प्रपञ्चेऽप्यविशिष्टमिति कथं स न सत्यः स्यात् । अथासत्यम्, तत्रापि शून्यमन्यथाख्यातमनिर्वचनीयं वा । आद्यपक्षद्वये न साध्यसाधकत्वं सम्भवति । नृगृङ्गवच्छुक्तिकाकलधौतवच्च । तृतीयपक्षोऽपि न श्रेयान् । अनिर्वचनीयत्वस्य प्रपञ्चतः प्रागेव प्रतिहतत्वात् । व्यवहारसत्यमिदमनुमानमतोऽसत्यत्वाभावात् स्वसाध्यसाधकमिति चेत् किमिदं व्यवहारसत्यं नाम । व्यवहर्तिर्व्यवहारो ज्ञानं तेन च सत्यं तर्हि परमार्थिकमेतत् । ज्ञानजनकत्वेनार्थक्रियाकारित्वात् पारमार्थिकत्वे वाऽस्यैतद्दृष्टान्तबलेनैव प्रपञ्चस्यापि पारमार्थिकत्वं दुःप्रतिषेधं स्यात् । अथ व्यवहारः शब्दस्तेन सत्यं व्यवहारसत्यमिति ब्रूषे । ननु शब्दोऽपि सत्यस्वरूपस्त-

दितरो वा । सत्यस्वरूपश्चेत्, तर्हि तेन यत्सत्यं तत्पारमार्थिकमेव । तत्र चोक्तो दोषः । अथासत्यस्वरूपश्शब्दः, कथं ततस्तस्य सत्यत्वं नाम। नहि स्वयमसत्यमन्यस्य सत्यत्वव्यवस्थापनहेतुरतिप्रसङ्गात् । अथ कूटकार्षापणे सत्यकार्षापणोचितक्रयविक्रयव्यवहारजनकत्वेन सत्यकार्षापणव्यवहारवदसत्येऽप्यनुमाने सत्यव्यवहार इति चेत् । तर्हि सत्यमेव तदनुमानम् । तत्र चोक्तो दोषः । अतो न प्रपञ्चाद्भिन्नमनुमानं कथमप्युपपद्यते । नाप्यभिन्नम् । प्रपञ्चस्वभावतया तस्यापि मिथ्यात्वप्रसक्तेर्मिथ्यारूपं तत्कथं मानं स्वसाध्यं साधयेदित्युक्तमेव ।

तस्मादेवं यत्प्रपञ्चानृतत्वे साध्ये साधो प्रत्यपादि प्रमाणम् ॥
तस्मिन् साध्यं साधनं चेति सर्वं प्रत्याख्यातं प्रोक्तयुक्तिप्रबन्धात् ॥२२४॥

अद्वैतवादिसंमतानुमानान्तरखण्डनम् ।

यान्यपि परैरपराणि प्रपञ्चगोचराण्यनुमानानि ख्याप्यन्ते । विवादगोचरापन्नः प्रपञ्चः सन्न भवति प्रतीयमानत्वाद्दृश्यत्वाद्वा यथा चन्द्रद्वैतरूप्यम् । तथा प्रपञ्चो मृषा सत्त्वासत्त्वाभ्यामनिर्वाच्यो वाऽनात्मत्वाज्जडत्वादुत्पत्तिमत्त्वाद्विनाशित्वाद्वा यत्पुनर्मृषा न भवति सत्त्वासत्त्वाभ्यामनिर्वाच्यं न भवति तन्न यथोक्तानात्मत्वादिसाधनाधिकरणं यथात्मतत्त्वमित्यादीनि । तत्र तावत्पक्षस्य प्रत्यक्षबाधितत्वमनुमानबाधितत्वं च सर्वत्राप्यविशिष्टं द्रष्टव्यम् । तथा हि सन् घटः सन्पट इत्याबुल्लेखवता निर्बाधप्रत्यक्षेण प्रपञ्चस्य सत्त्वं, सत्यत्वं, निर्वाच्यत्वं च प्रतीयते न पुनरसत्त्वं, मृषात्वमनिर्वाच्यत्वं चेति व्यक्तं पक्षस्य प्रत्यक्षबाधितत्वम्। तथा विवादास्पदः प्रपञ्चः सद्रूपस्तथा सत्यः सत्त्वासत्त्वाभ्यां निर्वाच्यश्चासद्विलक्षणत्वाद्यदेवं तदेवं यथात्मतत्त्वमसद्विलक्षणश्च प्रपञ्चस्तस्माद्यथोक्तसाध्यत्रयसम्पन्न इत्यनुमानबाधितत्वं च । प्रपञ्चासत्त्वप्रतिज्ञायां च प्रतीयमानत्वदृश्यत्वलक्षणं हेतुद्वयं पूर्वोक्तानुमानहेतुवद्विदुषा स्वयमभ्यूह्य दूषणीयम् । शेषाश्चा-

१ ' स्वरूपं ' इति प म. पुस्तकयोः पाठः ।

नात्मत्वादयो हेतवः सर्वेऽप्यन्यथानुपपत्तिशून्यत्वेन व्यभिचारित्वान्न स्वसाध्यसमर्थनासामर्थ्यभाजो भवितुमर्हन्ति। न खलु मृषात्वानिर्वचनीयत्वाभ्यां सार्द्धमनात्मत्वजडत्वोत्पत्तिमत्त्वविनाशित्वादिहेतूनामन्यथानुपपत्तिः केनापि प्रमाणेन प्रतीयते। सत्यत्वनिर्वचनीयत्वाभ्यां सह तेषां विरोधाप्रतिपत्तेः। तथा सर्वेऽप्यमी हेतवः किमसद्रूपाः सद्रूपा वा, असत्याः सत्या वा, अनिर्वचनीया निर्वचनीया वा । असद्रूपासत्यानिर्वचनीयपक्षेषु प्रतिवाद्यसिद्धत्वं हेतूनाम्। अनेकान्तवादिभिस्तथानङ्गीकरणात् । सद्रूपसत्यनिर्वचनीयपक्षेषु पुनर्वाद्यसिद्धत्वम् । तेषां प्रपञ्चान्तर्गतत्वेन हेतूनामप्यसद्रूपतया मृषारूपतयाऽनिर्वचनीयतया च भवता स्वीकरणात् । तथारूपतया तेषामस्वीकरणे वा तद्दृष्टान्तबलेनैव विवक्षितप्रपञ्चस्यापि सद्रूपत्वं सत्यत्वं निर्वचनीयत्वं च प्रसज्यमानं केन वार्येत। विशेषाभावात्। तथैतान्यनुमानानि प्रपञ्चाद्भिन्नान्यभिन्नानि वा । भिन्नान्यपि सत्यान्यसत्यानि वा प्रपञ्चाभ्योऽपि धर्म्मी प्रसिद्धोऽप्रसिद्धो वेत्यादि सर्वमत्रापि प्राग्वत् कुशाग्रीयमतिना चिन्तनीयमिति ।

तस्मात् ब्रह्म ब्रह्मवादिन्निदानीं मूलादेव क्षिप्तमेतत्त्वदुक्तम् ।
यन्निःशेषा युक्तिवीथी त्वदीया शान्तिं नीता कीर्त्तिता च स्वकीया।२२५॥

एवं च—

ज्ञानाद्वैतं निरस्तं तदनु विदलितश्चित्रविज्ञानवादः
शून्यं निर्लूनमस्याप्युपरि परिहताऽनन्तरं ब्रह्मवार्त्ता ।
तस्मादुद्दामयुक्तिव्यतिकरकलितस्तत्र यल्लोकयात्रा
स्तम्भादिस्तात्त्विकोऽयं जयति भुवि परध्वानवाच्यःपदार्थः।२२६॥१६॥

इदानीं प्राक्प्रतिज्ञानं स्वव्यवसायित्वं ज्ञानविशेषणं व्याख्यानयन्नाह—

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनं बाह्यस्येव तदाभिमुख्येन करिकलभकमहमात्मना जानामीति इति ॥ १७ ॥

स्वस्य प्रमाणत्वेनाभिमतस्य ज्ञानस्वरूपस्य सम्बन्धी व्यवसायः । क उच्यत इत्याह । स्वस्य विज्ञानस्वरूपस्याभिमुख्यमुन्मुख्यता स्वाभिमुख्यं तेन स्वाभिमुख्येन स्वानुभवनेन प्रकाशनं प्रतिभासनं यत्स इति । स्वव्यवसायसमर्थनार्थं बाह्यार्थव्यवसायं स्वपरप्रसिद्धं बाह्यस्येवेत्यादिना दृष्टान्तीकरोति । यथा बाह्याभिमुख्येन प्रकाशनं बाह्यव्यवसायो ज्ञानस्य तथा स्वाभिमुख्येन प्रकाशनं स्वस्य व्यवसायः । उल्लेखमाह । करिकलभकमिति प्रमेयस्य अहमिति प्रमातुर्ज्ञानामीति प्रमितेः प्रतिभासस्तथात्मनेति प्रमाणाभिमतज्ञानस्यापि । इदमत्र हृदयम् । ज्ञानान्तरानपेक्षं यत्स्वरूपप्रकाशनं तदिह स्वव्यवसायित्वं वादिप्रतिवादिभ्यां ज्ञानस्याभिमतं परव्यवसायित्वान्यथानुपपत्तेः ।

ज्ञाने स्वव्यवसायित्वप्रसाधकमनुमानमुपदर्शितं तत्र दूषणोद्धारः ।

तथाहि ज्ञानं स्वव्यवसायि परव्यवसायित्वात् यत्तु स्वव्यवसायि न भवति न तत्परव्यवसायि यथा स्तम्भादि परव्यवसायि च ज्ञानं ततः स्वव्यवसायीति । न तावदत्र हेतुरसिद्धः । परव्यवसायित्वस्य ज्ञाने वादिप्रतिवादिभ्यां प्रतिपन्नत्वात् । नापि स्वरूपमात्रव्यवसायव्यावृत्ते सुखादिज्ञाने परव्यवसायित्वाभावान्निखिलपक्षाव्यापकतया भागासिद्धोऽयं हेतुरिति शङ्कनीयम् । सुखादिसंवेदनस्यापि स्वस्मात्पृथग्भूतस्य सुखादेः परिच्छेदकत्वात्परव्यवसायित्वसिद्धेः । न च कुम्भादिवेदनस्यापि सर्वथा स्वपृथग्भूतार्थपरिच्छेदकत्वम् । सत्त्वप्रमेयत्ववस्तुत्वादिरूपेण कुम्भादेः संवेदनाभेदप्रतीतेः । अन्यथा तस्यासत्त्वप्रसक्तेः । कथञ्चित् पृथग्भूतत्वं तु सुखादिसंवेदनात्सुखादेरपि प्रतीयत एव । सुखादितत्संवेदनयोः कारणादिभेदव्यवस्थितेः । यथा च तयोः कारणादिभेदः सम्भवति तथाऽधस्तादेव चित्रविज्ञानवादविचारे विवेचितम्। नन्वेवं कुम्भादिज्ञानवत्सुखादिज्ञानस्यापि बहिर्भूतार्थपरिच्छेदकत्वात्ताभ्यामन्यस्य च विज्ञानस्यासम्भवात्किं स्वस्य संवेदकं ज्ञानं स्या-

१ 'भेदात्' इत्यधिकं प. पुस्तके ।

दिति चेत् । न । तस्यैव कुम्भादिमुखादिज्ञानस्य स्वरूपसंवेदकस्य सतः परसंवेदकत्वोपगमात् स्वसंवेदनसिद्धेः । स्वपरव्यवसायकत्वान्निखिलवेदनस्य ततः मुखादिज्ञानस्यापि परव्यवसायित्वसिद्धेर्नायं भागासिद्धो हेतुः । नाप्यनैकान्तिकः । स्तम्भादेर्विपक्षात् स्वसाध्यव्यावृत्तौ परव्यवसायित्वहेतोरप्यत्यन्तं व्यावृत्तत्वात् । विरुद्धोऽपि नासौ साध्यविपर्ययान्यथानुपपन्नत्वं हि तल्लक्षणं न चात्र तदस्तीति ॥१७।

स्वव्यवसायित्वमेव ज्ञानस्य स्पष्टदृष्टान्तोपदर्शनेन सावष्टम्भं समर्थयमानः प्राह—

कः खलु ज्ञानस्यालम्बनं बाह्यं प्रतिभातमभिमन्यमानस्तदपि तत्प्रकारं नाभिमन्येत मिहिरालोकवदिति ॥ १८ ॥

कः खलु लौकिकः परीक्षको वा । ज्ञानस्यालम्बनं गोचरम् । बाह्यं ज्ञानाद्बहिर्भूतम् । प्रतिभातं परिस्फुरितं प्रकटीभूतमिति यावत् । अभिमन्यमानः स्वीकुर्वाणः । तदपि ज्ञानमपि । स प्रतिभातत्वलक्षणः प्रकारः प्रतिनियतं स्वरूपं यस्य तत्तत्प्रकारं प्रतिभातमित्यर्थः । नाभिमन्येत किं तर्हि प्रतीतिमनुसरन्नभिमन्येतैव । किमिवेत्याह । मिहिरालोकवत् मार्त्तण्डालोकमिव । यथैव हि गिरिनगरगहनादिकं मिहिरालोकस्य विषयं प्रतिभातमभिमन्यमानैर्मीमांसकैर्ज्ञानमपि प्रतिभातं स्वीकर्त्तव्यमित्यर्थः ।

अत्राहुर्जैमिनीयाः ।

जैमिनीयमतस्योपपादनपूर्वकं खण्डनम् ।

अये भवानत्र यथा कथञ्चित्
स्वमन्दिरे गायतु मङ्गलानि ॥
विचार्यमाणं तु न वेदनस्य
स्वसंविदात्मत्वमुपैति युक्तिम् ॥ २२७ ॥

१ प्रतिभातमभिमन्यमानैर्मिहिरालोकोऽपि प्रतिभातोऽभिमन्यते लौकिकपरीक्षकैस्तद्ज्ञानस्य विषयं प्रतिभात इत्यादि कुम्भादिकं ' इत्यधिकं चिह्नान्तर्गतं म. पुस्तके ।

कर्मत्वेनाप्रतीयमाने हि तस्मिन्परोक्षत्वमेवोपपद्यते । तथाहि ज्ञानं परोक्षं कर्मत्वेनाप्रतीयमानत्वात् । न खलु स्तम्भादिभाववत्कर्म्मत्वेन ज्ञानं स्वमेऽपि प्रतिभासते । प्रतिभासने वा करणात्मनो ज्ञानान्तरस्य परिकल्पना प्रसज्येत । तस्यापि प्रत्यक्षत्वे करणात्मकं ज्ञानान्तरं परिकल्पनीयमित्यनवस्था दुर्निवारा स्यात् । तस्याप्रत्यक्षत्वेऽपि करणत्वे प्रथमज्ञाने किं दुश्चरितमालोचितं चेतस्विना । येनास्य परोक्षत्वे करणत्वं नानुमन्यते । तस्मादेतद्दोषसंश्लेषमनभिलषता ज्ञानस्य स्वव्यवसायित्वमुपेक्ष्य प्रतीत्यनुल्लङ्घनेन परोक्षरूपतैव स्वीकर्त्तव्या । इन्द्रियार्थसंप्रयोगादिसामग्रीतो हि क्रियास्वभावमात्मनि ज्ञानमुपजायमानं नित्यपरोक्षरूपमेवोपजायत इति ।

मीमांसकैरेवमवादि बुद्धि–पारोक्ष्यसिद्धावनुमाप्रमाणम् ॥
एषा च दोषैर्व्यभिचारमुख्यैः कलङ्किता भाति यतीश्वराणाम् ॥२२८॥

तथा ह्यस्यामनुमायां कर्म्मत्वेनाप्रतीयमानत्वाख्यस्य हेतोरात्मना प्रमाणफलेन च व्यभिचारित्वं तावत्कर्म्मत्वेनाननुभूयमानयोरप्यनयोः प्रत्यक्षत्वेनाङ्गीकरणात् । यदि पुनरेतयोः कर्म्मत्वेनाननुभूयमानयोरपि कर्त्तृत्वेन प्रमाणफलत्वेन वानुभूयमानत्वात् प्रत्यक्षत्वमनुमन्यते । तर्हि प्रमाणत्वेनाभिमतस्य ज्ञानस्य कर्म्मत्वेनाननुभूयमानस्यापि करणत्वेनानुभूयमानत्वात्प्रत्यक्षत्वमनुमन्यतां विशेषाभावात् । अथ करणत्वेनानुभूयमानं ज्ञानं करणमेव स्यान्न प्रत्यक्षम् । तर्हि कर्तृप्रमाणफलरूपतयानुभूयमानयोरात्मप्रमाणफलयोः कर्तृप्रमाणफलरूपतैव स्यान्न प्रत्यक्षत्वमित्यप्यस्तु । तुल्याक्षेपसमाधानत्वात् । अपि चात्मनः प्रत्यक्षत्वे परोक्षज्ञानकल्पनायाः किं फलम् । आत्मन एव स्वरूपवद्बाह्यार्थग्राहकत्वप्रसिद्धेः । अथ कर्त्तुः करणमन्तरेण क्रियायां व्यापारासम्भवात्करणभूतपरोक्षज्ञानकल्पना न निष्फलेत्युच्यते । तदप्यसाधीयः । मनसश्चक्षुरादेश्चान्तर्बहिःकरणस्य सद्भावात्ताभ्यां ज्ञानस्य परोक्षत्वेन विशेषाभावाच्च । अथ मनश्चक्षुरादिकायादेर-

चेतनत्वात् ज्ञानाख्यं करणं चेतनत्वेन ताभ्यां विशिष्यत इत्युच्यते । तदप्यनुपपन्नम् । भावरूपयोरिन्द्रियमनसोरपि चेतनत्वात् । तत्परोक्षत्वसाधने च सिद्धसाधनम् । स्वार्थग्रहणशक्तिलक्षणाया भावेन्द्रियमनःस्वभावाया लब्धेरर्वाग्दर्शिनामप्रत्यक्षत्वात् । उपयोगलक्षणं तु भावकरणमप्रत्यक्षं न जातुचिद्भवति । स्वार्थग्रहणव्यापारलक्षणस्यास्य स्वसंवेदनप्रत्यक्षप्रसिद्धत्वात् । चक्षुरादिद्वारेणोपयुक्तोऽहं घटं पश्यामीत्युपयोगस्वरूपसंवेदनस्य सर्वेषामपि प्रसिद्धत्वात् । क्रियायाः करणाविनाभावित्वे वात्मनः स्वसंवित्तौ किं करणं स्यात् । स्वात्मैवेति, तदर्थेऽपि स एवास्तु किमदृष्टान्यकल्पनया । स्वात्मनः करणतायामात्मनः शाश्वतत्वाच्छश्वदर्थप्रकाशानुषङ्ग इति चेत् । तत एव तस्य स्वसंवेदनं कुतो न शाश्वतम् । तस्य तद्धर्मत्वादिति चेत्, बहिरर्थप्रकाशनमपि तत एव शाश्वतं माभूत् । कथं तर्हि शाश्वतयोरात्मज्ञानयोर्धर्म्मधर्म्मिभावः पुरुषस्वसंवेदनयोरपि भेदोपगमादिति चेत् इतरत्रापि तुल्यमेतत् । सर्वत्र धर्म्मधर्म्मिणोर्भेदाभेदात्मकतायामविवादात् । स्वसंवेदनमपि पुरुषस्य शाश्वतमिति चेत् । न । श्रोत्रियमतव्याघाताद्देशादिप्रतिनियमानुपपत्तेश्च । यदि पुनरभिव्यञ्जकप्रत्ययवशात्तदभिव्यक्तिप्रतिनियमस्तदा पुरुषस्य शाश्वतार्थप्रकाशनप्रतिनियमोऽपि तथैव स्यात् । किं चैवं सति न किंचिदनित्यमसर्वगतं वा नाम स्यात् । अभिव्यञ्जकवशादेव सर्वस्य देशादिनियमोपपत्तेर्यतः कपिलमतसिद्धिर्न भवेदिति स्वपरप्रकाशके पुरुषे सत्यपार्थकं परोक्षज्ञानपरिकल्पनम् । परोक्षेण चक्षुरादिनैव प्रयोजनसिद्धेस्ततश्चक्षुरादिभ्यो विशेषमिच्छता करणज्ञानस्य कर्म्मत्वेनाप्रतीयमानस्यापि प्रत्यक्षत्वमङ्गीकर्त्तव्यम् । किं चात्मप्रमाणफलाभ्यां सकाशात्करणज्ञानस्य सर्वथा भेदः कथंचिद्वा । न तावत् सर्वथा । मतान्तरप्रसक्तेः । न खलु धर्मधर्मिणोर्भेदवन्मतेऽपि सर्वथा भेदोऽभ्युपेयते । अथ कथंचिद्भेदः । तर्हि न करणज्ञानस्यैकान्तेनाप्रत्यक्षत्वम् । प्रत्यक्षस्वभावाभ्यामात्मप्रमाणफलाभ्यामभिन्नस्य तस्यैकान्ततोऽप्रत्यक्षत्वावि-

रोधात् । अपि च समस्तप्रमाणापेक्षया ज्ञानस्य कर्मत्वेनाप्रतीयमानत्वं हेतुत्वेनाभिमतं स्वरूपापेक्षया वा । यदि समस्तप्रमाणापेक्षया, तदा सत्त्वमपि ज्ञानस्य दुःप्रापं स्यात् । तथाहि यत् समस्तप्रमाणापेक्षया कर्म न भवति न तत्सद्व्यवहारसरणिमनुसरति यथा तुरङ्गशृङ्गं समस्तप्रमाणापेक्षया न भवति च कर्म ज्ञानमिति । एवं ज्ञेयेऽपि कः समाश्वासः स्यात् ज्ञाननिबन्धनत्वात् ज्ञेयव्यवस्थितेरित्यनभिलषतोऽपि निखिलशून्यतावादः समायात इति साधुसाधितं बुद्धेः पारोक्ष्यं श्रोत्रियेण । अथ शून्यतापक्षो न क्षोदं क्षमेत् । तर्हि ज्ञानस्याप्रत्यक्षत्वेऽपि प्रमाणान्तरात् प्रतीतिरवश्यमङ्गीकर्त्तव्येति समस्तप्रमाणापेक्षया कर्मत्वेनाप्रतीयमानत्वादित्यस्य हेतोरसिद्धत्वम् । अथ स्वरूपापेक्षया कर्मत्वेनाप्रतीयमानत्वम् । तदप्यनुभवेन प्रतिहन्यमानत्वादनुचितम् । सकलजगत्प्रतीतौ हि स्तम्भग्राहिज्ञानं ततोऽहमनुभवामीत्यनुभवस्तस्माच्च प्रसिद्धं ज्ञाने स्वरूपापेक्षया कर्मत्वं कथं नामापह्नोतुं शक्यते । ततश्च स्वरूपापेक्षया कर्मत्वेनाप्रतीयमानत्वादित्यत्रापि पक्षे हेतोरसिद्धत्वमेव दोषः । एतेन प्रतिभासने वा करणात्मनोर्ज्ञानान्तरस्येत्यादिना याऽनवस्थोक्ता सापि प्रत्युक्ता । स्वरूपापेक्षयैव ज्ञाने कर्मत्वप्रतिभासस्य समर्थितत्वात् । किं च प्रतीतिसिद्धमपि ज्ञाने प्रत्यक्षत्वं कर्मत्वं च यद्यपलप्यते तथार्थेऽपि प्रत्यक्षत्वकर्मत्वयोः कः समाश्वास इति कथमर्थस्य व्यतिरेकदृष्टान्तत्वेनोपादानं स्यात् । प्रसङ्गविपर्ययाभ्यां च ज्ञानस्य प्रत्यक्षत्वं प्रतीयते । तथाहि यत्परोक्षं न तत्स्वोपधानेनाप्युपलभ्यमति यथेन्द्रियम् । परोक्षं च भवद्भिः परिकल्पितं ज्ञानमिति प्रसङ्गः । विपर्ययस्तु यत्स्वाकारोपहितमाकारान्तरमुपलभ्यमति तत्परोक्षं न भवति प्रत्यक्षं वा भवति यथा प्रदीपाद्यालोकः । उपलभ्यमति च ज्ञानं स्वाकारोपहितं नीलादिकमिति । एवं च ।

---

१ ' उररीकर्त्तव्या ' इति प. पुस्तके पाठः । २ ' तदा ' इति प. म. पुस्तकयोः पाठः । ३ ' प्रत्यक्षं वा भवति ' इति प. पुस्तके नास्ति ।

आत्मप्रतीतिं परिमुच्य जातु वस्तुप्रतीतिर्न समस्ति बुद्धया ॥
त्यजन्निदं वल्गु विचारतत्त्वं नाङ्गैव मीमांसक एष वादी ॥ २२९ ॥

अपि च ज्ञानस्य स्वसंवेदनप्रत्यक्षाविषयत्वे कुतस्तत्सत्ता प्रतीयेत । प्रत्यक्षान्तरादनुमानादर्थापत्तेर्वा । न तावत्प्रत्यक्षान्तरात्, कणभक्षाक्षपादपक्षकक्षीकारानुषङ्गात् । नाप्यनुमानात्, यतस्तत्र लिङ्गं चक्षुरादीन्द्रियमर्थस्तदतिशयस्तत्सम्बन्धस्तत्र प्रवृत्तिर्वा स्यात् । यदि चक्षुरादीन्द्रियम्, तर्हि तदपि निर्विशिष्टं विशिष्टं वा ज्ञानस्य गमकं भवेत् । यदि निर्विशिष्टम्, तदा सुप्तमत्तमूर्च्छितान्यत्रगतचित्तावस्थास्वपि ज्ञानं तद्गमयेत्तत्सत्तायास्तत्राप्यविशेषात् । अथ विशिष्टम्, ननु केन विशेषणेन विशिष्टत्वमिन्द्रियस्य, किमनावरणत्वेन प्रगुणमनःसहकृतत्वेन वा । न तावदनावरणत्वेन, तस्य प्रत्यक्षतः प्रत्येतुमशक्यत्वादप्रतीतस्य च हेतुविशेषणत्वे विशेषणासिद्धो हेतुः स्यात् । अथ विषयपरिच्छित्याऽनावरणेन्द्रियसिद्धिः । तर्हि परस्पराश्रयः । तथाहि विषयपरिच्छित्तिर्ज्ञानं तत्सिद्धावनावरणत्वविशेषणविशिष्टमिन्द्रियं सिद्ध्यति तथाभूतेन्द्रियसिद्धौ च विषयपरिच्छित्तिः सिद्ध्यतीति । एतेन च प्रगुणमनःसहकृतत्वमपीन्द्रियविशेषणं दूषितम् । मनसोऽतीन्द्रियस्य प्रगुणत्वधर्मोपेतस्य विषयपरिच्छित्तिं परित्यज्यान्यतः प्रत्येतुमशक्यत्वाविशेषात्तत्र च परस्पराश्रयदोषप्रसङ्गात् । अथार्थो बुद्धेर्लिङ्गम् । सोऽपि सत्तामात्रेण तत्स्याज्ज्ञातत्वविशेषणविशिष्टो वा । न तावदाद्यः पक्षः । तथाभूतस्यार्थस्य बुद्ध्यव्यभिचारित्वाभावात् । न वै यत्र यदा सत्तामात्रसमर्थस्य तत्र तस्माद्बुद्धिरनुमातुं शक्यते । तां विनाप्यर्थस्य सम्भवतस्तया सहान्यथानुपपत्तेरभावात् । यदि च सत्तामात्रेणार्थस्यानुमापकत्वमिष्यते । तदा सर्वार्थसत्तायाः सर्वपुरुषान्मत्यविशिष्टत्वात्सर्वबुद्ध्यनुमानं स्यात् । अथ ज्ञानत्वविशेषणविशिष्ट इति द्वितीयः पक्षः, नं तत्रापि ज्ञानत्वेन ज्ञातो-

---

१ मीमांसकपदेन पूज्यविचारकारित्वं बोध्यते । अत्र तु पूज्यविचारकारित्वाभावात् अयथार्थं मीमांसक इति नाम । २ ' तदा ' इत्यधिकं प. म. पुस्तकयोः पाठः । ३ ' ज्ञातत्वेन ' इति प. म. पुस्तकयोः पाठः ।

ऽज्ञातो वाऽर्थो बुद्धेर्गमकः स्यात् । अज्ञातस्य तद्गमकत्वे सर्वं सर्वस्य गमकं स्यादविशेषात् । अथ ज्ञातः, किं तत एव गम्यज्ञानात् ज्ञानान्तराद्वा । तत एव चेत्, तर्हि परस्पराश्रयः । सिद्धे हि ज्ञातत्वविशिष्टेऽर्थे ततो ज्ञानसिद्धिस्तत्सिद्धौ चार्थस्य ज्ञातत्वसिद्धिरिति । अथ ज्ञानान्तराज्ज्ञातत्वज्ञप्तिः तर्ह्यनवस्था । अथार्थातिशयो लिङ्गम् । ननु कोऽयमर्थस्यातिशयो नाम । प्राकट्यमिति चेत् ।

अहो चिराय प्रकटीचकार मीमांसकः स्वीयरहस्यमेतत् ॥
विचारचूलामवलम्बमानं विलोकयन्त्वेतदपीह सन्तः ॥ २३० ॥

प्राकट्यं हि ज्ञानं प्रकाशतामात्रं वा स्यात् । यदि ज्ञानम्, तदा तस्यासिद्धत्वात् कथं लिङ्गत्वम्, । न च स्वरूपसिद्धौ स्वरूपस्यैव लिङ्गत्वं क्वापि प्रतिपन्नं येनात्रापि तथा कल्प्येत । अथ प्रकाशतामात्रं प्राकट्यम्, तत्किं सर्वप्रमातॄणां साधारणमसाधारणं वा । यदि साधारणं, तदा सर्वदा सर्वान्प्रत्ययमविशेषेणैवार्थः प्रतिभासेत न तु कदाचित्कंचन प्रति । प्रकाशतामात्रस्य सर्वान्प्रत्यविशिष्टत्वात् । अथासाधारणम्, ततश्चायमर्थः सम्पन्नो यस्येन्द्रियेणोपकृतोऽसाधारणप्रकाशतास्व्यातिशयवानर्थः सम्पन्नस्तस्यैव प्रतिभासते नापरेषामिति । तदप्ययुक्तम् । न हि नीलपीताद्यर्थधर्म्यो यैनैव जन्यते तस्यैव तद्विशिष्टोऽर्थः प्रतिभासत इति नियमो दृश्यते । अपि चेयं प्रकाशताऽर्थादव्यतिरिक्ता व्यतिरिक्ता वा भवेत् । यद्यव्यतिरिक्ता, तदार्थ एव सा । अर्थस्य च सदा सत्त्वात्प्रकाशतया अपि सदा सत्त्वापत्तेः समस्तं विश्वं सदा सर्वज्ञमकिंचिज्ञं वा भवेत् । अथ व्यतिरिक्ता, तदेवमर्थेन सम्बद्धा वा स्यादसम्बद्धा वा । यद्यसम्बद्धा, कथमर्थस्येयमिति व्यपदिश्येत । अथ सम्बद्धा, किं तादात्म्येन तदुत्पत्त्या संयोगेन वा । न तावत्तादात्म्येन, व्यतिरेकविकल्पस्वीकृतत्वात् । नापि तदुत्पत्त्या, यतोऽर्थात्किं प्रकाशतोत्पद्यते ततो वाऽर्थः । न तावदर्थात्प्रकाशतोत्पद्यते ।

१ 'प्रकाशताया' इति म. पुस्तके पाठः ।

ज्ञानात्तदुत्पत्तिप्रतिज्ञानात्। नापि प्रकाशतायाः सकाशादर्थः समुत्पद्यते स्वसामग्रीतः प्रकाशतायाः पूर्वमप्यर्थस्योत्पन्नत्वात्। नापि संयोगेन प्रकाशताऽर्थेन सम्बद्धा। तस्य द्रव्यवृत्तित्वेनाद्रव्यरूपायां प्रकाशतायां सम्भवाभावात्। भवतु वा केनचित्सम्बन्धेन सम्बद्धाऽसौ, तथाप्यर्थ-
५ मात्रेणैषा सम्बद्धाऽर्थविशेषेण वा। अर्थमात्रेण सम्बन्धे स एवाशेषस्य जगतोऽशेषज्ञत्वम्यार्किंचिज्ज्ञत्वस्य वा प्रसङ्गः। घटस्यासीदत्र प्रकाशता इदानीं तु पटस्येति नियतदेशकालविशिष्टे प्रतिनियतेऽर्थे तद्व्यपदेशाभावश्च स्यात्। अथार्थविशेषेण, ननु कोऽयमर्थस्य विशेषो ज्ञानं प्रति जनकत्वं, आलम्बनत्वं वा। तत्रापि आद्यविकल्पोऽनुपपन्नः,
१० ज्ञानजनकत्वादर्थेन सह प्रकाशतायाः सम्बन्धे चक्षुरादिनापि सह सम्बन्धप्रसङ्गात्। द्वितीयविकल्पे परस्पराश्रयः, अर्थस्यालम्बनत्वसिद्धौ हि प्रकाशनाया अर्थविशेषेण सम्बन्धसिद्धिस्तत्सिद्धौ चार्थस्यालम्बनत्वसिद्धिरिति। तन्नार्थातिशयोऽपि ज्ञानस्य लिङ्गम्। नाप्यर्थसम्बन्धः। तस्य सम्बन्धिज्ञानपूर्वकत्वात्सम्बन्धिनौ चात्रेन्द्रियार्थौ ज्ञानार्थवति-
१५ शयार्थौ वा न ज्ञातुं शक्येते। यथा चैषां ज्ञातुमशक्तिस्तथाऽनन्तरमेवोक्तम्। अथ प्रवृत्त्या ज्ञानमनुमीयते, तर्हि निवर्त्तकस्य ज्ञानस्य कथं प्रतिपत्तिः स्यात्। प्रवृत्त्या हि प्रवर्त्तकमेव ज्ञानमनुमीयते न निवर्त्तकम्। अथ प्रवृत्तिनिवृत्तिभ्यां ज्ञानमुपकल्प्यते तर्हि तयोरभावे उदासीनस्योपेक्षणीयार्थविज्ञानं कथं कल्प्येत। तदित्थं ज्ञानेन सहा-
२० न्यथानुपपन्नस्य कस्याचिल्लिङ्गस्यासम्भवान्नानुमानादपि तत्सत्ताप्रतीतिः। अथार्थापत्तेः। तथाहि। अर्थप्राकट्याख्यफलमन्यथानुपपद्यमानं आत्मन्यहंप्रत्ययग्राह्ये नित्यपरोक्षं क्रियारूपं ज्ञानमुपकल्पयति। प्रवृत्तिरप्यन्यथानुपपद्यमाना तत्परिकल्पयति। अज्ञाते प्रवृत्तिविषये प्रवृत्त्यनुपपत्तेः। न हीष्टसाधनोऽप्यर्थः स्वविषयं ज्ञानं विना स्वरूपणैव प्रवृत्ति-
२५ हेतुः। सर्वदा तत्प्रसक्तेः। न चैवमतः कादाचित्कत्वात्

---

१ 'प्रतिनियत' इति प. पुस्तके पाठः।

प्रवृत्तेरर्थातिरिक्तं किंचित्कारणमस्तीत्यवसीयते । यस्मिन् सत्यर्थः प्रवृत्तियोग्यतामापद्यते तज्ज्ञानमिति । तदुक्तं **शबरस्वामिना** । **" अप्रत्यक्षा नो बुद्धिः प्रत्यक्षोऽर्थः स हि बहिर्देशसम्बद्धः प्रत्यक्षमनुभूयते ज्ञानं त्वनुमानादवगच्छति "** इति । अनुमानादिति अर्थापत्तेरित्यर्थः । नैतदपि न्याय्यम् । अनुमानात्पृथग्भूताया अर्थापत्तेरसम्भवादनुमानस्य चार्थप्राकट्यादेः प्रतिहतत्वात् । अपि च ज्ञानमुपजायमानं स्वानुभवेऽननुभवाद्यावृत्तं संवेद्यते अर्थश्चास्य विषयभावमापन्न एव संवेद्यते । अर्थमहं वेद्मीति प्रतीतेः । नित्यानुमेयत्वे च ज्ञानस्य द्वयमप्येतद्रूपपादम् । अर्थो हि प्रकाशमानः सर्वान्प्रति साधारण इति ज्ञानस्य परोक्षत्वे मम प्रकाशत इति निर्निमित्ता व्यवस्थितिरिति ।

तन्मीमांसक युक्तियुक्तमधुना स्वस्यावसायं धियः
किं न स्वीकुरुषे न मुञ्चसि किमित्यद्यापि पक्षं निजम् ॥
यस्मान्न्यायपथानुगस्य भवतः स्वान्तं निशान्तं मते
दुःपक्षप्रभवानुरागतमसा क्षुद्रेण किं बाध्यते ॥ २३१ ॥

इत्थं निराकुर्म्महि **जैमिनीयान्**परोक्षविज्ञानकथावलितान् ॥
ज्ञानान्तराध्यक्षमुशन्ति येऽथ संवेदनं तन्मऽमुत्क्षिपामः ॥२३२॥

एवं हि **यौगाः** संगिरन्ते । ज्ञानं ज्ञानान्तरवेद्यं वेद्यत्वाद्यद्वेद्यं तज्ज्ञानान्तरवेद्यं यथा घटो वेद्यं च ज्ञानं तस्मात् ज्ञानान्तरवेद्यमिति । न तावदत्र हेतुरसिद्धः । साध्यधर्मिणि विद्यमानत्वात् । नापि विरुद्धः । सपक्षे वर्त्तमानत्वात् । नाप्यनैकान्तिकः, विपक्षादत्यन्तं व्यावृत्तत्वात् । न च स्वसंविदिततया विपक्षीभूतेऽपि त्रिलोचनज्ञाने वर्त्तमानत्वादनैकान्तिकत्वम् । अस्मदादिज्ञानापेक्षया ज्ञानस्य ज्ञानान्तर-

नैयायिकमतस्योपपादनपूर्वकं खण्डनम् ।

१ एतदर्थकं मीमांसासू. शा. भाष्ये. पृ. ७ पं. १९ ।

वेद्यत्वप्रतिज्ञानात्। त्रिलोचनज्ञानस्य चास्मदादिज्ञानादतिशयोपेतत्वात्। न चातिशयोपेते प्रतीतं धर्ममतिशयापेतेऽपि प्रेरयन् परीक्षकतामास्कन्दति। समस्तार्थग्राहित्वस्यापि सकलज्ञानानां त्रिलोचनवत्प्रसक्तेः। नापि कालात्ययापदिष्टः, प्रत्यक्षागमाभ्यामनिराकृतगोचरत्वात्। ननु स्वव्यवसायिस्वरूपमर्थज्ञानं स्वसंवेदनप्रत्यक्षेणैवानुभूयते अतः प्रत्यक्षविक्षिप्तपक्षनिर्देशानन्तरोपन्यस्तत्वेन कालात्ययापदिष्टतालिङ्गित एवायं हेतुरिति चेत्, तदनुचितम्। ज्ञानस्य स्वव्यवसायिस्वरूपत्वानुपपत्तेः। अर्थव्यवसायिस्वरूपत्वेनैव तस्यावस्थानात्। "अर्थग्रहणं बुद्धिश्चेतना" इत्यभिधानात्, ग्रहणं पुनरस्य तद्गोचरतयोत्पन्नेनैकात्मसमवेतानन्तरज्ञानेन मानसाध्यक्षरूपेण। नन्वेवमर्थज्ञानतद्गोचरानन्तरज्ञानयोः क्रमेणोत्पन्नयोस्तथैवानुभवः किं न भवतीति चेत्। नैतद्वचनीयम्। अनयोः क्रमसमुत्पादेऽप्याशुवृत्तेः शतपत्रपत्रशतव्यतिभेदवद्योगपद्याभिमानतः पार्थक्याननुभूतिसम्भवात्। अथार्थज्ञानस्य ज्ञानान्तरप्रत्यक्षतायां ज्ञानान्तरस्याप्यपरज्ञानप्रत्यक्षताप्रसक्तेर्दुर्निवारास्यानवस्थेति चेत्, एतदप्यप्रातीतिकम्। अर्थज्ञानस्य द्वितीयेन ज्ञानेन ग्रहणादर्थसिद्धेरपरज्ञानकल्पनानर्थक्येनानवस्थित्यभावात्। अर्थजिज्ञासायां ह्यर्थज्ञानमुपजायते ज्ञानजिज्ञासायां तु ज्ञाने। सा च ज्ञानजिज्ञासार्थज्ञानं यावद्भवतीति द्वितीयज्ञानोत्पत्त्यैव कृतार्थयति प्रमातारमित्यलं तृतीयादिज्ञानकल्पनया। तन्न कालात्ययापदिष्टताश्लिष्टता-श्लिष्टमूर्त्तिरसौ हेतुः। नापि प्रकरणसमः। असम्भवत्परिपन्थिसाधनत्वात्। यस्य हि संशयबीजभूतं पक्षान्तरचिन्ताप्रवर्त्तकं साधनान्तरं सम्भवति स एव हेतुः प्रकरणसमः। न चात्र तदस्ति। अथ ज्ञानं स्वप्रकाशात्मकमर्थप्रकाशात्मकत्वात्प्रदीपवदित्येवंविधे परिपन्थिनि साधने जागरूके सति कथमिदमभिधीयतेऽसम्भवत्परिपन्थिसाधनत्वान्न प्रकरणसम इति चेत्। मैवम्। विचारभारासहत्वेनास्य साधनाभास-

१ 'कथम्' इति प. पुस्तके पाठः। २ 'श्लिष्टता' इति नास्ति प. पुस्तके

त्वात् । तथा हि स्वप्रकाशात्मकमित्यत्र किं स्वेनात्मनैव स्वस्य प्रकाशः स्वप्रकाशः स्वकीयेन वा । प्रथमपक्षे पक्षस्य प्रत्यक्षबाधितत्वं दोषः । अर्थग्रहणस्वभावस्यैव संवेदनस्य मानसप्रत्यक्षेण प्रतीतेः । हेतोश्च कालात्ययापदिष्टता प्रत्यक्षबाधितपक्षत्वात् । स्वात्मनि क्रियाविरोधाच्च नायं पक्षः सम्भवी । न हि सुतीक्ष्णोऽपि कौक्षेयकः[1] कदाचिदात्मानं विदारयति । न च विचित्रचारीसंचारचतुरापि नर्त्तकी निजस्कन्धमधिरोढुं प्रभवति । द्वितीयपक्षे पुनः सिद्धसाद्धयता । स्वकीयेनानन्तरोत्तरज्ञानेन प्राचीनज्ञानस्य प्रकाशस्वीकरणात् । किं च प्रकाशात्मकत्वं बोधरूपत्वं भासुररूपसम्बन्धित्वं वा भवेत् । आद्यपक्षे साध्यविकलत्वमुदाहरणस्यादृष्टान्ततयोपदिष्टे प्रदीपे बोधरूपत्वस्याभावात् । द्वितीयपक्षे तु पक्षस्य पुनरपि प्रत्यक्षबाधा । बोधात्मकत्वेन भासुररूपरहितस्यैव ज्ञानस्य प्रत्यक्षतः प्रतीतेः । तदेवं स्वप्रकाशात्मकत्वसाधनस्य विचार्यमाणस्यानुपपत्तेर्नानेन प्रकरणसमत्वम् ।

एवं समस्तदूषणकण्टकनिकरेण मुक्तमुक्तमिदम् ।
विदुषां सदस्सु नूनं साधनमुपनयति निजसाध्यम् ॥ २३३ ॥

अपि च स्वप्रकाशात्मकज्ञानवादिनः पर्यनुयुज्यन्ते । किं येनैव स्वभावेन ज्ञानं स्वरूपं प्रकाशयति तेनैवार्थमपि स्वभावान्तरेण वा । यदि तेनैव, तर्हि कथं ज्ञानार्थयोः पार्थक्यं स्यादभिन्नस्वभावज्ञानग्राह्यत्वात्तयोरेवान्यतरस्वरूपवत् । अथ स्वभावान्तरेण, तदा तौ स्वभावौ ज्ञानादभिन्नौ भिन्नौ वा । यद्यभिन्नौ, तदा ज्ञानमेव स्यान्न स्वभावौ । तयोरत्रैवानुप्रवेशात् । तथा च कथं ज्ञानं स्वार्थयोः प्रकाशकं स्यात्। अथ भिन्नौ, तत्रापि किं तौ स्वप्रकाशौ स्वाश्रयभूतज्ञानप्रकाशौ वा । प्रथमपक्षे स्वप्रकाशज्ञानत्रितयापत्तिः । तथा च ज्ञानवत्तत्स्वभावयोरपि प्रत्येकं स्वपरप्रकाशत्वे स एव पर्यनुयोगोऽनवस्था च । अथ स्वाश्रयभूतज्ञानप्रकाश्यौ तौ तर्हि स्वाश्रयभूतस्य ज्ञानस्य स्वपरप्रकाशे कर्तव्ये

[1] कौक्षेयकः खड्गः ।

हेतुभूतयोस्तयोर्यदि ज्ञानं तथाविधेनापरस्वभावद्वयेन प्रकाशकं तदानवस्था । स्वपरप्रकाशहेतुभूतस्वभावद्वयाप्रकाशत्वे वा ज्ञानस्य प्रमाणत्वायोगः । स्वस्वभावाप्रकाशकस्य कुम्भादिवत् अप्रमाणत्वेन भवद्भिरभ्युपगमात् । एवं च ।

एकप्रमातृसमवेतधियाधिगम्यं
सिद्धं समस्तमपि वेदनमुक्तयुक्त्या ।
ये तु स्वसंविदितमेतदुदाहरन्ति
क्रामन्ति ते किमिति नांसतटीं स्वकीयाम् ॥ २३४ ॥

अहो गदित्वा परिफल्गु किञ्चित्प्रगल्भसे मुग्ध किमेवमत्र ।
इतः स्वसंवेदनसिद्धियुक्तीः शृणु स्वपक्षेऽपि च दोषपंक्तीः॥ २३५ ॥

तथाहि यत्तावज्ज्ञानं ज्ञानान्तरवेद्यमित्याद्यनुमानमगादि तत्र वेद्यत्वादिति हेतोस्त्रिलोचनज्ञानेन व्यभिचारः । तस्य वेद्यत्वेऽपि स्वसंविदितत्वेन भवद्भिरभ्युपगमात् । यत्पुनरत्रोक्तमस्मदादिज्ञानापेक्षयेत्यादि । तदवद्यमस्मदादीति विशेषणस्यात्राश्रूयमाणत्वात् । हृदयनिविष्टं तदस्तीति चेत् । कथं शपथमन्तरेणायमर्थः प्रतीयते । अस्तु वा, तथापि पक्षस्य हेतोर्वा तत्स्यात् । यदि पक्षस्य, तदा विरूपाक्षज्ञानमपक्षोऽस्तु हेतुस्तु तत्र प्रवर्त्तमानः केन प्रतिहन्यते । येन स व्यभिचारो न भवेत् । अथ हेतोस्तद्विशेषणमस्मदादिज्ञानत्वे सति वेद्यत्वादिति तर्हि साधनविकल्पो दृष्टान्तः । तथाभूतस्य हेतोर्घटदृष्टान्तेऽसम्भवात् । अपि च विरूपाक्षज्ञानं स्वज्ञानं स्वसंविदितत्वादस्मदादीति विशेषणेनात्रव्यवच्छिद्यते । स्वसंविदितत्वं च कुतस्तस्य सिद्धम् । अर्थग्रहणात्मकत्वाच्चेत्तदस्मदादिज्ञानेऽप्यस्त्येवेत्युभयत्र स्वसंविदितत्वं सिध्येन्न वा क्वचिदपि विशेषादर्शनात् । अथ विरूपाक्षज्ञानस्यास्मदादिज्ञानाद्विशिष्टत्वात्तत्रैव स्वसंविदितत्वं न्याय्यं नान्यत्र नहि विशिष्टे दृष्टं धर्म्ममविशिष्टेऽपि योजयन् प्रज्ञावत्तां लभत इति चेत्, तदप्यनवदातम् । एवं हि शम्भुज्ञाने विशिष्टे दृष्टस्यार्थग्रहणात्मकत्वस्याप्यस्मदादिज्ञाने प्रतिषेधप्रसङ्गः । अथ तस्याभावे तज्ज्ञानमेव न स्यात्तस्य तत्स्वभावत्वा-

दिति चेत् । तदिदं स्वसंविदितत्वेऽपि समानम् । नहि स्वसंविदितत्वस्वभावस्याप्यभावे ज्ञानस्य ज्ञानता युक्ता । तस्यापि ज्ञानस्वभावत्वाविशेषात् । न खलु शम्भुज्ञानेऽर्थग्रहणात्मकत्वेनेव स्वसंविदितत्वेनापि विज्ञानस्वभावता दृष्टान्ततश्चास्मदादिज्ञानेऽपि स्वसंविदितत्वं कथं न स्यात् । न च स्वभावः प्रादेशिको युक्तः । आलोकस्य स्वपरप्रकाशकता मिहिरमण्डलालोकस्येव स्वभावो न पुनः प्रदीपाद्यालोकस्येति कश्चिद्विपश्चिद्वक्ति । उभयत्राप्यविशेषतस्तत्प्रतीतेः । नन्वस्मदादिज्ञानस्य शङ्करज्ञानवत्स्वपरव्यवसायिस्वभावत्वे तद्वन्निःशेषार्थप्रकाशकत्वमपि स्यादित्यपि बालप्रलपितम् । स्वयोग्यतानुसारितयैव ज्ञानेनार्थस्य प्रकाशनात्प्रदीपवत् । न खलु प्रदीपस्य दिनेश्वरवत्स्वपरप्रकाशस्वभावत्वेऽपि तद्वन्निःशेषार्थप्रकाशकत्वमुपलब्धम् । स्वयोग्यतानुसारितयैवार्थस्यानेनापि प्रकाशनात् । योग्यता च सकलज्ञानानां स्वावरकादृष्टक्षयोपशमतारतम्यस्वरूपा प्रतिपत्तव्या । न हि तस्या अभावे विषयग्रहणतारतम्यं ज्ञानानां युज्यते इति सविस्तरं पुरस्तादुपपादयिष्यते । साध्यविकलता चात्रानुमाने दृष्टान्तस्य स्पष्टैव । तथाहि न घटो ज्ञानान्तरवेद्योऽपि तु ज्ञानवेद्य उत्तरशब्दस्य सजातीयापेक्षयैव भेदवाचकत्वात् । तत्कथमत्र ज्ञानान्तरवेद्यत्वं साध्यं सम्भवति । अथैकेन ज्ञानेनानुभूते ज्ञानान्तरं यदा प्रवर्त्तते तदा ज्ञानान्तरवेद्यत्वं कुम्भे सम्भवतीति चेत् , तर्हि स्वसंविदितेऽपि ज्ञाने योगिप्रत्यक्षरूपज्ञानान्तरं प्रवर्त्तत एव ततः सिद्धसाध्यता । अथास्मदादिज्ञानान्तरवेद्यत्वं साध्यते तदास्मदादीति विशेषणं साध्यस्याभिधानीयम् । भवतु वा ज्ञानमस्मदादिज्ञानान्तरवेद्यमिति सविशेषणं साध्यं, तथापि सिद्धसाध्यता । चैत्रशरीरवर्त्तिसंवेदनस्यानुरूपेणास्मदादिज्ञानान्तरेण वेद्यत्वाभ्युपगमात् । एकशरीरवर्त्यस्मदादिज्ञानान्तरवेद्यत्वं साध्यमिति चेत्, तर्ह्येकशरीरवर्त्तीति विशेषणान्तरं साध्यस्य वाच्यम् ।

---

१ ' स्वभावतेति तद्दृष्टान्तः ' इति म. म. पुस्तकयो पाठः ।

एतदपि दृश्यमिति चेत्, तथापि सिद्धसाध्यता । स्मृतिरूपेणैकशरीरवर्त्ति-नाम्मदादिज्ञानान्तरेण अतीतज्ञानस्य वेद्यत्वाभ्युपगमात् । वर्तमानस्य ज्ञा-नस्यैकशरीरवर्त्त्यस्मदादिज्ञानान्तरवेद्यत्वं साध्यत इति चेत् । तन्न, वर्त्तमाने ज्ञाने ज्ञानान्तरस्यासम्भवात् । युगपज्ज्ञानानुत्पत्तेर्म्मनसो लिङ्गत्वेनाङ्गी-
५ करणात् । विवक्षितज्ञानोत्पत्त्यनन्तरभाव्येकशरीरवर्त्त्यस्मदादिज्ञानान्तरेण विवक्षितज्ञानस्य विनश्यदवस्थस्य वेद्यत्वं साध्यत इति चेत्, तर्ह्यनैकान्ति-कत्वं हेतोः सर्वेषां विद्यानां नियमेनोत्पत्त्यनन्तरभाव्येकशरीरवर्त्त्यस्मदादि-ज्ञानान्तरवेद्यत्वाभावात् । अथ किमेताभिः कल्पनाभिर्ज्ञानं ज्ञानान्तरेणैव वेद्यमित्यवधारणगर्भं साध्यमभिप्रेयते ततो न सिद्धसाध्यताद्यवतार
१० इति चेत् । मैवम् । एवमपि दृष्टान्ते साध्यवैकल्यकलङ्कस्याप्रति-हतप्रसरत्वात् । न खलु कलशो ज्ञानान्तरेणैव वेद्यः । प्रथमज्ञाने-नापि तस्य वेद्यत्वात् । न च तदपि कलशस्वरूपात्पार्थक्येन ज्ञाना-न्तरमिति वाच्यम् । अन्तरशब्दस्य सजातीयापेक्षयैव भेदवाचकत्वा-दित्युक्तत्वात् । यदप्यवादि अर्थग्रहणबुद्धिश्चेतनेति । तदप्यविचारित-
१५ रमणीयम् । स्वसंविदितत्वाभावे ज्ञानेऽर्थग्रहणस्यैवासम्भवात् । अर्थग्रहणत्वं हि ज्ञानेऽर्थादुत्पत्तेश्चेतनास्वरूपत्वतो वा भवेत् । यत्र यथार्थादुत्पत्तेर्ज्ञाने तदनुमन्यते, तर्हि घटेऽप्यनुमन्यतां मृद्दण्डचक्रचीव-रार्थादुत्पत्तेरविशेषात् । अथ चेतनास्वरूपत्वतः, ननु कुतो ज्ञानस्य चेतनात्वसिद्धिरर्थग्रहणाच्चेतनात्मप्रभवत्वाद्वा । अर्थग्रहणाच्चेत्,
२० परस्पराश्रयः । सिद्धे ह्यर्थग्रहणे चेतनात्वसिद्धिस्तत्सिद्धेश्चार्थग्रहण-सिद्धिरिति । अथ चेतनात्मप्रभवत्वात्, नन्वात्मनोऽपि कुतश्चेतनत्वं सिद्धेत्, चेतनासमवायात्स्वतो वा । यदि स्वतः, तदापसिद्धान्त-प्रसङ्गः । स्वरूपेण तस्य भवद्भिर्जडत्वेन स्वीकरणात् । अथ चेतना-समवायात्, तर्हि चक्रकापत्तिः । तथाहि चेतनासमवायादात्मन-
२५ श्चेतनत्वसिद्धिस्तत्सिद्धौ च तत्प्रभवत्वेन ज्ञानस्य चेतनात्वसिद्धिस्त-

१ 'तत्र' इति म. पुस्तके पाठः ।

सिद्धौ चात्मनश्चेतनासमवाय इति । यावन्नात्मनश्चेतनासमवायस्तावन्न चेतनत्वसिद्धिर्यावन्नासौ तावन्न तत्प्रभवत्वेन ज्ञानस्य चेतनात्वसिद्धिर्यावच्च नेयं तावन्नात्मनश्चेतनासमवाय इति । तस्मान्न स्वसंविदितत्वं विहाय बुद्धेरर्थग्रहणं घटते । किञ्चार्थबुद्धिरित्यत्र किमर्थस्यैव ग्रहणं बुद्धिरिति व्याख्यायते किंवार्थस्यापीति । तत्र प्रथमपक्षः प्रत्यक्षविरुद्धः। नीलमहमात्मना जानामीत्यत्र नीलमित्युल्लेखेनार्थग्रहणवदात्मनेत्युल्लेखेन ज्ञानग्रहणस्याप्यनुभवात् । न हि नीलसंवेदनाद्भिन्नकालं तदात्मसंवेदनं वेद्यते । तत्संवेदनसमकालमेवान्तःपरिस्फुटरूपस्यास्यानुभवात् । अतोऽर्थसंवेदनात्तदात्मसंवेदनस्याभिन्नस्वभावत्वात्तत्संवेदने तदपि संविदितमिति स्वसंवेदनसिद्धिः यद्यस्मादभिन्नस्वभावं तस्मिन् गृह्यमाणे तद्गृहीतमेव । यथा नीले गृह्यमाणे तस्यैव स्वरूपसन्निवेशादिकम् । अर्थसंवेदनादभिन्नस्वभावं च तदात्मसंवेदनमिति । अथार्थस्यापि ग्रहणमिति व्याख्यायते । तर्हि सिद्धं नः समीहितं स्वसंवेदनाप्रतिक्षेपात् । एवं च स्वसंवेदनप्रत्यक्षेणैव ज्ञानस्य स्वव्यवसायिस्वरूपत्वसिद्धेः प्रत्यक्षबाधितकर्म्मानन्तरोपदिष्टत्वेन वेद्यत्वादिति हेतोः कालात्ययापदिष्टत्वं तदवस्थमेवेति स्थितम् । यच्चोक्तं ग्रहणं पुनरस्येत्यादि । तदप्ययुक्तम् । विच्छिन्नप्रतिभासाभावात् । न खलु प्रागर्थज्ञानं पश्चात्तज्ज्ञानज्ञानमिति नान्तरा प्रतीतिरनुभूयते । यत्पुनरुक्तमनयोः क्रमसमुत्पादेऽप्याशुवृत्तेरित्यादि । तदतीवानुपपन्नम् । एवं हि समस्तार्थानां कथं क्षणभङ्गुरता न स्यात् सत्यामप्यस्यामाशुवृत्तेरेकत्वानध्यवसाय इति सौगतेनापि वक्तुं शक्यत्वात् । अपि च । उत्तरकालीनस्वग्राहकज्ञानकाले प्राचीनमर्थज्ञानमनुवर्त्तते न वा । यद्यनुवर्त्तते, तदा युक्तिप्रतीतिविरोधी ज्ञानयौगपद्यप्रसङ्गः । सिद्धान्तविरोधी चायं भवतः । त्वया ज्ञानद्वयस्य युगपदनभ्युपगमात् । अथ युगपज्ज्ञानद्वयस्योत्पत्तिरेव विरुध्यते । तथा च "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[1]

१ गौतमसू. १-१-१६.

इत्यक्षपादः । विनश्यदवस्थस्य त्वविनश्यता सहावस्थानं न विरुद्धमिति चेत् । ननु तस्यामवस्थायां विज्ञानं विनाशक्रिया केनचिदंशेन समाविशति न वा । न चेत्कथं विनश्यदवस्थेति वर्तमानकालतानिर्देशः स्याद्द्वितीयक्षणभावित्वाद्विनाशक्रियायाः । अथ कुशूलाद्यवस्थायामेकान्तेनासत्यपि कुम्भे कुम्भोऽयमुत्पद्यत इति वर्तमानकालतानिर्देशो दृष्टः । मैवम् । अत एव निर्देशात्तदानीं कथंचित् कुम्भस्योत्पत्तिप्रसिद्धेरन्यथा तदघटनात् । एवं च ब्रुवते लौकिकाः अद्याप्यर्द्धनिष्पन्नः कुम्भः किमित्येनं परिपूर्णं न करोषीति केनचिदंशेन तद्यनश्यत् सोंऽशोऽस्य द्वितीयज्ञानेन नाज्ञायेतेति न कदाचित्परिपूर्णस्याम्य संवित्तिः स्यात् । न चैवं नीलमहं विलोकयामीति सकलस्याम्य संवित्तेः । किञ्च त्वन्मतेऽस्यांशतो विनाश एव न युज्यते । तस्य निरंशत्वेन स्वीकारात् । अथ नानुवर्त्तते तर्हि कस्योत्तरसमयमाविज्ञानं ग्राहकं स्यात् । ग्राह्यग्राक्तनज्ञानस्य प्रागेव क्षीणत्वात् । किञ्चेन्द्रियजं प्रत्यक्षं सन्निकृष्टे विषये प्रवर्त्ततेऽतीतक्षणवर्तिनश्च ज्ञानस्य मनोलक्षणेन्द्रियसन्निकर्षो न युज्यते । ततः कथं प्राचीनज्ञाने मानसप्रत्यक्षवार्तापि स्यात्। यद्यप्युक्तमर्थजिज्ञासायां तु ज्ञान इति। एतदप्यघटमानम्। ज्ञानस्य जिज्ञासाप्रभवत्वासम्भवात् । नष्टतुरङ्गमस्य पुंसः सत्यामपि तुरङ्गमदिदृक्षायां तुरङ्गमदर्शनानुत्पादादसत्यामपि च स्तम्बेरमदिदृक्षायां स्तम्बेरमदर्शनोत्पादात् । किञ्च ज्ञानस्य ज्ञानान्तरवेद्यतायामर्थज्ञानं नैव भवेत् । प्रकाशस्य प्रकाशापेक्षायामप्रकाशतावत् । न हि स्वपरज्ञाने परमुखप्रेक्षित्वं पारित्यज्यापरं जडस्य लक्षणम् । यदपि ज्ञानं स्वप्रकाशात्मकमित्याद्यनुमाने स्वप्रकाशात्मकत्वं साध्यं विकल्प्य दूषितं किं स्वेनात्मनैव स्वस्य प्रकाशः स्वकीयेन वेत्यादिना । तत्र द्वैतीयिकविकल्पोऽनङ्गीकारेणैव निरस्तः । स्वेनात्मनैव स्वस्य प्रकाश इत्ययं तु प्रथमपक्षः कक्षीक्रियत एव । तत्र च यदुक्तं

---

१ स्तम्बेरमः—हस्ती । २ ' अनुमानं ' इति म. पुस्तके पाठः ।

पक्षस्य प्रत्यक्षबाधितत्वं दोष इति । तन्न समीचीनम् । स्वपरव्यवसायात्मकस्य ज्ञानस्य सर्वैरनुभूतेः । एवं चार्थप्रकाशात्मकत्वादिति हेतोः कालात्ययापदिष्टतापि प्रत्यादिष्टा । पक्षस्य प्रत्यक्षेण बोधनात् । यत्पुनरुक्तं स्वात्मनि क्रियाविरोधान्नायं पक्षः संभवीति । तत्र स्वदर्शनप्रसिद्धमपि त्रिनयनसंवेदनं सकलजनप्रतीतमपि वा प्रदीपाद्यालोकं स्वपरप्रकाशकं किन्नावधारयत्यायुष्मान् येनैवमात्मानमायासयति । न हि त्रिनयनज्ञानं स्वप्रकाशे ज्ञानान्तरमपेक्षते स्वपरावभासकमेकं नित्यज्ञानं जगत्कर्त्तुरित्यभ्युपगमात् । नापि प्रदीपाद्यालोकः स्वरूपप्रकाशने प्रकाशान्तरमपेक्षते प्रतीतिविरोधात् ।

अथ कथमपि मुक्त्वा मूलनैयायिकानां
मतमभिमतमेतद्दूषणैर्दूयमानम् ॥
गुरुतममतिदर्प्पात्कल्पयित्वात्र कश्चित्
निजमतमिदमाह न्यायवादी नवीनः ॥ २३६ ॥

चन्द्रचूलज्ञानमपि ज्ञानान्तरप्रत्यक्षं न स्वसंविदितमिति । न चैवं तज्ज्ञानग्राहिणो ज्ञानान्तरस्यापि ज्ञानान्तरप्रत्यक्षत्वेनानवस्थितिरित्यभिधातव्यम् । ज्ञानद्वयेनैव साध्यसिद्धेरपरज्ञानकल्पनायाः कपालिनि निरुपयोगत्वात् । तथाहि—

नव्यनैयायिकमतखण्डनम् ।

एकस्माज्ज्ञानतोऽयं कलयति भुवनं साकमन्येन तेन
द्वैतीयीकात्तु[1] तस्मात्कलयति यतस्तस्य च ग्राहकं तत् ।
एवं च ज्ञानयुग्मे त्रिपुरजिति सति क्वानवस्थाव्यवस्था
यौष्माकीणः क्व वाऽयं कथयत भवति स्वप्रकाशप्रसङ्गः॥२३७॥

ततश्च—

ज्ञप्तिरूपक्रियाया यो विरोधः स्वात्मनीरितः ।
जैनैर्धूर्जटिबुद्धौ नः स तेषां तदवस्थितः ॥ २३८ ॥

१ 'द्वैतीयीकात्' इति पदे यकारोत्तरवर्तिन इकारस्य दीर्घत्वं छन्दोऽनुरोधात्।

अत्रोच्यते—

विक्रीय मातरं मोहात्क्रीत्वा दासीममङ्गलम् ।
प्रशंसत्ययमात्मानं धृष्टः स्वमतिकौशले ॥ २३९ ॥

तथाहि समानकालयावद्द्रव्यभाविसजातीयगुणद्वयस्यान्यत्रानुपलब्धे-
५ स्त्र्यम्बकेऽपि तत्कल्पनाया असम्भवः । तथा च प्रयोगः । ईश्वरः समानकालयावद्द्रव्यभाविसजातीयगुणद्वयस्याधारो न भवति द्रव्यत्वात् यदित्थं तदित्थं यथा घटस्तथा चायं तस्मात् तथा । किं चानयोर्ज्ञानयोः पिनाकपाणेः सर्वथा भेदे कथं तदीयत्वसिद्धिः । तत्र समवायादिति चेन् , तन्न समवायस्य पदार्थपरीक्षायां प्रतिक्षेप्स्यमान-
१० त्वात् । ततश्च ।

अलीकवाचालतयाऽतिचापलं यदत्र विद्वन्ननु शीलितं त्वया ॥
नवीननैयायिक वक्ति केवलं त्वदीयबुद्धेस्तदतीव कुण्ठताम् ॥२४०॥

किञ्च का नाम क्रिया स्वात्मनि विरुध्यते । परिस्पन्दात्मिका धात्वर्थस्वभावा वा । न तावत्परिस्पन्दात्मिका । तस्या द्रव्यवृत्तित्वेना-
१५ द्रव्यरूपे ज्ञाने सत्त्वस्यैवासम्भवात् । अथ धात्वर्थरूपा । साप्यकर्मिका सकर्म्मिका वा । न तावदकर्म्मिका । यदि वृक्षस्तिष्ठतीत्यादौ तस्याः स्वात्मन्येव वृक्षादिस्वरूपे प्रतीतितोऽस्यास्तत्राविरोधः तर्हि ज्ञानं प्रकाशत इत्यादेरप्यकर्म्मकक्रियाया ज्ञानस्वरूपेऽविरोधोऽस्तु । प्रतीतेरुभयत्राप्य-विशिष्टत्वात् । अथ ज्ञानमात्मानं जानातीति सकर्म्मिका क्रिया
२० स्वात्मनि विरुद्धा । स्वरूपादपरत्रैव कर्मत्वप्रतीतेरित्युच्यते । तदपि कल्पनामात्रम् । आत्मात्मानं हन्ति प्रदीपः स्वात्मानं प्रकाशयतीत्या-दिकाया अपि क्रियाया विरोधापत्तेः । कर्तृस्वरूपस्य कर्मत्वेनोपचारात् नात्र परमार्थिकं कर्म्मेति चेत् । समानमन्यत्र । ज्ञाने कर्तरि स्वरू-पस्यैव ज्ञानक्रियायाः कर्मत्वेनोपचारात् । तात्त्विकमेव ज्ञाने कर्मत्वं
२५ प्रमेयत्वात् तस्येति चेत् । तद्यदि सर्वथा कर्तुर्ज्ञानादभिन्नं तदा विरोधः । यदि ज्ञानं कर्तृ कथं कर्म्म तच्चेत्कथं कर्त्रिति । अथ सर्वथा

भिन्नं कर्म्मत्वम् । तर्हि कथं तत्र ज्ञानस्य जानातीति क्रिया स्वात्मनि स्याद्येन विरुद्धयते । कथमन्यथा कटं करोतीति क्रियाऽपि कटकारस्य स्वात्मनि न स्यात् यतो न विरुध्यते । कर्तुः कर्म्मत्वं कथञ्चिद्भिन्नमित्येतस्मिंस्तु दर्शने ज्ञानस्यात्मनो वा सर्वथा स्वात्मनि क्रिया दूरोत्सारितैवेति न विरुद्धतामधिवसतीति । कश्च क्रियायाः स्वात्मा यत्र विरोधः स्यात् । किं क्रियास्वरूपं क्रियावदात्मा वा । यदि क्रियास्वरूपम्, तदा कथं तत्र तद्विरोधः सर्वस्य वस्तुनः स्वरूपेण विरोधानुषक्तेर्निस्स्वरूपत्वप्रसङ्गात् । क्रियावदात्मा चेत्तत्र विरोधे क्रियाया निराश्रयत्वं सर्वद्रव्यस्य वा निष्क्रियत्वमुपढौकेत । न चैवम् । कर्म्मस्थायाः क्रियायाः कर्म्मणि कर्तृस्थायाः कर्त्तरि प्रतीयमानत्वात् । यदि पुनर्ज्ञानक्रियायाः कर्तृसमवायिन्याः स्वात्मनि कर्मतया विरोधस्ततोऽन्यत्रैव कर्मत्वदर्शनादिति मतम्, तदा ज्ञानेनार्थमहं जानामीत्यत्र ज्ञानस्य करणतयाऽपि विरोधः स्यात् । क्रियातोऽन्यस्य करणत्वदर्शनात् । ज्ञानक्रियायाः करणज्ञानस्य चान्यत्वादविरोध इति चेत् । किं पुनः करणज्ञानं का वा ज्ञानक्रिया । विशेषणज्ञानं करणं विशेष्यज्ञानं तत्फलत्वात् ज्ञानक्रियेति चेत्, स्यादेवं यदि विशेषणज्ञानेन विशेष्यं जानामीति प्रतीतिरुत्पद्यते । न च कस्यचिदुत्पद्यते । विशेषणज्ञानेन विशेषणं विशेष्यज्ञानेन च विशेष्यं जानामीत्यनुभवात् । नन्वेवं कथं दण्डिनं वेद्मीति दण्डविशिष्टपुरुषप्रतिपत्तिः । पूर्वं दण्डाग्रहे हि पुरुषमात्रप्रतीतिरेव स्यादन्यथा दण्डरहितपुरुषेऽपि तत्प्रतीतिप्रसङ्गः । न खलु विशेषणं सत्तामात्रेण स्वानुरक्तां धियमुत्पादयत्यपि तु गृहीतमिति । तन्न वाच्यम् । यतो दण्डविशिष्टे पुंसि प्रवर्त्तमाना बुद्धिः सकृदेव तथाभूतं पुमांसं प्रत्येति न पूर्वं दण्डग्रहणमपेक्षते । दण्डरहिते च पुंसि दण्डविशेषणवैशिष्ट्यमेव पुंसो नास्तीति कुतस्तत्र तथाविधबुद्धिप्रादुर्भावप्रसङ्गः स्यात् । न खलु वयमसद्वस्तुव्यवसायिनीं बुद्धि-

१ 'अभिमतम्' इति म. पुस्तके पाठः ।

मभ्युपगच्छामः किन्तु वस्तुव्यवसायिनीम् । न चात्र विषयभेदाज्ज्ञानभेद-कल्पनोपपत्तिमती । समानेन्द्रियग्राह्ये योग्यदेशावस्थितेऽर्थे घटपटादिव-देकस्यादि ज्ञानस्य व्यापारविरोधात् । न च घटादावपि ज्ञानभेद इति वाच्यम् । ज्ञानानां युगपद्भावानभ्युपगमात् । क्रमभावे च प्रतीतिविरोधः । युगपद्भावाभ्युपगमे च विशेषणविशेष्यज्ञानयोः सव्येतरविषाणवत्कार्य-कारणभावाभावः । ततो विशेष्यज्ञानं विशेषणविशेष्योभयालम्बनमेव नतु विशेषणज्ञानेन जन्यमानत्वात् केवलविशेष्यालम्बनमिति । अपि च यदि विशेषणज्ञानं करणं विशेष्यज्ञानं तु ज्ञानक्रियोच्यते । तदापि विशेषणज्ञाने कस्य करणतां वक्ष्यसि । नहि तत्रापरं विशेषणज्ञानं करणमस्ति । अथास्त्येव दण्डादिज्ञाने दण्डत्वादिजातिज्ञानम्, दण्डत्वादिजातिज्ञाने तर्हि कतरत्कथयति।ततो न विशेषणविशेष्यज्ञानयोः करणक्रियात्वे वक्तव्ये किन्त्वेकज्ञानस्वरूप एव । अस्त्वास्त्वेवम्, न च विरोधस्तथाप्रतीतेः। कर्मत्वेनाप्यत एवाविरोधोऽस्तु । विशेषाभावात् । चक्षुरादिकरणं ज्ञानक्रियातो भिन्नमेवेति चेत्, न ज्ञानेनार्थं जानामीत्यपि प्रतीतेः । ज्ञायतेऽनेनेति ज्ञानं चक्षुराद्येव ज्ञानक्रियायाः साधकतमं करणमिति चेत्, न तस्य साधकतमत्वनिराकरणात्तत्रज्ञानस्यैव साधकतमत्वोपपत्तेः । ननु यदेवार्थस्य ज्ञानक्रियायां ज्ञानं करणं सैव ज्ञानक्रिया तत्र कथं क्रियाकरणव्यवहारः प्रातीतिकः स्यात् । विरो-धादिति चेत्, न कथञ्चिद्भेदात् । प्रमातुरात्मनो हि वस्तुपरिच्छित्तौ साधकतमत्वेन व्यापृतं रूपं करणम् । निर्व्यापारं तु क्रियोच्यते स्वातन्त्र्येण पुनर्व्याप्रियमाणः कर्त्तात्मेति । तेन ज्ञानात्मक एवात्मा ज्ञानात्मनार्थं जानामीति कर्तृकरणक्रियाविकल्पः प्रतीतिसिद्ध एव । तद्वत्तत्र कर्म्मव्यवहारोऽपि ज्ञानात्मात्मनात्मानं जानातीति घटते । सर्वथा कर्तृकरणकर्मक्रियाणामभेदानभ्युपगमात् । तासां कर्तृत्वादि-शक्तिनिमित्तत्वात् कथञ्चिद्भेदसिद्धेः । ततो ज्ञानं येनात्मनार्थं जानाति

---

१ ' हि कतमत्कथयसि ' इति म. म. पुस्तकयोः पाठः। २ ' तत्र ' इति नास्ति म. म. पुस्तकयोः पाठः । ३ ' क्रियाकरणत्वं ' इति म. पुस्तके पाठः ।

तेनैव स्वमिति वदतां स्वात्मनि क्रियाविरोध एव । परिच्छेद्यस्य रूपस्य सर्वथा परिच्छेदकस्वरूपादभिन्नस्योपगतेः । कथंचिद्भेदवादिनां तु नायं दोषः । अथ क्रियाकरणं निष्पादनं तच्च स्वात्मनि विरुद्धमित्यभिमतम् । मैवम् । न खलु ज्ञानमात्मानं निष्पादयतीति वयमभ्युपेमः स्वकारणादेव तस्योत्पत्तेः। अपि तु प्रदीपवज्ज्ञानमात्मानं प्रकाशयतीति । न च स्वरूपप्रकाशकत्वं प्रदीपस्यासिद्धम् । यथैव हि रूपज्ञानोत्पत्तौ प्रदीपः सहकारित्वाच्चक्षुषा रूपप्रकाशकः कथ्यते तथा स्वरूपज्ञानोत्पत्तौ तस्य सहकारित्वात् स्वरूपप्रकाशकोऽपीति । अथार्थवज्ज्ञाने ज्ञानस्वरूपस्याप्रतीतेर्न स्वसंविदितत्वमित्युच्यते । एतदप्ययुक्तम् । अर्थवदिति हि कोऽर्थः । किं यथार्थो बहिर्देशसम्बद्धः प्रतीयते न तथा ज्ञानं, किं वा यथार्थोन्मुखं ज्ञानं न तथा स्वोन्मुखमिति । आद्यपक्षे सिद्धसाधनम् । घटाद्यर्थज्ञानयोर्बहिरन्तर्देशसम्बद्धतयाऽवभासनात् । यदि तु घटाद्यर्थदेशसम्बद्धतया ज्ञानस्याप्रतिभासनादप्रत्यक्षत्वमित्यङ्गीक्रियते । तर्हि घटाद्यर्थस्यापि ज्ञानदेशसम्बद्धतयाऽप्रतिभासादप्रत्यक्षता स्यात् । द्वितीयपक्षोऽप्यनुपपन्नः, घटमहमात्मना वेद्मीत्यत्रार्थस्येव ज्ञानस्यापि प्रतिभासविलोपेऽर्थप्रतिभासेऽपि कः समाश्वासः । यदपि जल्पितं प्रकाशात्मकत्वं बोधरूपत्वं भासुररूपसम्बन्धित्वं वेत्यादि । तदपि परिफल्गु । यतः प्रकाशात्मकत्वं स्वपररूपोद्योतनसमर्थस्वरूपत्वमुच्यते तच्च क्वचिद्बोधरूपतया क्वचिद्भासुररूपसम्बन्धितया वा सम्भवन्न विरोधमध्यास्ते । ततो न प्रदीपदृष्टान्तस्य साध्यविकलत्वम् । नापि पक्षस्य प्रत्यक्षबाधितत्वम् । यदि चैवं साध्यं विकल्प्य दूष्यते । तर्हि समस्तानुमानमुद्राभङ्गप्रसङ्गः । तथाहि । सकलजनप्रतीते धूमाद्धूमध्वजविशिष्टपर्वतानुमानेऽप्येवं वक्तुं शक्यत एव । किमत्र धूमवत्त्वादिति हेतोः पर्वतवह्निना वह्निमत्त्वं साध्यते महानसवह्निना वा । आद्यकल्पे साध्यविकलत्वं दृष्टान्तस्य पर्वतवह्निना

१ ' प्रदीप एव ' इति प. पुस्तके पाठः । २ ' चक्षुषो ' इति म. म. पुस्तकयोः पाठः । ३ 'आद्यविकल्पे' इति म. म. पुस्तकयोः पाठः ।

वह्निमत्त्वस्य साध्यस्य दृष्टान्तीकृते महानसे सर्वथाऽप्यसम्भवात् । द्वितीयकल्पोऽपि न पेशलः महानसवह्निर्महीधरकन्धरायामसम्भवात् । सम्भवे वा महानसवह्निरेवासौ न भवेत् । तस्मादप्रतिहतामनुमानसरणिमनुसरता सामान्येनैव साध्यमनुमाने स्वीकर्त्तव्यम् । न पुनर्विशेषविकल्पकल्पनया विलोपनीयमिति । तदेवं सकलदोषकलङ्कविकलतया स्वप्रकाशात्मकत्वसाधनस्य सम्यग्रूपत्वात् तेन प्रकरणसमत्वं वेद्यत्वादिति हेतोः तदवस्थमेव । तथा ज्ञानं स्वप्रकाशात्मकं ज्ञानत्वात् यत्पुनः स्वप्रकाशात्मकं न भवति न तज्ज्ञानं यथा चक्षुरादीत्यनेनापि प्रकरणसमत्वमनिवार्यम् । यश्चायमुपालम्भः, किं येनैव स्वभावेन ज्ञानं स्वरूपं प्रकाशयति तेनैवार्थमपीत्यादि । स भेदाभेदैकान्तवादिन एवानुबाधते न स्याद्वादिनः । तैर्यथाप्रतीति भेदाभेदाभ्युपगमात् । स्वपरप्रकाशकस्वभावद्वयात् कथञ्चिदभिन्नस्यैकस्य ज्ञानस्य प्रतिपत्तेः । सर्वथा ततस्तस्य भेदाभेदयोरसम्भवात् । तत्पक्षभाविदूषणस्य निर्विषयत्वात् दूषणाभासतोपपत्तेः । परिकल्पितयोस्तु भेदाभेदैकान्तयोर्दूषणस्य प्रवृत्तौ सर्वत्र प्रवृत्तिप्रसङ्गात् कस्यचिदिष्टतत्त्वव्यवस्थानुपपत्तेः स्वपरप्रकाशकौ च स्वभावौ ज्ञानस्य स्वपरप्रकाशनशक्ती कथ्येते । तद्रूपतया चास्य परोक्षता तत्प्रकाशनलक्षणकार्यानुमेयत्वात्तयोरिति । किं तौ स्वप्रकाशौ स्वाश्रयभूतज्ञानप्रकाश्यौ वेत्यादिप्राक्प्रकाशितदोषराशेरनवकाश एवेति सर्वं पुष्कलम् ।

इत्येवं ज्ञानमेतत्समसिधदखिलं स्वेन संवेदनीयं
प्रौढोपन्यस्तयुक्तिव्यतिकरवशतः पश्यतां प्राश्निकानाम् ॥
यौगानामेष तस्मान्निखिलशिथिलितन्यायमूलप्रबन्धः
स्वाग्राहिज्ञानपक्षः सपदि निपतितश्छिन्नवृक्षो यथात्र ॥२४१॥

ज्ञानान्तरज्ञेयमिति प्रतिज्ञां यौगीमवज्ञाय समर्थयुक्त्या ॥
सङ्ख्याविदामत्युपहासपात्रं साङ्ख्याशयं सम्प्रति कीर्त्तयामः ॥२४२॥

तथाहि ज्ञानं स्वव्यवसायात्मकं न भवत्यचेतनत्वात् कलशवत् ।

सांख्यमतखण्डनम् ।

न चात्र हेतुरसिद्धः, अचेतनं ज्ञानं प्रधानपरिणामत्वात् कुम्भवत् यत्पुनश्चेतनं तन्न प्रधानपरिणामो यथात्मेत्यतस्तत्सिद्धेः । प्रधानपरिणामत्वमपि नासिद्धम् । प्रकृतेर्महानित्याद्यभिधानात् । प्रकृतेर्हि प्रधानापरनामिकायाः सकलजगत्प्रपञ्चरचनायां प्रवर्तमानायाः प्रथमतो महान् बुद्ध्यपरपर्याय एको व्यापको विषयाध्यवसायस्वरूप आसर्गप्रलयस्थायी प्रादुर्भवति । आसर्गप्रलयादेका बुद्धिरित्यभिधानात् । स च महानस्मादृशां संवेद्यस्वभावः । ततस्तया प्रतिप्राणिविभिन्ना इन्द्रियमनोवृत्तिद्वारेण बुद्धिवृत्तयो निःसरन्ति । ताः प्रमाणान्तरेण संवेद्यस्वभावाः । प्रतिपुरुषं हीन्द्रियवृत्तिः प्रथमतो विषयाकारेण परिणमति । ततो मनोवृत्तिद्वारेण बुद्धिवृत्तिरेकतः संक्रान्तविषयाकाराऽन्यतश्च संक्रान्तचिच्छाया सती विषयव्यवस्थापिका भवति । बुद्धौ च दर्पणप्रतिमायां विषयाकारसंक्रमे पुरुषेणार्थश्चेतयितुं शक्यते । बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते इत्यभिधानात् । बुद्ध्यध्यवसितं बुद्धिप्रतिबिम्बितमित्यर्थः । ननु बुद्धिव्यतिरिक्तस्य चैतन्यस्य स्वप्नावस्थायामप्यप्रतीतेरभेद एवेति कथं तत्र तच्छायासंक्रान्तिरिति चेत् , तदसाधीयः । सतोऽप्यनयोर्विवेकस्य संसर्गविशेषवशाद्विप्रलब्धेन प्रमात्रा प्रत्येतुमशक्तेरयोगोलकज्वलनविवेकवत् । न चायोगोलकपावकयोरप्यभेद एवेत्यभिधातव्यम् । अनयोरन्योन्यासम्भविरूपस्पर्शविशेषप्रतीतितः परस्परं भेदप्रतीतेः । ययोरन्योन्यासम्भवी रूपस्पर्शविशेषः प्रतीयते तयोरन्योन्यं भेदो यथा स्तम्भकुम्भयोरन्योन्यासम्भवी रूपस्पर्शविशेषश्च लोहगोलकज्वलनयोरिति । न चायमसिद्धः । कालायसगोलकगताभ्यामभासुररूपानुष्णस्पर्शाभ्यां सकाशाद्वैश्वानरभासुररूपोष्णस्पर्शयोः प्रत्यक्षेणैव विशेषदर्शनात् । अतो यथाऽत्र परस्परप्रदेशानुप्रवेशलक्षणसंसर्गाद्विप्रलब्धः प्रमाता भेदं नावधारयत्येवं बुद्धिचैतन्ययोरपि । यथोक्तमीश्वरकृष्णेन-

" तस्मात् तत्संसर्गादचेतनं चेतनावदिव लिङ्गम् " इति । लिङ्गं बुद्धिरिहोच्यते प्रलयकाले प्रकृतौ लयं गच्छतीति कृत्वा । ततश्च—

बुद्धेर्धर्म्मं ज्ञानमत्र प्रसिद्धं बुद्धिर्जाता जाड्यरूपात् प्रधानात् ॥
निश्चैतन्याज्जायमानं बतास्याः स्वस्याभासि ज्ञानमास्तां कथं नु॥२४३॥

संवेदनं साङ्ख्यसखे न जातु स्वस्य प्रकाशे पटुतां बिभर्ति ॥
केनेदृशं ते श्रवणे न्यवेशि श्रद्धानमानीतमिदं कथं वा ॥ २४४ ॥

तथाहि यत्तावदिदमगादि ज्ञानं स्वव्यवसायात्मकं न भवत्यचेतनत्वादिति । तत्र किमिदमचेतनत्वं नाम, किमस्वसंविदितमुतार्थाकारधारित्वं जडपरिणामत्वं वा । यद्यस्वसंविदितत्वम्, तदा प्रतिवादिनोऽसिद्धो हेतुः । साध्याविशिष्टत्वात् । यदेव हि ज्ञानस्यास्वव्ययसायात्मकत्वं साध्यं तदेव पर्यायान्तरेणास्वसंविदितत्वादिति हेतुत्वेनोपन्यस्तमिति । अथार्थाकारधारित्वम् । तदा दृष्टान्तस्य साधनविकलत्वम् । न खलु कलशम्यादर्शादेरिवार्थाकारधारित्वं केनचित्प्रतीयते । स्वरूपासिद्धं त्वेवंभूतमचेतनत्वम् । अमूर्त्तस्य ज्ञानस्य विषयाकारधारित्वायोगात् । तथाहि यदमूर्त्तं तद्विषयकारधारि न भवति यथा गगनममूर्त्तं च ज्ञानमिति । विषयाकारधारित्वे वा तस्यामूर्त्तत्वं न स्यात् । तथाहि यद्विषयाकारधारि तन्मूर्त्तं यथा दर्पणमुखमिति । विषयाकारधारित्वं च ज्ञानस्य निराकरिष्याम इत्यलमिहातिविस्तरेण । अथ जडपरिणामत्वमचेतनत्वम् । तदपि प्रतिवादिनं प्रत्यसिद्धमेव । आत्मपरिणामत्वात् ज्ञानस्य । तथापरिणामवानात्मा दृष्टत्वात् यस्तु ज्ञानपरिणामवान्न भवति नासौ द्रष्टा यथा लोष्टादिः द्रष्टा चात्मा तस्माज्ज्ञानपरिणामवानिति । चेतनोऽहमित्यनुभवाच्चैतन्यस्वभावतावच्चात्मनो ज्ञाताहमित्यनुभवाज्ज्ञानस्वभावताप्यस्तु । विशेषाभावात् । ननु ज्ञानसंसर्गाज्ज्ञाताहमित्यात्मनि प्रतिभासो न पुनर्ज्ञानस्वभावत्वादिति चेत् । तदपि न्यायबाह्यम् । चैतन्यादिस्वभावस्याप्येवमभावप्रसक्तेः ।

---

१ सांख्यकारिका २०. २ ' भवेदचेतनत्वात् ' इति म. म. पुस्तकयोः पाठः ।

चैतन्यसंसर्गाद्धि चेतनो भोक्तृत्वसंसर्गाद्भोक्ता औदासीन्यसंसर्गादुदासीनः शुद्धिसंसर्गाद्शुद्धो न तु तत्स्वभावादित्यपि वक्तुं शक्यत एव । अनुभवबाधाश्चोभयत्रापि तुल्यः । न खलु ज्ञानस्वभावविकलोऽयं कदाचनाप्यनुभूयते । चैतन्यादिस्वभावस्येव ज्ञानस्वभावस्यापि तत्र संवेद्यमानत्वात् । तथा च ज्ञानस्याचेतनत्वसमर्थनार्थं प्रधानपरिणामत्वादिति साधनं यदुक्तं तदप्यसिद्धमेव । आत्मपरिणामत्वेन ज्ञानस्य समर्थितत्वात्[1] । न चात्मनोऽनित्यज्ञानपरिणामात्मकतायामनित्यत्वं प्रसज्यत इति वाच्यम् । अव्यक्तस्याप्यनित्यव्यक्तात्मकतायामनित्यत्वप्रसक्तेः । अथ व्यक्ताव्यक्तयोरव्यतिरेकेऽपि व्यक्तमेवानित्यं परिणामत्वान्न पुनरव्यक्तं परिणामित्वादित्युच्यते । तर्हि ज्ञानात्मनोरव्यतिरेकेऽपि परिणामपरिणामिभावाज्ज्ञानमेवानित्यमस्तु नत्वात्मा । आत्मनोऽपरिणामित्वे तु प्रधानेऽपि तदस्तु । व्यक्त्यपेक्षया परिणामि प्रधानं न शक्त्यपेक्षया सर्वदा स्थास्नुत्वादित्यभिधाने त्वात्माऽपि तथाऽस्तु विशेषाभावात् । यदि चात्मनः परिणामित्वं नाभ्युपगम्यते । तदार्थक्रियाकारित्वाभावतस्तुरङ्गमशृङ्गवदसत्त्वापत्तिः । किं चायं प्रथमो बुद्धिरूपः परिणामः प्रकृतेः कुतः स्यात् । स्वभावतः पुरुषार्थकर्त्तव्यतातोऽदृष्टाद्वा । यदि स्वभावतः तर्हि सदाऽस्य सत्त्वप्रसङ्गः स्वभावस्य सदा सत्त्वसम्भवात् । यत्स्वाभाविकं न तत्कादाचित्कं यथा त्रिगुणात्मकत्वं स्वभाविकश्च प्रकृतेराद्यो बुद्धिपरिणाम इति । अथ पुरुषार्थकर्त्तव्यतातः आत्मनो विभागो मया सम्पादनीय इत्यनुसन्धाय प्रकृतिर्महदादिभावेन परिणमतीति । तदपि भाग्यहीनराज्यमनोरथस्थानीयम् । प्रथमसृष्टिकालेऽनुत्पन्नबुद्धिवृत्तेस्तस्याः पुरुषार्थो मया सम्पादनीय इत्यनुसन्धानानुपपत्तेः । तथाहि यदाऽसावनुत्पन्नबुद्धिवृत्तिस्तदाऽनुसन्धानशून्या यथा संहृतसृष्टयवस्थायाम् । अनु-

१ 'समर्पितत्वात्' इति म. पुस्तके पाठः । २ 'वात्मापि' इति म. पुस्तके पाठः ।

त्पन्नबुद्धिवृत्तिश्च प्रकृतिः प्रथमसृष्टिकाल इति । अथोऽदृष्टात्प्रथमो बुद्धिरूपः परिणामः प्रकृतेः । तदप्ययुक्तम् । यतस्तस्मात् परिणामाभ्युपगमे दुर्वारश्चक्रकावतारः । सिद्धे हि चिच्छायाद्युरितबुद्धिवृत्तिसद्भावे सुखसाधनप्रतिपत्तिपूर्वकमदृष्टसाधनानुष्ठानं तदनुष्ठानाददृष्टस्योत्पत्तौ च प्रथमसृष्टिकाले तथाविधबुद्धिवृत्तिसद्भावसिद्धिरिति । यदप्युक्तमेकतः संक्रान्तविषयाकारान्यतश्च संक्रान्तचिच्छाया सर्तीति । तत्र संक्रान्तविषयाकारत्वं बुद्धेर्बुद्धिरेवावगच्छत्यात्मा वा । न तावद्बुद्धिरेव । स्वयं स्वरूपस्याप्रतिपत्तावहं संक्रान्तविषयाकारेति प्रतिपत्तेरनुपपत्तेः । तथा तत्प्रतिपत्तौ पुनः सिद्धं बुद्धेः स्वव्यवसायत्वम् । आत्माऽपि बुद्धयर्थावप्रतिपद्य संक्रान्तविषयाकारत्वं बुद्धौ प्रतिपद्यते प्रतिपद्य वा । नाद्यः पक्षः । अर्थस्य बुद्धेश्चाप्रतिपत्तौ तत्प्रतिपत्तेरघटनात् । द्वयोर्हि प्रतिपत्तावयमत्र संक्रान्त इति प्रतिपत्तिर्युक्ता । इदं वदनमत्र दर्पणे संक्रान्तमिति प्रतिपत्तिवत् । अथ प्रतिपद्येति पक्षः, तर्हि बुद्धयर्थावात्मा किं स्वतः प्रतिपद्यते बुद्धयन्तरेण वा । स्वतश्चेत्, तर्हि बुद्धिकल्पनावैयर्थ्यम् । क्रियायाः करणमन्तरेणायोगात्तत्कल्पनायाः सार्थकत्वमिति चेत्, तर्हि कथमात्मावुद्धयर्थौ स्वतः प्रतिपद्यत इति प्रतिजानीषे । बुद्धयन्तरेण तत्प्रतिपत्तौ वाऽनवस्था । न च प्राक्तनबुद्धिकाले बुद्धयन्तरमस्ति । ज्ञानयौगपद्यानभ्युपगमात् । अतः कथं बुद्धयन्तरेणापि प्राक्तनबुद्धिकाले स्वयमसता बुद्धयर्थप्रतिपत्तिरात्मनः स्यात् । चिच्छायासंक्रान्तिरपि बुद्धौ पुरुषस्य प्रतिबिम्बनमुच्यते यथा वदनसंक्रान्तिर्दर्पणे वेदनस्य । न च व्यापिनः पुरुषस्य क्वचित्प्रतिबिम्बनं युज्यते । तथा हि यद् व्यापकं न तत् क्वचित्प्रतिबिम्बति यथा व्योम, व्यापकश्चात्मेति । प्रतिबिम्बने वात्मनो भवदभिप्रायेणास्मादृशामसंवेद्यपर्वणि स्थितत्वान्न प्रतिबिम्बप्रतिपत्तिः स्यात् । तथाहि यदसंवेद्यपर्वणि स्थितं न तस्य क्वचित् प्रतिबिम्बग्रहणं यथोभयसम्प्रतिपन्नस्य कस्यचिदत्यन्तसूक्ष्मस्य पदार्थस्य असंवेद्यपर्वणि स्थितस्य

भवदभिप्रायेणस्मादृशामात्मेति । तद्ग्रहणे वा मुखदर्पणयोरिव प्रकृतिपुरुषयोर्विवेकेनावधारणात् तन्निमित्तः सर्वस्य सर्वदा मोक्षः स्यात् । ततो न कश्चिच्छास्त्रश्रवणमननादिषु प्रयतेत । यच्चोक्तं सतोऽप्यनयोर्विवेकस्य संसर्गविशेषवशाद्विप्रलब्धेन प्रमात्रा प्रत्येतुमशक्तेरयोगोलकज्वलनविशेषवदित्यादि । तदप्युक्तिमात्रम् । अयोगोलकज्वलनयोरपि परस्परं भेदाभावात् । अयोगोलकद्रव्यं हि पूर्वाकारपरिहारेण वह्निसन्निधानाद्विशिष्टरूपस्पर्शपर्यायाधिकरणमेकमेवोत्पन्नमनुभूयते । आमाकारपरिहारेण पाकाकाराधिकरणकुम्भद्रव्यवत् । एवं च ययोरित्याद्यनुमाने प्रतीयमानोऽन्योन्यासम्भविरूपस्पर्शविशेषत्वाख्यो हेतुरसिद्धः । अयोगोलकज्वलनाख्यद्रव्यद्वयस्यैव तदानीमभावात् । तस्मात् तप्तायोगोलकवदेकत्वेनानुभूयमानं स्वपरप्रकाशकं बुद्ध्युपलब्धिज्ञानमिति पर्यायं चैतन्यतत्त्वमेवाभ्युपेयं न पुनस्तद्व्यतिरिक्ता तेन संसृष्टा जडस्वभावप्रधानकर्म्मा बुद्धिरिति । यदप्यभिहितं तस्मात् तत्संसर्गादचेतनं चेतनावदिव लिङ्गमिति । तत्र कोऽर्थं संसर्गशब्दार्थः प्रतिबिम्बनं भोग्यभोक्तृभावो वा । न तावत्प्रतिबिम्बनम् । तस्यानन्तरमेव निरस्तत्वात् । नापि भोग्यभोक्तृभावः । पुरुषस्य निरभिलाषत्वेन सुखदुःखसंविल्लक्षणभोगाभावो तस्य भोक्तृतायां प्रकृतेश्च भोग्यताया अनुपपत्तेः । चेतनावदित्येत्यस्य च कोऽर्थः । किमचेतनं चेतनं सम्पद्यत इति तच्छायाच्छुरितं वा । तत्र नाद्यः पक्षः श्रेयान् । अन्यसन्निधानेऽन्यस्यान्यधर्मस्वीकारासम्भवात् । अन्यथाऽकर्तृत्वादिधर्म्मोपेतात्मसन्निधानात् प्रकृतेरप्यकर्तृत्वादिधर्मस्वीकारः स्यात् । तथा च प्रकृतेर्महानित्यादिजगत्प्रपञ्चप्ररूपणा प्रलयमाप्नुयात् । अत्रैवार्थे प्रयोगः । चेतना बुद्धौ तद्व्यपदेशहेतुर्न भवत्यात्मधर्म्मत्वाद्यो य आत्मधर्मः स सोऽन्यत्र तद्व्यपदेशहेतुर्न भवति यथा प्रकृतावकर्तृत्वादिरात्मधर्म्मश्च चेतनेति । अथ तच्छायाच्छुरितमिति द्वितीयपक्षः चेतनासन्निधाने हि बुद्धिस्तया छुरिता भवतीति ।

सोऽप्यनुपपन्नः । चैतन्यसन्निधानस्य सदैव सद्भावेन बुद्धेरासर्ग-प्रलयस्थायिन्याः सदैव छायेवाछुरितत्वापत्त्या सदा विषयव्यवस्थापकत्व-प्रसक्तेः । न च बुद्धेः पारमार्थिकचैतन्याभावे विषयव्यवस्थापनशक्तिर्युक्ता न खलु माणवकस्य पावकोपचाराद्दाहादिजननशक्तिर्दृष्टा । ततः परमार्थतो बुद्धिश्चिद्रूपा सिद्धा । तथा च प्रयोगः । बुद्धिः परमार्थत-श्चिद्रूपा मुख्यतोऽर्थस्य व्यवस्थापकत्वात् यत्पुनः परमार्थतश्चिद्रूपं न भवति न तन्मुख्यतोऽर्थव्यवस्थापकं यथा प्रतिपन्नं तथा चेयं तस्मा-त्तथा । न चात्र प्रत्यक्षबाधा । एकमेव ह्यनुभवसिद्धं संविद्रूपं हर्ष-विषादाद्यनेकाकारं विषयव्यवस्थापकमनुभूयते । तस्यैवैते चैतन्यं बुद्धि-रध्यवसायो ज्ञानं संवित्तिरिति पर्यायाः । अत एव चेदमपि प्राप्ता-वसरमनुमानम् । चैतन्यं ज्ञानमेव तद्वाचकैः प्रतिपाद्यमानत्वात् । प्रसिद्धो हि लोके चेतयते जानीते बुद्ध्यतेऽध्यवस्यति पश्यतीत्येकार्थे प्रयोगः । न च शब्दभेदमात्राद्वाम्तवोऽर्थभेदोऽतिप्रसङ्गात् । सिद्धे चैवं बुद्धेश्चिद्रूपत्वे स्वसंविदितत्वमपि मूर्द्धाभिषिक्तमस्याः स्थितम् । तथा हि बुद्धिः स्वसंविदिता चिद्रूपत्वात् यत्तु नैवं तन्नैवं यथा घट इति ।

संवेदने ये कथयन्ति जाड्यं स्वस्यैव जाड्यं प्रथयन्ति तेऽत्र ॥
तस्मात्स्वनिश्चायकमभ्युपेतुं युक्तं तदेतत्कापिलस्य शिष्याः॥२४५॥
एतेन चार्वाकविटोऽपि तुल्ययुक्तित्वतः क्षिप्त इहावसेयः ॥
निरस्य जीवं वसुधादिधर्म्ममचेतनज्ञानमुपैति योऽत्र ॥ २४६ ॥

तथाहि सोऽपि ज्ञानस्य ज्ञानान्तरवेद्यत्वं यदि ब्रूयात् तदस्यापि योगसाङ्ख्यपक्षसमुपन्यस्तसमस्तदोषप्रसक्तिः । अथैवमसावनुमानयेत् । ज्ञानं न स्वसंविदितं भूतपरिणामत्वात् पटादिवदिति तदा तत्र हेतोर-सिद्धत्वमुद्भावयिष्यते । आत्मपरिणामत्वेन ज्ञानस्य प्रतिवादिनाऽभ्यु-पगमात् । आत्मसिद्धिश्च प्रबन्धेन सप्तमपरिच्छेदे करिष्यते इति ।

एवं च ।

---

१ ' तत् ' इत्यधिकं म. पुस्तके ।

बुद्धेः पारोक्ष्यपक्षः क्षयमुपगमितो जैमिनीयाभ्युपेतः
पूर्वं तस्यापि पश्चात् प्रलयवसुमतीं योगपक्षोऽत्र नीतः ॥
ज्ञाने जाड्याभिमानस्तदनु शिथिलतः सर्वथा कापिलानां
पक्षो लोकायतानां पुनरयमधुनाऽक्षेपि सङ्क्षेपवृत्त्या ॥ २४७॥

ततश्च—

प्रक्षीणनिःशेषविपक्षपक्षो ज्ञानं स्वसंवेदनवाद एषः ।
प्राप्तः प्रतिष्ठां परमामिदानीं जितं च जैनैर्जयकेलिलोलैः ॥२४८॥
प्रकाशकं स्वस्य परस्य चेत्थं सिद्धं समारोपविमुक्तरूपम् ।
ज्ञानं प्रमाणं निखिलाऽपि यस्मान्निष्पद्यते संव्यवहारवीथी॥२४९॥१८॥

अथ किं तज्ज्ञानस्य प्रामाण्यं यत्सम्पर्कादिदं प्रमाणमिति व्यपदिश्यत इत्याह—

ज्ञानस्य प्रमेयाव्यभिचारित्वं प्रामाण्यमिति ॥१९॥

यदि पुनरर्थाव्यभिचारित्वमित्युच्येत तदा सत्यं वाचस्पतेर्दूषणकणिकाकणमुपजीव्यता तावदर्थाव्यभिचारः प्रामाण्यं, "सत्यपि वह्निनियतत्वे धूमस्य कुतश्चिन्निमित्तादनुत्पादिताग्निज्ञानस्य प्रामाण्याभावात् नीलपीतादिषु प्रत्येकं व्यभिचारेऽपि चक्षुषो यथार्थज्ञानजनकत्वेनैव प्रामाण्यात्" इत्यभिदधानः श्रीधरो दुर्धर एव भवेत् । न च प्रमेयाव्यभिचारित्वाभिधानेऽपि समानमेतदिति मन्तव्यम् । वह्नेस्तदानीं प्रमेयत्वाभावात् । नीलपीतादीनां च प्रमेयत्वात् प्रमाणापेक्षयैव हि भावानां प्रमेयत्वं धूमध्वजज्ञानमजनयति च धूमे न प्रामाण्यस्यावसर इति कस्य प्रामाण्यमन्विष्यताम् । नीलपीतादीनां च स्वविषयं ज्ञानं जनयतां यदि न प्रमेयत्वम् । तदा दत्तो जलाञ्जलिः प्रमेयस्य । यतो नीलादिप्रमेयाव्यभिचारित्वाज्ज्ञानस्यैव तत्र प्रामाण्यं संगच्छते न चक्षुषः । यच्चावोचद्वाचस्पतिः । न च तेषां "न प्रामाण्यमिति साम्प्रतम् । प्रमितिक्रियां प्रति साधकतमत्वसम्भवात् ।

१ न्यायकन्दल्यां पृ. २१७ पं. २६

अन्यथा काष्ठादीनामपि पाकादावसाधकतमत्वप्रसङ्गादिति "।तत्र भवेदयं प्रसङ्गः सङ्गतो यद्युपपद्येत चक्षुरादीनां प्रमितिं प्रति साधकतमत्वम् । न चैवम् । ज्ञानस्यैव तत्र साधकतमत्वेन सविस्तरं प्रसाधितत्वात् ॥१९॥

अथ प्रसङ्गादायातमप्रामाण्यमपि प्रकाशयन्नाह—

तदितरत्त्वाप्रमाण्यमिति ॥ २० ॥

तस्मात् प्रमेयाव्यभिचारित्वात् । इतरत् प्रमेयव्यभिचारित्वम् । अप्रामाण्यं प्रत्येयम् । प्रमेयव्यभिचारित्वं च ज्ञानस्य स्वव्यतिरिक्तग्राह्यापेक्षयैव लक्षणीयम् । स्वस्मिन् व्यभिचारित्वासम्भवात् । तेन सर्वं ज्ञानं स्वापेक्षया प्रमाणमेव न प्रमाणाभासः । बहिरर्थापेक्षया तु किञ्चित् प्रमाणं किञ्चित्पुनस्तदाभासम् । तदुक्तम्, "भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः । बहिः प्रमेयापेक्षायां प्रमाणं तन्नवेति च" ॥ भावेति सामान्यशब्दोऽपि बहिरित्यभिधानाज्ज्ञानस्वरूपे वर्त्तत इति । तच्चार्हतो नान्यस्यास्वसंविदितज्ञानवादिनः ।

प्रामाण्यं स्वत एव युक्तिपदवीमायाति निःसंशयं
ज्ञानानां घटनामुपैति परतोऽप्रामाण्यमेकान्ततः ॥
उत्पत्तौ स्वविनिश्चये च तदिदं यज्जैमिनीया जगुः
तन्यक्कारपरायणं निजमतं ब्रूतेऽधुना सूत्रकृत्॥२४८॥२०॥

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्चेति ॥ २१ ॥

अत्र ल्यब्लोपे पञ्चमी परं स्वं चापेक्ष्य । ज्ञानस्य हि प्रामाण्यमप्रामाण्यं च द्वितयमपि ज्ञानकारणगतगुणदोषरूपं परमपेक्ष्योत्पद्यते । निश्चीयते त्वभ्यासदशायां स्वतोऽनभ्यासदशायां तु परत इति । तत्र ज्ञानस्याभ्यासदशायां प्रमेयाव्यभिचारित्वादितरस्माच्च प्रामाण्या-

१ ' चरितत्वम् ' इति म. पुस्तके पाठः । २ आप्तमीमांसायां श्लो. ८३.

प्रामाण्यनिश्चयः । संवादकबाधकज्ञानमनपेक्ष्य प्रादुर्भवन् स्वतो भवतीत्यभिधीयते । अनभ्यासदशायां तु तदपेक्षया जायमानोऽसौ परत इति । उत्पत्तौ परतः प्रामाण्ये किं प्रमाणमिति चेत्, उच्यते । प्रामाण्यं ज्ञानहेत्वतिरिक्तहेत्वधीनं ज्ञानत्वे सति कार्यत्वादप्रामाण्यवत् । यदि पुनः प्रामाण्यं ज्ञानहेतुमात्राधीनं भवेत् । तदा निर्विवादाप्रामाण्यं पार्वणेन्दुद्वयसंवेदनमपि प्रमाणतां प्रतिपद्येत । न खलु तत्र ज्ञानहेतुर्न विद्यते । तदनुत्पत्तिप्रसङ्गादसंवेदनत्वप्रसङ्गाच्च ।

अथ तत्र ज्ञानहेतुसम्भवेऽप्यतिरिक्तदोषानुप्रवेशादप्रामाण्यमिति चेत् । एवं तर्हि दोषाभावमधिकमासाद्य प्रामाण्यमुपजायेत[1], नियमेन तदपेक्षणात् । अस्तु दोषाभावोऽधिको भावस्तु नेप्यत इति चेत्, भवेदेवं यदि नियमेन दोषैर्भावैरेव भवितव्यम् । न त्वेवम् । विशेषादर्शनादेरभावस्यापि दोषत्वात् । तस्य ह्यदोषत्वे कथं ततः संशयविपर्ययौ स्याताम् । ततो विशेषादर्शनाभावो भावस्वभाव एवेति स कथं नेप्यते । तथाऽनित्यः शब्दः प्रमेयत्वादित्येवमादौ प्रमेयत्वादिलिङ्गगतानां विपर्यासादिदोषाणां भावस्वभावानामप्यभावे प्रामाण्यानुपपत्तेः । न खलु प्रमेयत्वं स्वरूपमात्रेण निश्चितमिति विपर्यासादिदोषाभावसम्भवाच्छब्दस्यानित्यत्वमनुमापयितुमलम् । अथानैकान्तिकत्वाद्दोषाभावस्तत्रासिद्ध इति चेत्, ननु कुतोऽनैकान्तिकत्वम्, नियमाभावादिति चेत्, अयत्नसम्पन्नसमीहितार्थास्तर्हि संवृत्ताः स्मः । दोषाभावातिरिक्तस्य भावस्वभावस्य नियमस्य प्रामाण्यहेतोस्त्वयैवैवं प्रसाधनात् । अथान्यत्र यथा तथाऽस्तु शब्दे तु विप्रलिप्सादिदोषाभावे वक्तृगुणापेक्षा प्रमाण्यस्य नास्तीति चेत्, तदननुगुणम् । वक्तृगुणाभावे तत्राप्रामाण्यस्य वक्तृदोषापेक्षा नास्तीति विपर्ययस्यापि सुवचत्वात् । अप्रामाण्यं प्रति दोषाणामन्वयव्यतिरेकौ

ज्ञानसामान्यकारणव्यतिरिक्तो दोषाभाव एव प्रामाण्ये हेतुर्न तु भावरूपः कश्चित् गुण इति पराभिमतस्य खण्डनम् ।

१ ' उपजायेत ' इति भ. म. पुस्तकयोः पाठः ।

म्त इति चेत्, न । प्रमाण्य प्रति गुणानामपि तयोस्तुल्यत्वात् । पौरुषेयविषयेयमस्तु व्यवस्था अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यमिति चेत्, न । गुणनिवृत्त्याऽप्रामाण्यस्यापि सम्भवात् । तस्या अप्रामाण्यं प्रति सामर्थ्यं नोपलब्धमिति चेत्, दोषनिवृत्तेः प्रामाण्यं प्रति क सामर्थ्यमुपलब्धम् । लोकवशादिति चेत् । तदितरत्रापि तुल्यम् । लोकवचसामप्रामाण्ये दोषा एव कारणं गुणनिवृत्तिस्त्ववर्जनीयसन्निधिरिति चेत् । प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् । गुणानां दोषोत्सारणप्रयुक्तोऽसाविति चेत्, दोषाणामपि गुणोत्सारणप्रयुक्तोऽसावित्यस्तु । अथवं वेदानामपौरुषेयतया गुणदोषयोरुभयोरप्यभावे तद्धेतुकयोः प्रामाण्याप्रामाण्ययोरभावात्तृतीयस्य च राशेरसम्भवान्निःस्वभावत्वं भवेदिति चेत् । किं न खलु भोः खलस्वभावमात्मानं त्वमुपालभसे । यः किलाभीषामकर्तृकत्वं पूत्करोषि । तस्माद्यथा यथाक्रमं द्वेषाभावस्य रागाभावस्य वाऽविनाभावेऽपि प्रवृत्तिनिवृत्तिप्रयत्नयो रागं द्वेषं च नियमेनानुविदधतो रागद्वेषकारणकत्वं न तु निवृत्तिप्रयत्नो द्वेषरूपभावहेतुकः । प्रवृत्तिप्रयत्नस्तु सत्यपि रागानुविधाने द्वेषाभावमात्रनिबन्धन इति विभागो युज्यते । सत्यपि द्वेषानुविधाने निवृत्तिप्रयत्नस्य रागाभावमात्रहेतुकत्वापत्तेः । तथा गुणाभावस्य दोषाभावस्य वाऽविनाभावेऽप्यप्रामाण्यप्रामाण्ययोर्दोषान् गुणांश्च नियमेनानुविदधतोर्दोषगुणकारणत्वमनुसरणीयम् । न त्वप्रामाण्यं दोषहेतुकं प्रामाण्यं सत्यपि गुणानुविधाने दोषाभावमात्रहेतुकम् । दोषान्नियमेनानुविदधतोऽप्यप्रामाण्यस्य गुणाभावमात्रहेतुकत्वप्रसक्तेरिति । अथ वेदानामपौरुषेयत्वेनापेतवक्तृदोषत्वं तथा च तद्धेतुकस्याप्रामाण्यस्याप्यभावात्ततः प्रविशति स्वत एव तेषु प्रामाण्यम् । एवं च गुणाभावेऽपि सम्भवत्प्रामाण्यं न गुणहेतुकमेवेति वक्तुं युज्यत एवेति चेत् । व्याहतमेतत्[1] । तत एवैतेषामपेतवक्तृगुणत्वं तथा च तद्धेतुकस्य प्रामाण्यस्याप्यभावस्ततश्चाप्रयत्नो-

---

१ 'एवंतत्' इति प. म. पुस्तकयोः पाठः ।

पनतमप्रामाण्यमिति दोषाभावेऽपि तत्सम्भवन्न दोषहेतुकमेवेति वक्तुं युक्तमित्येवं विपर्ययस्यापि कल्पयितुं शक्यत्वादिति । तथा प्रामाण्यं विज्ञानमात्रोत्पादककारणकलापातिरिक्तकारकोत्पाद्यं विज्ञानमात्रानुवृत्तावपि व्यावर्त्तमानत्वाद्यदित्थं तदित्थं सम्यग्ज्ञानेऽपि विज्ञानमात्रानुवृत्तावपि व्यावर्त्तमानमप्रामाण्यम् । तथा चेदं तस्मात्तथा। न चात्रासिद्धो हेतुः । मिथ्याज्ञाने विज्ञानमात्रानुवृत्तावपि प्रामाण्यव्यावृत्तेर्वादिप्रतिवादिनोः प्रतीतत्वात् । नापि विरुद्धः । सपक्षे सद्भावात् । पदार्थसिद्धिस्ततश्च तैं वाजिविषाणकल्पा । ननु यथार्थोपलब्धिलक्षणलिङ्गसमुत्थमनुमानं तन्निश्चायकमस्त्येवेति चेत् । तन्न युक्तम् । यतो यथार्थोपलब्धिलक्षणलिङ्गसमुत्थानुमानान्निर्दोषाणामेव कारणानां निश्चयो ननु सगुणानाम् । यदि हि यथार्थत्वायथार्थत्वरूपद्वयरहितमेव किञ्चिदुपलब्ध्यास्त्यं कार्यं भवेत्तदा कार्यत्रैविध्यमध्यवसीयेत यदुत यथार्थोपलब्धेर्गुणवन्ति कारकाणि अयथार्थोपलब्धेर्दोषकलुषितानि । उभयरूपरहितायाः पुनरुपलब्धेः स्वरूपावस्थितान्येवेति । न त्वेवमस्ति । द्वेधा हीयमुपलब्धिरनुभूयते, यथार्था चायथार्था च । तत्रायथार्थोपलब्धिस्तावत् दुष्टकारणजन्यैव संवेद्यते । यथाहि दुष्टकारणकलापाद्दुःशिक्षितकुलालादेः कुटिलकलशादिकार्यमवलोक्यते । तथा तिमिरादिदोषदुष्टान्नयनादिकारणकदम्बकात् कुमुदबान्धवद्वितयप्रत्ययादिका अयथार्थोपलब्धिरपि । अत एवोत्पत्तौ दोषापेक्षत्वादप्रामाण्यं परत एवेति कथ्यते । तदित्थमयथार्थोपलब्धौ दुष्टकारणजन्यत्वेन प्रसिद्धायामिदानीं तृतीयकार्याभावाद्यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारणेभ्योऽवकल्पते इति न गुणकल्पनायै सा प्रभवति । न च स्वरूपावस्थितानि कारणानि कार्यजन्मन्युदासत एव येन यथार्थोपलब्धिजननेऽमीषां गुणसहकारिता परिकल्प्यत इति ।

१ अत्र स्वमतप्रतिपादकोऽनन्तरश्च मीमांसकाक्षेपोद्वलको वाक्यसन्दर्भः आसादितादर्शेषु पतित इति विज्ञायते । २ 'तव' इति प. म. पुस्तकयोः पाठः ।

तस्मान्न सन्ति केचन कारणगुणाः । न चेन्द्रियनैर्मल्यादिरेव गुण इति वाच्यम् । नैर्मल्यादिकं हि नयनादीन्द्रियाणां स्वरूपं न पुनः स्वरूपातिरिक्तो गुणः । नैर्मल्यव्यपदेशस्तु लोचनादेर्दोषाभावनिबन्धनः । तथाहि काचकामलादिदोषाणामसत्त्वान्निर्मलमिन्द्रियं तेषां सत्त्वे पुनः सदोषमिति व्यपदिश्यते । अतास्तिमिरादीनामभावः स्वरूपमेवेन्द्रियस्य तत्सद्भावस्तु दोषः । मनसोऽपि निद्राद्यभावः स्वरूपं तत्सद्भावस्तु दोषः । विषयस्यापि निश्चलत्वादिकं स्वरूपं चञ्चलत्वादिकस्तु दोषः । प्रमातुरपि बुभुक्षाद्यभावः स्वरूपं तत्सद्भावस्तु दोषः । न चैतद्वाच्यं विज्ञानजनकानां स्वरूपमयथार्थोपलब्ध्या समधिगतम् । यथार्थत्वं तु पूर्वस्मात्कारणकलापादनुपजायमानं गुणाख्यं सामग्र्यन्तरं परिकल्पयतीति । यतोऽत्र लोकः प्रमाणम् । न चासौ मिथ्याज्ञानात्कारणस्वरूपमनुमिनोति किन्तु सम्यग्ज्ञानात् । एवं च गुणानामसम्भवात्कथं तेभ्यः समुत्पद्यमानं प्रामाण्यं परतः समुत्पद्यत इति ।

मुग्धधिया गदिता भवताऽमी शुश्रुविरे सकलाः कुविकल्पाः ।
जैनमतामृतपूतमतीनामुत्तरकेलिमतः शृणु सम्यक् ॥ २४० ॥

तथाहि । यत्तावदुक्तम् अभ्यक्षमक्षादिनिमित्तसंगतान् गुणान् ग्रहीतुं पटुतापुरःसरान् इत्यादि । तत्र किमिन्द्रिये परोक्षशक्तिरूपे गुणानां प्रत्यक्षेणानुपलम्भादभावः साध्यते, आहोस्वित्प्रत्यक्षे चक्षुर्गोलकादौ बाह्यरूपे । प्रथमपक्षे गुणवद्दोषाणामप्यभावः प्रसज्यते । परोक्षशक्तिरूपे इन्द्रिये अनुपलम्भस्य तुल्यत्वात् । द्वितीयपक्षेऽपि किमात्मप्रत्यक्षेण चक्षुर्गोलकादौ गुणानामनुपलम्भः परप्रत्यक्षेण वा । यद्यात्मप्रत्यक्षेण, तर्हि तेन दोषाणामप्यनुपलम्भात्तत्र सत्त्वं न स्यात् । स्पार्शनप्रत्यक्षेणात्मीयेन स्वचक्षुर्गोलकादिमात्रस्यैवावसायात् । अपरप्रत्यक्षेण चेदनुपलम्भः । नन्वसिद्धमेतत्, यथैव हि काचकामलादयो दोषाः परचक्षुर्गोलकादौ प्रत्यक्षतः परेण प्रतीयन्ते तथा नैर्मल्यादयो गुणा अपि । जातमात्रस्यापि नैर्मल्यादिनेन्द्रियप्रतीतेर्नैर्मल्यादीनां

गुणरूपत्वाभाव इत्युच्यते । तर्हि जातितैमिरिकस्य[1] जातमात्रस्यापि तिमिरादिपरिकरितेन्द्रियप्रतीतेरिन्द्रियस्वरूपातिरिक्ततिमिरादिदोषाणामप्यभावः कथं न स्यात् । कथं चैवं रूपादीनामपि कुम्भादिगुणस्वभावता । उत्पत्तेरारभ्य कुम्भे तेषां प्रतीयमानत्वाविशेषात् । ततः परचक्षुर्गोलकादौ प्रत्यक्षतः परेण प्रतीयमानत्वात् काचकामलादिदोषाणां यथा सत्त्वमङ्गीक्रियते नैर्मल्यादिगुणानामप्यङ्गीकर्तव्यम् । अन्यथा तु—

सुव्यक्तं गुणमात्सर्यमकारणमिदं तव ॥
दोषैकपक्षपातित्वं किं ब्रूमस्तत्सखेऽधुना ॥ २५० ॥

अपि च ।

प्रत्यक्षानुपलभ्यत्वाद्गुणाभावो यदीष्यते ॥
बुद्ध्यभावस्तथा प्राप्तस्तत एव तव ध्रुवम् ॥ २५१ ॥
बुद्ध्यभावेऽथ सर्वस्य प्रमाणस्याप्यभावतः ।
कथं स्वपक्षसिद्धिस्ते निःसन्देहविपर्ययात् ॥ २५२ ॥
परपक्षप्रतिक्षेपः कथं वा निष्प्रमाणकः ॥
सिद्धिक्षेपौ च कर्तव्यौ स्वपक्षपरपक्षयोः ॥ २५३ ॥
प्रमाणमन्तरेणापि क्रियते यदि तौ त्वया ।
सुष्ठु प्रामाणिकत्वं स्यादात्मनो व्यञ्जितं तदा ॥ २५४ ॥

तन्न प्रत्यक्षानुपलम्भमात्रेण गुणानामभावः कर्तुं युक्तः । यदप्यवादि,न शेमुषीलिङ्गकृतापीत्यादि । तदप्यसिद्धम् । गुणग्रहणप्रवणस्यानुमानस्य सद्भावात् । तथाहि। विवादाध्यासितेषु ज्ञानहेतुषु गुणाः सन्ति सम्यग्ज्ञानजनकत्वान्यथानुपपत्तेः । द्विविधमेव हि कार्यं सम्यगसम्यग् नतु तृतीयम् । तस्योपलब्धिलक्षणप्राप्तस्यानुपलब्धेर्निर्विशेषस्य सामान्यस्य शशविषाणकल्पत्वाच्च । तत्राद्यं गुणवत्कारणात् । द्वितीयं तु दोषवत्कारणादुपजायते । उक्तकारणातिरिक्तं तु कार्यवत्कारणमपि नोपलभामह इति सम्यग्ज्ञानलक्षणं कार्यं गुणवत्कारणादेवोपजायत इति सिद्धम् ।

[1] आजन्मनः तिमिररोगग्रस्तस्य ।

यच्चोन्द्रियगुणैः सह लिङ्गस्य प्रतिबन्धप्रतिषेधार्थं प्रत्यक्षतोऽनुमानाद्वा सम्भाव्येतास्य निश्चय इत्यादि न्यगादि । तदपि परसमयरहस्यानभिज्ञस्य प्रलापमात्रम् । न खलु क्वचिदपि लिङ्गे प्रत्यक्षानुमानाभ्यां साध्येन सार्द्धं प्रतिबन्धावधारणमभिदधति **स्याद्वादिनः** ।

५ किं तूहापरपर्यायात्तर्कात्स्यात्प्रमाणान्तरात् । तस्माच्च पूर्वोपन्यस्तगुणानुमाने प्रतिबन्धः प्रतीयत एव । ततश्च ।

एवं प्रमाणं सुदृढं गुणेषु प्रवर्त्तते सत्त्वविनिश्चयाय ।
प्रमाणमूला च पदार्थसिद्धिस्ततश्च ते नाश्वविषाणकल्पाः ॥२५५॥

इति सिद्धम् । यदि चैवं सुदृढप्रमाणप्रतिपन्नेष्वपि गुणेषु कुवि-

१० कल्पैर्विप्लवः क्रियते तर्ह्यप्रामाण्योत्पादकेषु दोषेष्वपि कः समाश्वासः । यथोक्तगुणविप्लवैककुविकल्पजालस्य तत्रापि तुल्यत्वात् । तथाहि । अभ्यक्षमक्षादिनिमित्तसङ्गतान् दोषान् ग्रहीतुं तिमिरादिकान् स्फुटम् । क्षमं न तावद्यदनेन वस्तुनि ज्ञाने न कश्चित्कलहायते सुधीः ॥२५६॥ इत्यादि ।

१५ एवं न दोषेषु तव प्रमाणं प्रवर्त्तते सत्त्वविनिश्चयार्थम् ।
न चाप्रमाणे हि पदार्थसिद्धिस्ततश्च ते वाजिविषाणकल्पाः ॥२५७॥

इति पर्यवसानः पद्योपन्यासः समग्रोऽपि गुणदूषणे वा दोषदूषणेऽपि कर्तुं शक्यत एवेति । यदप्युक्तम्, यथार्थोपलब्धिलक्षणलिङ्गसमुत्थानुमानान्निर्दोषाणामेव कारणानां निश्चयो न तु सगुणानामिति । तदप्य-

२० युक्तम् । उक्तन्यायेन गुणजन्यत्वेन तस्याः प्रसिद्धत्वात् । यत्पुनरुक्तम्, द्वेधा हीयमुपलब्धिरनुभूयते यथार्था चायथार्था चेति । तत्र न विप्रतिपद्यामहे । न हि यथार्थत्वायथार्थत्वे विहाय निर्विशेषमुपलब्धिसामान्यमुपपद्यते विशेषनिष्ठत्वात्सामान्यस्य । न खलु शाबलेयबाहुलेयादिविशेषविकलं गोत्वादिसामान्यं प्रतीयते । येनेदमुपलब्धि-

२५ सामान्यं यथार्थत्वायथार्थत्वविशेषविरहितं प्रतीयेत । यत्तु प्रतिपादितम्,

---

१ पृष्ठं निर्देष्टुं न शक्यते ग्रन्थस्य त्रुटितत्वात् ।

इदानीं तृतीयकार्याभावाद्यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारणेभ्योऽवकल्पत इति न गुणकल्पनायै सा प्रभवतीति । तदनुपपन्नम् । उक्तन्यायेन गुणदोषविरहितस्य तृतीयकारणस्यासम्भवात् ।

नैर्मल्यादिकं नयनादीनां स्वरूपं न ततोऽतिरिक्तो गुण इति मीमांसकमतस्य खण्डनम् ।

यदपि प्रत्यपादि । नैर्मल्यादिकं हि नयनादीन्द्रियाणां स्वरूपं न पुनः स्वरूपातिरिक्तो गुण इति । तत्रेदं पर्यनुयुज्यते । कुतो नैर्मल्यादेर्नयनादीन्द्रियस्वरूपतासिद्धिः । नयनादिभ्यो भेदेन तस्यानुपलभ्यमानत्वादिति चेत् । तदप्यसमीचीनम् । काचकामलादिदोषाणामपि लोचनादिभ्यः पार्थक्येनानवलोक्यमानानां तत्स्वरूपत्वप्रसक्तेः । किं च नैर्मल्यादिकं नयनादीन्द्रियाणां स्वरूपमित्यत्र स्वरूपशब्दस्य कः सम्मतोऽर्थः । तादात्म्यं तन्मात्रत्वं वा । तत्राद्यविकल्पे नैर्मल्यादेर्गुणत्वानिषेधस्तादात्म्यस्य गुणत्वाविरोधित्वात् । इतरथा रूपादेरपि गुणत्वाभावः स्यात् । द्वितीयविकल्पस्त्वयुक्तः । चक्षुरादावनुवर्त्तमानेऽपि नैर्मल्यादेर्निवर्त्तमानतया तन्मात्रत्वानुपपत्तेः । प्रयोगश्चात्र यस्मिन्ननुवर्त्तमानेऽपि यन्निवर्त्तते न तत्तन्मात्रं यथानुवर्त्तमानेऽपि पटे नीलादिद्रव्यसंयोगान्निवर्त्तमानः शुक्लादिर्गुणः । अनुवर्त्तमानेऽपि चक्षुरादौ निवर्त्तते काचकामलिनः कुपितादेर्वा नैर्मल्यादिकमिति । किंच कथं गुणानभ्युपगमे तस्माद्गुणेभ्यो दोषाणामभाव इत्यादि पदे पदे गुणसद्भावावेदको वार्तिककारोद्गारः शोभेत । यदप्यभाणि नैर्मल्यव्यपदेशस्तु लोचनादेर्दोषाभावनिबन्धन इत्यादि । तदपि मनःपीडाकरम् । दोषाभावस्य प्रतियोगिपदार्थस्वभावत्वात् । तुच्छस्वभावत्वे चास्य तुरङ्गशृङ्गस्येव कार्यत्वधर्माधारत्वविरोधः । न चाऽसिद्धमस्य कार्यत्वलक्षणधर्माधिकरणत्वम् । अञ्जनादेश्चक्षुरादौ क्रियमाणत्वप्रतीतेः । ततो दोषाणां प्रतियोगिनो ये गुणास्तत्स्वरूप एव दोषाभावः । लोकप्रती-

१ ' नयेन ' इति प. पुस्तके पाठः । २ 'वा' इति प. म. पुस्तकयोः पाठः ।

तिरप्यत्र साक्षिणी । तथाहि । काश्चित्काचकामलादिदोषकलुषितलोचनस्तथाविधौषधप्रयोगसामर्थ्यसमासादितेन्द्रियगुणः केनचित् परमवयस्येन कीदृशौ दृशौ भवतः सम्प्रतिपन्ने इति सस्नेहं सम्भाषितः सन्नभिधत्ते । पुरा सदोषे समभूतामधुना तु लब्धिसम्पन्ने इति । न तु विस्मृत्यापीदमभिदधाति यदुत प्राक्सदोषे मे दृशौ समभूतामिदानीं पुनस्तयोस्तिमिरादिदोषाभावमात्रं तुच्छं सम्पन्नमिति। ततश्च गुणस्वरूपस्य कार्यत्वं सुस्पष्टं प्रतीयत एवेति नासिद्धं कार्यत्वधर्माधारत्वमस्य । तथा च कथं निःस्वभावत्वं तस्येति । यदि च दोषाभावो निःस्वभावः स्वीक्रियते । तर्हि " **भावान्तरविनिर्मुक्तो भावोऽत्रानुपलम्भवत् । अभावः सम्मतस्तस्य हेतोः किन्न समुद्भवः ॥** " इत्यत्र भावान्तरविनिर्मुक्तो भावोऽभावः सम्मत इत्यस्य विरोधः । एवं च गुणदोषयोः परस्परविरुद्धत्वेनैकप्रतिषेधस्येतरविधिस्वरूपत्वाद्दोषाभावो गुणसद्भावात्मक एवाभ्युपगन्तव्यो यथा वस्त्वभावाभावो वस्तुसद्भावात्मकः । यदि चैवं नाभ्युपगम्यते तर्हि कथं लिङ्गे नियमलक्षणसम्बन्धाभावोऽपि दोषात्मकः स्यात् अभावस्य गुणस्वरूपत्वाभावाद्दोषरूपत्वस्याप्ययोगात् । तथा च काचकामलादिदोषाभावव्यतिरिक्तगुणरहिताच्चक्षुरादेरुपजायमानं प्रामाण्यं यथा स्वतोऽभिधीयते । तथा नियमलक्षणसम्बन्धाभावव्यतिरिक्तदोषरहितालिङ्गादप्रामाण्यमप्युपजायमानमनुमाने स्वतोऽभिधीयताम् । विशेषाभावात् ।

एवं च ' **अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः' । वस्तुत्वाद्विविधस्यात्र सम्भवो दुष्टकारणात्॥'** इत्यस्य विरोधः । द्विविधस्येति मिथ्यात्वसंशयस्वरूपस्य । ततो द्वितीयलिङ्गे नियमलक्षणसम्बन्धाभावस्य दोषरूपत्वविदिन्द्रिये दोषाभावस्य गुणरूपता स्यात् । यदपि न चैतद्वाच्यमित्याद्याशंक्य यतोऽत्र लोकः प्रमाणं न चासौ मिथ्याज्ञानात् कारणस्वरूपमात्रमनुमिनोति किन्तु सम्यग्ज्ञानादिति समाहितम्।

---

१ मीमांसाश्लोकवार्तिके सू. २ चोदनासूत्रे श्लो. ५४.

तदपि लोकव्यवहारव्याहतम् । लोको हि यथा मिथ्याज्ञानात्कारणस्वरूपमेवानुमिनोति तथा सम्यग्ज्ञानादपि । यथा च मिथ्याज्ञानाद्दोषवन्ति कारणानि परिकल्पयति । तथा सम्यग्ज्ञानाद्गुणवन्ति तानीति ।

तत्प्रामाण्यं गुणापेक्षमुत्पत्तिं प्रतिमानतः ॥
सिद्धिसौधमुपारूढमित्यलं बहुजल्पितैः ॥ २५८ ॥ ५

अनभ्यासदशायां प्रामाण्यं परतः प्रतिपद्यत इति । कुतः प्रतीयत इति चेत् । अनभ्यासदशायां प्रामाण्यं परतो ज्ञानते संशयास्पदत्वादित्यत इति ब्रूमः । यदि हि ज्ञानेन स्वप्रामाण्यं स्वयमेव ज्ञायेत यथार्थपरिच्छेदकमहमस्मीति, तदा प्रमाणमप्रमाणं वेदं ज्ञानमिति प्रामाण्यसंशयः कदाचिदपि नोत्पद्यते ज्ञानत्वसंशयवत् । निश्चिते तदनवकाशात् । अथ प्रमाणवदप्रमाणेऽपि ज्ञानमिति प्रत्ययरूपसमानधर्मदर्शनाद्विशेषस्य कस्यचिदप्यदर्शनादुत्पद्यत एव । निश्चितेऽपि प्रामाण्ये संशय इति चेत् । नैतत्संशयकारणानुगुणम् । न खलु साधकबाधकप्रमाणाभावमवधूय समानधर्मदर्शनादेवासौ भवितुमर्हति । तथा सति तदनुच्छेदप्रसङ्गात् । न चेह तव साधकबाधकप्रमाणाभावःसम्भवी । स्वतः प्रामाण्यज्ञप्तिरूपस्य प्रामाण्यसाधकस्याप्रामाण्यबाधकस्य च प्रमाणस्य विजृम्भमाणत्वात् । भवति चानभ्यासदशायां प्रामाण्ये सन्देहस्तस्मान्नात्र स्वतो ज्ञप्तिः । अथ झटिति प्रचुरा च तथाविधा प्रवृत्तिरन्यथानुपपद्यमाना स्वतः प्रामाण्यज्ञप्तिमाक्षिपतीति चेत्, नैतत् । अन्यथैवोपपत्तेः । करणं तत्कारणमभीष्टाभ्युपायताज्ञानं तदपि तज्जातीयत्वलिङ्गानुभवादिप्रभवमिति न प्रामाण्यग्रहस्य क्वचिदप्युपयोगः । उपयोगे वा स्वत इति कुत एतत् ।

अनभ्यासदशायां प्रामाण्यस्य परतस्त्वसाधकमनुमानम् ।

अथ यदि स्वतः प्रामाण्यज्ञप्तिर्न स्यान्न स्यादेवैषा । परतो ज्ञप्ति-

पक्षस्यानुपपद्यमानत्वात् । तथाहि । प्रामाण्यं
प्रामाण्यज्ञप्तिः परत इति मीमांसकस्य पूर्वपक्षं विस्तरेण उपपाद्य संवादकज्ञानाप्रामाण्यग्रह इति व्यवस्थापनेन तत्खण्डनम्।
स्वज्ञप्तौ कारणगुणज्ञानं बाधकाभावज्ञानं वा संवादकज्ञानं वा परमपेक्षेत । न तावत्कारणगुणज्ञानम् । तद्धि नेन्द्रियजं सम्भवति । अतीन्द्रियेन्द्रियादिकारणाधिकरणत्वेन परोक्षत्वादनुमानाम् । नापि लिङ्गजम् । नापि लिङ्गस्यैवाभावात् । उपलब्ध्याख्यकार्यपरिशुद्धिर्लिङ्गमस्तीति चेत्, मैवम् । अप्रतिपन्नायास्तस्यास्तद्गमकत्वानुपपत्तेः । उपलब्ध्याख्यकार्यपरिशुद्धिग्रहणं प्रामाण्यज्ञप्तिश्चेति स्वल्पनर्थान्तरम् प्रामाण्यज्ञप्तिश्च कारणगुणज्ञानाद्भवतीति प्रस्तुतं तथा चेतरेतराश्रयम् । उपलब्ध्याख्यकार्यपरिशुद्धिग्रहणात्कारणगुणज्ञानं तज्ज्ञानाच्च तद्ग्रहणमिति । तन्न कारणगुणज्ञानं स्वज्ञप्तौ प्रामाण्यमपेक्षते । नापि बाधकाभावज्ञानम् । यतस्तदपि प्रमाणमप्रमाणं वा भवेत् । प्रथमपक्षे कुतस्तत्प्रामाण्यज्ञप्तिः । परस्माद्बाधकाभावज्ञानाच्चेत् तर्हि तस्यापि तज्ज्ञप्तिरपरस्मात्तस्मादित्येवमनवस्था । द्वितीये तु स्वयमप्रमाणं बाधकाभावज्ञानं कथं प्रामाण्यं ज्ञापयेत् । ततो न बाधकाभावज्ञानादपि तज्ज्ञप्तिः । नापि संवादकज्ञानात् । संवादकज्ञानं हि समानजातीयं भिन्नजातीयं वा भवेत् । यदि समानजातीयम् । तदपि किमेकसन्तानप्रभवं भिन्नसन्तानप्रभवं वा । न तावद्भिन्नसन्तानप्रभवम् । देवदत्तघटज्ञाने यज्ञदत्तघटस्यापि संवादकत्वप्रसक्तेः । एकसन्तानप्रभवमप्यभिन्नविषयं भिन्नविषयं वा । प्रथमपक्षे संवाद्यसंवादकभावाभावः । विशेषाभावात् । अभिन्नविषयत्वे हि यथोत्तरज्ञानं पूर्वज्ञानस्य संवादकं तथा पूर्वमप्युत्तरस्य संवादकं किन्न भवेत् । कथं चोत्तरस्यापि संवादकत्वेनाभिमतस्य ज्ञानस्य प्रामाण्यनिश्चयः । तदुत्तरकालभाविनोऽन्यस्मात्तथाविधादेवेति चेत् । तर्हि तस्याप्यन्यस्मात्तथाविधादेव प्रामाण्यनिश्चय इत्यनवस्था । प्रथम-

१ ' बाधकभाव ' इति प. म. पुस्तकयोः पाठः ।

प्रमाणादुत्तरस्य प्रामाण्यनिश्चये परस्पराश्रयः । अथ भिन्नविषयमिति द्वितीयः पक्षः । सोऽपि न श्रेयान् । एकस्तम्भज्ञानं प्रति स्तम्भान्तरज्ञानस्य प्रामाण्यव्यवस्थापकत्वापत्तेः । तन्न समानजातीयं संवादकज्ञानमुपपद्यते । नापि भिन्नजातीयम् । तद्धि किमर्थक्रियाज्ञानमुतान्यत् । न तावदन्यत्, घटज्ञानात्पटज्ञाने प्रामाण्यनिश्चयप्रसङ्गात् । नाप्यर्थक्रियाज्ञानम् । प्रथमस्य प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चयाभावे प्रवृत्त्याद्यभावेनार्थक्रियाज्ञानस्यैवाघटनात् । निश्चितप्रामाण्यात्तु प्रवर्त्तकज्ञानात्प्रवृत्तौ दुर्निवारश्चक्रकावतारः । तथाहि प्रवर्त्तकज्ञानप्रामाण्यनिश्चयात्प्रवृत्तिः, प्रवृत्तेरर्थक्रियाज्ञानं, अर्थक्रियाज्ञानाच्च प्रवर्त्तकज्ञानप्रामाण्यनिश्चय इति । कथं चार्थक्रियाज्ञानस्यापि प्रामाण्यनिश्चयः, अन्यस्मादर्थक्रियाज्ञानादिति चेत्, तर्हि अनवस्था । प्रवर्त्तकज्ञानाच्चेत्, अन्योन्याश्रयः । अर्थक्रियाज्ञानस्य स्वतः प्रामाण्यनिश्चयाभ्युपगमे च प्रवर्त्तकज्ञानस्य तथाभावे किंकृतः प्रद्वेषः । यदाह भट्टः, **" यथैव प्रथमं ज्ञानं तत्संवादमपेक्षते । संवादेनापि संवादः परो मृग्यस्तथैव हि ॥ १ ॥ संवादस्याथ पूर्वेण संवादित्वात्प्रमाणता । अन्योन्याश्रयभावेन प्रामाण्यं न प्रकल्प्यते ॥ २ ॥ कस्यचित्तु यदीष्येत स्वत एव प्रमाणता । प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना ॥ ३ ॥ "** इति । तदेवं परतः पक्षस्यानुपपद्यमानत्वात्स्वत एव प्रामाण्यग्रहणमुपपद्यत इति । तदेतदखिलमर्लीकम् । तथाहि यत्तावदुक्तं प्रामाण्यं स्वज्ञप्तौ कारणगुणज्ञानं बाधकाभावज्ञानं वा संवादकज्ञानं वा परमपेक्षेतेत्यादि । तत्र संवादकज्ञानमपेक्षत इत्याचक्ष्महे । कारणगुणज्ञानबाधकाभावज्ञानयोरपि च संवादकज्ञानरूपत्वं प्रतिपद्यामहे । यादृशोऽर्थः पूर्वस्मिन् विज्ञाने प्रथापथमवतीर्णस्तादृश एवासौ येन विज्ञानेन व्यवस्थाप्यते तत्संवादकमित्येतावन्मात्रं हि तल्लक्षणमाचचक्षिरे धीराः । यत्तु कारणगुणज्ञाननिराकरणाय न्यगादि । तद्धि नेन्द्रियजं सम्भवतीत्यादि । तत्तावदेवमेव । यत्पुन-

नापि लिङ्गजं लिङ्गस्यैवाभावादित्यादि । तदसंगतम् । उपलब्ध्यास्य-कार्यपरिशुद्धिलक्षणस्य गुणग्रहणप्रवणस्य लिङ्गस्य सम्भवात् । यत्पुनस्तत्प्रतिक्षेपाय प्रतिपादितम् । अप्रतिपन्नायास्तस्यास्तद्गमकत्वानुपपत्तेरित्यादि । तदपेशलम् । न खलु कारणगुणज्ञानादेवोपलब्ध्यास्यकार्यपरिशुद्धिवुद्धिर्भवतीति नः पक्षः । अभ्यासदशायां स्वतोऽनभ्यासदशायां तु कारणगुणज्ञानवज्ज्ञानान्तरादपि संवादकात्तदुपपत्तेः । एतेन बाधकाभावज्ञानपक्षप्रतिक्षेपोऽपि प्रतिक्षिप्तः । यत्तु विकल्पितं संवादकज्ञानं हि समानजातीयं भिन्नजातीयं वा भवेदिति । तत्रोभयमपि स्वीक्रियत एव । क्वचित्खलु समानजातीयं संवादकज्ञानं भवति । यथा देवदत्तस्य प्रथमं घटज्ञाने प्रवृत्ते यज्ञदत्तस्यापि तस्मिन्नेव घटे घटज्ञानम् । एतेन देवदत्तघटज्ञाने यज्ञदत्तघटज्ञानस्यापि संवादकत्वप्रसक्तेरिति प्रत्युक्तम् । इष्टस्यैवापादनात् । क्वचित्तु भिन्नजातीयमपि संवादकज्ञानं भवति । यथा प्रथमस्य प्रवर्त्तकजलज्ञानस्योत्तरकालभाविस्नानपानावगाहनाद्यर्थक्रियाज्ञानम् । यत्तु समानजातीयमपि किमेकसन्तानप्रभवं भिन्नसन्तानप्रभवं वेत्युक्तम् । तत्रोभयमप्यभ्युपगम्यत एव । भवति ह्येकसन्तानप्रभवमन्धकारकलुषितालोकप्रभवस्य कुम्भज्ञानस्योत्तरकालभाविनस्तिमिरालोकप्रभवं तस्मिन्नेव कुम्भे कुम्भज्ञानम् । भिन्नसन्तानप्रभवं तु समानजातीयं संवादकज्ञानं यदिदानीमेव प्रथममुपदर्शितम् । यत्पुनरेकसन्तानप्रभवपक्षे समाख्यातम् एकसन्तानप्रभवमप्यभिन्नविषयं भिन्नविषयं वेति । तत्राप्युभयमस्माकमभिमतमेव । तत्राभिन्नविषयमेकसन्तानप्रभवं दर्शितमेव । यच्चात्र पक्षे दूषणं प्रथमपक्षे संवाद्यसंवादकभावाभावो विशेषाभावादिति । तदवद्यम् । विशेषाभावस्यासिद्धेः । संवाद्यं हि पूर्वसंवेदनं मन्दसामग्रीसमुत्पाद्यम्, संवादकं पुनरुत्तरकालभावि प्रबलसामग्रीजन्यमिति कथमनयोर्विशेषाभावः सिद्धयेत् । अभ्यस्तसद्विषयत्वेन च संवादकस्य संवादकान्तरानपेक्षत्वादनवस्थापि पूर्वोक्तात्र न सम्भवति । भिन्नविषयं

त्वेकसन्तानप्रभवं संवादकं यथा रथाङ्गमिथुनादेकतरदर्शनस्यान्यतरदर्शनम् । यत्तूक्तमत्र पक्षे एकस्तम्भज्ञानं प्रतिस्तम्भान्तरज्ञानस्य प्रामाण्यव्यवस्थापकत्वापत्तेरिति । तत्रापि यदि तद्विषययोरविनाभावस्तदा भवत्येव संवादकत्वम् । न खलु निखिलं भिन्नविषयं संवेदनं संवादकमिति ब्रूमः । किं तर्हि यत्र पूर्वोत्तरज्ञानगोचरयोरविनाभावस्तत्रैव भिन्नविषयत्वेऽपि ज्ञानयोः संवाद्यसंवादकभाव इति । यच्च भिन्नजातीयसंवादकज्ञानपक्षे विकल्पितम्, तद्धि किमर्थक्रियाज्ञानमुतान्यदिति । तत्रापि नः पक्षद्वयमपि सम्मतमेव । तत्रार्थक्रियाज्ञानं प्रथमस्य प्रवर्त्तकजलज्ञानस्येत्यादिना प्रागभिहितम् । अर्थक्रियाज्ञानादन्यत्तु भिन्नजातीयं संवादकं यथा एकसहकारफलादिवर्त्तिनां रूपादीनामविष्वग्भावलक्षणसम्बन्धिनां परस्परं व्यभिचाराभावाद्रसादिज्ञानमाशंकितविषयाभावस्य प्रामाण्यनिश्चायकम् । यत्पुनरत्र पक्षे घटज्ञानात्पटज्ञाने प्रामाण्यनिश्चयप्रसंगादिति जल्पितम् । तत्केवलं वाचालताचापलम् । अविनाभावो हि संवाद्यसंवादकभावनिबन्धनं नान्यदित्युक्तत्वात् । यत्त्वर्थक्रियाज्ञानपक्षे प्रथमस्य प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चयाभावे प्रवृत्त्याद्यभावेनार्थक्रियाज्ञानस्यैवाघटनादित्युद्घोषितम् । तदपि ज्ञानन्यायनिराकृतम् । न खलु सर्वत्र प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चये सति प्रवृत्तिरिति नः पक्षः । किं तर्ह्यनभ्यासदशायां प्रामाण्यसन्देहादपि प्रवृत्तिरिति । न चात्रेदं प्रतिपादनीयम् । यदि संशयादपि प्रवृत्तिः सम्पन्ना । तर्ह्यर्थक्रियाज्ञानात्प्रामाण्यनिश्चयेन किं प्रयोजनम् । प्रवृत्त्यर्थं हि प्रामाण्यनिश्चयः प्रार्थ्यते सा च सन्देहादपि जातेति । यतस्तत्र प्रामाण्यनिश्चयस्य तद्विषयसंशयापगम एव प्रयोजनं सुप्रतीतमिति किं प्रयोजनान्तरनिरूपणप्रयासेन । ननु प्रामाण्यगोचरसंशयापगमस्यापि किं प्रयोजनमिति चेत् । स्थाने प्रश्नः, किन्तु संशयापगमस्याभ्यासलक्षणमेव प्रयोजनं किं न परामृशसि । यदा ह्येकदाऽर्थक्रियाज्ञानात्प्रामाण्यं

१ 'ज्ञान' इति नास्ति भ. पुस्तके ।

निश्चितं भवति । तदा सुखेनैवान्यदाभ्यासात्स्वत एव प्रामाण्यनिश्चयपूर्विका प्रवृत्तिः सिद्ध्यति प्रतिपत्तृणामिति । एतेन निश्चितप्रामाण्यात्प्रवर्त्तकज्ञानात्प्रवृत्तावित्यादिना यच्चक्रकमकीर्त्ति । तदपि परास्तम् । यदि ह्यर्थक्रियाज्ञानादेकान्तेन प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चये सति प्रवृत्तिः प्रतिज्ञायेत । तदा स्याच्चक्रकदूषणावतारः । ननु प्रामाण्यसन्देहादपि प्रवर्त्तमानः कथं प्रेक्षावान् स्यादिति चेत्, न कथंचिदिति ब्रूमः । सन्देहात्प्रवर्त्तमानस्याप्रेक्षावत्त्वं कक्षीक्रियत एव । न खलु जात्या कश्चित्प्रेक्षावान्नाम समस्ति तदितरो वा । प्रेक्षावरणक्षयोपशमविशेषस्य हि सर्वत्र सर्वदा सर्वेषाममम्भवात् क्वचित्कदाचित्कश्चिदेव प्रेक्षावान् व्यवह्रियतेऽन्यत्र प्रक्षीणाशेषावरणादशेषवेदिनः । एकदा हि कश्चित्प्रेक्षावरणक्षयोपशयविशेषादवाप्तप्रेक्षावद्व्यपदेशः सुनिश्चितप्रामाण्यात् प्रमाणात् क्वचित्प्रवर्त्तते सोऽप्यन्यदा तथाविधक्षयोपशमानवाप्था समासादितप्रेक्षावद्व्यपदेशः संशयादेरपि क्वचित्प्रवर्त्तत इति न कश्चित्प्रतिनियतः प्रेक्षापूर्वकारी तदितरो वा । तथा चोक्तम् ॥ " प्रेक्षावत्ता पुनर्ज्ञेया कदाचित्कस्यचित् क्वचित् । अप्रेक्षाकारिताप्येवमन्यत्राशेषवेदिनः ॥ १ ॥ " इति ।

न च सन्देहात्प्रवृत्तिस्वीकारे प्रमाणमनोरथो व्यर्थः । प्रेक्षावत्प्रवृत्तौ तस्य सोपयोगत्वात् । प्रमाणं हि विना प्रेक्षावन्तः कथं कथं क्वचित्कदाचित्प्रवर्त्तन्तामिति । यत्रापि क्वचित्प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चये सति प्रवृत्तिस्तत्रापि नार्थक्रियाज्ञानात्तस्य प्रामाण्यनिश्चयो येन चक्रकमवतरेत् । किं तर्ह्यभ्यासदशायां स्वत एवानभ्यासावस्थायां तु परत एवानुमानादेः प्रमाणात् । तत्राभ्यासदशायां स्नानभोजनादिसाधनगोचरप्रमाणानां स्वत एव प्रामाण्यनिश्चयः सुप्रतीत एव । अनभ्यासदशायां त्वनुमानादित्थं प्रवर्त्तकज्ञानस्य प्रामाण्यनिश्चयः । यथा कश्चिदविदितवह्निस्वरूपः प्रमाता हेमन्ते हिमानीनिपातावबाधाविधुरितशरीरः तिरस्कृतस-

संदेहात्प्रवृत्तावपि प्रामाण्यज्ञप्तेः सोपयोगत्वम् ।

मस्तशीतावकाशं कमपि साग्निप्रदेशविशेषमुपसर्पन्नन्तराले ज्वलज्ज्वलनाभ्यासे सति तस्योष्णस्पर्शमसाधारणमवधार्य तद्रूपस्पर्शयोरविनाभावं विभाव्य च कालान्तरे दूरात्पुनः पावकरूपविलोकने सति समानोऽयं रूपप्रतिभासोऽभिमतार्थक्रियासाधन एवंविधरूपप्रतिभासत्वात् पूर्वोत्पन्नैवंविधरूपप्रतिभासवदित्यनुमानात्प्रवर्त्तकस्य साधननिर्मासिज्ञानस्य प्रामाण्यं निश्चित्य प्रवर्त्तत इति । कृषीवलादयोऽपि हि अनभ्यस्ते बीजादिगोचरे प्रथमं निहितमधुरनीरावसिक्तसुकुमारमृदि शरावादौ कतिपयशाल्यादिबीजकणगणवपनादिना बीजाबीजं निर्द्धार्य पश्चाद्दृष्टसाधर्म्येणानुमानात्परिशिष्टस्य बीजाबीजतया निश्चितस्योपादानाय हानाय च यतन्ते । तदनन्तरं पुनरभ्यस्ते बीजादिगोचरे परिदृष्टसाधर्म्यादिलिङ्गनिरपेक्षा एव निःशङ्कं कीनाशाः[1] केदारेषु बीजावपनाय प्रवर्त्तन्ते । यत्तु कथं चार्थक्रियाज्ञानस्यापि प्रामाण्यनिश्चय इत्यादिनाऽर्थक्रियाज्ञानलक्षणसंवादकज्ञानपक्षेऽनवस्थाऽन्योन्याश्रयदूषणमभाणि । तदप्युक्तिमात्रम्। अभ्यासदशायां संवादकस्य स्वत एवानभ्यासदशायां तु संवादकान्तरादेव प्रामाण्यप्रसिद्धेः । न च संवादकान्तरापेक्षायामनवस्था । संवादकान्तरैरनभ्यासदशापन्नैरेव भवितव्यमिति नियमाभावात् ।

स्वत एव प्रामाण्यज्ञप्तिरिति एकान्तिकमतस्य खण्डनम् ।

ये त्वमी स्वत एव प्रमाण्यज्ञप्तिं प्राजिज्ञपंस्तेषामात्मनिबन्धना वा आत्मीयनिबन्धना वा प्रामाण्यज्ञप्तिरभिप्रेता भवेत् । स्वशब्देऽत्रार्थद्वयस्यैव सम्भावनाभूमित्वात् । नाद्यः पक्षः श्रेयान् । बुद्धेरस्वसंविदितत्वेन तद्धर्मस्य प्रामाण्यस्याप्यस्वसंविदितत्वात् ; अथ द्वितीयपक्षाङ्गीकारेण येनैव प्रमाणेन प्रमाणत्वसम्मतं ज्ञानं निश्चीयते तेनैव तदाश्रितं प्रामाण्यमपीत्युच्यते । ननु किं प्रमाणं प्रमाणत्वसम्मतज्ञानस्य निश्चायकमिति । अर्थापत्तिरिति चेत् । मैवम् । तदुपस्थापकस्यार्थस्याभावात् । अर्थप्राकट्यमर्थापत्त्युपस्थापकोऽर्थोऽस्तीति चेत् । तत्किं यथार्थ-

[1] कीनाशाः—कृषीवलाः ।

त्वविशेषणविशिष्टं निर्विशेषणं वा । आद्यपक्षे तस्य यथार्थत्वविशेषणग्रहणं प्रथमप्रमाणादन्यस्माद्वा । प्रथमपक्षे परस्पराश्रयप्रसङ्गः । निश्चितप्रामाण्याद्धि प्रथमप्रमाणाद्यथार्थत्वविशिष्टार्थप्राकट्यग्रहणं तस्माच्च प्रथमप्रमाणप्रामाण्यनिश्चय इति । द्वितीयविकल्पे त्वनवस्था । अन्यस्मिन्पि हि प्रमाणे प्रामाण्यनिश्चायकार्थापत्त्युपस्थापकस्यार्थप्राकट्यस्य यथार्थत्वविशेषग्रहणमन्यस्मात्प्रमाणादिति निर्विशेषणं चेदर्थप्राकट्यमर्थापत्त्युपस्थापकम् । तर्ह्यप्रमाणेऽपि प्रामाण्यनिश्चायकार्थापत्त्युपस्थापनापत्तिः अर्थप्राकट्यमात्रस्य तत्रापि सद्भावात् । ततो न स्वत एव प्रामाण्यनिश्चयः ॥

तदित्थं ज्ञप्तिमाश्रित्यानभ्यस्ते विषये स्फुटम् ।
प्रामाण्यं परतः सिद्धमभ्यस्ते स्वत एव तु ॥ २५९ ॥

कारणानि स्वकार्याणि यथाकथंचित्कुर्वन्ति सन्ति स्वतो वा कुर्युः परतो वेति विचारस्य चतुरैरनाश्रयणान्नेह प्रामाण्यस्य कार्ये परिच्छेदम्[1] यथार्थे स्वतः परतो वा प्रवृत्तिरिति निरूप्यते । न खलु पिण्डः कुम्भं स्वतः परतो वा कुर्यादित्यर्थः कश्चित् पर्यालोचयति । ततश्च—

प्रामाण्यं स्वत एव नित्यमपरं तस्मात्परस्मादिति
प्राक्तं यत्किल युक्तितस्तदधुना नीतं कथाशेषताम् ॥
एवं चाप्रतिपक्षमत्र जयति प्रौढिं परामाश्रितं
स्याद्वादत्रिदशद्रुमामरगिरिर्जैनेश्वरं शासनम् ॥ २६० ॥

पूर्वाचार्यपरम्परापरिचितग्रन्थानुसारादिदं
सम्यैरप्यनुभूयमाननमनिशं दोषैरदत्ताम्पदम् ॥
मानानामुदितं स्वरूपमिह तद्येनाखिलोऽपि क्षितौ
लोकस्य व्यवहार एव घटते निःशङ्कितः संततम् ॥२६१॥

---

१ 'परिच्छेदः' इति प. म. पुस्तकयोः पाठः । २ 'आचार्यः' इति भ म. पुस्तकयोः पाठः । ३ 'वा' इति भ पुस्तके पाठः ।

विश्वारामाभिरामः सुचरितकुसुमच्छन्नशाखप्रशाखः
केषाञ्चित्प्राणभाजां सरणिमनुसरन्नेत्रयोः पुण्ययोगात् ॥
स्निग्धच्छायाकलापः कुशलशतमणीमञ्जरीजालमञ्जु-
र्जीयात्सेव्यः सुराणां जगति सुरतरुः सुव्रतः श्रीजिनेन्द्रः ॥२६२॥

सम्प्राप्ताः स्मृतिगोचरं सुमनसामद्यापि येषां गुणाः ५
सर्वाङ्गीणमपि क्षणेन पुलकालङ्कारमातन्वते ॥
येऽस्मिञ्जङ्गमधर्म्ममूर्त्तय इव क्षोणीतले रेजिरे
श्रीमन्तो मुनिचन्द्रसूरिगुरवस्ते सन्तु विघ्नापहाः ॥ २६३ ॥
किं दुष्करं भवतु तत्र मम प्रबन्धे
यत्रातिनिर्मलमतिः सततामियुक्तः ॥ १०
भद्रेश्वरः प्रवरयुक्तिसुधाप्रवाहो
रत्नप्रभश्च भजते सहकारिभावम् ॥ २६४ ॥ २१ ॥

इति सकलतार्किकवैयाकरणसैद्धान्तिकसहृदयकविचक्रचक्रवर्त्तिचारित्रचूडामणिसुगृहीतनामधेयश्वेताम्बराधिपश्रीमन्मुनिचन्द्रसूरिचरणसरसीरुहोपजीविना श्रीदेवाचार्येण विरचिते स्याद्वादरत्नाकरे प्रमाणनयतत्त्वालोकालङ्कारे प्रमाणस्वरूपनिर्णयो नाम प्रथमः परिच्छेदः ॥ १ ॥ १५

॥ अथ द्वितीयः परिच्छेदः ॥

॥ नमः श्रीगुरुपादपङ्कजेभ्यः ॥

प्रत्यक्षेण यदेकतानमनसः साक्षात्पुरोवर्त्तिनं
नासावंशनिवेशनिश्चलदृशः पश्यन्ति यं योगिनः ॥
यं चाद्यापि परोक्षमानवशतो निश्चिन्वते मादृशा-
स्तं सर्वज्ञमुपास्महे प्रतिकलं कल्याणसम्पत्तये ॥ २६५ ॥

प्रतिपादितं प्रमाणस्य स्वरूपमथ तत्संख्यामाह— ५

तत् द्विभेदं प्रत्यक्षं च परोक्षं चेति ॥ १ ॥

यत् स्वपरव्यवसायीत्यादि लक्षणतः स्वरूपेण प्रतिपन्नं प्रमाणं तद्विभेदं द्विप्रकारम् । तद्विभेदं प्रत्यक्षानुमानप्रकारेणापि माबोधीत्यभिमतं समग्रप्रमाणभेदसङ्ग्रहपरं संख्याप्रकारं स्पष्टयन्नाह प्रत्यक्षं च परोक्षं चेति ॥ अक्षमिन्द्रियं प्रति गतं कार्यत्वेनाश्रितं प्रत्यक्षं १०
" कुगतिप्राद्यः[1] " इति तत्पुरुषः । ततश्च " द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु[2] " परवल्लिङ्गतामतिषेधादभिधेयवल्लिङ्गतायां त्रिलिङ्गः प्रत्यक्षशब्दः सिद्धः । एवं च प्रत्यक्षं ज्ञानं प्रत्यक्षो बोधः प्रत्यक्षा बुद्धिरित्यादयो व्यपदेशाः प्रवर्त्तन्ते । अक्षमक्षं प्रति वर्त्तत इति प्रत्यक्षमिति त्वव्ययीभावे "अव्ययीभावश्च[3]" इत्यनेन सदा नपुंसकत्वं स्यात् । १५

---

१ ' गुरुपादुकाभ्यः ' इति भ. प. पुस्तकयोः पाठः । २ ' अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कलाः' इत्यमरः १-४-११, 'कला स्यात्कालशिल्पयोः' इत्यनेकार्थः २-४६५. ३ पाणिनिसू. २-२-१८. ४. 'अक्षि प्रति प्रत्यक्षं इति अव्ययीभावः' इति पाणिनिः ५-४-१०७. ५ 'द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु प्रतिषेधो वाच्यः' इति कात्यायनवार्तिकम् २-४-२६. ६ पा. सू. २ । ४ । १८.

नन्वेवं प्रत्यक्षशब्दस्य व्युत्पत्तौ कथमिन्द्रियानाश्रितस्य मानसस्यावधादेश्च[1] प्रत्यक्षव्यपदेशः स्यादिति चेत् । उच्यते ।

मानसप्रत्यक्षे प्रवृत्तिनिमित्तद्वारा प्रत्यक्षव्यपदेशोपपादनम् ।

प्रवृत्तिनिमित्तस्य तत्रापि सद्भावात् । अक्षाश्रितत्वं हि प्रत्यक्षशब्दस्य व्युत्पत्तिनिमित्तं गतिक्रियेव गोशब्दस्य । प्रवृत्तिनिमित्तं त्वेकार्थसमवायिनाऽक्षाश्रितत्वेनोपलक्षितमर्थसाक्षात्कारित्वं गतिक्रिययोपलक्षितं गोत्वमिव गोशब्दस्य । अन्यद्धि शब्दस्य व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम् । इतरथा गच्छत्येव गौर्गौरिति व्यपदिश्येत नापरो व्युत्पत्तिनिमित्ताभावात् । जात्यन्तरविशिष्टं च तुरगादिकं गतिक्रियापरिणतं व्युत्पत्तिनिमित्तसद्भावाद्गोशब्दाभिधेयं स्यात् ।

तथाऽक्षेभ्यः परतो वर्त्तत इति परोक्षमिति निपातनात्[2] सिद्धिः ।

परोक्षशब्दस्य व्युत्पत्तिः ।

अक्षव्यापारनिरपेक्षं मनोव्यापारेणासाक्षादर्थपरिच्छेदकं यज्ज्ञानं तत्परोक्षमित्यर्थः । चशब्दौ प्रत्यक्षपरोक्षयोस्तुल्यकक्षतां लक्षयतः । द्वयोरपि तयोः स्वपरव्यवसायिज्ञानत्वेन प्रामाण्यं प्रति विशेषाभावात् । तेन यदेकं व्याकुर्वन्ति प्रत्यक्षं सकलप्रमाणज्येष्ठमिति । तत्प्रत्यादिष्टं भवति ।

अथोच्यते प्रत्यक्षं ज्येष्ठं प्रमाणं स्वार्थनिर्णीतावन्यानपेक्षत्वादिति ।

प्रत्यक्षं सकलप्रमाणज्येष्ठमिति मतस्य खण्डनम् ।

तर्ह्यनुमानमपि ज्येष्ठमस्तु तत एव । न हि तदपि तस्यामन्यापेक्षम् । स्वोत्पत्तौ तदन्यापेक्षमिति चेत् । प्रत्यक्षमपि स्वोत्पत्तावन्यापेक्षमेव । तत्स्वनिमित्तमक्षादिकं तत्रापेक्षते न पुनः प्रमाणमन्यदिति चेत् । अनुमानमपि तथैव । न हि तदपि निश्चितं लिङ्गं हेतुमपेक्ष्य जायमानमन्यत्प्रमाणमपेक्षते । यत्तु लिङ्गस्वरूपग्राहिप्रमाणं तदनुमानोत्पत्तिकारणमेव न भवति । लिङ्गपरिच्छित्तावेव चरितार्थत्वात् । अथ

---

१ अवधिमनःपर्यवकेवलानि मानसज्ञानानि । लक्षणानि अग्रे २१-२२-२३ सूत्रेषु द्रष्टव्यानि । २ 'परोक्षे लिट्' पा. सू. ३-२-११५ इति निपातनात् ।

प्रत्यक्षपूर्वकं प्रमाणान्तरं प्रवर्त्तत इति प्रत्यक्षं ज्येष्ठम्। मैवम्। कस्यचित्प्रत्यक्षस्यापि प्रमाणान्तरपूर्वकत्वात्। तथा हि। वयस्य विलोकय भयादतितरलतारकः कुरङ्गपोतकोऽयं तरसा धरित्रीतलमाक्रामतीत्याद्याप्तशब्दात् कुरङ्गपोतकगोचरं तथा स्मृत्यादेः कुतूहलाकुलितस्य प्रतिपत्तुर्वनदेवकुलादिपदार्थविषयं प्रत्यक्षं शब्दपूर्वकं स्मृत्यादिपूर्वकं च प्रवर्त्तमानं दृष्टमिति। अथ प्रत्यक्षपूर्वकमेव प्रमाणान्तरं प्रवर्त्तते। प्रत्यक्षं तु प्रमाणान्तरपूर्वकमन्यथापीति तदेव ज्येष्ठम्। नैतदपि साधिष्ठम्। अवधारणस्यासिद्धेः। अनुमानस्य तर्कपूर्वकत्वेन व्यवस्थितेः। अथ तर्कस्यापि प्रत्यक्षपूर्वकत्वात्तत्पूर्वकस्यानुमानस्यापि परम्परया प्रत्यक्षपूर्वकत्वमिति चेत्। मैवम्। अनुमाने तर्कस्य प्रत्यक्षपूर्वकत्वासम्भवात्। अथ विशब्दावभासित्वात् प्रत्यक्षं ज्येष्ठम्। तर्हि द्विचन्द्राद्यवभासिसंवेदनस्यापि ज्येष्ठत्वापत्तिरिति।

प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकमतस्योपपादनपूर्वकं खण्डनम्।

चार्वाकचर्चाचतुरोऽथ कश्चि-
देवं ब्रवीति स्फुरिताभिमानः॥
प्रत्यक्षमेकं घटते प्रमाणं
निरूप्यमाणं न पुनः परोक्षम् ॥२६६॥

तथाहि नानुमानं तावत्प्रमाणं गौणत्वात्। पक्षधर्मत्वं हि तज्जनकस्य हेतोः स्वरूपम्। पक्षश्च धर्म्मधर्म्मिसमुदायात्मा। तदनिश्चये कथं तद्धर्मतायाहेतौ निश्चयः। तन्निश्चये वानुमानवैफल्यम्। ततोऽवश्यं पक्षधर्मव्यवहारसिद्धये धर्मधर्मिसमुदाये रूढोऽपि पक्षशब्दस्तदेकदेशे धर्मिण्युपचरणीयः। तस्मादित्थं पक्षस्य गौणत्वम्। तद्गौणत्वे च हेतोरपि गौणता। तद्धर्मत्वलक्षणत्वात्तस्य। तस्माद्गौणकारणजन्यत्वेन गौणमनुमानम्। गौणत्वाच्च न प्रमाणम्। अपि चार्थव्यवसायहेतुः प्रमाणं भवतीति सकलहृदयप्रतीतम्। अनुमानाच्चार्थव्यवसायो दुःशकः। तथा हि प्रतीयमानादर्थादर्थान्तरप्रतीतिरनुमानम्। प्रतीयमानश्चार्थोऽर्थान्तरेण सम्बद्ध-

१ व्यवसायो-निश्चयः।

स्तस्य गमको भवेदसम्बद्धो वा । न तावदसंबद्धः । अतिप्रसक्तेः । अथ सम्बद्धः । ननु कुतस्तस्य तेन सम्बन्धसिद्धिः प्रत्यक्षादनुमानाद्वा । न तावत्प्रत्यक्षात् । अस्य प्रतिनियतदेशकालाकारगोचरचारितया सार्वत्रिकतत्सम्बन्धग्रहणशक्तेरभावात् । नाप्यनुमानात् । अनवस्था-
५ प्रसक्तेः । तदपि संबन्धग्रहणे सति यतः प्रवर्त्तते सम्बन्धग्रहश्च तत्राप्यनुमानान्तरादिति । किं चावस्थादेशकालभेदाद्भिन्नशक्तित्वेन भिन्नार्थक्रियाकारिणां भावानां सामस्त्येन स्वभावप्रतिबन्धः केनापि न निश्चेतुं शक्यः । शतशोऽप्यामलक्यादिफलानां कषायरसे स्वाद्यमाने क्षीरादेरवसेकेन माधुर्योपलम्भात् । तदुक्तम् । " अवस्थादेशकालानां
१० भेदाद्भिन्नासु शक्तिषु । भावानामनुमानेन प्रतीतिरतिदुर्लभा ॥ १ ॥" इति । न च साध्ये सत्येव साधनस्योपलम्भादसति चानुपलम्भादेव साध्य-साधनसंबन्धसिद्धिरिति वाच्यम् । साधनानुपलम्भस्य साधनसद्भावे साधनाभावे च सम्भवात् । यत्र ह्यनग्नौ धूमो न दृश्यते तत्र प्रमातुः शक्त्यभावः करणस्य सामर्थ्यविरहो धूमस्याभावो वानुपलम्भे कारण-
१५ मिति । अपि चानुमानस्य धर्मी धर्मस्तत्समुदायो वा साध्यः स्यात् । तत्राद्यपक्षोऽनुपपन्नः । धर्मिणः प्रसिद्धत्वेन साधनवैफल्यसंसक्तेः । हेतोरनन्वयत्वानुपङ्गाच्च । न खलु यत्र यत्र धूमस्तत्र तत्र पर्वतनितम्ब इत्यन्वयः सम्भवति । द्वितीयपक्षेऽपि धर्मः सामान्यरूपो विशेषरूपो वा साध्यः स्यात् । तत्र सामान्यरूपे सिद्धसाधनम् । न च तन्मात्रप्रतीतौ
२० किञ्चित्फलमुपलभामहे । न हि वह्नित्वं दाहपाकादावुपयुज्यमानं प्रतीतम् । किं च सामान्यात्प्रतीतात्प्रवर्त्तमानः प्रतिपत्ता कथं नियत-दिगभिमुखमेव प्रवर्त्तते । न हि सामान्यं नियतदिक्कम् । सकलव्यक्ति-व्यापित्वाभावप्रसक्तेः । अथ सामान्यस्य व्यक्तिं विनानुपपत्तेः प्रतीते तस्मिन्नन्यथानुपपत्त्या व्यक्तिप्रतीतेर्नियमेन प्रवृत्तिरित्युच्यते । ननु सामा-

१ ' स नियतः ' इति प. पुस्तके पाठः । २ वा. प. का. १०.

न्यमभिमतया व्यक्त्या विना नोपपद्येत व्यक्तिमात्रेण वा । न तावदभिमतया, व्यक्त्यन्तरेऽप्यस्य सम्भवात् । द्वितीयपक्षे तु व्यक्तिमात्रप्रतीतावप्यभिमतव्यक्तिप्रतीत्यर्थं पुनर्यत्नान्तरमास्थेयमिति । विशेषरूपस्य च धर्मस्य साध्यत्वे नान्वयहेतुर्भवेत् । न ह्यत्रत्येदानींतनेन खादिरादिस्वभावेन वह्निना वह्निमान्पर्वतनितम्ब इत्यत्र विशेषे सान्वयः सङ्गच्छते । महानसादौ दृष्टान्ते तथाविधसाध्येन समं धूमस्य व्याप्त्यप्रतीतेः । तन्न धर्मोऽपि साध्यः । नापि तत्समुदायः । तस्याप्यन्यत्रानन्वयात् । न हि यत्र यत्र धूमस्तत्र तत्र वह्निमान्पर्वतनितम्ब इत्यन्वयः प्रतीतिधुरामधिरोहति । मूलानुमानविषयापहारिणोऽनुमानविरोधस्य विशेषविरुद्धापराभिधानस्येष्टविघातकृतः सन्देहहेतोर्विरुद्धाव्यभिचारिणो वा सर्वत्रानुमाने सम्भाव्यमानत्वाच्च दुष्प्रापं प्रामाण्यम् । तदुक्तम् ।

" विशेषेऽनुगमाभावात्सामान्ये सिद्धसाधनात् ।
तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः ॥ १ ॥
अनुमानविरोधो वा यदि वेष्टविघातकृत् ।
विरुद्धाव्यभिचारस्तु सर्वत्र सुलभोदयः ॥ २ ॥ "

इति । किंच ।

देशकालदशाभेद-विचित्रात्मसु वस्तुषु ॥
अविनाभावनियमो न शक्यो लब्धुमञ्जसा ॥ २६७ ॥
भवन्नप्यविनाभावः परिच्छेत्तुं न शक्यते ॥
जगत्त्रयगताशेषपदार्थालोचनाद्विना ॥ २६८ ॥
न चाध्यक्षीकृता यावद्धूमाग्निव्यक्तयोऽखिलाः ।
तावत्स्यादपि धूमोऽसौ योऽनग्नेरिति शक्यते ॥ २६९ ॥
ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः ।
किं दिव्यचक्षुषां तेषामनुमाने प्रयोजनम् ॥ २७० ॥

---

१ अविनाभावो-व्याप्तिः । २ ' प्रत्यक्षीकृता ' इति प. पुस्तके पाठः ।

सामान्यद्वारकोऽप्यस्ति नाविनाभावनिश्चयः ।
वास्तवं हि न सामान्यं नाम किंचन विद्यते ॥ २७१ ॥
भूयोदर्शनगम्यापि न व्याप्तिरवकल्पते ।
सहस्रशोऽपि नेदृष्टौ व्यभिचारावधारणात् ॥ २७२ ॥
बहुकृत्वोऽपि वस्त्वात्मा तथेति परिनिश्चितः ।
देशकालादिभेदेन दृश्यते पुनरन्यथा ॥ २७३ ॥
भूयोदृष्ट्या च धूमोऽग्निसहचारीति गम्यताम् ।
अनग्नौ तु स नास्तीति न भूयोदर्शनाद्गतिः ॥ २७४ ॥
न चाप्यदृष्टिमात्रेण गमकः सहचारिणः ।
तत्रैव नियतत्वं हि तदन्याभावपूर्वकम् ॥ २७५ ॥
नियमस्यानुमांगत्वं गृहीत्वा प्रतिपद्यते ।
ग्रहणं चास्य नान्यत्र नास्तितानिश्चयं विना ॥ २७६ ॥
दर्शनादर्शनाभ्यां तु नियमग्रहणं यदि ।
तदप्यसदनग्नौ हि धूमस्येष्टमदर्शनम् ॥ २७७ ॥
अनग्नि च क्रिया सर्वं जगज्ज्वलनवर्जितम् ।
तत्र धूमस्य नास्तित्वं नैव पश्यन्ति योगिनः ॥ २७८ ॥
तदेवं नियमाभावात्सत्यपि ज्ञप्त्यसम्भवात् ।
अनुमानप्रमाणत्वदुराशा परिमुच्यताम् ॥ २७९ ॥
स्मृत्यादिकेऽपि विज्ञाने प्रमाणत्वमनोरथः ।
त्यज्यतां येन संवादः स्वार्थे तस्यातिदुर्लभः ॥ २८० ॥

एवं चाध्यक्षमेकं कलयति जगतीमण्डले मानमुद्रा-
मन्यत्स्वर्गापवर्गप्रकटननिपुणं नैव किंचित् प्रमाणम् ॥
तस्मात्स्वान्तानुकूलं कवलयत सदा दत्त वित्तं प्रियेभ्यो
मा मा धूर्त्तोपदेशैर्वत कुरुत वृथा वञ्चनीं स्वस्य मुग्धाः ॥२८१॥

---

१ 'हि दृष्टौ' इति म. पुस्तके पाठः । २ 'च स्वात्मा' इति म. पुस्तके पाठः । ३ 'नान्य' इति म. पुस्तके पाठः ४ 'पश्यन्त्ययोगिनः' इति प. पुस्तके पाठः ।

चार्वाकतस्कर किमित्थमरे निकामं
निर्लज्ज गर्ज्जसि विसर्प्पदनल्पदर्प्पात् ।
किं नैव पश्यसि पुरः पततः परोक्ष-
प्रामाण्यसाधकसुयुक्तिदृढप्रहारान् ॥ २८२ ॥

तथा हि यत्तावदूचे प्रत्यक्षमेकं घटते प्रमाणमिति । तन्न सुघटम्। ५
यतः स्वपरव्यवसायिज्ञानत्वं प्रमाणस्य स्वरूपं तस्य च परोक्षेऽप्यनुमानादौ विद्यमानत्वात्कथं प्रत्यक्षमेकं प्रमाणमिति नियमः साधीयान् । तथा हि अनुमानादिकं प्रमाणं स्वपरव्यवसायित्वात्प्रत्यक्षवदिति युक्तिमाकलयन् कः सचेताः प्रामाण्यमनुमानादेर्निह्नुवीत । यच्चोक्तं नानुमानं तावत्प्रमाणं गौणत्वादित्यादि । तत्र यदि नाम संक्षिप्तासंक्षिप्तचेतोभिः शास्त्रकारैर्धर्मधर्मिसमुदाये संकेतितोऽपि पक्षशब्दस्तदैकदेशे धर्मिण्युपचारेण प्रयुक्तो भवेन्नैतावता शास्त्रे पक्षशब्दात्प्रतिपत्तौ धर्म्मिणो गौणता । अनुमानसमये पुनः प्राकृतैरिव तार्किकैरप्यप्रयुक्तपक्षशब्दैरेव धर्मिणः प्रत्यक्षतः प्रतीयमानत्वे कथं गौणता । तदगौणतायां च तदधिकरणस्य हेतोरप्यगौणत्वात्कथं तज्जन्यस्यानुमानस्य गौणत्वं गदितुमनुगुणम् । यच्चोक्तं तत्त्ववृत्तावुद्भटेन " लक्षणकारिणा लाघविकत्वेनैव शब्दविरचनव्यवस्था, न चैतावताऽनुमानस्य गौणता, यदि च साध्यैकदेशधर्मिधर्मत्वं हेतो रूपं ब्रूयुस्ते, तदा न काचिल्लक्षणेऽपि गौणी वृत्तिः" इति । यत्तु तेनैव परमलोकायतम्मन्येन लोकव्यवहारैकपक्षपातिना लोकप्रसिद्धधूमाद्यनुमानानि पुरस्कृत्य शास्त्रीयस्वर्गादिसाधकानुमानानि निराचिकीर्षता " प्रमाणस्य गौणत्वादनुमानादर्थनिश्चयो दुर्लभः " इति पौरन्दरं[3] सूत्रं पूर्वाचार्यव्याख्यानतिरस्कारेण व्याख्यानयता इदमभिहितं " हेतोः स्वसाध्यनियमग्रहणे प्रकारत्रयमिष्टं दर्शनाभ्यामविशिष्टाभ्यां दर्शनेन

१ अनुगुणं-सदृशम् । २ ' लक्षणकाराणां' इति म. पुस्तके पाठः । ३ पुरन्दरनामकः कश्चित् ग्रन्थकारः ।

विशिष्टानुपलब्धिसहितेन भूयोदर्शनप्रवृत्त्या च लोकव्यवहारपतितया, तत्राद्येन ग्रहणोपायेन ये हेतोर्गमकत्वमिच्छन्ति तान् प्रतीदं सूत्रं लोकप्रसिद्धेष्वपि हेतुषु व्यभिचारादर्शनमस्ति तन्त्रसिद्धेष्वपि तेन व्यभिचारादर्शनलक्षणगुणसाधर्म्यतः तन्त्रसिद्धहेतूनां तथाभावो व्यवस्थाप्यत इति गौणत्वमनुमानस्य । अव्यभिचारावगमो हि लौकिकहेतूनामनुमेयावगमे निमित्तं स नास्ति तन्त्रसिद्धेष्विति न तेभ्यः परोक्षार्थावगमो न्याय्योत इदमुक्तमनुमानादर्थनिश्चयो दुर्लभ इति " इति । तदेतत्तस्य वचनं दर्शनादर्शनमात्रेण हेतुव्याप्तिग्रहणवादिनो जैमिनीयान्नोति न पुनस्तर्कोल्यसुदृढप्रमाणेन सर्वत्र साधनसंबन्धबोधाभिधायिनो जैनान् । यथैव हि तर्कप्रमाणेन लौकिकहेतूनामव्यभिचारनिश्चयः कर्तुं शक्यस्तथा तन्त्रप्रसिद्धहेतूनामपीति कथं न तेभ्योऽपि स्वसाध्यप्रतिपत्तिः । न वाऽवश्यं बौद्धैरिवास्माभिरपि पक्षधर्मत्वं हेतोः स्वरूपमिष्यते । येन गौणहेतोर्जायमानमनुमानमपि गौणं स्यात् । अन्यथानुपपत्तेरेव तत्स्वरूपत्वेन स्वीकरणात् । तन्न गौणत्वादनुमानस्याप्रामाण्यं वक्तुं युक्तमिति । अथास्पष्टस्वरूपत्वात्, स्वार्थनिश्चये परापेक्षत्वात्, प्रत्यक्षपूर्वकत्वात्, अर्थादनुपजायमानत्वात्, अवस्तुविषयत्वात्, बाध्यमानत्वात्, साध्यसाधनयोः प्रतिबन्धसाधकप्रमाणाभावाद्वा तस्याप्रामाण्यमुच्यते । तदप्यनुचितम् । यतो न तावदस्पष्टस्वरूपत्वादप्रामाण्यमनुमानस्य घटते । यदि हि स्पष्टत्वं प्रमाणलक्षणं भवेत्तदिदानीमनुमानान्निवर्त्तमानं प्रामाण्यमादाय निवर्त्तत इत्यप्रामाण्यमस्योपपन्नं स्यात् । न चैतत्प्रमाणलक्षणलक्षणम् । द्विचन्द्रादिज्ञाने स्पष्टत्वस्य सद्भावेऽपि प्रामाण्यासम्भवात् । स्वार्थनिश्चये परापेक्षत्वमप्यनुमानस्य नावश्यंभावि । प्रत्यक्षवत्तस्य तन्निश्चयेऽभ्यासावस्थायां परनिरपेक्षत्वात् । अनभ्यासावस्थायां तु स्वार्थनिश्चये परापेक्षत्वं प्रत्यक्षस्यापि विद्यते ।

---

१ तत्स्वरूपत्वेन–हेतुस्वरूपत्वेन । २ 'लक्षण' इति नास्ति प. म. पुस्तकयोः ।

प्रत्यक्षपूर्वकत्वं चानुमानस्यासिद्धम् । तर्काख्यप्रमाणपूर्वकत्वेन तस्याभिधास्यमानत्वात् । अस्तु वा प्रत्यक्षादेवानुमानस्य जन्म तथापि नाप्रामाण्यम् । प्रत्यक्षं ह्यनुमानस्य जन्मनि निमित्तम् । स्वसामग्रीतश्चोपजायमानस्य तस्याप्रामाण्ये प्रत्यक्षस्यापि तत एवाप्रामाण्यापत्तिः । किं च प्रत्यक्षपूर्वकत्वेनानुमानस्याप्रामाण्ये प्रत्यक्षस्यापि कस्यचिदनुमानपूर्वकत्वेनाप्रामाण्यानुषङ्गः । दृश्यते हि सामर्थ्यमनुमानान्निश्चित्य प्रवर्त्तमानस्य प्रमातुरनुमानपूर्विका प्रत्यक्षप्रवृत्तिः । अर्थादनुपजायमानत्वमप्यनुमानस्याघटमानम् । प्रत्यक्षवत्तस्याप्यर्थादुत्पत्तेरनुभूयमानत्वात् । अवस्तुविषयत्वं चास्यासिद्धम् । प्रत्यक्षवत्सामान्यविशेषात्मकार्थगोचरत्वात्तस्य । न ह्यवस्तुभूतापोहगोचरमनुमानं सौगतवर्त्मनैरिष्टम् । तत्र तद्गोचरत्वस्य निराकरिष्यमाणत्वात् । बाध्यमानत्वं च सम्यगनुमानस्यानुमानाभासस्य वा । प्रथमपक्षोऽनुपपन्नः । सत्यधूमादिसाधनादग्न्याद्यनुमाने बाध्यमानत्वस्यासम्भवात् । अनुमानाभासस्य तु तत्सम्भवे तस्यैवाप्रामाण्यं युक्तं न सम्यगनुमानस्य । अन्यथा प्रत्यक्षाभासस्य बाध्यमानत्वेनाप्रामाण्योपलम्भात्सम्यक्प्रत्यक्षस्याप्यप्रामाण्यापत्तिः । साध्यसाधनयोः प्रतिबन्धग्राहकप्रमाणाभावश्चासिद्धः । तर्काख्यप्रमाणस्य तद्ग्राहकस्य सद्भावात् । तथा च सति ननु कुतस्तस्य तेन सम्बन्धसिद्धिः प्रत्यक्षादनुमानाद्वेत्यादि प्रागुद्दिष्टं प्रत्यादिष्टम् । सार्वत्रिकसम्बन्धप्रतीतौ च यथा तर्कस्य सामर्थ्यं तथा कथयिष्यत इति ।

तस्माद्बृहस्पतिमतोपनिपात्रियेण
प्रोक्ता प्रमाविमुखताऽनुमिताविया या ।
इत्थं विकल्पपरशुप्रबलप्रहारैः
सा चिच्छिदे सपदि मूलत एव सभ्याः ॥ २८३ ॥

किं च यथार्थं प्रमाणं नायथार्थमिति यदा परः प्रतिपाद्यते त्वया । तदा काश्चिदयथार्थाः प्रामाण्यव्यक्तीः परित्यज्य यथार्थाश्चाभ्युपगम्य

यदीदृशं तत्प्रमाणं नान्यादृशमिति तं प्रति प्रतिपादनीयम् । एतच्चानुमानाद्विना न प्रतिपादयितुं शक्यम् । न खलु पुरोवर्त्तिवर्त्तमानप्रतिनियतरूपत्वादिविषयोपारूढेन प्रत्यक्षेणैतत्प्रतिपादयितुं पार्यते । परश्च बुद्धिमत्त्वेन स्तम्भादिभ्यो विलक्षणः प्रतिपाद्यमानार्थग्रहणसमर्थो निश्चितः सन् प्रतिपाद्यो भवति । न च तन्निश्चयेऽनुमानादन्यस्य सामर्थ्यम् । प्रत्यक्षस्य रूपादिविषयप्रतिपत्तावेव सामर्थ्यात् । कथं चानुमानानभ्युपगमे स्वस्याप्यवस्थापितप्रमाणप्रमेयव्यतिरिक्तप्रमाणप्रमेयस्य निषेधः । प्रत्यक्षमात्रासामर्थ्यात् । तदुक्तं कीर्त्तिना, **" प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥ १ ॥ "** इति । अस्यार्थः । अवश्यमयं चार्वाकोऽनुमानमपवदमानः प्रमाणाप्रमाणयोः स्थितिं स्थापयितुमनुमानं मन्येत । तदपवादे सैव तयोः स्थितिर्न घटते । तदा हि न घटेत यदि न सामान्येन क्रियते । सामान्येन च कर्त्तव्या । अनुभूताननुभूतस्वपरसन्तानवर्त्तिप्रमाणाप्रमाणव्यक्तिव्याप्त्या क्रियते यतः । तादृशी च प्रत्यक्षमात्रप्रमाणवादिनः शक्यक्रिया।प्रमाणेतरलक्षणयोगिनीनां विज्ञानव्यक्तीनां सर्वासामप्रत्यक्षत्वात् । प्रत्यक्षाणां च परेभ्योऽनुपदेश्यत्वात् । अत उक्तम् । प्रमाणेतरसामान्यस्थितेः प्रमाणान्तरसद्भाव इति तथाऽन्यधियो गतेः परचित्तज्ञानात् । अन्यदीया हि धीः कायवाग्व्यापारव्यवहाराभ्यां कार्यलिङ्गाभ्यामनुमीयते न प्रत्यक्षेणेक्ष्यते । कस्यचिच्च प्रतिषेधात् । न ह्यनुपलब्धिलिङ्गमनुमानमन्तरेण क्वचित् किंचित्प्रतिषेद्धुं शक्यते । तदनेन सूत्रेण त्रिविधत्रिरूपस्वभावकार्यानुपलब्धिलिङ्गानुमानसद्भावः परेणाप्यभ्युपगतोऽन्यथा व्यवहारविलोपप्रसंगादित्युक्तमिति । किं चानुमानस्यापह्नवस्तत्स्वरूपाभावान्निरवद्यतल्लक्षणाभावाद्वा स्यात् । न तावत्तत्स्वरूपाभावात् । तत्स्वरूपस्य सकलजनप्रतीतत्वात् । न चेदमसिद्धम् , यतः

१ धर्मकीर्त्तिना । २ परेण-चार्वाकेण ।

गोपालोऽपि प्रबलविगलद्बाष्पबिन्दुप्रबन्धे ।
नेत्रे कर्तुर्मधुरमधुयुग्मज्ञरीम्लानिहेतोः ॥
धूमोत्पीडात्कचिदपि समालोक्यमानात्प्रदेशे ।
जानात्येव ज्वलनमखिलक्षिप्तशङ्कावकाशः ॥ २८४ ॥

कथं चानुमानस्वरूपापलापे प्रत्यक्षमेव प्रमाणमगौणत्वादित्यनुमानमुद्रया परम्प्रतिपादयतस्तव स्ववचनविरोधो न स्यात् । तथा च ।

सद्भावमेस्यति सदाऽनुमितेर्मतस्य
स्वीयस्य सिद्धिमनयैव च सन्तनोति ॥
आभात्यलौकिकममुष्य मनीषिलोके
लोकायतस्य सकलं चरितं तदेतत् ॥ २८५ ॥

निरवद्यतल्लक्षणाभावादित्यप्ययुक्तम् । हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानमित्यादेर्निरवद्यतल्लक्षणस्याग्रे वक्ष्यमाणत्वात् । यदप्यवस्थादेशकालभेदादित्याद्यभिहितम् । तदप्यभिधानमात्रम् । तर्कास्यप्रमाणमाहात्म्यतः सम्यगवगतायां व्याप्तौ लिङ्गस्य स्वसाध्ये व्यभिचाराभावात् । यत्र तु व्यभिचारस्तत्र प्रमातुरेवापराधो नानुमानस्य । तदाहुः । " **प्रमातुरपराधोऽयं विशेषं यो न पश्यति । नानुमानस्य दोषोऽस्ति प्रमेयाव्यभिचारिणः ॥१॥** " यदप्युक्तं तत्र प्रमातुः शक्त्यभावः करणस्य सामर्थ्यविरहो धूमस्याभावो वानुपलम्भे कारणमिति । तदप्यसत् । प्रमातुः करणस्य च सामर्थ्यसद्भावनिश्चये यो धुमानुपलम्भस्तस्य धूमाभावेनैव प्रयुक्तत्वाद्धूमाभावस्य चाग्न्यभावप्रयुक्तत्वेन निर्णयात्साध्यसाधनसंबन्धसिद्धिः । यच्चान्यज्जल्पितं अनुमानस्य धर्म्मी धर्मस्तत्समुदायो वा साध्यः स्यादित्यादि । तदपि न युक्तिमाक्रन्दति । प्रयोगकालापेक्षया साध्यस्य भेदात् । व्याप्तौ हि साध्यं धर्मसामान्यं प्रयोगकाले तु तद्विशिष्टो धर्मीति वक्ष्यति । ततः कथं सिद्धसाधनं

---

१ ' असूच् क्षेपणे अस्यति क्षिपति ।' हैमधा. पा. ४-७८. २ ' तदा ' इति म. पुस्तके पाठः । ३ ' सिद्धेः ' इति प. पुस्तके पाठः ।

हेतोरनन्वयो वा भवेत् । यदपि मूलानुमानविषयापहारिण इत्यादि प्रत्यपादि । तदपि न चतुरस्रम् । सम्यक्साधने प्रयुक्तेऽनुमानविरोधादिपांसुप्रकरपातानामसम्भवात् । उक्तं च तन्त्रवृत्तौ भट्टोद्भटेन " **सर्वश्च दूषणोपनिपातोऽप्रयोजकहेतुमात्रामनीन्यप्रयोजकविषया विरुद्धानुमानविरोधविरुद्धाव्यभिचारिण** " इति । एवं च देशकालदशाभेदेत्यादिकारिकाकदम्बकमपि विडम्बितमवबोद्धव्यम् । यदप्युक्तं स्मृत्यादिकेऽपीत्यादि । तदप्यनुपपन्नम् । स्वार्थे संवादस्य स्मृत्यादिकेऽपि प्रमाणे समर्थयिष्यमाणत्वात् ।

एवं स्वर्गापवर्गप्रकटनविहितौ बद्धकक्षे परीक्षे
सम्प्राप्ते मानभावं झटिति विघटितो नास्तिकस्याभिसन्धिः ॥
तस्मादास्तिक्यमेकं मनसि शुभलतोल्लासजीमूतकल्पं
मत्वा सद्धर्मकर्म प्रतनुत सततं स्वेष्टसिद्धयै विदग्धाः ॥२८६॥"

अत्राह **सौगतः** । "**प्रत्यक्षं च परोक्षं च द्वित्वमेवं न युज्यते ।**
प्रत्यक्षमनुमानं चेन्येतत्तु घटतेतराम् ॥ १ ॥

प्रत्यक्षमनुमानमिति द्वयमेव प्रमाणमिति सौगतमतस्योपपादनपूर्वकं खण्डनम् ।

आः कुमते मैवं वोचः । यतः स्वलक्षणसामान्यात्मप्रमेयद्वैविध्यात्प्रमाणद्वैविध्यमित्याकूतं भवतः तदनुचितम् । तथाविधप्रमेयद्वैविध्यस्यासम्भवात् ।

एक एव हि सामान्यविशेषात्मार्थः प्रमेयः प्रमाणस्येति पुरस्तादुपपादयिष्यते । यदि च प्रत्यक्षस्य स्वलक्षणमात्रविषयत्वमिष्यते । तदा ततः स्थिरस्थूराद्याकाराध्यवसायेन प्रवृत्तिर्न स्यात् ।

विज्ञानमन्यगोचरमन्यत्रार्थे प्रवर्त्तकमितीदम् ॥
व्यक्तं भवता कैतवमभ्यस्तं सौगत कुतोऽपि ॥ २८७ ॥

भवतु वा प्रमेयद्वित्वं तथापि तत्प्रमाणद्वित्वस्य ज्ञातमज्ञातं वा ज्ञापकं भवेत् । यद्यज्ञातम्, तर्हि तस्य सर्वत्राविशेषात्सर्वेषामप्यविशेषेण[1] तत्प्रतिपत्तिप्रसङ्गतो विप्रतिपत्तिर्न स्यात् । ज्ञातं चेत्, कुतस्तस्य

१ 'विशेषेण' इति भ. पुस्तके पाठः ।

ज्ञप्तिः । प्रत्यक्षादनुमानाद्वा । न तावत्प्रत्यक्षात् । तेन सामान्यस्याग्रहणात् । ग्रहणे वा तस्य सविकल्पकत्वप्रसक्तिर्विषयसंकरश्च प्रमाणद्वित्वविरोधी भवतः प्रसज्येत । नाप्यनुमानात्, तेन स्वलक्षणस्याग्रहणात् । स्वलक्षणपराङ्मुखतया हि भवतानुमानमभ्युपगतम् । द्वाभ्यां प्रमेयद्वित्वस्याज्ञानेऽन्यतरस्यापि प्रमाणद्वित्वज्ञापकत्वायोगः । अन्यथा देवदत्तयज्ञदत्ताभ्यां प्रतिपन्नाद्भूमद्वित्वात्तदन्यतरस्याग्निद्वित्वप्रतिपत्तिः स्यात् । द्वैविध्यमिति द्विष्ठो धर्मः । स च द्वयोर्ज्ञाने ज्ञायते नान्यथा । न ह्यज्ञातसह्यविन्ध्यस्य प्रतिपत्तुस्तद्गतद्वित्वप्रतिपत्तिरस्ति । प्रमाणद्वित्वात्तु प्रमेयद्वित्वज्ञप्तिस्वीकारे परस्पराश्रयदोषानुषङ्गः । सिद्धे हि प्रमेयद्वित्वेऽतः प्रमाणद्वित्वसिद्धिस्तस्याश्च प्रमेयद्वित्वसिद्धिरिति । अथान्यतः प्रमाणाद्वित्वस्य सिद्धिः । व्यर्थस्तर्हि प्रमेयद्वित्वोपन्यासः । ननु प्रत्यक्षानुमानयोः स्वसंवेदनप्रत्यक्षसिद्धत्वात्प्रत्यक्षसिद्धमेव प्रमाणद्वित्वम् । केवलं यस्तथाप्रतिपद्यमानोऽपि न व्यवहरति स प्रसिद्धेन प्रमेयद्वैविध्यव्यवहारेण प्रवर्त्त्यत इति चेत् । तदप्यसारम् । प्रमेयद्वैविध्यस्यासिद्धत्वेनाभिहितत्वात् । ननु मा सिध्यतु प्रमेयद्वैविध्यं तथापि न प्रमाणद्वित्वं व्याहरति रागादीनामनुमानादनर्थान्तरत्वात् । शब्दादिकं हि परोक्षणार्थेन सह सम्बद्धमसम्बद्धं वा तस्य गमकम् । न तावदसम्बद्धम् । अतिप्रसङ्गात् । सम्बद्धं चेत्, तर्हि तल्लिङ्गमेव । तज्जनितं च ज्ञानमनुमानमेवेति चेत् । तदप्यनुचितम् । प्रत्यक्षस्याप्येवमनुमानत्वप्रसङ्गात् । तदपि स्वविषयेण सम्बद्धं सत्तस्य गमकं नान्यथा । सर्वस्य प्रमातुः सर्वार्थप्रत्यक्षत्वापत्तेः । अथ स्वविषयसम्बद्धत्वाविशेषेऽपि प्रत्यक्षानुमानयोः सामर्थ्यादिभेदात्प्रमाणान्तरत्वम् ।

शाब्दस्य मीमांसकमतेन प्रत्यक्षादनुमानाच्च पृथक्त्वव्यवस्थापनम् ।

भिक्षो तदानीं बत दुर्विदग्धाः
शाब्दोपमादेरपि जैमिनीयाः ॥
प्रमान्तरत्वं प्रतिपादयन्तः
कथं त्वधन्ते प्रतिषेधनीयाः ॥ २८८ ॥

१ 'हि' इत्यधिकं प. पुस्तके । २ 'व्याहन्यत आगमादीनां' इति प. भ. पुस्तकयोः पाठः ।

तथा हि ते सङ्गिरन्ते शाब्दं तावच्छब्दसामग्रीतः प्रभवति न चास्य प्रत्यक्षता। सविकल्पकत्वभावत्वात्। नाप्यनुमानता, त्रिरूपलिङ्गाप्रभवत्वात् अनुमानगोचरार्थाविषयत्वाच्च। तदुक्तम्।

" तस्मादननुमानत्वं शाब्दे प्रत्यक्षवद्भवेत्।
त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात् ॥ १ ॥ "

इति। यादृशो धूमादिलिङ्गजस्यानुमानस्य विषयो धर्म्मविशिष्टो धर्म्मी तादृशेन विषयेण रहितत्वं शाब्दे सामान्यमात्रविषये सुप्रसिद्धं त्रैरूप्यरहितत्वं च। तथा हि न शब्दस्य पक्षधर्म्मत्वम्। धर्मिणोऽसम्भवात्। न वाऽर्थस्य धर्मित्वम्। तेन तस्य सम्बन्धासिद्धेः। न वाप्रतीतेऽर्थे तद्धर्मतया शब्दस्य प्रतीतिः सम्भविनी। प्रतीते वाऽर्थे तद्धर्मतया शब्दस्य प्रतीतिर्नोपयोगिनी। तामन्तरेणाप्यर्थस्य प्राग्व प्रतीतेः। अथ शब्दो धर्म्मी अर्थवानिति साध्यो धर्म्मः शब्द एव च हेतुरिति चेत्, न। प्रतिज्ञार्थैकदेशत्वप्रसंगः। शब्दो हि धर्म्मितयोपात्तः स एव हेतुरिति। अथ शब्दत्वं हेतुरिति न प्रतिज्ञार्थैकदेशत्वम्। न। शब्दत्वस्यागमकत्वात्। अवान्तरसामान्यं तर्हि गोशब्दत्वं हेतुर्भविष्यतीति चेत्। न। तस्यासिद्धत्वात्। उक्तं च।

"विषयोऽन्यादृशस्तावद्दृश्यते लिङ्गशब्दयोः ॥ सामान्यविषयत्वं च पदस्य स्थापयिष्यते ॥ १ ॥ धर्म्माधर्म्मविशिष्टश्च लिङ्गीत्येतच्च साधितम्। न तावदनुमानं हि यावत्तद्विषयं न तत् ॥ २ ॥

तद्विषयमिति धर्म्मविशिष्टधर्म्मिविषयम्। " अथ शब्दोऽर्थवत्त्वेन पक्षः कस्मान्न कल्प्यते ॥ ३ ॥ प्रतिज्ञार्थैकदेशो हि हेतुस्तत्र प्रसज्यते। शब्दत्वं गमकं नात्र गोशब्दत्वं निपेत्स्यते ॥ "

शब्दत्वं गमकं नात्रेति, अर्थविशेषो ह्यत्रानुमित्सितो न चास्य

---

१ मीमांसाश्लोकवार्तिके सू. ५ शब्दपरिच्छेदे श्लो. ९८. २ मीमांसाश्लो. सू. ५ श. परि. श्लो. ५५-५६. ३ मी. श्लो. वा. सू. ५ शब्दप. श्लो. ६२. ४ मी. श्लो. वा. सू. ५ श. प. श्लो. ६३-६४.

शब्दत्वं गमकमनैकान्तिकत्वादिति भावः । " व्यक्तिरेव विशेष्यातो हेतुश्चैका प्रसज्यते ॥ ४ ॥ " अस्यार्थः—अतः शब्द-गोशब्दत्वसामान्ययोरगमकत्वासिद्धत्वाभ्यां हेतुत्वनिषेधाद्व्यक्तिरेव शब्दलक्षणा एकार्थवत्त्वेन साध्यधर्म्मेण विशेष्या, हेतुतया वाऽभिधा-तव्या इति दुष्परिहरं प्रतिज्ञार्थैकदेशत्वम् । शब्दस्यैव धर्म्मित्वेन हेतुत्वेन चाऽभिधानादिति । न चार्थान्वयः शब्दस्यास्ति । विद्यमानस्य ह्यन्वेतृत्वं नाविद्यमानस्य । यत्र हि धूमस्तत्रावश्यं वह्निरस्तित्वेन प्रसिद्धो-ऽन्वेता भवति धूमस्य । नत्वेवं शब्दस्यार्थेनान्वयोऽस्ति । न हि तत्त्व-शब्दाक्रान्ते देशेऽर्थस्य सद्भावः।न खलु यत्र मृद्वीकादिशब्दः समाकर्ण्यते तत्र मृद्वीकादिरर्थोऽप्यस्ति । नापि शब्दकालेऽर्थोऽवश्यं भवति । तथा हि । " वक्तुं सर्वे यदाज्ञां करकमलमिलन्मौलयो भूमिपालाः । सोऽयं शौण्डीर्यवर्याः सुचिरमरचयन्यत्र विश्रम्भबुद्धिम् ॥ लङ्कालङ्कारकल्पः सकलकुवलयप्रोद्भूतैकातपत्रः । क्रव्यादां चक्रवर्ती समजनि स पुरा रावणः शक्रशत्रुः ॥ १ ॥ अस्मिन्नेव महीतले हि कियतः कालात्पुरो भूमिभृन्मौलिश्लिष्टकिरीटकोटिघटनाघृष्टांघ्रिपीठः सदा ॥ निःशेषक्षितिरक्षणक्षमभुजः पुसां शिरोभूषणं । श्रीसंघो भवितामि-रामरुचिमान्वात्यावितश्चक्रभृत् ॥ २ ॥" इत्यादिशब्दाः सम्प्रति श्रूयमाणत्वेन वर्त्तमानास्तदर्थस्तु भूतो भविष्यंश्चेति कुतोऽर्थैः शब्दस्या-न्वेतृत्वम् । अथ मतम्, नित्यत्वाच्छब्दानां सर्वकालमवस्थितेरर्थेन सह न भिन्नकालता । नापि भिन्नदेशता । व्यापित्वात्सर्वदेशावष्टम्भ-नावस्थितेः । अतो नित्यविभुत्वाद्भवेदन्वयः शब्दानामिति । तत्र सर्वशब्देषु तन्नित्यत्वं विभुत्वं च तुल्यमिति कृत्वा प्रतिनियतेन शब्देन प्रतिनियतार्थाभिधानं न प्राप्नोति । किं तर्हि येन केनचि-च्छब्देन सर्वस्यैवार्थस्याभिधानं स्यात् । तेनार्थेन सह सर्वत्र देशे

---

१ मी. श्लो. वा. सू. ५ श. प. श्लो. ६४.

काले वा तस्य शब्दस्य दृष्टत्वात् । तन्नान्वयस्य निश्चयः । नापि व्यतिरेकस्य, स हि साध्याभावे साधनाभावरूपः । न चासौ शब्दे सम्भवति । नित्यविभुत्वादेव । तदुक्तम् ।

" अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते ।
व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते ॥ १ ॥"

व्यापारेणेति सद्भावेन सत्तयेति यावत् ।

" यत्र धूमोऽस्ति तत्राग्निरस्तित्वेनान्वयः स्फुटः ॥
नन्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चयः ॥ १ ॥
न तावद्यत्र देशेऽसौ न तत्काले च गम्यते ।
भवेन्नित्यविभुत्वाच्चेन्सर्वार्थेष्वपि यत्समम् ॥ २ ॥
तेन सर्वत्र दृष्टत्वाद्व्यतिरेकस्य चागतेः ॥
सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते ॥ ३ ॥ " इति ।

मीमांसकमतेनोपमानस्य प्रमाणान्तरत्वव्यवस्थापनम् ।

सामग्रीभेदतो भेयभेदतश्चागमस्ततः ॥
अन्तर्भवति नैवेत्थमनुमानं कथंचन ॥२८९॥
प्रमाणं चैष मन्तव्यः प्रमेयाव्यभिचारतः ।
यथा प्रत्यक्षविज्ञानं यथा च लैङ्गिकी मतिः।२९०।

उपमानमपि प्रमाणान्तरमेव । तस्य हि लक्षणम्, यथा,

" दृश्यमानाद्यदन्यत्र विज्ञानमुपजायते ॥
सादृश्योपाधि तत्त्वज्ञैरुपमानमिति स्मृतम् ॥ १ ॥"

येन हि प्रतिपन्ना गौरुपलब्धो न गवयो न चातिदेशवाक्यं गौरिव गवय इति श्रुतं तस्यारण्ये पर्यटतो गवयदर्शने प्रथमे समुत्पन्ने सति यत्परोक्षे गवि सादृश्यज्ञानमुत्पद्यते अनेन सदृशो गौरित्येवं तदुपमानमिति । तस्य च विषयः सादृश्यविशिष्टः परोक्षो गोपिण्डस्तद्विशिष्टं वा सादृश्यम् । तच्च वस्तुभूतमेव । यदाह ।

---

१ मी. श्लो. वा. सू. ५ श. प. श्लो. ८५. २ मी. श्लो. वा. सू. ५ श. प. श्लो. ८६, ८७, ८८. ३ ' यथा ' इति नास्ति प. पुस्तके ।

" सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम् ।
भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत् ॥ १ ॥ "

भूयसामवयवसामान्यानां जात्यन्तरोपलक्षितेऽवयविनि योगो यस्तत्सादृश्यम् । तच्च सदृशप्रत्ययोत्पादकत्वेनार्थक्रियाकारित्वाद्वस्त्वेवेत्यर्थः । सजातीये सर्वावयवसामान्यसद्भावात्सादृश्यं नास्तीति ज्ञापनार्थं जात्यन्तरग्रहणमिति । अस्य चानधिगतार्थाधिगन्तृतया प्रामाण्यम् । गवयविषयेण हि प्रत्यक्षेण गवयो विषयीकृतो न त्वसन्निहितोऽपि सादृश्यविशिष्टो गौस्तद्विशिष्टं वा सादृश्यम् । यच्च पूर्वं गौरिति प्रत्यक्षमभूतस्यापि गवयोऽत्यन्तमप्रत्यक्ष एवेति कथं गवि तदपेक्षं तत्सादृश्यज्ञानम् । उक्तं च । " तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम् । प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥१॥ प्रत्यक्षेणाबबुद्धेऽपि सादृश्ये गवि च स्मृते । विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥ २ ॥ प्रत्यक्षेऽपि यथा देशे स्मर्यमाणे च पावके ॥ विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥ ३ ॥" इति । न चेदं प्रत्यक्षम् । परोक्षविषयत्वात् सविकल्पकत्वाच्च । नाप्यनुमानम् । पक्षधर्मान्वयव्यतिरेकिणामसम्भवात्प्रत्यक्षवत् । तथा ह्येतत्सदृशो गौरिति गवयसादृश्यविशिष्टे गव्यनुमेये सादृश्यं वा लिङ्गं परिकल्प्येत गवयो वा । सादृश्यमपि गोगतं गवयगतं वा । न तावद्गोगतम् । तद्धि गवयसादृश्यविशिष्टगोज्ञानात्पूर्वं प्रमेयैकदेशस्य गोधर्मिणो लिङ्गं परिकल्पितं न धर्मत्वेन गृह्यते । तथाप्रतीतेरभावात् । तत्प्रमेयत्वाच्च तस्य प्रतिज्ञार्थैकदेशत्वेन पक्षधर्मत्वासम्भवान्न लिङ्गता । नापि गवयगतम् । तत्र हि गृह्यमाणं सादृश्यं न गोसम्बन्धिनः सादृश्यस्यानुमापकम् । वैयधिकरण्येन पक्षधर्मत्वासम्भवात् । नापि च गवयो लिङ्गम् । गवा सह सम्बन्धाभावात्तद्धर्मत्वानुपपत्तेः । न च

---

१ मी. श्लो. वा. सू. ५ उ. प. श्लो. १८. २ मी. श्लो. वा. सू. ५ उ. प. श्लो. ३७, ३८; ३९.

गवयगतं सादृश्यं सर्वेण प्रमात्रा सादृश्यविशिष्टगोज्ञानात्पूर्वं गव्यनुगतं दृष्टम् । न हि गोगवयौ युगपत्सर्वैः सदृशौ लक्ष्येते । अपि त्वेकस्मिन्ननुपलक्षितसादृश्ये पूर्वं गवि दृष्टेऽपि द्वितीयं गवयलक्षणमर्थं पश्यतो वने सादृश्यसहित एवास्मिन् गवि तस्मिन्नेव काले बुद्धिरुत्पद्यते । न चापि गवयः । कैरपि गवान्वयी दृष्टपूर्वः । येन गोस्तत्सादृश्यस्य वा लिङ्गता प्रतिपद्येत । न च गवयस्तत्सादृश्यं वा विपक्षाद्व्यावृत्तं दृष्टम् । गोरभावेऽपि तयोः प्रवृत्तिदर्शनात् । यदाह भट्टः । " न चैतस्यानुमानत्वं पक्षधर्म्माद्यसम्भवात् ॥ प्राक्प्रमेयस्य सादृश्यं धर्म्मत्वेन न गृह्यते ॥ १ ॥ गवये गृह्यमाणं च न गवामनुमापकम् । प्रतिज्ञार्थैकदेशत्वाद्धेागतस्य न लिङ्गता ॥ २ ॥ गवयश्चाप्यसम्बन्धान्न गोर्लिङ्गत्वमृच्छति ॥ सादृश्यं न च सर्वेण पूर्वं दृष्टं तदन्वये ॥३॥ एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने ॥ सादृश्येन सहैवास्मिंस्तदैवोत्पद्यते मतिः ॥ ४ ॥ न चापि गवयः कैश्चिद्दृष्टपूर्वो गवान्वितः । येन गोर्लिङ्गतां गच्छेत्तत्सादृश्यस्य वा तदा ॥ ५ ॥ गवयश्च ससादृश्यो गोरभावे प्रवर्त्तते । विपक्षात्तेन नास्त्येव व्यावृत्तिरुभयोरपि ॥ ६ ॥ " इति ॥

सामग्र्यादिविभिन्नत्वात्प्रत्यक्षादिप्रमाणतः ॥
मतान्तरतया सिद्धमुपमानं ततः स्फुटम् ॥ २९१ ॥

अर्थापत्तिरपि प्रमाणान्तरम् । यदाह भाष्यकारः, " दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टकल्पनाऽर्थापत्तिः " इति । दृष्टः शाब्दव्यतिरिक्तप्रमाणपञ्चकाधिगतः । श्रुतः शाब्दप्रमाणाधिगतः ।

मीमांसकमतेनार्थापत्तेः प्रमाणान्तरत्वव्यवस्थापनम्

कुमारिलोऽप्येतदेव भाष्यकारवचो विवृण्वन्प्राह । " प्रमाणपट्कवि-

---

१ मी. श्लो. वा. सू. ५ उ. प. श्लो. ४३, ४४, ४५, ४६. २ 'मानान्तरतया' इति म. पुस्तके पाठः । ३ ' इत्यर्थकल्पना । यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना ' इति शबरस्वामिना मीमांसादर्शनशाबरभाष्ये १-१-५. ४ मी. श्लो. वा. सू. ५ अर्था. प. श्लो. १.

ज्ञातो यत्रार्थोऽनन्यथाभवन् । अदृष्टं कल्पयेदन्यं सार्थापत्ति-रुदाहृता ॥ १ ॥" यत्र देशकालादौ प्रत्यक्षानुमानशाब्दोपमा-नार्थापत्त्यभावलक्षणैः षड्भिः प्रमाणैः परिच्छिन्नोऽर्थोऽन्यथा नोपपद्यते यद्येवंभूतोऽर्थो न भवेत्परोक्ष इति या परोक्षार्थविषया कल्पना सार्था-पत्तिः प्रमाणम् । उदाहृतेति शबरस्वामिना प्रतिपादिता । तत्र प्रत्यक्ष- ५
पूर्विकाऽर्थापत्तिर्यथा । प्रत्यक्षेण प्रतिपन्नाद्धाद्धहेर्दहनशक्तिकल्पना । न हि शक्तिः प्रत्यक्षेण परिच्छेद्या । अतीन्द्रियत्वात् । नाप्यनुमानेन । अस्य प्रत्यक्षावगतप्रतिबन्धलिङ्गप्रभवत्वेनाभ्युपगमात् । अर्थापत्तिगोचरस्य चाऽर्थस्य सदैव प्रत्यक्षाविषयत्वात् । अनुमानपूर्विका यथा । सूर्ये गमनात्तच्छक्तियोगकल्पना । अत्र हि देशाद्देशान्तरप्राप्त्या सूर्ये १०
गमनमनुमीयते । तस्माच्च तत्र गमनशक्तिसम्बन्धोऽर्थापत्त्या कल्प्यते । शाब्दप्रमाणपूर्विका यथा । पीनो देवदत्तो दिवा न भुंक्ते इति वाक्य-प्रतिपन्नदिनाधिकरणभोजनाभावविशिष्टपीनत्वाख्यकार्यान्यथानुपपत्त्या कारणभूतरात्रिभोजनाभिधायकं रात्रौ भुंक्त इति वाक्यखण्डलक्षं कल्प्यते । रसायनोपयोगादेस्तु तत्कारणस्याभिधायकं तन्न कल्पनार्हम् । १५
दिनाधिकरणभोजनाभावविशिष्टत्वेन पीनत्वस्य रसायनोपयोगादिबाध-हेतुत्वात् । रसायनोपयोगादौ हि सर्वथा भोजनं निषिध्यते न तु दिनाधिकरणतया । उपमानपूर्विका यथा । गवयोपमितस्य गोपिण्ड-स्योपमानप्रमाणग्राह्यताशक्तिकल्पना । अर्थापत्तिपूर्विका यथा । शब्दकर्तृकार्थप्रत्यायनानुपपत्तिप्रतिपन्नवाचकशक्त्यन्यथानुपपत्त्या शब्दे २०
नित्यत्वकल्पना । शब्दोच्चारणे हि सत्यन्यथानुपपत्त्या वाचिका शक्तिस्तावत्प्रतीयते । पुनरर्थापत्तिप्रमितवाचकशक्त्यन्यथानुपपत्त्या शब्दस्य स्थायित्वं प्रतीयते । अभावपूर्विका यथा । प्रमाणाभावप्रमि-ताद्वेश्मनि जीवच्चैत्राभावाच्चैत्रबहिर्भावकल्पना । चैत्रो बहिरस्ति जीवतो वेश्मन्यभावान्यथानुपपत्तेरिति । यथोक्तं भट्टेन " तत्र प्रत्य- २५

---

१ ' अधिकरणक ' इति म. पुस्तके पाठः ।

क्षतो ज्ञानादाहाद्दहनशक्तिता ॥ वह्नेरनुमिता सूर्ये यानात्तच्छक्तियोग्यता ॥ १ ॥ [1]पीनो दिवा न भुंक्ते चेत्येवमादिवचः श्रुतौ ॥ रात्रिभोजनविज्ञानं शाब्दार्थापत्तिरुच्यते ॥ २ ॥ "

रात्रिभोजनविज्ञानमिति रात्रिभोजनाभिधायकवाक्यशकलविज्ञानम् ।

[1]गवयोपमिताया गोस्तज्ज्ञानग्राह्यशक्तता ॥ १ ॥ अभिधानप्रसिद्ध्यर्थमर्थापत्त्याववोधिता ॥ शब्दे वाचकसामर्थ्यात्तन्नित्यत्वप्रमेयता ॥ २ ॥ अभिधानान्यथाऽसिद्धेरिति वाचकशक्तता । अर्थापत्त्यवगम्यैव तदनन्यगतेः पुनः ॥ ३ ॥ अर्थापत्त्यन्तरेणैव शब्दनित्यत्वनिश्चयः ॥ ४ ॥ प्रमाणाभावनिर्णीतात्तत्राभावविशेषितात् । गेहात्तत्रबहिर्भावसिद्धिर्या त्विह दर्शिता ॥ ५ ॥ तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत् ॥ ६ ॥ " इति । एतेषु चार्थापत्तिनिदर्शनेषु प्रत्यक्षानुमानोपमानपूर्विकाणामर्थापत्तीनां शक्तिः प्रमेयत्वेन दर्शिता । शब्दार्थापत्त्यभावप्रमाणपूर्विकाणां तु यथाक्रमं वाक्यशकलशब्दनित्यत्वतत्रबहिर्भावाः । न च प्रत्यक्षानुमानोपमानपूर्विकाणामेवार्थापत्तीनां शक्तिः प्रमेयेति नियमः । अन्यासामपि शक्तिगोचरत्वेन क्वचिद्दर्शनात् । तथा चार्थापत्तिपूर्विकयाऽर्थापत्त्या रूपप्राकट्यान्यथानुपपत्तिप्रतिपन्नरूपोपलम्भान्यथानुपपत्तिरूपया चक्षुषो रूपपरिच्छेदनशक्तिः कल्प्यते ।

अर्थापत्तिः पोढा सेयं मानान्तरत्वमुपयान्ती ॥
सामग्रीविषयभिदा मनस्सु चेतस्विनां वसतु ॥ २९२ ॥

अभावप्रमाणमपि प्रमाणान्तरम् । तथा हि । तस्य स्वरूपं प्रत्यक्षादेः सदुपलम्भकप्रमाणपञ्चकस्यानुत्पत्तिः । तदुक्तम् ।

मीमांसकमतेनाभावस्य प्रमाणान्तरत्वव्यवस्थापनम् ।

" प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ॥ सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ॥ १ ॥ " इति । अस्यार्थः । प्रत्यक्षादेरर्थापत्तिपर्यन्तस्य

१ मी. श्लो. वा. सू. ५ अर्था. प. श्लो. ३, ५१. २ मी. श्लो. वा. सू. ५ अर्था. प. श्लो. ४, ५, ६, ७, ८, ९. ३ मी. श्लो. वा. सू. ५ अभा.प.श्लो.११.

यथाविषयमनुत्पत्तिरभावप्रमाणलक्षणमित्यर्थः । तामेव प्रत्यक्षाद्यनुत्पत्तिं विवृणोति नात्मन इत्यादि । उत्तरपदार्थप्रतिषेधमात्रविवक्षायामात्मनोऽपरिणामो वेत्याह । घटज्ञानरूपतया परिणतस्यात्मनो घटसद्भावः प्रमेयं[1] । तद्रूपेणापरिणतस्य तु तदभाव इत्यर्थः । उत्तरपदार्थपर्युदस्तवस्त्वन्तरविवक्षायां विज्ञानं वाऽन्यवस्तुनीत्याह । भूप्रदेशे घटव्यतिरिक्ते वस्तुनि घटविविक्तताख्यो इह प्रदेशे पैटो[2] नास्तीति यद्विज्ञानं तदभावसंज्ञकं प्रमाणमित्यर्थः । अयमाशयः । इह प्रदेशे दृश्यादर्शनं चाऽस्ति[3] तदनन्तरं घटो नास्तीति ज्ञानं चोत्पद्यते । तत्र घटाभावे प्रमेये दृश्यादर्शनमेव कदाचित्प्रमाणत्वेन विवक्ष्यते । तदा सात्मनोऽपरिणामो वेति पक्षः[4] । अथ तदनन्तरं नास्तीति ज्ञानं प्रमाणत्वेन विवक्ष्येत बोधकत्वेन वाचकप्रत्ययाभावेन च । तदा विज्ञानं चाऽन्यवस्तूनीति पक्षः[5] । प्रथमपक्षे नास्तीति ज्ञानं फलम्, द्वितीयपक्षे तु हानादिबुद्धिरिति । विषयः पुनरस्य प्रमाणपञ्चकप्रवृत्त्ययोग्योऽसदंशः । यदुक्तम् । **"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ॥ वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥ १ ॥"** इति ॥ अस्यार्थः । सदसद्रूपेणोभयात्मके वस्तुनि व्यवस्थिते सति यस्मिन्वस्तुरूपे वस्त्वंशे सद्रूपे प्रमाणपञ्चकमर्थापत्तिपर्यन्तं न जायते । किमर्थम् । वस्तुसत्तावबोधार्थम् । तत्राभावांशे प्रमेयेऽभावस्य प्रमाणता । **औंचकस्त्वेवं** व्याख्यातवान् । **"यत्र घटाख्ये वस्तुनि प्रत्यक्षादि सद्भावग्राहकं नोपजायते । तस्य नास्तिता भूप्रदेशाधिकरणाभावप्रमाणस्य प्रमेयेति"** । न चेदमभावज्ञानं प्रत्यक्षम् । अक्षानपेक्षया केवलात्ममनःसन्निकर्षादेव समुत्पद्यमानत्वात् । उक्तं

---

१ ' सात्मनः ' इति म. पुस्तके पाठः । २ ' यम् ' इति प. पुस्तके पाठः । ३ ' घटो ' इति म. पुस्तके पाठः । ४ ' तदनन्तरं ' इत्यादि ' पक्षः ' इत्यन्तं नास्ति प. म. पुस्तकयोः । ५ ' प्रथमपक्षे ' इत्यादि 'जायते' इत्यन्तं भ.पुस्तके नास्ति । ६ मी. श्लो. वा. सू. ५ अभा. प. श्लो. १. ७ मी. श्लो. वा. सू. ५ अभा. प. श्लो. २७.

च " गृहीत्वावस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् । मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥ १ ॥ " अविकलस्फारिते चक्षुषि प्रदेशज्ञानं चोत्पद्यते नास्तीति ज्ञानं च इह प्रदेशे घटो नास्तीति । निमीलिते तु चक्षुष्युभयोरप्यभावः । तत्र समाने तद्भावभावित्वे कथं प्रदेशज्ञानमेवाक्षजं नतु नास्तीति ज्ञानमपीत्याशंक्याभ्युपगम्य तद्भावभावित्वमन्यथासिद्धतामस्य दर्शयितुमियं कारिका भट्टेनाभिदधे । इदं चात्र तात्पर्यम् । भूप्रदेशग्रहणसापेक्षमभावग्रहणम् । भूप्रदेशग्रहणं चेन्द्रियजमिति तद्भावभावित्वमन्यथासिद्धमभावज्ञानस्य । यथा हि विस्फारिते चक्षुषि दूरव्यवस्थितेऽग्नौ रूपज्ञानं चोत्पद्यते स्पर्शज्ञानं च तत्र रूपज्ञानमेवाक्षजमिष्यते । स्पर्शज्ञानं त्वेकार्थसमवायिनो रूपादानुमानिकमिति तद्भावभावित्वं तत्रान्यथासिद्धम् । एवमिहापि । गृहीत्वा स्मृत्वेति च ज्ञातृज्ञानयोरभेदात्समानकर्तृत्वाभिधानमिति । अभावांशेन सहेन्द्रियस्य सम्बन्धायोग्यत्वाच्च नेदमभावज्ञानं प्रत्यक्षम् । यदाह । न तावदिन्द्रियेणेषा नास्तीत्युत्पद्यते मतिः ॥ भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥ १ ॥ " अस्यार्थः । योग्यता हि कार्यदर्शनसमधिगम्या । सा चेन्द्रियाणां भावांशग्रहण एवोपलभ्यते नाभावांश इति । न च धर्म्यभेदाद्भावांशेन सहाभावांशस्याभेदे सति योग्यतासिद्धेरिन्द्रियेण सम्प्रयोगतासम्भवात्तद्विषयं ज्ञानमध्यक्षमेवेत्यभिधेयम् । अभिन्ने धर्मिणि रूपरसयोरिव भावाभावांशयोरन्योन्यं भेदात् । तदुक्तम् । " ननु भावादभिन्नत्वात्सम्प्रयोगोऽस्ति तेन च ॥ न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि नः ॥ १ ॥ " अत्र पूर्वार्धेन प्रश्नः । उत्तरार्द्धेन तूत्तरम् । यदि हि भावाभावयोरेकान्तेनाभेदः स्यात्ततो भावेनेन्द्रियसन्निकर्षे तदभिन्नस्य तस्यापि स स्यात् । न त्वेवमस्ति । अभावस्यापि रूपा-

---

१ मी. श्लो. वा. सू. ५ अभा. प. श्लो. १८. २ मी. श्लो. वा. सू. ५ अभा. प. श्लो. १९.

दिवदत्यन्तमभेदाभावादिति । न चैतदभावज्ञानमनुमानम् । लिङ्गाभावात् । तदुक्तम् । "नं चाप्यस्यानुमानत्वं लिङ्गाभावात्प्रतीयते ॥ भावांशो ननु लिङ्गं स्यात्तदानीमजिघृक्षणात् ॥ १ ॥ अभावांशे गतेर्जन्म भावांशे ह्यजिघृक्षिते । तस्मिन् प्रतीयमाने च नाभावे जायते मतिः ॥ २ ॥ न चैष तस्य धर्म्मत्वं पदवत्प्रतिपद्यते ॥" इति । अत्र भावांशो ननु लिङ्गं स्यादिति प्रश्नः । शेषं तु समाधानम् । अयमाशयः । भूप्रदेशास्त्ये धर्म्मिणि घटाभावे प्रमेयेऽघटाभावस्य वा लिङ्गत्वं स्याद्भूप्रदेशस्य वा । न तावत् घटाभावस्येत्याह तदानीमजिघृक्षणादिति । घटाभावप्रतिपत्तिवेलायामप्रतीयमानस्य घटस्य कथं लिङ्गत्वम् । तत्प्रतिपत्तिवेलायां च तदभावप्रतिपत्तिर्नास्तीत्यर्थः । नापि भूप्रदेशस्यैव लिङ्गत्वम् । घटाभावे प्रमेये भूप्रदेशस्य पदवत्तद्धर्मतया ग्रहणाभावादित्याह । न चैष तस्य धर्म्मत्वमिति । एष इति पुरोवस्थितं भावमपरोक्षं निर्दिशति । यथार्थे पक्षीकृते पदमतद्धर्मतया न हेतुरित्युक्तमेवमेषोऽपि भूतलभावो न घटाभावस्य धर्म इति । न चाभावस्य भावरूपेण प्रत्यक्षादिना प्रमाणेन परिच्छित्तिर्युक्ता । प्रयोगः । यो यथाविधविषयः स तथाविधेनैव प्रमाणेन परिच्छिद्यते । यथा रूपादिर्भावो भावरूपेण प्रत्यक्षादिना । विवादास्पदीभूतश्चाभावस्तस्मादभावप्रमाणपरिच्छेद्य इति । यदाह । "मेयो यद्वदभावो हि मानमप्येवमिष्यताम् ॥ भावात्मके यथा मेये नाभावस्य प्रमाणता ॥ १ ॥ तथैवाभावमेयेऽपि न भावस्य प्रमाणता ॥" इति । चतुःप्रकारश्चाभावो व्यवस्थितः । प्रागभावप्रध्वंसाभावेतरेतराभावात्यन्ताभावभेदात् । उक्तं च, "क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥ नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ॥ १ ॥ गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥ शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः ॥ २ ॥

---

१ मी. श्लो. वा. सू. ५ अभा. प. श्लो. २९, ३०, ३१. २ मी. श्लो. वा. सू. ५ अभा. प. श्लो. ४५, ४६. ३ मी. श्लो. वा. सू. ५ अभा. प. श्लो. २, ३, ४.

शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥ " इति । आसामर्थः। क्षीरमृदादौ कारणे दधिघटादिलक्षणं कार्यं नास्तीत्येवं यत् प्रतीयते लोके स प्रागभाव उच्यते । एवं दध्नि क्षीरस्य यन्नास्तित्वमयं प्रध्वंसाभावः । यस्तु गवादावश्वाद्यभावः सोऽन्योऽन्याभाव उच्यते । शश-शृङ्गादिरूपेणालोच्यमानाः शशमृङ्गोऽवयवा वृद्धिकाठिन्याभ्यां रहिता अत्यन्ताभावः । स्वरूपेण तु ते भावा एवेति । अभावप्रमाणाभावे तु प्रागभावादिचतुष्प्रकाराऽभावव्यवस्था न स्यात् । यदाह ॥ " **क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः । शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्त्तिरात्मनि ॥ १ ॥ अप्सु गन्धो रसश्चाग्नौ वायौ रूपेण तौ सह । व्योम्नि सस्पर्शकास्ते च न चेदस्य प्रमाणता ॥ २ ॥**" एवमिति यथा क्षीरे दधि एवं दध्न्यपि क्षीरमित्यर्थः । शशे शृङ्गमित्यतः प्रभृति अत्यन्ताभावासिद्धौ परेषां दोषप्रसञ्जनम् । आभावप्रामाण्यानाश्रयणे हि न शशादिषु शृङ्गादीनामत्यन्ताभावः सिद्ध्यति । परिपन्थिनश्च भूतैचैतन्यवादिनो न निराकर्तुं शक्नुवन्ति । महाभूतानां वाय्वादीनामात्यन्तिको गन्धाद्यभावो न सिद्ध्येत् । यथोक्तं हि चत्वारि महाभूतान्येकैकगुणरहितानीति स्थितिरिति । न चाभावस्यावस्तुत्वम् । द्रव्यादिवद्विद्यमानत्वात् । तदुक्तम् । " **नं चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता** " इति । कारणादिस्वरूपत्वाच्च प्रागभावादेर्नावस्तुत्वम् । तदाह " **कार्यादीनामभावः को भावो यः कारणादिनः** " इति। वस्त्वेव हि सदसदात्मकमिति सिद्धान्तः । तत्र कथं वस्तुरूपस्यैवाभावस्य निस्स्वभावत्वं भविष्यति । स एव हि कार्यस्य दध्नोऽभावो यस्तत्कारणस्य क्षीरस्य भावः । स एव च क्षीरस्याभावो यस्तत्कार्यस्य दध्नो भावः । किमिदानीं भावाभावयोरभेद एव । नेति वदामः । भेदोऽपि ह्यनयोर्धर्म्मधर्म्मितया कियानप्यस्त्येव रूपादीनामिवेति । इत-

---

१ मी. श्लो. वा. सू. ५ अभा. प. श्लो. ५,६. २ भूतचैतन्यवादिनः—चार्वाकाः। ३ स्थितिः—शास्त्रमर्यादा । ४ मी. श्लो. वा. सू. ५ अभा. प. श्लो. ८.

श्चानुमानद्वयादवसीयते वस्तुत्वमभावस्य । अभावो वस्तु अनुवृत्ति-व्यावृत्तिबुद्धिग्राह्यत्वात् प्रमेयत्वाद्घटवादिवत् । यदुक्तम् । " **यद्वानुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयम् । तस्माद्घटवादिवद्वस्तु प्रमेयत्वाच्च गृह्यताम् ॥ १ ॥** " तत्रानुवृत्तिबुद्धिः । चतुर्ष्वप्यभावोऽभावः इत्येकाकारः प्रत्ययः । व्यावृत्तिबुद्धिः । प्रागभावोऽयं न प्रध्वंसाभाव इत्यादिर्भेदाकारप्रत्यय इति ।

एवं स्वरूपभेदाद्गोचरभेदात्फलस्य भेदाच्च ।
भिन्नं सिद्धमभावप्रमाणमपरप्रमाणेभ्यः ॥ २९३ ॥

ततश्च—

सामग्र्योदेर्भेदतः शाब्दमुख्यं भिन्नं मानं भट्टनीत्या प्रसिद्धम् ॥
मानद्वित्वं सौगतैतत्कथं ते तस्माद्यातु न्यायनिष्ठां प्रतिष्ठाम् ॥२९४॥

नन्वेवं प्रत्यक्षपरोक्षभेदात्कथं जैनानामपि प्रमाणद्वैविध्यव्यवस्था ।

जैनसिद्धान्ते आगमादीनां परोक्षेऽन्तर्भावात् प्रत्यक्षभेदेन द्वैविध्यं नासंगतमिति निर्णीय मीमांसकसंमतप्रमाणानां तत्र तत्रान्तर्भावनिरूपणम् ।

आगमादीनां प्रमाणान्तरत्वप्रसिद्धेरविशेषादिति चेत् । तेषां परोक्षेऽन्तर्भावादिति ब्रूमः । यथा यदेकलक्षणलक्षितं तद्व्यक्तिभेदेऽप्येकमेव । यथा वैशद्यैकलक्षणलक्षितं चक्षुरादिप्रत्यक्षम् । अवैशद्यैकलक्षणलक्षितं च शाब्दादीति । यथा हि चक्षुरादिसामग्रीभेदेऽपि तज्ज्ञाने वैशद्यैकलक्षणलक्षितत्वेनैवाभेदः प्रसिद्धः तद्वच्छब्दादिसामग्रीभेदेऽप्यवैशद्यैकलक्षणलक्षितत्वेनैवाभेदः शाब्दादीनामस्तु । ननु परोक्षस्य स्मरणादिभेदेनैवाग्रे परिगणयिष्यमाणत्वादुपमानादीनां प्रमाणान्तरत्वमस्त्येवेत्यप्यसमीक्षिताभिधानम् । यस्मादुपमानं प्रत्यभिज्ञानेऽन्तर्भावयिष्यते । अर्थापत्तिस्त्वनुमानेऽन्तर्भवति । तथाहि अर्थापत्त्युत्थापकोऽर्थोऽन्यथानुपपद्यमानत्वेनानवगतोऽवगतो वाऽदृष्टार्थपरिकल्पनानिमित्तं स्यात् । न तावदनवगतः । अतिप्रसङ्गात् । येन

१ मी. श्लो. वा. अभा. प. श्लो. ९. २ ' तत् ' इति प. पुस्तके पाठः ।

हि विनोपपद्यते तमपि परिकल्पयेदनवगतत्वाविशेषात् । अथ तं न कल्पयति, तर्हि येन विना नोपपद्यते तमपि न कल्पयेत् । अथावगतः, तर्ह्यर्थापत्तेरनुमानादभिन्नत्वम् । अन्यथानुपपद्यमानत्वेन प्रतिपन्नादेकस्मात्सम्बन्धिनो द्वितीयस्य प्रतीतेरत्राप्यविशेषात् । किं चार्थापत्त्युत्थापकस्यार्थस्यान्यथानुपपद्यमानत्वावगमोऽर्थापत्तेरेव प्रमाणान्तराद्वा । प्रथमपक्षेऽन्योन्याश्रयः । तथा ह्यन्यथानुपपद्यमानत्वेन । प्रतिपन्नादर्थादर्थापत्तिप्रवृत्तिस्तत्प्रवृत्तेश्चास्यान्यथानुपपद्यमानत्वप्रतिपत्तिरिति । अथ प्रमाणान्तरादर्थापत्त्युत्थापकस्यार्थस्यान्यथानुपपद्यमानत्वावगमः । तत्किं भूयोदर्शनं विपक्षेऽनुपलम्भो वा । आद्यकल्पे कास्य भूयोदर्शनं साध्यधर्मिणि दृष्टान्तधर्मिणि वा । यदि साध्यधर्मिणि, तदा भूयोदर्शनेनैव साध्यस्यापि तत्र प्रतिपन्नत्वादर्थापत्तेर्वैयर्थ्यम् । अथ दृष्टान्तधर्मिणि, तर्हि तत्र प्रवृत्तं भूयोदर्शनं साध्यधर्मिण्यप्यस्यान्यथानुपपद्यमानत्वं निश्चाययति तत्रैव वा । तत्रोत्तरपक्षोऽयुक्तः । न खलु दृष्टान्तधर्मिणि निश्चितान्यथानुपपद्यमानत्वार्थोऽन्यत्र साध्यधर्मिणि तथात्वेनानिश्चितस्वसाध्यं प्रसाधयति । अतिप्रसङ्गात् । प्रथमपक्षे तु लिङ्गार्थापत्त्युत्थापकार्थयोर्भेदाभावः । ननु लिङ्गस्य दृष्टान्तधर्मिणि प्रवृत्तप्रमाणात्स्वसाध्यान्यथानुपपद्यमानत्वनिश्चयोऽर्थापत्त्युत्थापकार्थस्य तु साध्यधर्मिणि प्रवृत्तप्रमाणादित्यनयोर्भेदः । नैतद्युक्तम् । अर्थापत्तेर्वैयर्थ्यस्य तदवस्थत्वात् । न च लिङ्गं सपक्षानुगममात्रेण गमकं वज्रस्य लोहलेख्यत्वे पार्थिवत्वादिवत् । किं तर्हि व्याप्तिबलेन । तत्र च किं सपक्षानुगमेनेति प्रतिपादयिष्यते । तदभावे गमकत्वमेवास्य कथमिति चेत् । उच्यते । यथार्थापत्त्युत्थापकार्थस्य । तथा चार्थापत्तिरेवाखिलमनुमानमिति प्रमाणसंख्याव्याघातः । भवतु वा सपक्षानुगमाननुगमरूपो विशेषः । तथापि नैतावता तयोर्भेदः । अन्यथा पक्षधर्मत्वसहितादनुमानात्तद्रहितमनुमानं प्रमाणान्तरं स्यादिति प्रमाण-

---

१ 'न तत्कल्पयति' इति भ. पुस्तके पाठः ।

संख्याव्याघातः । अस्ति चानुमानं पक्षधर्म्मत्वरहितम् । **नदीपूरोऽप्यधोदेशे दृष्टः सन्नुपरिस्थिताम् । नियम्यो गमयत्येव वृत्तां वृष्टिं नियामिकाम् ॥ १ ॥ पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणतानुमा । सर्वलोकप्रसिद्धा न पक्षधर्म्ममपेक्षते ॥ २ ॥ एवं यत्पक्षधर्मत्वं ज्येष्ठं हेत्वङ्गमिष्यते । तत्पूर्वोक्तान्यधर्म्मत्वदर्शनाव्यभिचार्यते ॥ ३ ॥**"[1] इति भट्टेनाभिधानात् । नियमवतोऽर्थादर्थान्तरप्रतिपत्तेरविशेषात्तयोरभेदे स्वसाध्याविनाभाविनोऽर्थादर्थान्तरप्रतिपत्तेरत्राप्यविशेषात्कथमनुमानादर्थापत्तेर्भेदः स्यात् । अथ विपक्षेऽनुपलम्भात्तस्यान्यथानुपपद्यमानत्वावगमः । न । पार्थिवत्वादेरप्येवं स्वसाध्याविनाभावित्वावगमप्रसङ्गात् । विपक्षेऽनुपलम्भस्याविशेषात् । सर्वात्मसम्बन्धिनोऽनुपलम्भस्यासिद्धानैकान्तिकत्वाच्च । नन्वेवं सकलानुमानोच्छेदः अस्तु नाम तस्यायं यो भूयोदर्शनाद्विपक्षेऽनुपलम्भाद्वा व्याप्तिं प्रसाधयति । नास्माकम् । प्रमाणान्तरात्तत्प्रसिद्धयभ्युपगमात्, मीमांसकस्यापि ततस्तदभ्युपगमे प्रमाणसंख्याव्याघातः ।

प्रत्यक्षाद्युपलक्षितादधिगतिर्यार्थादिहार्थान्तर—
स्यार्थापत्तिरियं न किन्तु सुसखे सैषाऽनुमानं ध्रुवम् ॥
तन्मीमांसकपद्मप्रमाणगणनात्यन्तार्जवं नोचितं
छेकानां परिपन्न नाम किमियं ज्ञाता त्वयाद्यापि भोः ॥२९५॥

अत्र योगाः सङ्गिरन्ते ।

नैयायिकमतेन शक्तेः खण्डनम् ।

अर्थापत्तिर्या प्रतिष्ठानुमाने
युष्मन्नीत्या हन्त तस्याः कदाचित् ॥
ग्राह्या शक्तिर्मन्यतेऽतीन्द्रिया या
श्लाघ्या नेयं न्यायमुद्रादरिद्रा ॥२९६॥

---

१ प्रथमश्लोकार्थद्योतकः श्लोक उपलभ्यते केवलम् । मी. श्लो. वा. अ. प. श्लो. १७.

तथाहि । दहनादिषु तत्प्रसिद्धये स्फोटाद्यन्यथानुपपत्त्यानुमानमायुष्मतां सम्मतम् । तच्च न सङ्गतम् । दृष्टकारणादेव स्वरूपसहकारिशक्तिरूपात्स्फोटाद्युत्पत्तेर्घटनात् । दहनस्य हि स्वरूपं दहनत्वं देहसंयोगादिस्तु सहकारी । तदुभयसम्भवेऽवश्यंतया सम्पद्यमानं स्फोटकार्यं कथमतीन्द्रियशक्तिकल्पनाकौशलमवलम्बेत । न चैवं प्रतिबन्धकमणिमन्त्रौषधादिसन्निधानेऽपि धनञ्जयस्य स्फोटादिकार्यकारित्वप्रसक्तिरिति वाच्यम् । प्रतिबन्धकाभावस्यापि सहकारित्वात्तस्य च तदानीमभावात् । प्रयोगश्चैतन्निषेधे दहनादयः स्वरूपसहकारिरूपदृष्टशक्त्यतिरिक्तशक्तिभाजो न भवन्ति कार्योत्पादकत्वात् । यदित्थं तदित्थं यथा कर्म । तथा चैते तस्मात्तथा । उत्क्षेपणादिकं हि कर्म विभागेन निवर्त्तिते पूर्वसंयोगे उत्तरसंयोगोत्पादे स्वरूपलक्षणायाः पूर्वसंयोगप्रध्वंसलक्षणसहकारिरूपायाश्च दृष्टशक्तेरतिरिक्तशक्तिभाग् न भवत्येवेत्युभयसम्प्रतिपन्नोऽयमर्थः । विष्णुभट्टस्त्वाह । "स्वरूपसहकारिव्यतिरिक्ता शक्तिरस्तीति वाक्यमनर्थकं सर्वप्रमाणैरनुपलभ्यमानार्थत्वाद्यदित्थं तत्तथा यथाङ्कुल्यग्रे करिशतमास्त इति वाक्यं यथोक्तसाधनं चैतत्तस्माद्यथोक्तसाध्यम्" । विमलशिवः पुनरन्यथा प्राह । "वह्न्यादिकं न स्वैकसमवेतातीन्द्रियकार्यकृच्चाक्षुषत्वे सति हेतुत्वात् यदित्थं तत्तथा यथा गोत्वं तथा च विवादास्पदं तस्मात्तथा । वह्न्यादिकं नातीन्द्रियकार्यकृदित्युच्यमाने प्राणिसमवेतादृष्टरूपातीन्द्रियकार्यकृत्त्वस्यापि प्रतिषेधः स्यात्तदपोहाय स्वसमवेतेति । वह्न्यादिकं हि प्राणिनामदृष्टं निमित्तकारणत्वेन करोति न तु तत्तत्र समवेतम् । प्राणिसमवेतत्वात्तस्य । एवमपि वह्न्यादेराकाशादिनापि संयोगकृत्त्वस्वभावः स्यात्तन्निषेधायाह एकेति । संयोगो हि न वह्न्यादावेव समवेतः हेतुत्वादित्युच्यमाने आत्मादिना स्वैकसमवेतातीन्द्रियादृ-

---

१ स्फोटः-वंशादीनां सशब्दं स्फुटनम् । अथवाऽग्निसंयोगेन शरीरे स्फोटोत्पत्तिः ।

ष्टादिकार्ये जनकेन व्यभिचारः स्यात्तत्परिहाराय चाक्षुषत्व इति। अपि चासौ शक्तिर्नित्याऽनित्या वा।आद्यपक्षे सर्वदा कार्योत्पादप्रसङ्गःतस्याः सदा सत्त्वात्।ननु तन्नित्यत्वेऽपि सहकारिणां कादाचित्कत्वप्रयुक्तं कार्यस्य कादाचित्कत्वम्।तदपेक्षयास्तस्या कार्यकारित्वप्रतिज्ञानात्"इति।

एतदप्यनुपपन्नम्। शक्तिकल्पनावैयर्थ्यप्रसक्तेः। स्वरूपस्यैव सहकारिकारणापेक्षस्य कार्योत्पादकत्वोपपत्तेः। अनित्यत्वे तु स्वरूपसहकारिलक्षणसामर्थ्यसम्पाद्येयमतीन्द्रियशक्त्यन्तरनिष्पाद्या वा। प्रथमपक्षे कार्यमेव स्वरूपसहकारिलक्षणसामर्थ्यसम्पाद्यमस्तु। पर्याप्तमप्रातीतिकातीन्द्रियशक्तिकल्पनया। अतीन्द्रियशक्त्यन्तरनिष्पाद्यत्वेऽनवस्था। तस्यापि कादाचित्कतया तदन्तरनिष्पाद्यत्वप्रसक्तेः। तथा प्रतिकार्यमेका शक्तिरनेका वा। न तावदेका, तद्भेदात्कार्यभेदाङ्गीकरणात्। अथानेका, तर्हि किं शक्तिशक्तिमतोर्भेदोऽभेदो भेदाभेदो वा। भेदेऽपसिद्धान्तप्रसङ्गः। अभेदेऽपि स एव दोषः। किंच। किं शक्तिभ्यस्तद्वानभिन्नस्तद्वतो वा शक्तयः। प्रथमपक्षे शक्तिस्वरूपवच्छक्तिमतोऽप्यनेकत्वमतीन्द्रियत्वं च स्यात्। तादात्म्ये तस्यापि तावद्वा भेदादतीन्द्रियस्वरूपस्वीकाराच्च। अन्यथा तत्तादात्म्यानुपपत्तिः। द्वितीयविकल्पे तु शक्तिमत्स्वरूपवच्छक्तीनामप्येकत्वप्रसक्तिः। एकस्मादभिन्नानां तत्स्वरूपवदनेकत्वानुपपत्तेः। कुतः कार्यनानात्वसम्भवः। भेदाभेदपक्षस्तु विरोधादेवासम्भवीति।

तत्कार्यं भावानां स्वरूपसहकारिलक्षणा शक्तिः॥
उपपत्तिमेति न पुनः परोक्षरूपा पराभिमता॥ २९७॥

शक्तिमत्स्वीकुर्वतो नैयायिकस्य खण्डनम्।

मैवं व्यलीकवचनैश्चापलमङ्गीकुरुष्वमिह यौगाः॥
यस्मादतीन्द्रियायां शक्तौ युक्तिःस्फुरत्येव॥२९८॥

तथा हि। यत्तावदवादि दृष्टकारणादेव स्वरूपसहकारिरूपादित्यादि। तदवद्यम्। प्रतिबन्धकोपढौकनावस्थायामपि ततः कार्यो-

---

१ 'आद्यक्षणोत्पन्नं द्रव्यं क्षणमगुणं तिष्ठति' इति न्यायेन प्रथमक्षणोत्पन्नद्रव्ये शक्तेरनुत्पादात्। २ 'तत्' इत्यधिकं भ. पुस्तके।

त्पत्तिप्रसक्तेः । यत्पुनरिहोक्तं प्रतिबन्धकाभावस्यापि सहकारित्वादिति । तदप्यनौपयिकम् । यतः कोऽत्र प्रतिबन्धकस्याभावः सहकारी । किं प्रागभावः प्रध्वंसोऽन्योन्याभावोऽत्यन्ताभावो वा । यदि प्रागभावः, तर्हि प्रतिबन्धकस्य प्रध्वंसे सत्यपि वा तस्मिन्नुत्तम्भकमणिसन्निधौ ततो दाहोत्पत्तिर्न स्यात् । एतेन यत्कन्दलीकारः प्राह [1] **" मन्त्रादिसन्निधौ कार्यानुत्पत्तिरदृष्टं रूपमाक्षिपति यथाह्यन्वयव्यतिरेकाभ्यामवधारितसामर्थ्यो बहिर्दाहस्य कारणं तथा प्रतिबन्धकमन्त्रादेः प्रागभावोऽपि कारणं स च मन्त्रादिप्रयोगे सति निवृत्त इति सामग्रीवैगुण्यादेव दाहस्यानुत्पत्तिर्न शक्तिवैकल्यात् "** इति । तदपि प्रत्युक्तम् । उक्तर्नीत्या प्रतिबन्धकप्रागभावस्य दाहं प्रति कारणत्वासम्भवात् । नापि प्रध्वंसः सहकारी । तत्प्रागभावे तत्सत्त्वेऽपि चोत्तम्भकमण्युपनिपाते दाहानुत्पत्तिप्रसङ्गात् । उभयदशायामपि तत्प्रध्वंसस्य सहकारिणोऽसम्भवात् । नाप्यन्योन्याभावः । प्रतिबन्धकमण्यादिसद्भावेऽप्यस्य सम्भवेन दाहोदयानुपङ्गात् । तत्प्रागभावप्रध्वंसाभावयोश्च समयेऽन्योन्याभावासम्भवेन दाहानुदयप्रसक्तेश्च । अत्यन्ताभावस्य च प्रतिबन्धकमण्यादावसम्भवादेव सहकारित्वं प्रत्याख्यातम् । अथ कदापि प्रतिबन्धकस्य प्रागभावः कदापि प्रध्वंसः शिखिनि सन्निधत्वमाश्रयति । तथा चाभिदधे विष्णुभट्टेन **"प्रतिबन्धकप्रागभावप्रध्वंसाभावयोश्च नीलपीताद्यनेकविधानामिव यथासम्भवं कारणत्वं विशेषत "** इति । तदपि नोपादेयम् । कार्यस्यैवमनियतहेतुकत्वप्रसङ्गात् । अनियतहेतुकं चाहेतुकमेव । ननु किमिदममर्यादमुच्यते । अनियतहेतुकं नैकहेतुर्भवति न पुनरहेतुकमेव । युक्तिरिक्तस्यैतद्वचः । यत्र खल्वसति कार्यं नोपजायत एव सत्येव तु जायते तदेव कारणमिति कार्यकारणकथासु कथयन्ति तार्किकाः । यदि तु तदन्तरेणापि कारणान्तरादुपजायमानं कार्यमुपलभ्यते तदा कथं तत्कार्यता । असत्यपि

---

१ न्यायकन्दल्यां पृ. १४५ पं. १५.

तस्मिंस्तद्भावादिति को हेतुः स्यात् । अथ कोऽयं प्रसङ्गोऽस्माकम् । अभ्युपगम्यत एव भवद्भिरप्यनियतहेतुकत्वम् । तथा हि कदलीबीजादिव दावपावकप्लुष्टबीजादपि रम्भास्तम्भारम्भो वृश्चिकादिव गोमयादपि वृश्चिकडिम्भारम्भः सम्प्रतिपन्न उभाभ्याम् । तन्न युक्तम् । अनियतहेतुकत्वस्यास्माभिरनभ्युपगमात् । कदलीकार्यजननसामर्थ्याख्यया शक्त्यैकया कदलीबीजादिवत्कारणानामशेषाणामधिष्ठितत्वात् । वृश्चिकगोमयादिवृश्चिककारणानामपि तज्जननसामर्थ्यसंज्ञयैकया शक्त्या समलंकृतत्वात् । न च प्रतिबन्धकप्रागभावप्रध्वंसयोरपि स्फोटादिकार्यजनकत्वमेकं रूपमस्तीति वाच्यम् । यतः किमिदं सामान्यं धर्मो वा कश्चित् । नाद्यः पक्षः । अभावेषु भवता सामान्यानभ्युपगमात् । नापि द्वितीयः । यतोऽयं धर्मो दृश्यः स्यादतीन्द्रियो वा । न तावद्दृश्यः, तस्य तत्र कस्याचिदपि प्रत्यक्षेणाप्रेक्षणात् । अतीन्द्रियस्य तु तस्य स्वीकारे प्रतिबन्धकप्रागभावातिकुथितकन्थापरित्यागकारणं शक्तिरेव भावेषु स्वीक्रियताम् । किं च, यदापि प्रतिबन्धकसविधमधिवसति कृशानुस्तदाप्युत्तम्भकमणिमन्त्रौषधसान्निध्यसप्रीचीनस्य[1] तस्य दहननिर्माणनैपुण्यमैक्षिष्महि । तत्कथं प्रतिबन्धकाभावः सहकारी स्यात् । अथासत्प्रतिपक्षस्य मणिमन्त्रादेः प्रतिबन्धकत्वं प्रतिज्ञायते । यदाहोदयनः कुसुमाञ्जलौ । " असत्प्रतिपक्षो हि प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्ष " इति । उत्तम्भकसन्निधौ च सत्प्रतिपक्षत्वान्नायं प्रतिबन्धक इति । नन्वेवं वदतस्ते कुण्टकारुकस्येवैकं सन्धित्सोरन्यत्प्रत्यवते । तथा हि यदा जातवेदसः प्रथमं प्रतिबन्धकः समनन्तरमुत्तम्भकस्तदुत्तरमपरः प्रौढप्रतिबन्धकः सन्निधिमाम्भवति । तदा तावन्निर्विवादमस्यावसीयते तद्बलात्कार्याकरणम् । न चेदं त्वन्मतेनोपपद्यते । उत्तम्भकरूपप्रतिपक्षसत्त्वेनापरप्रौढप्रतिबन्धकस्य प्रतिबन्धकत्वासिद्धेः ।

---

१ ' प्रागभावाद्यतिकुथित ' इति प. म. पुस्तकयोः पाठः । २ सह अञ्चति इति सप्रीचीनः । उत्तम्भकमण्यादिसहितस्येत्यर्थः । ३ न्यायकुसुमाञ्जलौ पृ.४२ पं.३.

अथासिद्धं विवक्षितोत्तम्भकस्य प्रतिपक्षत्वम् । यतः कश्चिदेवोत्तम्भकः कस्यचिदेव प्रतिबन्धकस्य प्रतिपक्षः । तदयमुत्तम्भकः प्रथमोपस्थायिन एव प्रतिबन्धकस्य प्रतिपक्षो न त्वपरस्य । तदपेक्षयोत्तम्भकान्तरस्यैव प्रतिपक्षत्वादिति चेत् । सोऽयं पङ्गोस्तुङ्गतरुशिखरालम्बिपेशलफलादानदोहदः[1] । सपक्षप्रतिपक्षव्यवस्था हि भावानामविरुद्धविरुद्धकार्यकारित्वावसेया[2] । तत्र प्रतिबन्धकस्य कार्यं वह्निप्रतिबन्धनं उत्तम्भकस्य पुनस्तदुत्तम्भनम् । तदिह यथा प्रथमप्रतिबन्धकम्प्रति तदुत्तम्भनाव्यविरुद्धकार्यकारित्वात्प्रतिपक्षतयोत्तम्भकः स्वीक्रियते । तथा परप्रौढप्रतिबन्धकमपि प्रति किं न तथाऽसौ स्वीक्रियते । विशेषाभावात् । अथोत्तम्भनस्वभावं कार्यं कुर्वन्नेवोत्तम्भक उत्तम्भकतां प्रतिपद्यते । प्रौढप्रतिबन्धकसन्निधौ चोत्तम्भकस्य तदुत्तम्भनरूपकार्यकारित्वाभावान्नोत्तम्भकत्वमिति कथं तत्प्रतिपक्षत्वव्यवस्थेति चेत् । तर्किमिदानीं दहनसन्निधाने शान्तिमनादधानस्य तुषारस्यापि प्रतिपक्षतां न प्रतिपन्नवान् भवान् । क्वापि कदापि तस्मिँस्तज्ज्ञातं यदा शीतकार्यदर्शनात्तुषारस्य प्रतिपक्षतोपगमे तद्वदेवोत्तम्भकेऽपि जाङ्गले पादिकया किं न कोविदैः कक्षीकार्यसे । अपि चैवमुच्यमाने प्रतिबन्धकनिकटतायां करतलमदहतो दहनस्यापि दहनत्वं न व्यवतिष्ठेत । अथ तदाप्यसौ स्वाश्रयमिन्धनं दहत्येवान्यथा निर्वाणत्वापत्तिस्तत्कथमदहनः । तर्हि दहनद्वयमुत्तम्भयितुमेकस्मिन्नुत्तम्भके प्रयुक्ते तदन्यतरदहनोद्देशप्रयुक्तप्रौढापरप्रतिबन्धकनिकटतायामुत्तम्भकोऽप्युत्तम्भयत्येव दहनान्तरमिति कथं नोत्तम्भकः । अथास्तु दहनान्तरापेक्षयाऽयमुत्तम्भकः का नः क्षतिः । प्रकृततदपेक्षया तावदनुत्तम्भकः एवासौ । तर्हि दहनोऽपि दाह्यान्तरापेक्षयैव दहनः करतलापेक्षया त्वदहन एवास्तु । अस्त्वेमिति चेत् ।

---

१ ' शिखरावलम्बि ' इति प. पुस्तके पाठः । २ ' जातीये वा ' इति म. पुस्तके पाठ. ।

अहह नैयायिक त्वं स्वकदाशयसिद्धिमात्रलाम्पट्यात् ॥
लोकव्यवहारमसुं कथमवधारयसि निःशङ्कः ॥ २९९ ॥

लोको हि प्रतिबद्धमपि दहनं दहनमेव व्यवहरति । अथ न दहनस्य दाहनिबन्धनो दहनव्यवहारस्तस्य दहनत्वसामान्यनिबन्धनत्वात् । इतरत्रापि किं न तथा । अथोत्तम्भके नास्त्युत्तम्भकत्वसामान्यमुत्तम्भनक्रियानिबन्धनत्वात्तद्व्यपदेशस्य पाचकादिवदिति चेत् । दहनेऽप्येवमस्तु । अथोत्तम्भके तत्सामान्याभ्युपगमे प्रौढापरप्रतिबन्धककालेऽपि तस्य तदवस्थत्वात्कार्योत्पत्तिप्रसङ्गः । वह्नावपि तुल्यमिदम् । किं च समाचक्ष्महे च हेतुरित्येव जनकः किं तु युतोऽप्रत्यक्षया शक्त्या ।

तत्प्रतिबन्धककाले च शक्तिरुत्तम्भकस्य सा ध्वस्ता ॥
तदनुत्तम्भितवह्नेस्ततः कथं भवतु कार्यजनिः ॥ ३०० ॥

येन तु नोपगताऽसौ तस्येदृशि सङ्कटे निपतितस्य ॥
निस्सरणोपायः स्यात्पलायनं यदि परं नान्यः ॥ ३०१ ॥

नोत्तम्भकत्वमित्थं कुर्वाणस्यैव कार्यमेति घटाम् ॥
अस्ति प्रतिपक्षत्वं प्रौढप्रतिबन्धकेऽस्य ततः ॥ ३०२ ॥

किं चोत्तम्भकापेक्षया प्रौढप्रतिबन्धके प्रतिपक्षत्वं कक्षीकरोषि तदपेक्षया पुनरुत्तम्भके न स्वीकरोषीति नाम्नैव नैयायिकोऽसि । उभयाधिष्ठानतयाऽस्योभयत्रोपगमार्हस्यैकत्रैवोपगमात् । अथ यमभिसन्धाय यस्य प्रयोगः स तस्य प्रतिपक्षः । न च प्रौढापरप्रतिबन्धकस्याभिसन्धानेनैतदुत्तम्भकप्रयोगः किन्तु प्रथमप्रतिबन्धकस्येति चेत्, परिभाषामात्रमेतत् । विरुद्धकार्यकारित्वेनैव प्रतिपक्षत्वव्यवस्थितेरुक्तत्वात् । यदा च विद्यमाने बलीयसि प्रतिबन्धके तमभिसन्धाय दुर्बलं उत्तम्भकः केनापि सन्निधाप्यते तदा कः कुशलोपायस्ते । तदा हि तस्य

१ 'नैव' इत्यधिकं म. पुस्तके । २ केवलं युक्तिरहितं वचनमित्यर्थः ।

त्वन्नीत्या समस्ति प्रतिपक्षत्वम् । तथा च सत्प्रतिपक्षस्य प्रतिबन्धकस्याप्रतिबन्धकत्वेन तदभावनिबन्धनः कार्योदयः किं न स्यात् । यत्तु हरिहरः प्राह "न च दुर्बल उत्तेजकमन्त्रः स्तम्भकमन्त्रस्य प्रतिपक्षः । तस्मिन् सत्यपि स्तम्भकमन्त्रस्य कार्यकरणदर्शनात्" इति । तदस्यातिमनीषिमानितया लोकातिक्रान्तप्रतिपक्षस्वरूपप्रतिपादनम् । लोके हि किमपि दुर्बलोऽपि तिमिरपरिकरः खरतरकरनिरन्ताक्रान्तदिग्मण्डलस्य मार्तण्डमण्डलस्योत्पत्तौ बलीयसः क्षोदीयानपि च प्रत्यर्थी प्रौढप्रतापाक्रान्तदिक्चक्रस्य सम्राजो महीयसः प्रोच्यते प्रतिपक्षः । किं च, यत एव प्रौढस्तम्भकमन्त्रः[1] सत्यप्युत्तम्भके तद्विरुद्धं कार्यं कुर्वन् दृश्यतेऽत एवोत्तम्भकः प्रतिपक्षो भवति प्रौढस्तम्भकस्य । लोकोऽपि खल्वपचिकीर्षुः प्रतिपक्षस्यैव विरुद्धमाचेष्टते नानुकूलस्योदासीनस्य वा । तदेवमुत्तम्भकमणिसन्निधाने प्रतिबन्धकाभावस्याभावेऽपि कार्योत्पादान्नासौ सहकारी। अपि चोत्तम्भकसन्निधौ प्रतिबन्धकस्याभावः प्रध्वंसरूपः सहकारित्वेन त्वया व्याक्रियते । स च किं प्रतिबन्धकधर्मिणः स्यादुत तद्धर्म्मस्योपचारात्तु प्रतिबन्धकस्येत्युच्यते । नाद्यः पक्षः । मणिप्रमुखप्रतिबन्धकधर्मिणोऽप्रध्वस्तस्यैव प्रत्यक्षेण वीक्षणात् । नापि द्वितीयः । यतः प्रत्यक्षोपलक्षितस्य रूपादेः कस्यचिदसौ स्यादतीन्द्रियस्य वा । प्रथमपक्षे प्रत्यक्षविरोधः । रूपादेरशेषस्याक्षुण्णतयाऽध्यक्षेण प्रेक्ष्यमाणत्वात् । अतीन्द्रियस्य तु कस्यचित्तस्य प्रध्वंसस्वीकारे निष्कारणोऽत्यक्षशक्तिनिराकरणप्रयासः । किं च अकिञ्चित्करः किञ्चित्करो वा प्रतिबन्धकः स्वीक्रियते । नाद्यः पक्षः । अन्तरिक्षादिवदकिञ्चित्करस्य प्रतिबन्धकत्वस्यायोगात् । तथापि प्रतिबन्धकत्वे न कदाचित्कूपीटयोनिः स्फुटं स्फोटघटनपाटवं प्रकटयेत् । नापि द्वितीयः । अतीन्द्रियशक्तिस्वीकारप्रसङ्गात् । यदिहोदयनः पुनरुदीरयामास, "सामग्रीवैकल्यं

१ 'मन्त्र' इत्यधिकं प. म. पुस्तकयोः । २ न्यायकु. पृ. ४७ पं. १३.

हि प्रतिबन्धपदार्थो मुख्यः । स चात्र मन्त्रादिरेव । न त्वसौ प्रतिबन्धकः । ततः किं तस्याकिञ्चित्करत्वेन । तत्प्रयोक्तारस्तु प्रतिबन्धारः । ते च किञ्चित्करा एवेति किमसमञ्जसम् " इति । सोऽयमधमर्णस्येव मणिमन्त्रादिविशेषस्य नामान्तरमारचयन्नप्युत्तमर्णादिव गदितदूषणान्न तं परित्रातुमीशः । यथा खल्वकिञ्चित्करस्याम्बरादिवन्न किञ्चिदपि प्रति प्रतिबन्धकत्वमपि कथं कल्प्यते । अथ कथयेः परहृदयानभिज्ञतयैतदुक्तं मणिमन्त्रादिप्रतिबन्ध इति प्रतिबन्धनक्रिया व्याक्रियते । सा चाकिंचित्कर्येव । क्रियाणां निष्क्रियत्वात् । तदेतद्भवतो भावस्वभावानभिज्ञतामाविर्भावयति । मण्यादिर्हि द्रव्यं तत्कथमसौ प्रतिबन्धक्रियोच्यते । द्रव्यक्रिययोरैक्यानुपपत्तेरिति । उपचारादुच्यत एवेति चेत्, ननु कुत उपचारः । कार्यकारणभावादिति चेत्, तर्हि प्रतिबन्धक्रियाकरणान्मणिमन्त्रादेः प्रतिबन्धकत्वं किञ्चित्करत्वं चायातमित्यस्य प्रतिबन्धकत्वाभावान्न किञ्चित्करत्वं च स्वोपज्ञं प्रज्ञापयन् कथं न लज्जसे । कथं च तत्प्रयोक्तारं प्रतिबन्धारं ब्रवीषि । तत्प्रयोक्तृत्वादयमुपचारेण प्रतिबन्धकोऽभिधीयते इति चेत् । सोऽयं पारमार्थिकं पशुं पृष्टस्तादितरमुपचरितपशुत्वं पुमांसं पशुतयापि प्रतिपादयन्नियतं स्वयमेव पशुः । यदा च केनचित्परिपन्थिना तवाप्यविदितां भवद्भवनसन्निधिसमुद्गतां दिव्यामौषधिमनवबुद्धयमानेन तदुपरि दाहाय दहनो निहितस्तदा कथमसौ न दाहं विदध्यात् । तदा हि न भवान् प्रतिबन्धको नापि त्वत्परिपन्थी । तदपरिज्ञानेनोभयोरपि तत्प्रयोक्तृत्वासम्भवात् । अथायं परिपन्थी प्रतिबन्धमजानन्नपि तत्सविधे धूमध्वजं नियोजयन् प्रतिबन्धक एव । हन्त तर्हि किमिति कोऽपि पाटलचटुले चक्षुषी समारचयन्नतिविकटभ्रूकुटिसमाटोपसंकटं च ललाटपट्टं प्रकटयन् रेरे दुराचारविचारगोचरीकृतस्वपरसारदुरागते क यासीति नैयायिकनायकोऽपि भूत्वा तं प्रति पूत्करोषि न पुनर्निसर्गत एव सकललोकोपचारैकरसिक मन्मन्दिरप्रदीपपावकप्रति-

बन्धवन्धो विधीयतां स्नेहानुबन्धः । समनुभूयतां सज्जनसमालिङ्गनादि-प्रमोदसत्पयः किमत्र संत्रासेनेति प्रमोदनिर्भरं भाषसे । किं च इक्ष्वामकुक्षिकुम्भभुजगाकर्षणादिव्यमपि नासौ प्रतिबन्धकः किन्तु प्रदीपमित्र एवायमित्यर्थे साक्षिभावं भजते । अथ येषु देशकालादृष्टेषु सन्निहितेषु सत्सु पुरुषादिदृष्टकारणेनानुपढौकितः प्रतिबन्धस्तिष्ठति तत्र तेषां प्रतिबन्धकत्वं प्रतिपद्यामहे । यत्र तु तदुपढौकितस्तत्र तस्य तेषां तदिह च देशकालादृष्टाः प्रतिबन्धका भविष्यन्ति माभूत्पुरुष इति चेत् तर्हि यस्मिन् दहने सन्निहिते सति प्रतिबन्धस्तिष्ठति स स्वयमेव प्रतिबन्धक इत्यपि किं नार्थ्यायते । अथ प्रतिबन्धक्रियाविदधानस्य प्रतिबन्धस्यौषध्यादेः प्रतिबन्धक्रियाविषयतया सहकारिकारणं दहनः कथं प्रतिबन्धकः स्यात् । तर्हि देशकालादृष्टा अपि तस्य तामादधतः स्ववस्थानहेतुतया सहकारिणः कथं प्रतिबन्धकाः स्युः । ततो न मणिमन्त्रादिप्रतिबन्धप्रयोक्ता प्रतिबन्धको युक्तः । अपि च यो यस्यान्वयव्यतिरेकावनुविधत्ते स तस्य कार्यम् । नच स्फोटादिकार्यं प्रतिबन्धकाभावस्य तावनुविधत्ते । प्रतिबन्धकासद्भावेऽपि ह्युत्तम्भकप्रयोक्तृसन्निधाने कार्यं जायते । यदा च कश्चित्प्रतिबन्धकमणिं वह्निसन्निधौ विधाय स्वयमयासीद्देशान्तरम् । तदा तत्र प्रतिबन्धकाभावसद्भावेऽपि नोपजायते । अथ माभूद्देशान्तरेऽपि सन्नसौ प्रतिबन्धको भविष्यति । एवं तर्हि केनचित्प्रतिबन्धकमणेरुत्सारणेऽपि तस्य देशान्तरे सत्त्वात्कुतस्त्यः कार्योत्पादः । अथ यावद्यत्प्रयुक्तः प्रतिबन्धः सन्निहितो भवति तावदसौ तत्रस्थो अन्यदेशस्थो वा प्रतिबन्धक एवेति चेत् तर्हि सति सन्निहिते प्रयुक्ते प्रतिबन्धे यदोत्तम्भक उपढौक्यते तदापि प्रतिबन्धकसद्भावाद्व्यापः

१ ' सत्पर्यातमत्त ' इति प. म. पुस्तकयोः पाठः । २ ' कुक्षिकुम्भभुजङ्ग ' इति म. पुस्तके पाठः । ३ ' हन्त ' इत्यधिकं प. म. पुस्तकयोः । ४ ' प्रतिबन्धक ' इति प. म. पुस्तकयोः पाठः । ५ ' प्रतिबन्ध ' इति प. पुस्तके पाठः । ६ ' प्रतिबन्धकपुरुषसद्भावे ' इति प. म. पुस्तकयोः पाठः ।

कार्योत्पादः। असत्प्रतिपक्ष एव प्रतिबन्धो भवतीति चासत्प्रतिपक्षप्रतिबन्धकपराकरणेनैव निरस्तम्। तेन समानयोगक्षेमत्वात्। तस्मान्न मणिमन्त्रादेः प्रतिबन्धत्वं तत्प्रयोक्तुः प्रतिबन्धकत्वं युक्तम्। अपरः पुनराह। " **मन्त्रोच्चारणव्यापारावच्छिन्नमान्त्रिकाभिप्रायावच्छिन्नः कालविशेषः प्रतिबन्धक** " इति। सोऽपि स्वगृहसारं विस्मृत्यैवं व्याजहार। तद्गृहे कालस्यैकत्वेन वर्णनात्तद्विशेषाणामनुपपत्तेः। अथैवमेवैतत्स्वरूपापेक्षयोपाधिविशेषापेक्षया पुनर्दुरपह्नवा अस्य विशेषा इति चेत्। न। स्वरूपतः सर्वथा विशेषाभावे उपाधिविशेषसहस्रापेक्षयापि विशेषासम्भवात्। न हि विहायः स्वभावेनादाहकं पावकप्रमुखोपाधितोऽपि दाहकं भवति। कल्पिता विशेषाः[1] स्युः किं पुनस्तेभ्यः पारमार्थिकार्थव्यवस्था सङ्गच्छते। न खलु कल्प्यपावकत्वान्माणवकात्पारमार्थिकपाकादिक्रियानिष्पत्तिरुपलब्धचरी। तत् किं विशिष्टादृष्टाधिष्ठितकर्णशष्कुल्यवच्छिन्ननभोदेशस्वभावं श्रोत्रमपि शब्दोपलम्भार्थक्रियां माकार्षीत्। ओमिति ब्रूमः। दृष्टा तावदियमभ्रान्ता चेति चेत्। ननु न वयमेतामपह्नुमहे। किन्तु नैतादृशेन श्रोत्रेणासौ कर्तुं पार्यत इत्याचक्ष्महे। यादृशं च श्रोत्रं तत्र कल्प्यते तादृशमचिरेणैव वक्ष्यामः। तथा प्रतिबन्धकेन स्तम्भितस्य विषस्य भक्षणे पश्चात्प्रतिबन्धकनिवृत्तौ मरणप्रसङ्गः। अत्र हि प्रतिबन्धकेन रसाभावः क्रियते अतिशयान्तरं वा। नाद्यः पक्षः। नीरसत्वस्य विषेऽनुपलम्भाद्रसस्य तत्र प्रत्यभिज्ञायमानत्वात्। नाप्यतिशयान्तरम्। अदृष्टकल्पनाप्रसक्तेः। यदि त्वतिशयः कश्चिदतीन्द्रियः कल्प्यते तदा तथाविधशक्तिकल्पने को विद्वेषः। ततो न प्रतिबन्धकाभावः सहकारी वक्तुं युक्तः। अथ माभूदयं सहकारी उत्तम्भकसद्भाव एव सहकारी भविष्यति। नन्वेवं कथं केवलावस्थायां स्थूलज्वालाकलापकरालोऽपि ज्वलनो जनयतु देहदहनम्। उत्तम्भकस्य सहकारिणस्तदानीमभावात्। अथ प्रतिबन्धकाभावोत्तम्भकसद्भावास्त्यमुभयमपि

१ ' च ' इत्यधिकं भ. पुस्तके। २ ' स ' इत्यधिकं प. पुस्तके।

यथासम्भवं सहकारि ततस्तदानीं प्रतिबन्धकाभावसद्भावान्न देहदहनाभावः । नन्वित्थमप्यनियतहेतुकत्वं दाहादेस्स्यात् । न च प्रतिबन्धकाभावोत्तम्भकयोः प्रागभावप्रध्वंसयोरिवैकं किञ्चिद्रूपं सम्भवति येन नियतहेतुकत्वं दाहस्य स्यात् । तथायमुत्तम्भकोऽसत्प्रतिपक्ष एवोत्तम्भकत्वमाकलयत्यन्यथा वा । प्रथमपक्षे प्रतिबन्धकोत्तम्भकसद्भावे सत्प्रतिपक्षत्वेन प्रतिबन्धकस्याप्रतिबन्धकत्वादसत्प्रतिपक्षत्वेनोत्तम्भकस्योत्तम्भकत्वात्प्रतीबन्धकाभावोत्तम्भकयोः सद्भावात् किमयं कृपीटयोनिर्जनयतु दहनम् । किं वा पूर्वोक्तयुक्त्या प्रथमप्रतिबन्धकस्यापि प्रतिपक्षत्वसिद्धेः सत्प्रतिपक्षत्वेनोत्तम्भकस्यानुत्तम्भकत्वमत एवैतदपेक्षया प्रथमप्रतिबन्धकस्य सत्प्रतिपक्षत्वासिद्धेः प्रतिबन्धकत्वं चेत्युभयथोत्तम्भकभावप्रतिबन्धकाभावयोरभावान्माजीजनदिति त्वयि न्यायमुद्राधिकारिणि मुद्रितास्य जनकत्वाजनकत्वव्यवस्था । द्वितीयपक्षेऽपि यथा प्रतिबन्धकसद्भावेन सत्प्रतिपक्षस्याप्युत्तम्भकस्योत्तम्भकत्वं स्वीक्रियते तथाऽपरप्रौढप्रतिबन्धकसद्भावेऽपि किं न स्वीक्रियते । स्वीकारे तु कार्योत्पादप्रसङ्गः । तन्नातीन्द्रियशक्तिस्वीकारमन्तरेण कश्चन सहकारी सूपपादः । तदङ्गीकारे तु सर्वं सुस्थम् ।

प्रतिबन्धकेन शक्तिनाशे दारुतृणादीनामप्यदाह इति परमतमाशंक्य तत्खण्डनम् ।

अन्यः प्राह, "प्रतिबन्धकसन्निधाने शक्तेः प्रतिबन्धस्तावच्चाऽपि प्रोच्यते । स च यदि शक्तेर्विनाशः । तर्हि प्रतिबन्धकेन दहनस्य दहनसामर्थ्ये दलिते दारुतृणादीनामप्यदहनप्रसङ्गः । ततश्च स्वाश्रयस्याप्यदहनाद्दहनस्य निर्वाणत्वापत्तिः" । अथ करतलदाहाभिप्रायप्रयुक्तत्वान्मन्त्रस्य करतलदाहशक्तिरेव वह्नेर्विनश्यति । तर्हि करतलदाहशक्तौ विनष्टायामनभिमन्त्रितकरतलस्य तेन दहनं न भवेत् । अथ मन्त्रेण करतलस्यैव दाहशक्तिर्दाह्यता परपर्याया विनाश्यते

१ 'प्रसिद्धेः' इति प. म. पुस्तकयोः पाठः । २ 'उभयथा' इति नास्ति प.म. पुस्तकयोः ।

ततोऽभिमन्त्रितस्यैव तस्यादाह इति चेत् । तदसम्बद्धम् । विवक्षित-दहनादाद्यस्य करतलस्य दहनान्तरेणाप्यदाहप्रसङ्गात् । अथ बादरदहनाभिप्रायप्रयुक्तमन्त्राभिमन्त्रितकरतलस्य प्रतिनियतदहनापेक्षयैव क्षीणा शक्तिः । अस्त्वेवं तथापि प्रतिबन्धकाभावे सति कुतस्तेनैव कृशानुना तस्यैव करतलस्य दाहः स्यात् । तदानीमन्यैव शक्तिः संजातेति चेत्, ननु सा जायमाना प्रतिबन्धकाभावात्तदितरदृष्टदेशादिकारकचक्रादृष्टार्थान्तराद्वा संजायेत, न प्रथमः पन्थाः । तत एव स्फोटोत्पत्तिसिद्धेः शक्तिकल्पनावैयर्थ्यात् । नापि द्वितीयः । तदितरदृष्टदेशादिकारकचक्रस्य प्रतिबन्धककालेऽपि सद्भावेन शक्त्यन्तरप्रादुर्भावप्रसङ्गात् । नापि तृतीयः । अदृष्टार्थान्तरनिमित्ताकल्पने तत एव स्फोटोदयप्रसङ्गात् इति । तदेतदस्य तुण्डमण्डपाडम्बरपाण्डित्यमात्रम् । तथाहि प्रतिबन्धकेन दहनस्यैव शक्तिर्विनाश्यते । न च दारुतृणादीनामपि दहनशक्तिः । दाह्यानेकत्वेन शक्तीनामनेकत्वस्याभ्युपगमात् । न च कल्पनागौरवातङ्कः कर्त्तव्यः । प्रमाणोपपन्नवस्तुविषयत्वेन कल्पनागौरवस्यादोषत्वात् । तथा चाहुः, " प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि " इति । यद्वास्तु करतलस्यैव दाह्यताशक्तेर्विनाशः । यत्पुनरस्याः पुनरत्पत्तौ कारणं विकल्पितम् । तत्प्रकटयिष्यमाणकूपीटयोनिस्फोटघटनपटीयःशक्तिसमुत्पादककारणानुसारेण विचिन्तनीयम् ।

उदयनमतमुद्राव्य तत्खण्डनम् ।

यत्पुनरुदयनेन न्यगादि, " किं प्रतिबन्धकेन शक्तिर्विनाश्यते तद्धर्मो वा धर्म्मान्तरं वा जन्यते न वा किमपीति पक्षाः । तत्राकिंचित्करस्य प्रतिबन्धकत्वानुपपत्तिः । विपरीतधर्मान्तरजनने तदभावे सत्येव कार्यमित्यभावस्य कारणत्वस्वीकारः प्रागभावादि-

---

१ 'अदृष्टार्था' इति म. पुस्तके पाठः । २ ' निमित्तकल्पने ' इति म. पुस्तके पाठः । ३ न्यायकु. प्र. स्त. पृ. ४९ पं. १.

विकल्पावकाशश्च । तद्धर्मविनाशे वा पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वम् । पूर्वं स्वरूपोत्पादकादिदानीमुत्तम्भकात्तदुत्पत्तेः । न च समानशक्तिकतया तुल्यजातीयतया नैवमिति साम्प्रतम् । विजातीयेषु समानशक्तिनिषेधात् । न च प्रतिबन्धकशक्तिमेवोत्तम्भको निरुणद्धि न तु भावशक्तिमुत्पादयतीति साम्प्रतम् । तदनुत्पादप्रसङ्गात् । कालविशेषात्तदुत्पादे तदेवानियतहेतुकत्वं सम्पद्यते " इति । तत्र शक्तिनाशपक्ष एव कक्षीक्रियते । यत्पुनः पुनस्तदुत्पादेऽनियतहेतुकत्वमकथि । तन्न तथ्यम् । उत्तम्भकाच्छक्त्युत्पत्तेरनभ्युपगमात् । तस्य प्रतिबन्धकशक्तिसंहार एव व्यापारात् । शक्तसप्तार्चिः स्वरूपादेव हि परिणामिकारणादसौ सम्पद्यत इति वक्ष्यते । नन्वस्तु सप्तार्चिरेव परिणामिकारणं शक्तेः किन्तु तत्र कालोऽपि सहकारी कथ्यते सकलकार्योत्पत्तावेतस्य सहकारित्वेन स्वीकृतत्वान्न चास्याग्निना साकमेकं किञ्चिद्रूपं शक्तिजनकमस्ति विजातीयत्वादिति कुतो नियतहेतुकत्वमिति चेत् । असदेतत् । कालस्याग्निना साकं समानशक्तिकतया तुल्यजातीयत्वसम्भवात् । यत्तु विजातीयेषु समान शक्तिनिषेधादित्यभिधायि । तत्र विजातीयत्वं सर्वथा घटितं कथञ्चिद्वाभिप्रेतम् । नाद्यः पन्थाः । सर्वथा विजातीयस्य कस्यचिद्भावात् । जलज्वलनयोरपि द्रव्यत्वादिना समानजातीयत्वात् । द्वितीये तु पथि न कथंचित्समानजातीयतायाः प्रतिक्षेपः । कथंचिद्विजातीयतायाः कथंचित्समानजातीयत्वाविनाभावित्वात् ।

हन्त नूतनतमोक्तिमुद्रया किं तवोदयन तत्सखेऽनया ॥
या विदग्धघटितं न मृष्यते तर्ककर्कशवितर्कबर्बरम् ॥३०३॥

ननु प्राप्य शक्तिं प्रतिबन्धकः प्रतिबध्नात्यप्राप्य वा । न तावत्प्राप्य । शक्तिमतो मणिमन्त्रादिनाऽप्राप्तौ तेनास्याः प्राप्तेरयोगात् । न हि हस्तेन पटाप्राप्तौ तद्वतरूपादेः प्राप्तिः सम्भवति । अप्रा-

विकल्पप्रदर्शनपूर्वकमुद्राविताना परकीयाधिक्षेपाणां खण्डनम् ।

प्तस्य प्रतिबन्धे चैकस्मादेव मणिमन्त्रादेः सर्वस्याः शक्तेः प्रतिबन्धः स्यादिति चेत् । नैतच्चतुरस्रम् । योग्यतालक्षणसम्बन्धवशाद्योग्याया एवास्यास्तेन प्रतिबन्धोपपत्तेः । न खलु चुम्बकस्यापि प्रतिनियतलोहाकर्षणे तेन समं योग्यतातोऽन्यः सन्निकर्षादिः सम्बन्धोऽस्ति । योग्यताया अनङ्गीकारे च कथमेतदपि घटेत । यदुत, ५

कश्चिद्योगसमृद्धिलब्धविलसन्निःसीममाहात्म्यवान्
विद्यावेशविशेषसिद्धतिलकालङ्कारसंस्कारतः ॥
एकां कामपि कामकार्मुकलतासंवादिनीं कामिनी-
माकर्षत्यखिलास्तु न त्रिभुवनक्रोडान्तराध्यासिनीः ॥३०४॥

ननु वह्नेः शक्तिर्नष्टा सती प्रतिबन्धकोत्तरकालं कुतः समुत्पद्यते । १०
यत एव शक्त्यन्तरसहिताद्वह्निस्वरूपात्परिणामिकारणात्प्रथमं तत एवेति ब्रूमः । यदि शक्त्यन्तररहितादेव प्रतिबन्धकोत्तरकालविशिष्टाद्वह्निस्वरूपात्समुत्पत्स्यते तदा को दोष इति चेत् । न कश्चिदन्योऽनियतहेतुकत्वात् । एवं हि कल्पने दाहशक्तिजनकशक्त्यन्तरस्य सर्वथाऽभावात्पूर्वं वह्न्युत्पादककारणेभ्यः सम्प्रति तु वह्निस्वरूपात्त- १५
दुत्पत्तिप्रसक्त्याऽनियतहेतुकत्वम् । देशकालयोश्च यदि न शक्त्यन्तरमस्ति तदा कथं तौ सहकारिणौ स्याताम् । कुम्भादेरपि सहकारित्वापत्तेः । शक्त्यन्तरसाहित्ये तु यान्येव कारणानि दहनस्वरूपदेशकालादीनि तैर्नैकेन शक्त्यन्तरेण शृङ्खलेनेव समाकलितान्येव स्फोटादिकां शक्तिं घटयतीति कुतोऽनियतहेतुकत्वम् । ननु तच्छक्त्य- २०
न्तरं प्रतिबन्धकोपस्थानावस्थायामप्यस्ति न वा । नास्ति चेत् । कुतः प्रतिबन्धकोत्तरकालमुत्पद्येत । कालादेः शक्त्यन्तरशालिनो ज्वलनादेर्वा । कालादेश्चेत् । दाहोत्पादकशक्तिरपि तत एवास्तु किं शक्त्यन्तरसङ्गतेन दहनेन । शक्त्यन्तरशालिनो ज्वलनादेव तदुत्पादस्वीकारे तु तदपि शक्त्यन्तरसङ्गतादेव वह्नेरुत्पत्तिमदङ्गीकर्तव्यम् । २५
तदप्येवमित्यनवस्थानान्न कदाचित्प्रतिबन्धकोत्तरकालं कार्योत्पत्तिः

स्यात् । अथ दाहकारिशक्त्युत्पादिका शक्तिः प्रतिबन्धकावस्थायाम-प्यस्ति । तर्हि तदानीमेवासौ स्फोटघटनलम्पटां शक्तिं किमिति नोत्पादयति । किं प्रतिबन्धकाभावस्य सहकारिणोऽभावादभिभूतत्वाद्वा । आद्ये कल्पे प्रतिबन्धकाभाव एव सर्वत्र सहकारी कल्प्यतां किमतीन्द्रियशक्तिकल्पनाकलङ्केन । द्वितीये तु कोऽस्या अभिभवः । कार्योत्पत्त्यनाभिमुख्यमिति चेत् । तदपि पदार्थस्वरूपस्यैवास्तु किमनया । यदि चास्मत्पक्षे प्रकामं प्रद्विष्टाः शक्तिकल्पनेऽवगाढमभिनिविष्टाः। तथापि स्फोटोत्पादिकैव शक्तिस्तदानीमभिभूतास्तु किमनेनाज्ञनातनयलाङ्गूलदण्डाडम्बरविडम्बिना शक्त्यन्तरेण ।

भाति तवैष वयस्य वितर्कः कर्कशतर्कवितर्कपटूनाम् ॥
निर्भरदुर्भगदुर्गतरामाविभ्रमभङ्गिशतेन समानः ॥ ३०५ ॥

तथा हि यदुक्तम् , प्रतिबन्धकावस्थायां शक्त्यन्तरमस्ति न वेति। तत्रास्तीति नः पक्षः । यत्तूक्तं तदानीमेवासौ स्फोटघटनलम्पटां शक्तिं किमिति नोत्पादयतीति । तदप्युक्तम् । तदानीमपि तस्यास्तया समुत्पादनात् । यदि तदानीमपि तथाऽसौ समुत्पाद्यते कथं न कार्यजन्मेति चेत् । कार्यकरणक्षणे प्रतिबन्धकेन तस्याः प्रध्वंसात् । तज्जनिकाऽपि शक्तिः कथं न तेन प्रध्वस्यते इति चेत्, तदा कुड्यकाण्डपटादिना प्रभावयवीव तज्जनको रत्नावयव्यपि किमिति न प्रध्वस्यते इत्यभिधेयम् । तस्य ततो दूरदेशस्थत्वादिति चेत् । निकटस्थे तस्मिन् किमुत्तरं वितरसि । प्रभावयविनैव सार्द्धं तस्य विरोधित्वादिति चेत् । तर्हि स्फोटोत्पादकशक्त्यैव साकं प्रतिबन्धकस्य विरोधात् तस्या एव तेन निरोध इति तुल्यम् । कथमसौ तदानीं तामुत्पादयतीति निश्चीयते इति चेत् । अविकलत्वात्तस्याः । यदा हि कारणमविकलन्तदा स्वकार्यमर्जयत्येव । अविकलत्वमपि कुतो निश्चितमिति चेत् । तस्याः शक्तिस्वरूपकार्योपार्जने स्वोत्पाद्यशक्त्यनास्कन्दितदहनसत्तामात्रापेक्षत्वात् । तस्य च प्रतिबन्धकाव-

स्थायामपि भावात् । ननु किमियं शक्तिरपि प्रेक्षाचक्षुः । यत्स्वोत्पादशक्त्यनास्कन्दित एव दहने तामादधाति । ननु किं बीजमपि प्रेक्षाचक्षुर्यत्सहकारिनिकरपरिकरितमेवाङ्कुरं करोति । स्वभाव एवायमीदृगस्येति पुनरत्रापि सुप्रापम् । नन्वसौ शक्तिसमुत्पादिका शक्तिः कुतः समुत्पद्यते । यत एव जातवेदाः । स हि तथा सहित एव स्वहेतोरुपजायते । यत एवासौ विनश्यति तत एव सापि । ततो न प्रतिबन्धकाद्यावद्द्रव्यभावित्वात्तस्याः ।

ननु स्फोटादिजनिका शक्तिः शक्त्यन्तरसहकृता कार्यं करोत्यन्यथा वा । आद्ये कल्पेऽनवस्था । द्वितीये तु शक्तिवत्पदार्थस्वरूपमेव निःशक्तिकं कार्यकारि समस्तु किं शक्त्या कृत्यम् । एतदप्यसत्यम् । क्षित्यादिसहकारिण्यपि समानत्वात् । तथाहि क्षितिः क्षित्यन्तरसहकृताङ्कुरं करोत्यन्यथा वा । प्रथमेऽनवस्था । द्वितीये क्षितिवद्बीजमेव क्षितिरुण्णमङ्कुरकारि समस्तु किं क्षित्या कृत्यम् । अथ सदैव विश्वम्भरास्वरूपसहकारिपरिचितं बीजमङ्कुरमारचयद्विलोकितमिति कथं तामन्तरेण तस्याङ्कुरकरणकौशलमित्युपगममहासाहसं कर्तुमीश्महे इति चेत् । ननु भवतु क्षितिरूपे प्रत्यक्षे सहकारिणीदमुत्तरम् । अत्यक्षे पुनरदृष्टे किं वक्ष्यसि । न च सहकारीदमङ्कुरोत्पत्ताविति वाच्यम् । सर्वोत्पत्तिमतामदृष्टसहकारिवशादुत्पत्तेस्त्वया स्वीकारात् । अपि च शक्तिः शक्त्यन्तरसहकृतेत्यादिविकल्पपरिकल्पनेन शक्तेरुन्मूलने क्रियायामपि का ते प्रतिक्रिया । तथा हि यदा कयाचित्क्रियया कश्चित्किमपि फलमुत्पादयितुमभिलषति तदासौ क्रियापि क्रियावती फलोत्पादाय कल्प्यते अन्यथा वा । आद्येऽनवस्था । द्वितीये तु देवदत्तादिरेव फलोत्पादकोऽस्तु किं क्रियया । अथ क्रियाया अभावे विवक्षितकालादन्यदापि फलोत्पत्तिः स्यादतोऽस्त्येव क्रिया । न चास्यां क्रियान्तरमुपेयम् । तदुपगमे हि तस्या द्रव्यत्वप्रसङ्गो बाधकं

स्फोटादिजनिका शक्तिः शक्त्यन्तरसहकृता कार्यं करोत्यन्यथावेति विकल्पपूर्वकं खण्डयितुः पराकरणम् ।

प्रमाणं क्रियाया द्रव्याश्रितत्वादिति चेत् । इदं शक्तावपि तुल्यम् । शक्तेरभावे हि वह्न्यादेर्विवक्षितकालादन्यदापि दाहोत्पत्तिः स्यादतोऽस्त्येव शक्तिर्न चास्यां शक्त्यन्तरमुपेयं तदुपगमे हि तस्या द्रव्यत्वप्रसङ्गो बाधकं प्रमाणं शक्तीनां द्रव्याश्रितत्वात् । शक्तिर्हि पर्यायो न च पर्यायः पर्यायाश्रितो भवतीति । तत्किमशक्त एव शक्तिपर्यायः कार्यं कुरुते । क्रियापि किमक्रियैव कार्यं कुरुते इति समानम् । ननु क्रिया प्रत्यक्षसिद्धैव । शक्तिस्तु कार्यान्यथानुपपत्त्या परिकल्प्यते । सा च व्यभिचारिणी । द्रव्यस्य सहकारितया व्याप्रियमाणेभ्यः पर्यायेभ्यः शक्तिरहितेभ्योऽपि कार्योत्पादात् । न हि पर्यायेषु शक्तिरस्ति । तस्याः पर्यायत्वेन तदनाधारत्वादिति चेत् । तर्हि परमाण्वाद्यतीन्द्रियद्रव्यवर्त्तिनीषु कार्याऽन्यथानुपपत्त्यैव प्रतीयमानासु क्रियासु का वार्त्ता । ततः क्रियेव शक्तिरपि स्वीकर्त्तव्या ।

तदपि चात्र प्लवते यदजल्पि जयन्तेन पल्लवे[1] "स्वरूपादुद्भवत्कार्यं सहकार्युपबृंहितात् ॥ न हि कल्पयितुं शक्तं शक्तिमन्यामतीन्द्रियाम् ॥ १ ॥ सर्वदा न च सर्वेषां सन्निधिः सहकारिणाम् ॥ स्वरूपसन्निधानेऽपि न तदा कार्यसम्भवः ॥ २ ॥ मन्त्रे सति विषादीनां स्वकार्याकरणं तु यत् ॥ न शक्तिप्रतिबन्धात्तत्किन्तु हेत्वन्तरागमात् ॥ ३ ॥ मन्त्राभावो हि तद्धेतुर्धर्म्मादिसहकारिवत् ॥ मन्त्राभावस्ततस्तत्र हेत्वन्तरतया मतः ॥ ४ ॥ तेषाममलानरूपाणां ननु मन्त्रेण किं कृतम् ॥ कार्योदासीनतामात्रं शक्तौ चैष नयः समः ॥ ५ ॥ न हि मन्त्रप्रयोगेण शक्तिस्तत्र विनाश्यते ॥ मन्त्रवादिन्युदासीने पुनस्तत्कार्यदर्शनात् ॥ ६ ॥" इति । किं चेदमुदासीनतामात्रं यदि धर्म्मः कश्चिदसौ दृश्योऽदृश्यो वा । नाद्यः । तस्य क्वचिददर्शनात् । द्वितीये

पाठ्यग्रन्थे जयन्तेन कृतस्य शक्तिखण्डनस्य खण्डनम् ।

---

१ न्यायमञ्जर्यां पृ. ४१.

तु नातीन्द्रियकल्पनया परिणीताभिजातकान्तयेव त्यज्येत तद्वरं शक्तिः कल्पितास्तु । न चेदं शक्तावपि समम् । तस्यास्तस्याः प्रध्वंसस्योक्तत्वात् ।

यत्रास्यां शक्तिसंसिद्धौ मज्जत्युदयनद्विपः ॥
जयन्त हन्त का तत्र गणना त्वयि कीटके ॥ ३०६ ॥ ५

तदेवं स्वरूपसहकारिशक्तिरूपादृष्टहेतोरेव स्फोटादिकार्यमघटमानमतीन्द्रियां शक्तिं सप्तार्चिषः समर्प्पयति । ये त्वस्यामन्यथानुपपत्तौ सत्यां नं तां स्वीकुर्वते महासाहसिकास्ते । यद्वा,

मेघे चारुशचीशचापरचनारोचिष्णुचित्राञ्चिते
चञ्चत्कज्जलकालकान्तिकलिते कामं तथा गर्जति ॥ १०
किं काकः कुरुते कदापि किमपि प्रोल्लासिलास्योत्सवं
किं वा कोमलकण्ठनालललितं केकीव केकायितम् ॥३०७॥

यच्च दहनादयः स्वरूपसहकारिरूपादृष्टशक्त्यातिरिक्तभाजो न भवन्तीत्याद्यनुमानमवादि । तत्र स्वरूपसहकारिशक्त्योर्दृष्टत्वं प्रत्यक्षापेक्षया विवक्षितं प्रमाणान्तरापेक्षयापि वा । प्रथमपक्षे सकलकार्योत्पत्तिसहकारित्वेन स्वीकृतस्य प्रामाण्यदृष्टस्यापि प्रत्यक्षानुपलक्ष्यत्वेन दृष्टत्वाभावात् प्रतिषेधः स्यात् । अथ प्रमाणान्तरापेक्षयापि दृष्टत्वं विवक्षितम् । तथा चादृष्टस्यानुमानप्रमाणेन दृष्टत्वात्तदतिरिक्ताया एव शक्तेरभावः साध्यत इति चेत् । तर्हि सिद्धसाध्यता । प्रमाणपरिदृष्टेभ्योऽतिरिक्तशक्तेरस्माभिरप्यभावाभ्युपगमात् । न खलु प्रामाणिकः कश्चित्प्रमाणपरिदृष्टादतिरिक्तं वस्तु स्वीकरोति । कथितं च तत्साधनाय स्फोटान्यथानुपपत्तिरनुमानमनन्तरमेव । कार्योत्पादकत्वरूपो हेतुरपि सोपाधिः । अतीन्द्रियशक्त्यभावे द्रव्यत्वाभावस्यैव प्रयोजकत्वात् । श्यामत्व इव शाकाद्याहारपरिणतेः ।

शक्तिप्रतिक्षेपकानुमानस्य खण्डनम् । १५ २०

१ 'अपि' इत्यधिकं प. भ पुस्तकयोः ।

ततो यथा यत्रैव शाकाद्याहारपरिणतेः सद्भावः सत्यपि तत्पुत्रत्वे तत्रैव श्यामत्वमेवमिहापि यत्रैव कर्मादौ द्रव्यत्वाभावः सत्यपि कार्योत्पादकत्वे तत्रैव शक्त्यभाव इति । द्वितीयानुमानेऽपि सर्वप्रमाणैरनुपलभ्यमानार्थत्वादिति हेतुरसिद्धः । तत्साधकस्यानुमानस्य दर्शितत्वात् अपि च सर्वप्रमाणैर्भवानेव नोपलभेत[1] शक्तिशब्दस्यार्थं किं वा सर्वमपि जगत् । प्रथमपक्षे व्यभिचारी हेतुः । यदि नाम भवतस्तत्र न प्रमाणानि प्रवृत्तानि तत् किमेतावता तस्या अभावो भवतु । भावत्कप्रमाणसत्तायाः पदार्थसत्तां प्रति व्यापकत्वाभावात् । द्वितीयपक्षे तु सन्दिग्धासिद्धः । सर्वस्यापि प्रमातुस्तत्र प्रमाणं न प्रवर्त्तत इति असर्ववेदा निश्चेतुमशक्तेः । तृतीयानुमानेऽपि पार्थिवाप्यद्रव्याभ्यां व्यभिचारी हेतुः । ते हि चाक्षुषत्वे सति हेतू भवतो न च स्वैकसमवेतार्तान्द्रियकार्याकर्तृणी । गुणत्वगुणस्य तादृशस्य ताभ्यां निर्वर्त्तनात् । व्यर्थविशेष्यश्चायम् । चाक्षुषत्वविशेषणमात्रादेव साध्यसिद्धेः । न खलु चाक्षुषं किंचित् स्वैकसमवेतातीन्द्रियकार्यकारि समुपलब्धं यद्यवच्छेदाय हेतुत्वमुपन्यस्येत । वह्न्यादिकमित्यत्राप्यादिशब्देन समस्तं विवादास्पदं द्रव्यं धर्मित्वेन यद्यभीप्सितम् । तदा पक्षैकदेशासिद्धता हेतुविशेषणस्य । पक्षीकृताशेषद्रव्याणामेकदेशे वायुव्योमादौ चाक्षुषत्वविशेषणाभावात् । अथ पृथ्वीपाथोरूपमेव द्रव्यमादिशब्देनाभिप्रेतमिति नोक्तदोषावकाश इति चेत्, तर्ह्यव्यापिनी शक्त्यभावसंसिद्धिः । तन्नेदमप्यनुमानं साधु ।

हंहो न्याय्यं न्यायशास्त्रप्रवीणाः शक्तेर्यूयं बाढमत्र द्विषन्तः ॥
सर्वेभ्यो यद्भीतभीतेव युष्मन्नष्टा शक्तिः शक्त्यभावप्रसिद्धौ ॥ ३०८ ॥

यच्चोक्तं शक्तिर्नित्याऽनित्या वेत्यादि । तत्र नित्यानित्यां शक्तिं ब्रूमः । द्रव्यरूपतया नित्यत्वस्य पर्यायरूपतयाऽनित्यत्वस्य तत्र जैनैरभ्युपगमात् । यत्पुनरस्या उत्पत्तौ कारणं विकल्पितम् । तत्र दहनस्वरू-

नित्यानित्येति पक्षस्य ऽऽन-पूर्वकं शक्तेर्नित्यानित्य-रूपतायाः व्यवस्थापनम्।

---

१ 'उपलभते' इति प.पुस्तके पाठः। २ 'उत्पाति' इति प. म. पुस्तकयोः पाठः।

पमेव तत्कारणमित्युच्यते । ननु तदपि शक्तिमदेव तदुत्पादे व्याप्रियते सापि तत्र शक्तिः कुतः समुत्पन्नेति चेत् । येभ्य एव शक्तकारणेभ्यः पावकः कारणशक्तिरपि च तेभ्य एव समुत्पद्यते । न चैवमनवस्थापि दूषणाय । बीजाङ्कुरादिवत् । यत्पुनरुक्तं प्रतिकार्यमेका शक्तिरनेका वेत्यादि । तत्र कारणस्य प्रतिकार्यमनेकैव शक्तिः । तथा हि कारणमनेकशक्तियुक्तं विचित्रकार्यत्वात् नानाकारणवत् । विचित्रकार्याणि वा कारणस्य शक्तिभेदनिमित्तकानि तत्त्वाद्विभिन्नकारणकार्यवत् । यथैव हि सहकारफलादौ रूपादिज्ञानानि रूपादिस्वभावभेदनिबन्धनानि । तथैकस्मादपि प्रदीपादेर्भावाद्वर्त्तिकादाहतैलशोषादिविचित्रकार्याणि तावच्छक्तिभेदनिमित्तकानि व्यवतिष्ठन्ते । अन्यथा रूपादेर्नानात्वं न स्यात् । चक्षुरादिसामग्रीभेदादेव हि तज्ज्ञानप्रतिभासभेदः स्यात् । सहकारफलादिद्रव्यं तु रूपादिस्वभावरहितमेकमनंशमेव भवेत् । चक्षुरादिबुद्धौ प्रतिभासमानत्वात् रूपादेः कथं सहकारफलादिद्रव्यस्य तद्रहितत्वमिति चेत्, तर्हि तैलशोषादिविचित्रकार्यानुमानबुद्धौ शक्तिनानात्वस्य प्रदीपाद्यर्थानां प्रतीतेः कथं तद्रहितत्वं स्यात् । प्रत्यक्षबुद्धौ प्रतिभासमाना रूपादय एव परमार्थसन्तो नत्वनुमानमतौ परिस्फुरन्त्यः शक्तय इत्यप्यसुन्दरम् । अदृष्टेश्वरादेरपरमार्थसत्त्वप्रसङ्गात् । प्रदीपादिद्रव्यस्यैकस्य वर्त्तिकादिसामग्रीभेदाद्दाहादिकार्यनानात्वं न पुनस्तच्छक्तिस्वभावभेदादित्यप्यविचारितरमणीयम् । रूपादेरप्यभावानुषङ्गात् । शक्यं हि वक्तुं सहकारफलादिद्रव्ये चक्षुरादिसामग्रीभेदाद्रूपादिप्रतिभासभेदो न पुना रूपाद्यनेकस्वभावभेदादिति । तन्न प्रमाणप्रतिपन्नत्वाद्रूपादिवच्छक्तीनामपलापो युक्तः ।

१ 'तत्' इत्यधिकं प. पुस्तके ।

यच्चान्यदुक्तं किमसौ शक्तिमतोऽभिन्ना भिन्ना वेत्यादि । तत्राद्यपक्ष-

शक्तिः शक्तिमतो भिन्ना अभिन्ना वेति पक्षखण्डनपूर्वकं भेदाभेदपक्षस्य व्यवस्थापनम् ।

द्वयमनभ्युपगतमेव । भेदाभेदपक्षस्यैव स्वीकारात् । शक्तिमतो हि शक्तिर्भिन्ना । तत्प्रत्यक्षत्वेऽप्यस्याः प्रत्यक्षत्वाभावात् । कार्यान्यथानुपपत्त्या तु प्रती-

५ यमानासौ तद्वतो विवेकेन प्रत्येतुमशक्यत्वादभिन्नेति । न चात्र विरोधाद्यवतारः । भेदाभेदात्मकवस्तुनो जात्यन्तरत्वात् । मेचकज्ञानवत्सामान्यविशेषवच्चेति । ततः कार्यकारणभावप्रतिनियमं प्रतिजानानैः प्रतिपदार्थं स्वात्मभूतमतीन्द्रियकार्यैकसमधिगम्यं विचित्रं रूपान्तरं शक्त्यपराभिधानं प्रेक्षादक्षैः प्रतिपत्तव्यम् । एवं च

१० सन्नीतिनिश्रेणिवशात्प्रसिद्धिप्रासादमारूढवती कथञ्चित् ॥
नित्या विभिन्ना च विचित्ररूपा शक्तिः परोक्षा निखिलार्थसार्थे ॥३०९॥

तस्यां चार्थापत्तेरनुमानान्तःप्रतिष्ठरूपाया नापह्नोतुं शक्यं प्रतीयमानं प्रमाणत्वम् ।

यत्पुनः शाब्दप्रमाणपूर्विकाया अर्थापत्तेः पीनो देवदत्तो दिवा

१५ मीमांसकसंमतार्थापत्तेः खण्डनम् ।

न भुङ्क्ते इति निदर्शनमदर्शि जैमिनीयैः । तत्र वाक्यखण्डलककल्पनमनुपपन्नम् । अर्थस्यैव कार्यलिङ्गद्वारतः कल्पयितुमुपपन्नत्वात् । यथैव हि प्रत्यक्षतः स्थूलं क्वचिद्धूममालोक्य तत्कारणं धूमकेतनमनुगच्छन्ति ते तथैवागमादिनाधिकरणभोजनाभावविशिष्टं पीनत्वाख्यं कार्यमवधार्य तत्कारणं रजनिभोजनमप्यनुमिन्वन्तु । कोऽत्र विशेषः । लिङ्गस्य तु क्वचित् प्रत्यक्षात्प्रतिपत्तिः कुत्रचिद्विवेचनादिति नायं गरीयान् विशेषः । अथापरिपूर्णवचनं यथोचितां प्रतीतिमेव कर्तुमशक्तमिति चेत् । तर्किं पीनो देवदत्तो दिवा न भुङ्क्ते

१ ' प्रसाद ' इति प. पुस्तके पाठः । २ ' स्थूलं ' इति नास्ति प. पुस्तके ।

इत्यतस्तत्पीनत्वेप्रतीतिर्न भवति । ननु भवति साकाङ्क्षा तु भवति न च साकाङ्क्षप्रतीतिकारिणस्तस्य प्रामाण्यमिति तदेव तावत्पूरयितुं युक्तामिति चेत् । तदपि न परीक्षाक्षमम् । यतः कस्यात्र साकाङ्क्षत्वं शब्दस्य तदर्थस्य तदवगमस्य वा । शब्दस्य तावदर्थनिरपेक्षस्य न कदाचिदाकाङ्क्षा । अनभिव्यक्तशब्दवत् । अर्थस्तु साकाङ्क्षः सन्नर्थान्तरमेव कल्पयतु किं फलं वचनकल्पनायाः । अवगमोऽप्यर्थगोचर एव साकाङ्क्षो भवति न शब्दगोचरः श्रवणकरणकः । तस्मादवगमनैराकाङ्क्ष्यसिद्धये तदर्थकल्पनैव साधीयसी । वाक्यखण्डलककल्पनापि ह्यर्थावगतिसिद्धयर्थमित्यर्थकल्पनैवास्तु किं सामान्यान्तरेण । अथ कल्प्यमानस्यार्थस्यानागमिकत्वं प्राप्नोतीत्युच्यते । तर्हि वाक्यशकलकल्पनापक्षे सुतरामनागमिकः सोऽर्थः स्यात् । कल्प्यमानस्य तस्यागमादन्यत्वात् । श्रुतोऽनुमितश्च द्वेधाऽप्यागम एवायमिति चेत्, श्रौतश्च श्रौतार्थानुमितश्च द्विप्रकारोऽप्यागमार्थ एव भविष्यत्यसौ किं वाक्यांशविधानेन । तेन श्रूयमाणागमवचनप्रतिपाद्यार्थसामर्थ्यलभ्यत्वादेव तस्यागमार्थता भविष्यतीत्यर्थ एव कल्पयितुमुचितः । अपि च यस्मिन्नकल्पितेऽनुपपत्तिस्तदर्थापत्त्या प्रमीयते । रात्रिसम्बन्धे चानवगते भोजनस्यानुपपत्तिः । कालसम्बन्धाभावेन ह्यपानुपपत्तिः सा कालान्तरसम्बन्धमेव कल्पयितुमलम् । अथार्थसद्भावमेव कल्पयितुमर्थापत्तिः प्रवर्त्तमाना तस्य सविकल्पकज्ञानवेद्यत्वात् सविकल्पकज्ञानानां च शब्दपुरस्सरत्वात् पुरोवर्तिनि शब्द एव पर्यवस्यति । स च शब्दः स्वार्थमुपस्थापयतीति । तदसम्यक् । एवं सविकल्पकप्रत्यक्षानुमानोपमानादेरपि प्रामाण्यस्य सकलस्य शाब्द एव पर्यवसानप्रसङ्गात् । यदि च शब्दमात्रमुपपादकमुच्यते । तर्हि पीनो देवदत्तो दिवा न भुङ्क्ते इति यदा प्रयुज्य पुनरेवमुच्यते यामिन्यामत्तीति । तदा यामिनीशब्देऽत्तिशब्दे

१ ' पनिताप्रतिपत्ति ' इति प. पुस्तके पाठः । २ ' अर्थास्तु इति प. भ. पुस्तकयोः पाठः । ३ ' श्च ' इति नास्ति प. भ. पुस्तकयोः ।

वाऽव्युत्पन्नस्य पूर्वश्रुतवाक्यार्थाविषयानुपपत्तिरुपपरमेत । न चैवम् । ततः शब्दाद्भोजनस्य रात्रिसम्बन्धेऽवगत एव तदुपरतेः । ततोऽर्थस्यैव साक्षादुपपादकत्वमिति न सर्वथा वाक्यखण्डलकविषया श्रुतार्थापत्तिः श्रेयसीति । यच्चार्थापत्तिपूर्विकायां अर्थापत्तेरुदाहरणं शब्दकर्तृकार्थप्रत्यायनान्यथानुपपत्तिप्रतिपन्नवाचकशक्त्यन्यथानुपपत्त्या शब्दे नित्यत्वकल्पनेति मीमांसकैर्दर्शितम्, तदपि न मीमांसासहम् । वाचकशक्तेर्नित्यत्वकल्पनां प्रत्यन्यथानुपपत्तेरभावात् । पराकरिष्ये च पुरतः शब्दस्य नित्यत्वमित्यलमिह प्रपञ्चेन । अथ भवत्वन्यासामर्थापत्तीनामनुमानान्तःपातोऽभावपूर्विकार्थापत्तेस्तु कथमयमुपपद्यते । उच्यते । जीवतो गृहाभावेन लिङ्गभूतेन बहिर्भावानुमानात् । तथाहि जीवतश्चैत्रस्य सद्मन्यभावो बहिस्तद्भावपूर्वको जीवत्सद्मन्यभावत्वात् प्राङ्गणे स्थितस्य गृहे जीवद्भाववत् । यद्वा चैत्रो बहिरस्ति गृहासंसृष्टजीवनाधारत्वात् स्वात्मवदिति । ननु साधनप्रतीतिसमय एव साध्यस्य प्रतीयमानत्वेन प्रमेयानुप्रवेशाभ्युपगमदोषप्रसङ्गान्नेदमनुमानम् । तथा ह्यागमावगतजीवनस्य गृहाभावेन चैत्रस्य बहिर्भावः परिकल्प्यते । इतरथा मृतेनानैकान्तिको हेतुः स्यात् । अभावश्च गृहीतः सन् बहिर्भावं गमयति नागृहीतो धूमवत् । अभावग्रहणं च सकलसदुपलम्भकप्रमाणप्रत्यस्तमयपूर्वकम् । इह च सदुपलम्भके आगमप्रमाणे सति कथमभावः प्रवर्त्तेतेति सद्मनि प्रवर्त्तमान एवासौ सदुपलम्भकं प्रमाणं पृथग्विषयमवस्थापयति बहिरस्य भावो गृहे त्वभाव इति । तेन जीवतो बहिर्भावव्यवस्थापनपूर्वकगृहाभावग्रहणोपपत्तेः स्पष्टं प्रमेयानुप्रवेशलक्षणो दोषः । अनुमाने तु धूमादिलिङ्गग्रहणसमये मनागपि तदनुमेयदहनादिलिङ्गस्यानुप्रवेशस्पर्शो न विद्यत इति । नैतदुपपन्नम् ।

---

१ ' यथार्थापत्ति ' इति प. भ. पुस्तकयोः पाठः । २ ' पूर्विका ' इति भ. पुस्तके पाठः । ३ ' न ' इति नास्ति भ. पुस्तके । ४ ' परिकल्प्य ' इति प. भ. पुस्तकयोः पाठः । ५ 'स्पष्टः' इति प. पुस्तके पाठः । ६ 'एतद्' इति नास्ति प. पुस्तके ।

अतः किं प्रमेयमभिमतमत्र भवतां येन तदनुप्रवेशो दोषः स्यात् । किं सत्तामात्रमुत बहिर्देशविशेषणम् । सत्तामात्रं तावदागमादेवावगतमिति न प्रमाणान्तरप्रमेयतामवलम्बते । बहिर्देशविशेषितं तु सत्त्वं भवति प्रमेयम् । तस्य जीवद्गृहाभावग्रहणकालेऽनुप्रवेशः कुतस्त्य इति चिन्त्यम् । गृहाभावग्राहकं हि प्रमाणं गृह एव सदुपलम्भकप्रमाणावकाशमपाकरोति न बहिःसदसत्त्वचिन्तां प्रस्तौति । मृतस्य जीवतो वा दूरे प्राङ्गणेऽपि वा तिष्ठतश्चैत्रस्य गृहाभावपरिच्छेदे विशेषाभावात् । जीवनविशिष्टस्तु गृहाभावः प्रतीयमानो लिङ्गतामश्नुते । व्यभिचारनिरासात् । न च विशेषणग्रहणमेव प्रमेयग्रहणम् । जीवनमन्यदन्यच्च बहिर्भावास्त्यं प्रमेयम् । ननु जीवनयत्नविशिष्टगृहाभावप्रतीतिरेव बहिर्भावप्रतीतिः । न हि दहनाधिकरणधूमप्रतीतिरेव दहनप्रतीतिः । ननु धूमादन्य एव दहनः । इहापि गृहाभावजीवनाभ्यामन्य एव बहिर्भावः । पर्वतहुतवहयोः सिद्धत्वात् मत्वर्थमात्रं हि तत्रापूर्वमनुमेयमेवमिहापि बहिर्देशयोगमात्रम् । यदि तु तदधिकं प्रमेयमिह नेष्यते । तदा गृहाभावजीवनयोरभावागमाख्यप्रमाणाभ्यामवधारणादानर्थक्यमर्थापत्तेः । तस्मात्प्रमेयान्तरसद्भावात्तस्य च जीवद्गृहाभावलक्षणलिङ्गग्रहणसमयेऽननुप्रवेशान्न प्रमेयानुप्रवेशो दोषः । अर्थापत्तावपि तुल्य एवायं दोषः । तत्राप्यर्थादर्थान्तरकल्पनाभ्युपगमात् । " दृष्टः श्रुतो वाऽर्थो नोपपद्यत " इत्यर्थकल्पनेत्येवं ग्रन्थोपनिबन्धनात् । तस्य तस्मात्यतीतिरिति हि यत्र व्यवहारस्तत्रावश्यं तत्प्रतीतौ तदनुप्रवेशो दोष एष । स्वभावहेताविव तद्बुद्धिसिद्धथा तत्साध्यसिद्धेः प्रमाणान्तरवैफल्यादिति ।

१ 'यत्न'इति नास्ति प. म. पुस्तकयोः। २ 'अधिकरणात्' इति प. पुस्तके पाठः। ३ मीमांसाभाष्ये पृ. ८ पं. १७. ४ ' अन्यथा ' इत्यधिकं भ. पुस्तके। ५ ' नोपपद्य ' इति प. पुस्तके पाठः।

अभावप्रमाणं तु प्रत्यक्षादावेवान्तर्भवतीति न तद्द्वारेणाप्यभिमतप्रमाणसङ्ख्याव्याघातः । यत्तु तत्समर्थनाय प्रत्यक्षादेरनुत्पत्तिरित्यादि जैमिनीयैरजल्पि । तत्र सात्मनोऽपरिणामो वेति प्रथमपक्षे किमात्मा[1] सर्वथा ज्ञानरूपेणापरिणतः कथञ्चिद्वा । तत्राद्यविकल्पे माता मे वन्ध्येत्यादिवत् स्ववचनविरोधः । सर्वथा हि यद्यात्मा ज्ञानरूपतया न परिणतः कथमभावपरिच्छेदकः । परिच्छेदस्य ज्ञानधर्मत्वात् । परिच्छेदकत्वे वा कथमसौ सर्वथा[2] ज्ञानरूपतया न परिणतः । अथ कथञ्चित्[3] । तथा हि अभावविषयं ज्ञानमस्ति निषेध्यविषयं तु नास्तीति । तर्हि तज्ज्ञानमेवाभावप्रमाणं स्यान्नात्मा । तच्चेन्द्रियान्वयव्यतिरेकानुविधायित्वात्प्रत्यक्षमेव । द्वितीयपक्षे[4] यदन्यवस्तुनि अभावांशे विज्ञानं तत्प्रत्यक्षमेव । भावांशवदभावांशेऽप्यक्षाणां प्रवृत्त्यविरोधात् । एतेन यदभावप्रमाणस्यासाधारणविषयप्रदर्शनाय प्रमाणपञ्चकं यत्रेत्याद्युक्तम् । तदपि प्रत्युक्तम् । प्रत्यक्षादेरभावांशग्राहकत्वोपपत्तेस्तत्राभावप्रमाणकल्पनाया निरुपयोगादिति । यदप्यभावज्ञानस्य प्रत्यक्षताप्रतिक्षेपाय गृहीत्वावस्तुसद्भावमित्याद्यभिहितम् । तदप्यवद्यम् । अक्षापेक्षया जायमानत्वेन प्रत्यक्षताया एव तत्रोपपद्यमानत्वात् । यत्तु भूतदेशग्रहणजन्मन्येवाक्षाणामुपयोगित्वादक्षापेक्षित्वमन्यथासिद्धमभावज्ञानस्येत्युक्तम्। तदनुपपन्नम् । न खलु ज्ञानद्वयं क्रमेणोत्पद्यमानमिदमनुभूयते प्रथममिन्द्रियजं भूप्रदेशज्ञानं ततः प्रतियोगिस्मरणे सति मानसमिन्द्रियानपेक्षं नास्तिताज्ञानं च । एकस्यैव कुम्भादिविविक्तभूप्रदेशग्राहिणो ज्ञानस्याभावग्राहित्वेनाप्यनुभूयमानत्वात् तस्य चेन्द्रियजत्वेन त्वयापि प्रतिपन्नत्वात् नान्यथासिद्धमक्षापेक्षित्वमभावज्ञानस्य । एवं च भूतलादिवस्तुग्रहणघटादिप्रतियोगिस्मरणलक्षणोऽभावप्रमाणजनिका सामग्री निर-

मीमांसकसंमतस्याभावप्रमाणस्य सविस्तरं खण्डनम् ।

---

१ 'किमात्मवुद्धयसर्वथा' इति प. भ. पुस्तकयोः पाठः । २ ' परिणतं ' इति प. पुस्तके पाठः । ३ 'अपि इत्यधिकं ' प. भ. पुस्तकयोः । ४ अथेत्यधिकं प. भ. पुस्तकयोः ।

स्ता । तज्जन्यत्वेनाभ्युपेतस्य प्रत्यक्षाद्यतिरिक्तस्याभावप्रमाणस्य प्रतिक्षिप्तत्वात् । किं च भूतलादिकं वस्तु प्रत्यक्षेण घटपटादिभिः प्रतियोगिभिः संसृष्टं प्रतीयतेऽसंसृष्टं वा । तत्राद्यः पक्षोऽनुपपन्नः । प्रतियोगिसंसृष्टस्य भूतलादिवस्तुनः प्रत्यक्षेण प्रतीतौ तत्र प्रतियोग्यभावग्राहकत्वेनाभावप्रमाणस्य प्रवृत्तिविरोधात् । प्रवृत्तौ वा न प्रामाण्यम् । प्रतियोगिनः सत्त्वेऽपि तत्प्रवृत्तेः । द्वितीयपक्षे त्वभावप्रमाणवैयर्थ्यम् । प्रत्यक्षेणैव प्रतियोगिनां कुम्भादीनामभावप्रतिपत्तेः । अथोच्यते न संसृष्टं नाप्यसंसृष्टं प्रतियोगिभिर्भूतलादिवस्तु प्रत्यक्षेण गृह्यते वस्तुमात्रस्य तेन ग्रहणाभ्युपगमादिति । तदपि दुष्टम् । संसृष्टत्वासंसृष्टत्वयोः परस्परपरिहारस्थितिरूपत्वेनैकरूपनिषेधेऽपरविधानस्य[1] परिहर्तुमशक्यत्वात् । प्रतियोगिनश्च घटादेः स्मरणमनुभूतस्यैव नान्यथा । अतिप्रसक्तेः । तदनुभवश्चान्यासंसृष्टतयाभ्युपगन्तव्यः । तस्याप्यन्यासंसृष्टताप्रतिपत्तिस्तदन्यप्रतियोगिस्मरणात् । तत्राप्ययमेव न्याय इत्यनवस्था । अथ प्रतियोगिनो भूतलस्य स्मरणाद्घटस्यान्यासंसृष्टता प्रतीयते तत्स्मरणाच्च भूतलस्य तदितरेतराश्रयः । तथाहि न यावद्घटासंसृष्टभूभागप्रतियोगिस्मरणाद्घटस्य भूतलासंसृष्टताप्रतिपत्तिर्न तावत्तत्स्मरणाद्भूतलस्य घटासंसृष्टताप्रतिपत्तिर्यावच्च भूतलस्य घटासंसृष्टता न प्रतीयते न तावत्स्मरणेन घटस्येति । तस्मादन्यप्रतियोगिस्मरणमन्तरेणैवाभावांशो भावांशवत्प्रत्यक्षोऽभ्युपगन्तव्यः । भूतलासंसृष्टघटदर्शनाहितसंस्कारस्य च पुनर्घटासंसृष्टभूभागदर्शनानन्तरं तथाविधघटस्मरणे सत्यस्यात्राभावप्रतिपत्तिः प्रत्यभिज्ञानमेव । यदा तु सर्वं सर्वत्र विद्यते इति दुरागमाहितसंस्कारः सांख्यः प्रतिबोध्यते । यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्रासदिति व्यवहर्तव्यं यथा सत्त्वे रजस्तमसी तथा चात्र घट इति । तदाप्यनुमानमेवेति कामभावप्रमाणस्यावकाशः । यच्च न तावदिन्द्रियेणेत्याद्युक्तम् । तदपि न युक्तम् ।

[1] रूपेति नास्ति प. भ. पुस्तकयोः ।

यस्मादिन्द्रियाणामभावज्ञानाजनकतायामभावांशेन सह सम्बन्धाभावो निबन्धनमभिधीयते । तत्र कस्य सम्बन्धस्याभावः । किं संयोगलक्षणस्य योग्यतारूपस्य वा । नाद्यः कल्पः श्रेयान् । संयोगस्येन्द्रियाणां ज्ञानजनकत्वं प्रत्यप्रयोजकत्वात् । चक्षुषः संयोगाभावेऽपि भावांशे ज्ञानजनकत्वस्य प्रसाधयिष्यमाणत्वात् । नापि द्वितीयः । योग्यतालक्षणस्य संबन्धस्येन्द्रियाणामभावांशेऽपि सद्भावाविरोधात् । योग्यता हि कार्यदर्शनावसेया । कार्यं च ज्ञानाख्यमिन्द्रियाणां भावांशवदभावांशेऽपि उपलभ्यत एवेति । एतेन 'ननु भावादभिन्नत्वात्सम्प्रयोगोऽस्ति तेन चे' त्याशङ्क्य 'न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि नः' इति यत्समाहितं तदपि प्रतिहतम् । अनभ्युपगतोपालम्भत्वात् । भावांशेऽपीन्द्रियाणां ज्ञानजनकत्वं प्रति संयोगस्याप्रयोजकत्वेनाभिहितत्वात् । न चाप्यनुमानत्वमित्याद्यनुपपन्नमुक्तम् । वह्न्यादिकारणाभावज्ञानाज्जायमानस्य धूमादिकार्याभावज्ञानस्यानुमानत्वसम्भवात् । यत्त्विन्द्रियादिसामग्रीसमुद्भूतं कुम्भाद्यभावज्ञानं तस्य प्रत्यक्षत्वेनानुमानत्वमस्माभिरभ्युपगतमेव । यच्चान्यदवाचि मेयो यद्वदभावो हीत्यादि । तत्र भावरूपेण प्रत्यक्षेण नाभावो वेद्यत इति प्रतिज्ञाऽन्यासंसृष्टभूतलग्राहिणा प्रत्यक्षेण निराक्रियते । अनुष्णाग्निप्रतिज्ञेव तदौष्ण्यग्राहिणा प्रत्यक्षेण । भावात्मके यथा मेये इत्यसम्बद्धम् । अभावादपि भावप्रत्तिपत्तेः । यथा गगनतले पत्रादीनामधःपाताभावाद्वायोरिति । भावाच्च वह्न्यादेः शीताभावस्य प्रतीतिः सकललोकप्रतीता । यो यथाविधः स तथाविधेनैव गृह्यत इत्यभ्युपगमे चाभावस्य मुद्गरादिभावजन्यत्वाभावः स्यात् । शक्यं हि वक्तुं यो यथाविधः स तथाविधेनं जन्यते यथा भावो भावेन अभावश्चाभावस्तस्मादभावेनैव जन्यते । प्रत्यक्षबाधा चान्यत्रापि समाना । प्रागभावादिचतुर्विधाभावस्य चाभावप्रमाणविषयतया परैः परिकल्पितस्य

१ एवेत्यधिकं प. भ. पुस्तकयोः ।

यथा निरासस्तथाग्रे वक्ष्यते । ततश्च क्षीरे दध्यादि यन्नास्तीत्यादि-
कारिकाग्रन्थः प्रतिक्षिप्तो लक्षयितव्यः । यच्च वस्त्वसंकरसिद्धेश्च तेनाभाव-
प्रमाणतेत्यादि । तदपि न । तस्यापि प्रत्यक्षादिप्रमाणत एव प्रसिद्धत्वात् ।
कथं प्रत्यक्षादेरभावस्य परिच्छित्तिरिति चेत् । ननु भावस्यापि कथं
ततः परिच्छित्तिः । प्रतिभासाच्चेत् , तदितरत्रापि तुल्यम् । न खलु ५
प्रत्यक्षेणान्यसंसृष्टः प्रथमतोऽर्थोऽनुभूयते पश्चादभावप्रमाणादन्यासंसृष्ट
इति क्रमप्रतीतिरस्ति । प्रथममेवान्यासंसृष्टस्य भूतलादेरर्थस्य प्रत्यक्षे
प्रतिभासनात् । न चान्यासंसृष्टार्थवेदनादन्यत्तदभाववेदनं नाम ।
एवं च ।

प्रत्यक्षादेर्भिन्नरूपत्वमात्रं नाभावाख्यं मानमस्तीह षष्ठम् ॥ १०

यस्य ग्राह्यः प्रागभावाद्यभावः श्रद्धाजिह्मैर्जैमिनीयैर्न्यगादि ॥ ३१० ॥

एतेन प्रत्यक्षानुमानागमोपमानार्थापत्तिषु यथाक्रमं द्वित्रिचतुःपञ्च-
प्रमाणवादिनां वैशेषिकसांख्यनैयायिकप्राभा-
उक्तखण्डनातिदेशेन वैशेषिकसांख्यनैयायिकप्राभाकराणां खण्डनम् । कराणां प्रमाणसंख्याव्याख्याप्रत्याख्यानं कृतम-
वसेयम् । उक्तन्यायस्यात्राप्यविशेषात् । १५

ननु नाद्यापि प्रत्यक्षपरोक्षभेदेन प्रमाणद्वैविध्यमवतिष्ठते । सम्भवैति-
ह्ययोः प्रमाणान्तरभावात् । सम्भवो नाम समुदा-
सम्भवैतिह्ययोः प्रमाणान्तरत्वस्य खण्डनम् । येन समुदायिनोऽवगमः । यथा सम्भवति सहस्रे
शतं सम्भवति खार्यां द्रोण इति । अनिर्दिष्ट-
प्रवक्तृकं प्रवादपारम्पर्यमितिहोच्चुर्वृद्धाः इत्यैतिह्यम् । यथेह वृक्षे यक्षः २०
प्रतिवसतीति । तदशोभनम् । सम्भवस्यानुमानेऽन्तर्भावात् । यत्र हि
सहस्रं तत्रावश्यं शतं सम्भवतीत्यन्यथानुपपत्तेः पूर्वमेव ग्रहणात् ।
तथा हि सहस्रं समुदायि शतवत्सहस्रत्वात् पूर्वोपलब्धसहस्रवत् ।
एवं खार्यामपि द्रोणानुमानम् । ऐतिह्यं तु न प्रमाणम् । अनिर्दिष्ट-
प्रवक्तृकत्वेन सांशयिकत्वात् । आप्तवक्तृकत्वनिश्चये त्वागम इति । २५

१ 'दर्धायिष्यते' इति प. भ. पुस्तकयोः पाठः ।

यदपि प्रातिभमक्षलिङ्गशब्दव्यापारानपेक्षमकस्मादेवाद्य मे महीपतिप्रसादो भवितेत्याद्याकारं स्पष्टतया वेदनमुदयते । तदप्येतदिन्द्रियनिबन्धनतया मानसमिति प्रत्यक्षकुक्षिनिक्षिप्तमेव । यत्पुनः प्रियप्राप्तिप्रभृतिफलेन सार्द्धं गृहीतान्यथानुपपत्तिकान्मनःप्रसादोद्वेगादेर्लिङ्गादुदेति । तत्पिपीलिकापटलोत्सर्पणोत्थज्ञानवदस्पष्टमनुमानमेवेति परोक्षान्तर्गतमेव । प्रतिभातमेव ननु निश्चितं इति लौकिकव्यपदेशादनवधारणात्मकमप्रमाणमेवैतत्किं तदन्तर्भावचिन्तयेति कश्चित् । नासौ विपश्चित् । यतः सकलमेवेदमनवधारणात्मकमुच्येत किञ्चिद्वा । नाद्यः पक्षः । प्रायशोऽवधारणात्मकस्यैवाम्योत्पादात् । अनवधारणात्मकस्य तु तस्य प्रामाण्यमेव नास्तीति नाम्यान्तर्भावं वयमपि ब्रूमः ।

प्रातिभस्य प्रत्यक्षादावन्तर्भावकथनम् ।

तस्मादवस्थितमिदं प्रत्यक्षपरोक्षभेदतो द्वेधा ॥
एतत्प्रमाणतत्त्वं सर्वभिदां संग्रहप्रवणम् ॥ ३११ ॥ १ ॥

तत्राद्यं भेदं व्याचष्टे—

॥ स्पष्टं प्रत्यक्षमिति ॥ २ ॥

स्पष्टं विशदं यद्विज्ञानं तत्प्रत्यक्षमिति प्रत्येयम् । अत्र च प्रयोगः । प्रत्यक्षं स्पष्टज्ञानात्मकं प्रत्यक्षत्वाद्यत्तु न चैं स्पष्टज्ञानात्मकं तन्न प्रत्यक्षं यथानुमानं प्रत्यक्षं च विवादाध्यासितं ततः स्पष्टज्ञानात्मकमिति ।

अनेनाकस्माद्धूमदर्शनाद्वह्निरत्रेति ज्ञानं यावान् कश्चिद्धूमवान् प्रदेशः स सर्वोऽग्निमानित्यादिव्याप्तिज्ञानं चास्पष्टमपि प्रत्यक्षमाचक्षाणः प्राज्ञमानी प्रज्ञाकरगुप्तादिरवज्ञातः, अनुमानस्याप्येवं प्रत्यक्षतापत्त्या प्रत्यक्षमेवैकं प्रमाणं स्यात् । अपि च । अकस्माद्धूमदर्शनाद्वह्निरत्रेति ज्ञाने सामान्यं वा प्रतिभासेत विशेषो वा । यदि सामान्यम् । न

प्रज्ञाकरगुप्तादेः खण्डनम् ।

१ अनिन्द्रियेति प. भ. पुस्तकयोः पाठः । २ ' निश्चय ' इति प. भ. पुस्तकयोः पाठः । ३ ' च ' इति नास्ति प. पुस्तके । ४ अवज्ञातः=खण्डितः ।

तर्हि तज्ज्ञानं प्रत्यक्षम् । तस्य सामान्यगोचरत्वास्वीकारात् । तत्स्वीकारे वा प्रमेयद्वैविध्यात्प्रमाणद्वैविध्यमित्यङ्गीकारस्य भङ्गप्रसङ्गः । सविकल्पकत्वानुषङ्गश्च प्रत्यक्षस्य । अथ विशेषस्तज्ज्ञाने प्रतिभासते । तर्हि ततः प्रवर्त्तमानस्य प्रतिपत्तुर्वह्निविशेषसंशयो न प्रादुर्भवेत्तौर्णो वात्राग्निः पार्णो वेति यथा सन्निहिते वह्निविशेषे । न खलु पावकं सन्निहितमवलोकमानस्य तत्र संशयः समुल्लसति । समुल्लासे वा तस्य शब्दालिङ्गाद्वा विशेषं प्रतिपाद्यमानस्यापि प्रमातुरसौ समुल्लसेत् । तथा चेदमसङ्गतं भवेत् शब्दालिङ्गाद्वा विशेषप्रतिपत्तौ न तत्र सन्देह इति। तन्नेदमकस्माद्धूमदर्शनाद्वह्निरत्रेति ज्ञानं प्रत्यक्षम् । किं तर्हि लिङ्गदर्शनसमुत्थत्वादनुमानम् । दृष्टान्तावष्टम्भं विनाप्यनुमानं भवतीत्येतच्च पुरस्तादुपपादयिष्यते । व्याप्तिज्ञानमप्यस्पष्टत्वेनाप्रत्यक्षं व्यवहारिणां सुप्रतीतम् । व्यवहारानुकूल्येनैव प्रमाणचिन्ता प्रतन्यते भवद्भिः । प्रामाण्यं व्यवहारेणेत्यभिधानात् । न च व्यवहारिणां सर्वेऽभ्यादयो धूमादयो वा स्पष्टज्ञानगोचरा इत्यभ्युपगमोऽस्ति । अनुमानस्य वैयर्थ्यप्रसक्तेः । समस्तं हि व्याप्यं व्यापकं च स्पष्टत्वेन युगपन्निश्चिन्वतः प्रमातुर्न किंचिदनुमानेन साध्यं सम्भवति । अन्यथा योगिनामप्यनुमानबलात्पदार्थनिश्चयप्रसङ्गः । समारोपनिषेधार्थमनुमानस्य प्रवृत्तमानत्वान्न वैयर्थ्यमिति चेत् । तदप्यनुचितम् । निश्चिते समारोपस्यासम्भवात् निश्चयसमारोपयोः परस्परं विरुद्धत्वात् । अथ कालान्तरभाविसमारोपनिषेधकत्वेन नानुमानस्य वैयर्थ्यम् । एवं तर्हि क्वचिदुपलब्धदेवदत्तस्य पुंसः पुनः कालान्तरेऽनुपलभ्यास्यसमारोपे सत्यनन्तरं यत्स्मरणादिकं तस्याप्यवैयर्थ्यं स्यात् । तथा च प्रमाणान्तरमेतदापद्येत । तन्न व्याप्तिज्ञानमप्यस्पष्टत्वात् प्रत्यक्षं युक्तम् ।

ननु चास्पष्टत्वं ज्ञानधर्मोऽर्थधर्मो वा । यदि ज्ञानधर्मः । कथमर्थ-

---

१ तृणजन्यः । २ पर्णजन्यः । ३ ' सन्निहितं पावकं ' इति प. पुस्तकं पाठः । ४ ' किं ' इति नास्ति भ. पुस्तके । ५ ' च ' इत्यधिकं प. पुस्तके । ६ 'मानवैयर्थ्यं ' इति प. पुस्तके पाठः ।

स्यास्पष्टत्वम् । अन्यास्पष्टत्वादन्यस्यास्पष्टत्वेऽतिप्रसक्तिः । अर्थधर्म्मत्वे पुनरस्य कथमतो व्याप्त्यादिज्ञानस्याप्रत्यक्षत्वं प्रसिध्येत्। व्यधिकरणाद्धि हेतोः साध्यसिद्धौ काकस्य कार्स्न्याद्धवलः प्रासाद इत्यादेरपि गमकत्वप्रसङ्ग इति चेत्। तदपि दुराशामात्रम्। स्पष्टत्वेऽप्येतस्य तुल्यत्वात्। स्पष्टत्वमपि हि यदि ज्ञानधर्मस्तर्हि कथमर्थे स्पष्टता। अतिप्रसक्तेः। विषये विषयिधर्मस्योपचाराददोषेऽत एवान्यत्राप्यदोषोऽस्तु। संवेऽदनस्यैव ह्यस्पष्टता धर्मः स्पष्टतावत्। यदि तु तस्याः परिच्छेद्यपदार्थधर्मत्वं स्वीक्रियते। तर्हि सर्वदा तथा प्रतिभासप्रसङ्गात्कुतः प्रतिभासपरावृत्तिर्भवेत्। ननु विषयिधर्मस्य विषयेपूपचारात्तत्र स्पष्टत्वास्पष्टत्वव्यवहारे विषयिणोऽपि ज्ञानस्य स्पष्टत्वधर्मतासिद्धिः कुतः। किं तज्ज्ञानगोचरज्ञानान्तरगतस्पष्टत्वास्पष्टत्वाभ्यां स्वतो वा। प्रथमपक्षेऽनवस्था। द्वितीयपक्षे त्वविशेषेण निखिलज्ञानानां स्पष्टत्वमस्पष्टत्वं वा प्रसज्येतेति चेत्। तदप्यचारु। अन्यथैव ज्ञाने स्पष्टत्वास्पष्टत्वधर्मतासिद्धेः। तथा हि प्रबलतरज्ञानावरणवीर्यान्तरायकर्मक्षयोपशमविशेषात्काचिद्विज्ञानस्य स्पष्टत्वं विपरीतात्तु तस्मादस्पष्टत्वम्।

स्पष्टज्ञानस्वरूपत्वं तत्प्रत्यक्षस्य लक्षणम् ॥
व्यवस्थितमिदं युक्तिप्रतीतिभ्यामबाधितम् ॥३१२॥२॥

अथ स्पष्टत्वमेव प्रकटयन्नाह—

॥अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वमिति ॥ ३ ॥

अनुमानादिभ्यो वक्ष्यमाणभेदेभ्यः[1] सकाशादाधिक्येनातिरेकेण विशेषाणां नियतवर्णसंस्थानार्थाकाराणां[2] प्रकाशनं प्रतिभासनं यस्य ज्ञानस्य तत्स्पष्टत्वं वैशद्यमित्यर्थः। तदुक्तम् ' **अनुमानाद्यतिरेकेण विशेषप्रतिभासनम् ॥ तद्वैशद्यं मतं बुद्धेरवैशद्यमतः परम्॥१॥**' इति।

---

१ ' परोक्षप्रमाण ' इत्यधिकं प. पुस्तके । २ ' संस्थानाद्यर्था ' इति प. पुस्तके पाठः ।

प्रतीत्यन्तराव्यवधानेन प्रतिभासनमपि ज्ञानस्य वैशद्यमिति वदतां तार्किकम्मन्यानां जैनमतानभिज्ञत्वम् ।

केचित्तु तार्किकम्मन्याः प्रतीत्यन्तराव्यवधानेन प्रतिभासनमपि ज्ञानस्य वैशद्यं वदन्ति । अनुमानादिपरोक्षप्रमाणभेदेषु हि धूमादिगोचरप्रतीतिव्यवधानेन धूमध्वजादिवस्तुनः प्रतीतिरित्यवैशद्यं तेषाम् । प्रत्यक्षे तु नैवं प्रतीत्यन्तरव्यवधानमस्तीति वैशद्यं तस्य । न ते जैनदर्शनोपनिषदं स्वप्नेऽपि प्रापुः । एवं प्रकारं वैशद्यं वदन्तस्ते कथमीहादिज्ञानस्य सन्देहाद्यपेक्षिणः प्रत्यक्षतां व्यवस्थापयिष्यन्ति । अथ ब्रूयुरपरापरेन्द्रियव्यापारादेवेहादीनामुत्पत्तेः सन्देहाद्यनपेक्षत्वात्प्रतीत्यन्तराव्यवधानेन प्रत्यक्षतेति । तदपि प्रतीतिपराङ्मुखम् । ईहादयो हि सन्देहादिभ्यः समुपजाययानाः प्रतीयन्त एवेति कथं तदनपेक्षत्वम् । प्रतीयमानस्यापि कार्यकारणभावस्यात्रापह्नवे सर्वत्र तदपह्नवः किन्न स्यात् । अथैकमिदं संवेदनमवग्रहार्थचेष्टाशयोपेतमित्यत्रापि प्रतीत्यन्तराव्यवधानमस्तीति । ननु तथापि तदनेकत्वपक्षे प्रतीत्यन्तरव्यवधानमलब्धसमाधानम् । स्याद्वादिना ह्यवग्रहादीनामेकत्वमिवानेकत्वमपि वक्तव्यम् । तदेवं परोदितस्य वैशद्यलक्षणान्तरस्यानुपपत्तेर्यथोदितलक्षणमेव वैशद्यं स्पष्टत्वापरपर्यायं स्वीकार्यम् ।

सूत्रोक्तवैशद्यलक्षणस्यासंभवादिदोषरहितत्वम् ।

निरवद्यं चेदं स्पष्टत्वं प्रत्यक्षस्य लक्षणम् । साकल्येनाखिलाध्यक्षव्यक्तिषु सम्भवेनाव्याप्त्यसम्भवदोषानास्पदत्वात् । अतिव्याप्तिस्तु दूरोत्सारितैव । अध्यक्षत्वानभिमते क्वचिदप्येतल्लक्षणस्यासम्भवात् । समन्धकारादौ मलिनवस्तुवेदनमप्यध्यक्षमेव । संस्थानमात्रे तस्यापि स्पष्टत्वात् । ननु च परोक्षेऽपि स्मृतिप्रत्यभिज्ञादित्वरूपसंवेदनेऽस्याध्यक्षलक्षणस्य सम्भवादतिव्याप्तिरेवेति चेत्, नैवम् । तस्य परोक्षत्वासम्भवात् ।

---

१ आदिग्रहणात् अवायधारणाग्रहणम् । लक्षणं तु क्रमेण परि. २ सू. ८, ९, १० इत्यत्र द्रष्टव्यम् । २ आदिग्रहणात् उक्तसंशयस्य ग्रहणम् । अवग्रहलक्षणं परि. २ सू. ७ इत्यत्र द्रष्टव्यम् ।

क्षायोपशमिकसंवेदनानां स्वरूपसंवेदनस्यानिन्द्रियप्रधानतयोत्पत्तेरनिन्द्रियाध्यक्षव्यपदेशसिद्धेः । बहिरर्थग्रहणापेक्षया हि विज्ञानानां प्रत्यक्षपरोक्षव्यपदेशो नतु स्वरूपापेक्षया । स्वरूपे सर्वज्ञानानां स्पष्टप्रतिभासत्वेन प्रत्यक्षतयैव व्यवस्थितत्वात् ।

५ तस्मान्निर्दोषत्वात्स्पष्टत्वं प्रत्यक्षलक्षणं प्रेक्षावद्भिरङ्गीकर्त्तव्यं नेन्द्रिय-

चक्षुषोऽर्थेन सन्निकर्षाभावमभ्युपगच्छतो नैयायिकस्य खण्डनम् ।

सन्निकर्षोत्पन्नमित्यादि नैयायिककल्पितम् । चाक्षुषसंवेदने तस्यासत्त्वेनाव्यापकत्वात् । चक्षुषोऽर्थेन सन्निकर्षाभावात् ।

इदमस्मदुदीरितं निशम्य प्रोद्यत्कोपविपाटलीकृताक्षम् ॥

१० निगदति नितरामभृप्यमाणं तदिदं योगकदम्बकं मिलित्वा ॥ ३१३ ॥

आः किमिदमुच्यते चक्षुषोऽर्थेन सन्निकर्षाभावादिति । अस्ति हि

चक्षुषः प्राप्तार्थपरिच्छेदकत्वमित्यर्थे साधकानुमानानां खण्डनम् ।

तत्सद्भावग्राहकमनुमानम् । तथा च व्योमशिवः " चक्षुः प्राप्तार्थपरिच्छेदकं व्यवहिताप्रकाशकत्वात् यद्यद्व्यवहिताप्रकाशकं तन्ना-

१५ प्राप्तार्थपरिच्छेदकं यथा प्रदीपः व्यवहिताप्रकाशकश्च चक्षुः तस्मात्प्राप्तार्थपरिच्छेकम्" इति । किरणावलीकारोऽपि 'येषां त्वप्राप्यकारि चक्षुस्तेषामप्राप्तत्वाविशेषादव्यवहितमिव व्यवहितमपि किन्न गृह्णीयात्' इति वदति तदेव समर्थयते श्रीधरोऽप्येतत् 'बाह्येन्द्रियत्वात्त्वगिन्द्रियवत्' इति द्वितीयं च प्राह ।

२० कश्चित्पुनरुवाच । चक्षुः प्राप्यकारि भौतिकत्वाद्यदेवं तदेवं यथा परशुस्तथा चेदं ततस्तथा । अथ चक्षुषः प्राप्यकारित्वे कथं भूधरचन्द्रमसोर्युगपद्ग्रहणम् । तदसत् । युगपत्तद्ग्रहणस्याप्रसिद्धेः । प्रथमतो हि चक्षुः सन्निहितं महीधरं प्राप्य प्रकाशयति । पश्चाद्दूरचारिणं

१ ' च ' इति नास्ति प. भ. पुस्तकयोः । २ किरणावल्यां पृ. २८८ पं. ९. ३ न्यायकन्दल्यां पृ २३ पं. १५.

हरिणलक्ष्माणम्। युगपत्प्रतिपत्त्यभिमानस्तु शतपत्रपत्रशतव्यतिभेदवदाशूत्पत्तिनिमित्तकः।

एवं च लोचनस्य प्राप्तिसिध्यत् प्राप्यकारिता श्रुतिवत्॥
तन्नयनसन्निकर्षाभाववचः सङ्गतिं कथमुपैतु॥ ३१४॥

एषामहो जगदपूर्वपदार्थसिद्धौ
कोऽप्येष दुर्द्धरतरः खलु पक्षपातः॥
किन्त्वभ्यधायि स न कश्चन युक्तिलेशः
प्राप्नोति यः किमपि हन्त तदानुरूप्यम्॥ ३१५॥

तथा हि यत्पौरस्त्यमनुमानम्। तत्र भावचक्षुर्द्रव्यचक्षुर्वा धर्मितया वर्ण्येत। न तावद्भावचक्षुः। त्वया तस्याक्षीकारेण धर्मिणोऽप्रसिद्धौ साधनस्याश्रयासिद्धताप्रसक्तेः। अक्षीकारेऽपि नास्य पदार्थेन प्राप्तिः सिद्ध्यति। भावचक्षुः खल्वात्मनो बुद्धिलक्षणो गुणः प्राप्तिरपि पदार्थेन संयोगो गुणः। न च गुणे गुणान्तरमस्ति। निर्गुणत्वात् तद्गुणानाम्। द्रव्यचक्षुरपि गोलकरूपमन्यद्वा किञ्चिद्भवेत्। आद्यपक्षे प्रत्यक्षबाधः प्रतिज्ञायाः। प्रत्यक्षेण परिच्छित्तिकाले पदार्थसम्बद्धस्यैव गोलकस्योपलब्धेः। अन्यथा तदानीं पुंसः पक्ष्मप्रदेशे प्रकटकोटरोपलम्भः स्यात्। पदार्थस्य वा गोलकदेशे प्रतीतिः स्यात्। अथान्यत्किञ्चिच्चक्षुरिन्द्रियं धर्मितया ह्यधिष्ठाननिष्ठमेवं पटिष्ठमर्थपरिच्छेदे स्वीक्रियते। तदा स एव तद्देशे पदार्थस्योपलम्भः स्यात्।

अथाधिष्ठानदेशात्प्रसरद्रश्मिरूपावयवसमवेतं चक्षुः प्रमृत्यार्थेन सम्बद्ध्यते संम्बद्धं चोपलम्भयति। तदसुलभम्। चक्षुः प्रमृत्य नार्थेन सम्बद्धय त्त्वगादिवादित्यनुमानबाधापातात् चक्षुषो रश्मिवत्त्वासिद्धेः। अथ रश्मिवच्चक्षुस्तैजसत्वात् यद्दित्थं तद्दित्थं यथा ज्योतिस्तथाचेदं तस्मात्तथेत्यतस्तत्सिद्धिः। न चासिद्धं तैजसत्वम्। चक्षुस्तैजसं रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वाद्यदेवं तदेवं यथा दीपस्तथा

१ 'धर्मि तद्यधिष्ठान' इति प. भ. पुस्तकयोः पाठः।

चेदं तस्मात्तथेत्यतस्तत्सिद्धेः । रूपस्याभिव्यञ्जकत्वादित्युक्ते मनसा व्यभिचारो भवेत् । तद्धि रूपव्यञ्जकं न च तैजसमिति तद्व्यवच्छेदार्थं नियमेनेति पदम् । न हि मनो रूपस्यैव व्यञ्जकं गन्धादीनामपि व्यञ्जकत्वात् । एवमपि रूपत्वद्रव्यादिव्यञ्जकत्वोपलब्धेरसिद्धत्वं स्यादिति रूपादिषु मध्ये इत्युक्तमिति चेत् । तदसुन्दरम् । इन्दुदीधितिप्रतिबन्धे तदितिं प्रतिबन्धे रूपादिप्वित्यादिहेतोरनैकान्तिकत्वात् । न च शुचिरोचिःशोचिःसञ्चयस्यापि तैजसत्वान्न व्यभिचार इति वाच्यम् । उष्णस्पर्शशून्यत्वेन तैजसत्वासम्भवात् । तथा तेजःप्रकरणे वैशेषिकभाष्यम् । ' उष्ण एव स्पर्शः ' इति ।

यत्पुनरुदयनोऽत्राह ' एवंकारश्चन्द्रचामीकरचक्षुरादिष्वनुपलम्भहेतुकां विप्रतिपत्तिमपनेतुं, तेषां तैजसत्वेनोष्णत्वानुमानात्' इति । तदबन्धुरम् । शशधरेऽद्यापि तैजसत्वासिद्धेः । अथ प्रस्तुतहेतुत एवात्रापि तत्सिद्धिरभिधीयते । तदशस्यम् । अस्यानुमानबाधितपक्षानन्तरोपन्यस्तत्वेन कालात्ययापदिष्टत्वात् । तथाहि न चन्द्रस्तैजसः शैत्यहेतुत्वात् पाथोवदिति । सति च सुधांशोरतैजसत्वे सुतरां तन्मरीचीनामतैजसत्वम् ।

यस्त्वयं कस्यचिदागमः । ' जलकल्लोलश्चन्द्रस्तत्र प्रतिहतास्तपनांशवः प्रद्योतन्ते शिशिराश्च भवन्ति तत एव शैत्यहेतव ' इति । सोऽपि स्वैरालापः । कस्य पयोराशेरयं कल्लोलः । कथं तं विहाय विहायस्तलमालम्बे । कुतः परिमण्डल एव कथं न स्पन्दते । काठिन्यमाप्तो वा । तत्प्रतिफलितास्तपनांशाः शिशिराः सुखालोकाः सकलदिवप्रसारिणश्च भवन्ति । कथं च न दिवापि तत्प्रतिफलनमित्यादि विचारचतुःपथासञ्चरिष्णुत्वात् । तथाविधस्यापि स्वीकारे

१ ' प्रबन्धे ' इति म. पुस्तके पाठः । २ ' तादिति प्रतिबन्धे ' इति नास्ति म. पुस्तके । ३ वैशेषिकदर्शने प्रशस्तपादभाष्ये पृ. १५ पं. ८. ४ किरणावल्यां पृ. २८३ पं. २. ५ ' बन्धुरं तन्नतानतम् ' न चतुरस्रमित्यर्थः । ६ अप्रशस्यमित्यर्थः । ७ ' तथा च ' इति प. भ. पुस्तकयोः पाठः । ८ आकाशतलम् । ९ ' विचारयितुः पथा ' इति म. पुस्तके पाठः ।

परस्परस्यापि स्वेष्टसिद्धया स्वमतव्याघातः। तेजोरूपनयनसन्निकर्षेणापि व्यभिचारी प्रकृतहेतुः। अयं हि रूपादिषु रूपस्यैवाभिव्यञ्जकोऽस्ति न च तैजसः।

अथ द्रव्यत्वे रूपादिषु नियमेन रूपस्याभिव्यञ्जकत्वादिति विशिष्य हेतुरुच्यते। तदाप्यञ्जनादिनानैकान्तः। अथ तैजसमेवाञ्जनं न पुनः पार्थिवम्। तत्रानुद्भूतस्य तेजोद्रव्यस्य भावादिति चेत्। तदयुक्तम्। प्रमाणभावात्। तैजसमञ्जनं रूपावभासने नयनस्य सहकारित्वात्प्रदीपवदिति प्रमाणमस्तीति चेत्। तदचतुरस्रम्। चेतसा व्यभिचारस्य दुष्परिहारत्वात्। अथ रूपस्यैवावभासने नयनस्यैव वा सहकारित्वादित्यवधारणगर्भसाधनोपदर्शनेन सकलानां विषयाणामिन्द्रियाणां वा साधारणस्यान्तःकरणस्य व्यवच्छेदेन व्यभिचारपरिहारः क्रियते। तदाऽऽद्यपक्षे हेतुरसिद्धः। द्रव्यादेरपि व्यञ्जनेऽञ्जनस्य नयनसहकारित्वात्। द्वितीये तु दृष्टान्तस्य साधनवैकल्यम्। रूपेऽपि स्वविषयतयावभासं जनयति प्रदीपस्य सहकारितया नयनं प्रत्येव सहकारित्वासम्भवात्। अथ रूपादिषु मध्य इत्यादिहेतोरेवाञ्जनस्य तैजसत्वसिद्धिरुच्यते। तर्हि निदर्शनं वाच्यम्। प्रदीप एवेति चेत्। न। अस्य साधनशून्यत्वात्।

अहो किमिदमुच्यते किं प्रदीपः प्रबोधितो न रूपमभिव्यनक्ति रसादीनपि चाभिव्यनक्ति। उच्यते। अभिव्यञ्जयत्येवायं स्वान्तर्निमग्नानामगुरुमृगनाभिकर्पूरशकेलादीनां सुरभिपरिमलोद्गारं नागकर्णिकाविमर्दककरतलमिव नागकर्णिकादेः। एवं चक्षुषस्तैजसत्वसिद्ध्यनुमानेऽपि साधनवैकल्यं दृष्टान्तस्य वाच्यम्। अपि च यदि चक्षुषस्तैजसत्वं स्यात्तदा कथं न तत्र भास्वररूपोपलम्भः। तेजसि तस्य स्वाभाविकत्वात्। अनुद्भूतत्वादिति चेत्, नन्वेवं रूपाभिव्यञ्जकत्वमस्य दुरुप-

---

१ 'शलाका' इति प. भ. पुस्तकयोः पाठः।

पादम् । तथा हि यदुद्भूतभासुररूपरहितं तन्न रूपाभिव्यञ्जकं यथा पाथःसंयुक्तमनूनपात्तथा चक्षुः कक्षीकृतं त्वयेति ।

यत्तु भूषणेनाबभाषे । 'कथमनुद्भूतरूपाणामर्थप्रकाशकत्वमिति चेत् । न । प्रदीपादिप्रकाशसहितानां तदुपपत्तेः । अत एव येषामदृष्टसामर्थ्यादुद्भूतरूपा नायना रश्मय उत्पन्नास्तेषां बाह्यप्रकाशनिरपेक्षा एवार्थं प्रकाशयन्ति यथा नक्तञ्चराणाम् । तथा च केषांचिन्नक्तञ्चराणां नायना रश्मयः प्रत्यक्षेणैव दृश्यन्ते' इति । तदपि न कमनीयम् । कुम्भादेरप्यनुद्भूतभासुररूपपरिकल्पनया प्रदीपादिसहकृतस्य प्रकाशकत्वोपपत्तेः । तस्यातैजसत्वेन भासुररूपमेव नास्तीति कुतस्तत्र तस्यामुद्भूतत्वकल्पनोपपत्तिमतीति चेत् । ननु चक्षुषोऽपि कुतस्तैजसत्वसिद्धिः । रूपादिषु नियमेनेत्यादिहेतोरेवेति चेत् । तत एवान्यस्यापि सास्तु । अत्रार्थं हेतुरसिद्ध इति चेत् । लोचनेऽपि कथं सिद्धः । प्रदीपादिसहकृतस्य प्रकाशकत्वोपलब्धेरिति चेत् । तदन्यत्रापि न नाम नास्ति ।

अनुद्भूतरूपस्यापि चक्षुषः प्रदीपादिसहकारेणार्थप्रकाशकत्वमिति भूषणमतस्यापपादपूर्वकं खण्डनम् ।

अथ वृषदंशादिचक्षुरालोकासहकृतमपि प्रकाशकमुपलब्धं नत्वेवं कुम्भादिरिति चेत् । तत्किमयमाशयस्ते यदालोकसहकृतमेव प्रकाशकं तन्न तैजसमिति । तर्हि नरनारीनयनानां तादृशमतैजसत्वप्रसक्तिः । यदप्यवाचि केषाञ्चिन्नक्तञ्चराणां नायना रश्मयः प्रत्यक्षेण दृश्यन्त इति । तदपि यदि परममांसचक्षुषामपेक्षया प्रोक्तम् । अस्मदादिभिस्तत्र रश्मीनामप्रतिपत्तेः । वृषदंशदृशोः प्रतीयन्त एवेति चेत् । न । तद्लोकप्रदेशविशेष एव हि तथा प्रतिभासते नतु रश्मयः क्वचित् । यदि तु ते तत्र स्युः तदा प्रदीपादिवत्तेऽपि प्रसरन्तो दृश्येरन् । न च यमर्थं निशि निशाचरः पश्यति स तल्लोचनरुचिनिचयविच्छुरितो दीप-

१ 'च' इति प. पुस्तके पाठः । २ वृषदंशः—मार्जारः । ३ 'दीपादिवत्' इति प. पुस्तके पाठः । ४ 'प्रदीपं' इति प. भ. पुस्तकयोः पाठः ।

प्रभाप्राग्भारपरिरब्ध इव निकटोपटौकमानमनुष्येण दृश्येत । न च तेषामतितनुतरतया न नरान्प्रत्यभिव्यञ्जकत्वमिति वाच्यम् । रात्रिञ्चरानपि प्रति तदभिव्यञ्जनविरोधात् । उद्भूतभासुररूपत्वेन हि तेषामभिव्यञ्जकत्वं तच्चोभयत्र तुल्यम् । यद्वा सन्तु मार्जारनेत्रयोर्मरीचयो यत्र चाकचक्यायमानतास्ति काचित् । यत्र तु गृहगोधिकादिचक्षुषि न किञ्चिन्निशि चकास्ति तत्रोद्भूतभासुररूपा रश्मयः सन्तीति कः स्वस्थः कथयेत् । दर्शनयोग्यं हि रूपमुद्भूतमुच्यते । अन्यथा मनुष्यनेत्रेषु तदनुद्भूतताभ्युपगमः किंनिमित्तकः स्यात् । अनुद्भूतताभ्युपगमे तु गृहगोधिकादिचक्षूरश्मीनामालोकनिरपेक्षाणामेव प्रकाशकत्वमवलोकितमिति कथं प्रदीपादिप्रकाशसहितानां तदुपपत्तेरिति प्रागुक्तमुपपद्यते ।

यत्तु तेनैव नेत्ररश्मिष्वनुद्भूतरूपतामनिच्छतावाचि । अथवालोकावयवसहितेभ्यस्तदवयवेभ्य उद्भूतरूपा एव नायना रश्मयः उत्पद्यन्ते । दृष्टौ हि तेजसामाशुतरविनाशोत्पादौ । रूपस्पर्शौ चोद्भूतानुद्भूतत्वधर्मविकल्पोपेतावित्युद्भूतरूपत्वेनोत्पन्नानामपि रश्मीनामन्यस्मिन्समावेशाद्विवेकेनाग्रहणम् । यथाऽनेकप्रदीपरश्मीनामेकार्थसम्बद्धानामिति । तदपि नोपपद्यते । यतो यदि नामालोकमिलितमनुष्यलोचनेष्वेवम् । तथापि बहुलनिशीथे निरन्तरमञ्जनकुवलयदलश्यामलान्धकारकलापेऽतिशयसङ्घटितविकटकपाटसम्पुटापवरकक्रोडे विचरतां गृहगोधिकादिपिपीलिकादिपापीयःप्राणिनां साक्षादपि पश्यतां कथं रश्मीनामुपलम्भो न भवेत् । तत्रालोकमिलनस्यासम्भवात् । अथ यत्रालोकमिलनं तत्रैव तेषामुद्भूतानामुत्पत्तिः । तर्हि गृहगोधिकादिनेत्ररश्मीनामप्रकाशकत्वं स्यात् । अनुद्भूतभासुररूपत्वादिति प्रागुक्तान्न मुच्यसे ।

---

१ ' अभिव्यञ्जकं ' इति म. पुस्तके पाठः । २ भित्तिविभेदको महाकायो मूषकविशेषः । ३ 'मङ्कुशीतकुवलय' इति प. भ. पुस्तकयोः पाठः । ४ अपवरकं—गृहम् ।

भाषमाणेन निःसारमित्येवं भूषण त्वया ॥
सत्यं सत्यापयांचक्रे भूषणं भस्मभङ्गिभिः ॥ ३१६ ॥

चक्षुषस्तैजसत्वस्यानुमानेन बाधनम्।

ततोऽनुद्भूतभास्वररूपस्याभिव्यञ्जकत्वाघटनादसिद्धं ते रूपाभिव्यञ्जकत्वं चक्षुषि । अनुमानबाधितं च चक्षुसस्तैजसत्वम् । चक्षुषस्तैजसं न भवति तमःप्रकाशकत्वाद्यन्नैवं न तदेवं यथा प्रदीपस्तथा चेदं तस्मात्तथेति । न च तमसोऽसत्त्वेनासिद्धं तत्प्रकाशकत्वम् । अस्य प्रसाधयिष्यमाणत्वात् । तदेवं तैजसत्वस्यासिद्धत्वान्न चक्षुषि रश्मिवत्त्वसिद्धिनिबन्धनत्वम् ।

अथ कचन निरन्तरतिमिरनिकरकरम्बितापवरककोणे निषण्णस्य जरन्मार्जारस्येक्षणे प्रत्यक्षतो रश्मिवत्त्वप्रतीतेस्तन्निदर्शनेनान्यत्रापि नेत्रत्वहेतुना तत्सिद्धिरभिधीयते । तर्हि तरुणरमणीवीक्षणे कटाक्षलक्षप्रक्षेपाः प्रेक्ष्यन्ते तत एव करभादिलोचनेऽपि तत्सिद्धिः किं न स्यात् । तस्मान्न साधर्म्यमात्रेण हेतोर्गमकत्वमपि त्वन्यथानुपपन्नत्वेन । न चात्र तदस्ति । तद्ग्राहकप्रमाणस्यासम्भवात् । न च मार्जारनेत्रेऽपि रश्मिवत्त्वं नः सिद्धमिति प्रागुक्तम् । तदित्थं दृशो रश्मिवत्त्वाप्रसिद्धेरसम्बद्धमुक्तमधिष्ठानदेशात्तत्सरद्रश्मिरूपावयवसमवेतमित्यादि । अनुमानबाधितश्च चक्षुषः प्राप्तार्थपरिच्छेदनपक्षः। तथा हि चक्षुः प्राप्तार्थपरिच्छेदि न भवत्यत्यासन्नार्थाप्रकाशकत्वाद्यत्पुनर्नैवं न तदेवं यथा घ्राणं तथा चैतत्तस्मात्तथेति । न चात्र हेतुरसिद्धः । गोलकसंसर्गिणोऽञ्जनस्य लोचनेनाप्रकाशनात् । अथात्यासन्नोऽर्थो योग्योऽयोग्यः सामान्यतो वा विवक्षितः । आद्यपक्षे हेतोरसिद्धिः । योग्यस्यात्यासन्नस्य सर्वस्य तेन प्रकाशनात् । अञ्जनस्य तु न योग्यता । प्रसरतो हि नयनरश्मिसमूहस्य यत्तत्प्रगुणदेशेऽवस्थितं तदेव चक्षुर्ग्रहणे योग्यम् । न चाञ्जनं तथा । तस्य पक्ष्मपुटतटोद्दङ्कितस्य गोलकान्तर्निःसरतां मूले मृणालसूत्रसूक्ष्मेण रश्मिसमूहेन सार्धं प्रगुणत्वायोगात् । द्वितीये तु पक्षे व्यभिचारः ।

स्पर्शनादीनामाकाशपरमाणुप्रमुखात्यासन्नायोग्यपदार्थाप्रकाशकत्वेऽपि प्राप्तार्थपरिच्छेदकत्वात्। तृतीयेऽप्ययमेव कलङ्कः। तदखिलं प्रलापमात्रम्। यतो यदि नाम सूक्ष्मरश्मि दंष्ट्रादिस्वकीयालीककल्पनयाञ्जनमयोग्यं पर्यकल्पि तथापि सकलगोलकव्यापितिमिरकामलादिषु कः प्रतीकारः। ते हि तद्व्यापित्वादेव तद्रश्मीनां प्रगुणदेशस्थिताः। यथा स्फुटस्फटिक- ५
काचादिकूपिकाक्रोडोपगतप्रदीपरश्मीनां स्फाटिकादिकूपिका इति। न च स्पर्शनेन प्राप्तार्थप्रकाशकेनाप्यत्यासन्नस्याभ्यन्तरशरीरावयवस्पर्शस्याप्रकाशनादत्यासन्नार्थाप्रकाशकत्वस्यानेकान्तः। आभ्यन्तरशरीरावयवानां स्पर्शनेन्द्रियकारणत्वेन तत्सम्बन्धिस्पर्शस्य तदविषयत्वात्। अकारणस्य तु जलादेः पीयमानस्य शिशिरस्पर्शोऽभ्यन्तरमनुभूयत एव। व्यवहिता- १०
प्रकाशकत्वादिति हेतुरप्यसिद्धः। कुलिशकाचाभ्रपटलस्वच्छसलिलस्फटिकोपलान्तरितानामपि पदार्थानामुपलम्भात्। अथ चक्षूरश्मयः। कुलिशादिकं विभिद्य तदन्तरितपदार्थदेशमुपसर्प्पन्ति ततस्तदुपलम्भः तर्हि तूलपटलान्तरितपदार्थोपलम्भः सुतरां भवेत्तस्य सुभेदत्वात्। ये हि किमपि कर्कशमतिशयनिशितशस्त्राभेद्यं दम्भोलिस्फाटिकादिकमपि १५
भिन्दन्ति न ते तूलपटलीं भेदयितुमलमिति कः सकर्णः कर्णेऽपि कुर्व्वीत।

यत्पुनरुदयन उदचीचरत्। "**स्फटिकाद्यन्तरितोपलब्धिः प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावद्भवेदुपपन्ना**" इति। तदपि नोपपन्नम्। न हि प्रसन्नतानिमित्तको मूर्त्तद्रव्यस्य २०
मूर्त्तद्रव्यान्तरेण गतेरप्रतिबन्धः क्वापि प्रेक्षि।

स्फटिकादीनां प्रसादस्वभावतया तेजोगतेरप्रतिबन्धकत्वमित्युदयनमतस्य खण्डनम्।

किन्तु प्रशिथिलावयवारभ्यत्वनिमित्तकः। यथा तूलादिभिरेव जलादीनां न पुनः स्फटिकादिभिः। तद्वदिहापि तूलादय एव नयनरश्मिगतेरप्रतिबन्धकाः। न[1] स्फटिकादयः। स्फटिकान्तर्गतप्रदीपरश्मयस्तु न तं भित्त्वा प्रसरन्ति। किन्तु तत्सम्पर्कमासाद्य स्फटिकपरमाणुपुञ्ज एव २५

---

१ 'न' इति प. पुस्तके नास्ति।

तथा परिणतः सर्वतः प्रसरति । अत एव पीतरक्तादिकाचकूपिकातो रश्मयोऽपि तच्छायाः प्रसरन्तो दृश्यन्ते । अथ यथा पारदस्यायस्पात्रभेदे सामर्थ्यं न पुनरलाबुपात्रभेदे तथा लोचनरोचिषामपि स्फटिकादेर्भेदे शक्तिर्भविष्यति न तूलपटलीभेद इति चेत् । तदप्रतीतिकम् । सोऽयं स्फटिकादिरिति निर्णयाद्विनाशव्यवहारस्य तत्र कस्यचिदभावाच्च । अथ पूर्वपूर्वकाचादिव्यूहवृत्तावुत्तरोत्तरतद्रूपव्यूहान्तरस्योपपत्तेः प्रदीपज्वालावन्निरन्तरताभ्रान्तिरित्युच्यते । हन्तैवम् ।

कलशकुलिशप्राकाराद्यं त्रिविष्टपकन्दरा-
कुहरकलितं विश्वं वस्तु प्रतिक्षणभङ्गुरम् ॥
ज्वलनकलिकावत्किन्त्वस्मिन्निरन्तरताभ्रमः
प्रभवति वदन्नित्थं शाक्यः कथं प्रतिहन्यते ॥ ३१७ ॥

अथात्मादिपदार्थानां क्षणिकत्वमाचक्षाणं भिक्षुं प्रतिक्षेप्स्यति । प्रत्यभिज्ञैवेति चेत् । स्फटिकादावप्यस्त्येवासौ । सान्यत्र दृढेति चेत् । किंकृतं तत्रास्य दार्ढ्यम् । बाधाभावकृतमिति चेत् । प्रकृतेऽपि तत्समानम् । न हि स्फटिकादौ प्रत्यभिज्ञानस्यैकत्वपरामर्शिनः किंचिद्बाधकमस्त्यात्मादिवत् । स्फाटिकान्तरितार्थोपलम्भेन तद्भेदसिद्धिरेकत्वग्राहकप्रत्यभिज्ञानस्य बाधिकेति चेत् । नैवम् । इतरेतराश्रयापत्तेः । भेदसिद्धौ हि स्फटिकादेस्तदन्तरितार्थोपलम्भः सिद्ध्यति तत्सिद्धौ च भेदसिद्धिरिति । यदि च तथा स्फाटिकादेराशूत्पादविनाशौ स्वीक्रियेते तदा चैवं दर्शनान्तरितमदर्शनमपि स्यात् । न च तत्र तदा कस्यचित् तदनुभूयते । तद्विनाशस्य पूर्वोत्तरोत्पादाभ्यामाशुभाविभ्यां तिरोहितत्वान्न तत्रादर्शनं स्यादिति चेत् । नन्वेवं तदुत्पादस्य पूर्वोत्तरविनाशाभ्यामाशुभाविभ्यामेव तिरोधानादर्शनमपि मास्तु । तदुत्पादयोः स्वमध्यगतविनाशतिरोधाने सामर्थ्यं भावस्वभावत्वेन बलीयस्त्वात् । नतु निस्स्वभावयोस्तन्नाशयोः स्वमध्यगतोत्पादतिरोधाने । अभावस्वभावत्वेन दुर्बलत्वादिति चेत् नैतद्धार्य्यम् । भावाभावस्वभावयोः समानबलत्वात् ।

तयोरन्यतरबलीयस्त्वे युगपद्भावाभावात्मकवस्तुप्रतितिविरोधात् । न हि वस्तुनो भाव एव कदाचित्प्रतीयते । स्वरूपादिचतुष्टयेनेव पररूपादिचतुष्टयेनापि भावप्रतीतिप्रसक्तेः । न चानाद्यनन्तं सर्वात्मकं वस्तु प्रतिभाति । यतस्तथाभ्युपगमः श्रेयान् । नाप्यभाव एव वस्तुनोऽनुभूयते । पररूपादिचतुष्टयेनेव स्वरूपादिचतुष्टयेनाप्यभावप्रतिपत्तिप्रसङ्गात् । न च सर्वथाप्यसत्प्रतिभाति । यतस्तदभ्युपगमोऽपि कस्यचित्प्रतितिष्ठेत । प्ररूपयिष्यते च भावाभावप्रतिभासनम् । ततः सर्वथोत्पादे विनाशे च पुनः पुनः स्फटिकादौ दर्शनसान्तरस्यादर्शनस्य प्रसञ्जनं दुर्निवारमिति स्थितम् । न चैवं प्रदीपे कथं नैरन्तर्यभ्रम इति वाच्यम् । सर्वथोत्पादविनाशयोस्तत्राघटमानत्वादिति वक्ष्यते । सन्दिग्धव्यतिरेकि च व्यवहिताप्रकाशकत्वम् । अप्राप्तार्थपरिच्छेदित्वेऽपि व्यवहिताप्रकाशकत्वस्याविरोधात् ।

अप्राप्तार्थपरिच्छेदपक्षे व्यवहितस्यापि प्रकाशकत्वानिति किरणावलिकारोक्तप्रसङ्गस्यापाकरणम् ।

यत्तूक्तमप्राप्तत्वाविशेषादव्यवहितवत्कुड्यादिव्यवहितमपि किं न गृह्णीयादिति । तदप्यसङ्गतम् । योग्यतावशेनैव तेन प्रकाशनात् । अभ्युपगतं च भवताप्येतत् । कथमन्यथा स्फाटिकान्तरितस्येव समलजलान्तरितस्यापि भावस्योपलम्भो न भवेत् । अथ पाथो विध्वसितत्वाल्लोचनतेजो न तद्भित्त्वार्थेन सम्बध्यते इति कथं तदुपलम्भः । तर्हि स्वच्छसलिलान्तरितस्यापि तस्यानुपलम्भः स्यात् । कथं वा कुड्यादेर्न रश्मिभिर्भेदः । नहि तत्तेजो विरोधि । स्फटिकादावपि तद्विरोधित्वापत्तेः । प्रसन्नतानिमित्तस्तु तद्भेदः पूर्वमेव व्यपास्तः । किं च घ्राणं यथा कैरवस्यैवं परमाणोरपि गन्धं कुतो न प्रकाशयेत् । अथ प्रकाशयत्येव योगिनो घ्राणं परमाणुगन्धमपि । नास्मदादेः । तादृगदृष्टविशेषस्याभावात् । महत्त्वाद्युपेतद्रव्यगन्धादि तु प्रकाशयति । तादृगदृष्टविशेषस्य सद्भावात् । इत्यदृष्ट-

१ ' स्वभाववस्तु प्रतिभासनम् ' इति प. पुस्तके पाठः ।

वैचित्र्यात्तद्विज्ञानभावाभाववैचित्र्यम् । तदितरत्रापि तुल्यम् । स्याद्वादिनामपि चक्षुरप्राप्यकारि केषाञ्चिदतिशयज्ञानभृतामस्मदाद्यगोचरविप्रकृष्टस्वविषयस्य परिच्छेदकम् । तादृशतदावरणक्षयोपशमविशेषसद्भावात् । अस्मदादीनां तु यथाप्रतीति पदार्थप्रकाशकत्वं स्वानुरूपतदावरणक्षयोपशमविशेषादित्युभाभ्यामभ्युपगन्तव्या योग्यता । अधिकश्चास्माकमनुभवः साक्षी । अनुमानं चानन्तरं निरूपितम् ।

कन्दलीकारोक्तयोग्यतास्वण्डनस्य खण्डनम् ।

यत्तु कन्दलीकारो व्याकरोति । "योग्यताभावाद्व्यवहिताग्रहणमिति चेत् । इन्द्रियस्य तावद्योग्यता विषयग्रहणसामर्थ्यमस्त्येव तदानीमव्यवहितग्रहणात् । विषयस्यापि योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका व्यवधानेऽप्यनिवृत्तैव । आर्जवावस्थानमपि तदवस्थमिति" । तदप्येतेन निरस्तम् । प्रमातुस्तादृशक्षयोपशमरूपतद्ग्रहणयोग्यताया अभावात् । कथमन्यथा निशीथिनीनाथरूपस्येव तद्गतेरुपलम्भो न भवेत् । अथ भास्वरत्वाद्रादपि रूपं तस्योपलभ्यते नतु गतिस्तद्विपरीतत्वात् तर्हि तदुत्सङ्गसङ्गतः कुरङ्गकलङ्कः सैंहिकेयनिकेतनकदेशश्च नोपलभ्येत । तद्रूपाभावेन सितत्वेन तदुपलम्भे कतरो गतावपराधः । यन्नासौ दृश्यते । तदेवं न व्यवहिताप्रकाशकत्वानुमानं साधीयः । नापि बाह्येन्द्रियत्वानुमानम् । तत्रापि प्रतिपादितदोषाणां प्रायः प्रसर्पणात् ।

किं च किमिदं बाह्येन्द्रियत्वं चक्षुषः । किं बहिरर्थग्रहणाभिमुख्यं, बहिर्देशावस्थायित्वं, बहिष्कारणप्रभवत्वं वा स्यात् । तत्र प्राचीनं चेतसा व्यभिचारि । तस्याप्राप्तसुपर्व्वपर्व्वतम्वर्गादिपरिच्छेदकत्वेऽपि बहिरर्थग्रहणाभिमुख्यतया बाह्येन्द्रियत्वात् । द्वितीयपक्षेऽप्यर्थदेशः शरीराद्बहिर्वा बहिर्देशो विवक्षितः । व्यवस्थायित्वमपि पौरस्त्यपक्षेऽर्थदेशाश्रितत्वमर्थाभिमुख्येन प्रवृत्तिर्वा स्यात् । आद्यपक्षे उभयासिद्धिः । चक्षुषो गोलकान्तर्देशसमाश्रितत्वेन वादिप्रतिवादिभ्यामभ्युपगतत्वात् । दृष्टा-

१ 'हि' इत्यधिकं प. पुस्तके । २ न्या. कं. पृ. २३ पं. ७.

न्तश्च साधनविकलः । त्वगिन्द्रियस्यार्थदेशानाश्रित्वात् । द्वितीयपक्षेऽपि प्रवृत्तिरर्थाभिमुख्येन प्रसर्प्पणरूपो व्यापारः प्रतीत्युत्पादकत्वं वा । प्रथमे प्रतिवाद्यसिद्धिः । न खलु प्रतिवादिना नयनरश्मयोऽर्थदेशेऽपसर्प्पन्तः स्वीकृताः । तेन नयनस्यातैजसत्वेन प्रतिपादनात् । तत्साधकस्य रूपादिषु नियमेनेत्यादिप्रमाणस्य प्राक्पराकृतत्वेन बाधकस्य चोपन्यस्तत्वेनोभयासिद्धिर्वा । साधनविकलतात्रापि दृष्टान्तस्य स्पष्टैव । अर्थाभिमुख्येन प्रतीत्युत्पादकत्वं पुनर्मनसैवानैकान्तिकम् । अथ शरीराद्बहिर्देशे गोलकस्वरूपे समाश्रितत्वं बहिर्देशावस्थायित्वम् । चेतसा च व्यभिचारोत्सारणाय बाह्येति विशेषणम् । तद्धि देहान्तर्देशसमाश्रितमिति । तदप्यबन्धुरम् । इन्द्रियबाह्यत्वस्याप्राप्तार्थपरिच्छेदेनापि सार्द्धमविरोधात् । न चाविरुद्धं विशेषणं विपक्षेण ततो हेतुं निवर्त्तयति । न चैं विरोधसाधनसावधानं किञ्चिदिह प्रमाणमस्ति ।

अथ मनसि प्राप्तार्थपरिच्छेदव्यावृत्त्या बाह्येन्द्रियत्वस्यापि व्यावृत्तेर्विरोधसिद्धिरभिधीयते । नैवम् । क्वचित्[3] साध्यनिवृत्तौ साधननिवृत्तावपि विरोधस्यासिद्धेः । अन्यथा चक्षुरप्राप्तार्थपरिच्छेदि स्पर्शनरसननासाश्रोत्रान्येन्द्रियत्वात् मनोवदित्यतः कश्चिच्चक्षुषोऽप्राप्तार्थपरिच्छेदं प्रसाधयन् कथं प्रतिरोत्स्यते । समस्ति खल्वत्राप्यप्राप्तार्थपरिच्छेदव्यावृत्त्या स्पर्शनरसननासाश्रोत्रान्येन्द्रियत्वस्यापि व्यावृत्तिः स्पर्शनादाविति । तस्माद्व्यतिरेकानिश्चयात्सन्दिग्धव्यतिरेको हेतुः । बहिष्कारणप्रभवत्वमपि मनसैव व्यभिचारि । आत्मापेक्षया हि बहिष्कारणं पुद्गलतत्त्वं तत्प्रभवत्वं च चक्षुरादीन्द्रियवन्मनसोऽप्यस्त्येव । तस्यापि पौद्गलिकत्वेन षट्पदार्थपरीक्षायां समर्थयिष्यमाणत्वात् । चक्षुः प्राप्यकारि भौतिकत्वादित्यत्रापि प्राप्यकारीति कोऽर्थः । प्राप्य संयुज्य स्वकार्यं करोतीति चेत् । ननु प्राप्तिरपि स्वकार्यं तदपि च प्राप्य करोत्यन्यथा वा । प्राप्य

---

१ 'मध्ये' इत्यधिकं प. भ. पुस्तकयो । २ 'च' इति नास्ति प. भ. पुस्तकयोः । ३ 'क्वचन' इति भ. पुस्तके पाठः ।

चेत्, तर्हि सापि प्राप्तिः प्राप्यैव कर्त्तव्येति प्राप्तिपरम्परोत्पाद एवोपशान्तशक्तित्वात्प्रस्तुतकार्यानिष्पत्तेरनवस्था । अन्यथेति पक्षे त्वनयैव व्यभिचारः ।

अथ ज्ञानरूपकार्यापेक्षयैव चक्षुषः प्राप्यकारित्वसाधनान्नोक्तदोषानुषङ्गः । ननु कुत एतदासमायुष्मता । प्राप्यकारीति शब्दस्य प्राप्तिपूर्वक्रियामात्राभिधानपर्यवसितत्वात् । न च शब्दान्तरमस्ति यत्सन्निधानादयं " देवस्य शृंगारिणः " इत्यादिवदभिमतार्थवृत्तिः स्यात् ।

अथ सैन्धवादिवत्प्रकरणवशादम्याभीष्टार्थनिष्ठाभिधीयते । तथाहि प्राप्य वा चक्षुर्ज्ञप्तिं कुर्यादप्राप्य वेत्यत्र प्रस्तावे प्रोच्यते चक्षुः प्राप्येत्यादि । तदपि नोपपन्नम् । एवं सति निदर्शनस्य साध्यशून्यतापत्तेः । परश्वधो हि पादपं प्राप्य द्वैधीभावमेव विधत्ते नतु ज्ञप्तिम् ।

अथाभिदध्यात्कश्चित्, स्वविषयज्ञप्तिकरणापेक्षया परशुर्निदर्शनमुपदर्शितो न च्छिदपेक्षया । तथा च न साध्यवैकल्यं दोषः । प्राप्यैवेन्द्रियं तेन ज्ञप्तिकरणादिति । सोऽपि नोपपन्नवक्ता । यतश्चाक्षुषीं स्पार्शनीं वा ज्ञप्तिमपेक्ष्य तेनैतदुच्येत । यदि पौरस्त्यम् । तदा सैव साध्यशून्यता निदर्शनस्य । चक्षुरर्थयोः प्राप्तेरद्याप्यसिद्धेः । अथ स्पार्शनीं तामपेक्षोच्यते । अस्त्येवम् । किन्तु हेतोर्मरुणा मनःपरिच्छेद्येन व्यभिचारः । भौतिकेनापि तेन मनोऽप्राप्तेनैव स्वपरिच्छित्तिकरणात् ।

अथ करणभूतेन येन परिच्छित्तिर्जन्यते स एव प्राप्यकारीह सङ्गतो न विषयत्वेनापि । तर्हि दृष्टान्तान्तरं वक्तव्यम् । न प्रकृतम् । अस्तु प्रदीपादिरेवासौ तेन हि करणभूतेन रश्मिद्वारेण प्राप्त एवार्थः प्रकाश्यत इति चेत् । नैवम् । एवमपि हेतोः प्रतिबन्धानिश्चयात् । साधर्म्यमात्रेण तन्निश्चयायोगात् । अप्राप्यकारित्वमपि स्पृशतो भौतिकत्वस्य न किञ्चित्परिपन्थिप्रमाणमिति । एतेन कारकत्वादिति साधनं

---

१ 'निष्टता' इति प. पुस्तके पाठः । २'तथापि' इति प. भ. पुस्तकयोः पाठः ।

यत्केनचिदुच्यते । तदपि परास्तम् । अयस्कान्तेन च व्यभिचारीदम् । तेनाप्राप्तस्यैव लोहस्याकर्षणात् ।

अथ तस्यापि प्राप्तस्यैवाकर्षणम् । अयस्कान्तो हि वायुद्वारेण तदाकर्षति यथा पुरुषो नालान्तर्वायुप्रयोगेण पानीयादि । संयुक्तसंयोगश्चात्र प्राप्तिः । तदसत् । वायोस्तत्राप्रमाणत्वात् । न तावत्प्रत्यक्षं तद्ग्राहकम् । अननुभवात् । अनुमानमपि नास्ति । समाकर्षणस्यान्यथानुपपत्तिरस्ति इति चेत्, न । अप्राप्तस्याप्याकर्षणोपपत्त्यास्या उपक्षीणत्वात् । अप्राप्तस्याप्याकर्षणे कथं न सकललोहाकर्षणम् । प्राप्तस्याप्याकर्षणे कथं न तद्देशवर्त्तितृणतूलादिसमाकर्षणम् । तस्यायोग्यत्वादिति चेत् । अनयैवोक्त्यामृतमास्वादय । सकललोहानामयोग्यत्वादप्राप्तत्वाविशेषेऽपि नाकर्षणं भवेदस्ति चैतदिति तुल्यम् । वाद्यन्तरं प्रत्येवास्य योग्यतेति चेत्, किमेतदेवान्यत्रापि न पश्यसि । किं च कुतोऽयसः समाकर्षणान्यथानुपपत्तिः । कारकत्वाख्याद्धेतोरिति चेत् । अयमभिसन्धिः । सकलं कारकं प्राप्त एव वस्तुनि फलमुत्पादयदवलोकितं कारक एवायस्कान्त इति । तदसुन्दरम् । इतरेतराश्रयप्रसङ्गात् । कारकत्वस्य हेतुत्वसिद्धावयस्कान्तस्य प्राप्तार्थसमाकर्षणसिद्धिस्तत्सिद्धौ च कारकत्वस्य हेतुत्वसिद्धिरिति । यदि च वायुद्वारेण तदाकर्षणमुच्यते । तदा तिर्यगेव तदाकर्षणं भवेन्न पुनरूर्ध्वम् । वायोस्तिर्यक्पवनस्वभावत्वात् । वात्यादौ तु विरुद्धदिक्क्रियवायुद्वयसंयोगनिमित्तत्वेनोर्ध्वगतेर्भवद्भिर्व्यवस्थापितत्वात् । न चात्रापि तथाविधा कल्पना ज्यायसी । तथाननुभवात् । अनुमानबाधितं च तत्र वायुपरिकल्पनम् । तथा हि चुम्बको नायसो वायुद्वारेणाकर्षकस्तत्रावस्थितलघुतरतृणतूलाद्यनाकर्षणान्यथानुपपत्तेः । कथं च तिलकादिना कान्तादीनामाकर्षणम् । तत्रापि पवनोऽस्तीति महासाहसिकस्योल्लापः । न खलु यथा वात्यादिना परवशीभूता कान्ता समानीयते । तथात्रापि पवनविशेषेणेति प्रतीतिरस्तीति ।

---

१ ' च ' इति प. भ. पुस्तकयोः पाठः ।

यदप्यवादि प्रथमतो हि चक्षुः सन्निहितमित्यादि, यदपि च संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेनैकताङ्गतं युगपदेव तावदर्थैः संसृष्टमिन्द्रियमुत्पादितवदिति भूधरशशधरयोस्तुल्यकालग्रहणमुपपद्यत इति केनचित् उच्यते तदपि चक्षुषो रश्मिवत्त्वपराकरणादपाकृतम् । उत्तरमते च पृष्ठास्थितस्य व्यवहितस्य चार्थस्योपलम्भः । प्रसज्यते । अथानार्जवावस्थितस्य व्यवहितस्य कथं ग्रहणमस्तु । मैवम् । आर्जवावस्थितस्य व्यवधानाश्रयणस्येन्द्रियप्राप्त्यर्थत्वात्तस्याश्च तथास्थितेऽप्यर्थे सज्ञानत्वात् ।

परेण भूधरशशधरयोर्युगपद्ग्रहणाभावः प्रदर्शितः तत्खण्डनम् ।

यदि च चक्षुः प्राप्यकारि । तदा कथं संशयविपर्ययप्रादुर्भावः। सामान्यवद्विशेषाणामपि सन्निकृष्टानामुपलम्भसम्भवात् । तथा च कथं विशेषानुपलब्धिनिबन्धनौ संशयविपर्ययौ स्याताम् । यत्पुनरात्रेयभाष्यकारः प्राह ।

चक्षुषः प्राप्यकारित्वे संशयावपर्ययोरनुत्पत्तिप्रसंजनम् ।

"यथा सामान्यस्य विशेषाणां च प्रदीपालोकेन सन्निकृष्टत्वेन दूरात्सामान्यमुपलभ्यते न विशेषा इति प्रदीपालोककारितौ संशयविपर्ययौ भवतः तथा सामान्यस्य विशेषाणां च चक्षुषा सन्निकृष्टत्वेऽपि दूरात्सामान्यमुपलभ्यते न विशेषा इति चाक्षुषौ संशयविपर्ययौ भवतः । तत्र महाविषयत्वात्सामान्यं दूरादप्युपलभ्यतेऽल्पविषयत्वात्तु विशेषा न दूरादुपलभ्यन्त इति संशयविपर्ययोरुपपत्तिः " इति । तदपि न क्षोदक्षमम् । महाविषयत्वस्योपलम्भं प्रत्यप्रयोजकत्वात् । न खलूपलभ्यमानादितरे विषयाः कणिकयापि तत्सामान्यज्ञप्तावुपयुज्यन्ते । यतस्तद्भूयस्त्वं दूरात्तत्रसामान्योपलब्धौ निमित्तं स्यात् । यस्तु प्रदीपो दृष्टान्ततयोपदिष्टः सोऽपि न श्रेष्ठः । येन हि सन्निकर्ष उपलम्भकारणतया कथ्यते तस्य प्रदीपेऽपि सामान्यवद्विशेषाणामुपलम्भकत्वप्रसक्ति-

दुर्निवारा । अस्माभिस्तु प्रदीप एवोपलम्भं प्रति निमित्तमुच्यते । स च स्वयोग्यतावशेन दूरात्सामान्यमेवोपलम्भयतीति युक्तम् । तद्वदेव यदि चक्षुषोऽपि योग्यता स्वीक्रियते कृतं सन्निकर्षेण । संनिकर्षाभावे योग्यमपि कथमुपलम्भं करोति चक्षुः । न हि योग्योऽपि प्रदीपोऽप्राप्तं पटादि प्रकटयतीति चेत्, ननु कुत एतत् । तस्य व्यवहिताप्रकाशकत्वादिति चेत् । न । अस्य निराकृतत्वात् । अनुमानबाधितं च चक्षुषः प्राप्तार्थप्रकाशनम् । तथा हि चक्षुरप्राप्तार्थप्रकाशकं व्यवहितस्यापि प्रकाशकत्वात् यत्तु नैवं न तदेवं यथा श्रोत्रं तथा चेदं ततस्तथा । प्रसाधितं च काचादिव्यवहितस्यापि चक्षुषः प्रकाशकत्वमिति न साधनासिद्धिः ।

योग शाम्यतु तवैष दोहदः प्राप्यकारिणि तदीक्षणे क्षणात् ॥
हन्त यत्किमपि कर्कशोक्तिरैः कीलिता सकलयुक्तिमण्डली ॥ ३१८ ॥

श्रोत्रस्याप्राप्यकारित्वमिति स्वीकुर्वतो बौद्धस्य मतमुपन्यस्य तत्खण्डनम् ।

दर्प्पाध्मातः **शाक्यसिंहस्य** शिष्यो
जल्पत्येवं प्रस्तुतार्थोपघाति ॥
दृष्टान्तत्वं नैव कर्णेन्द्रियस्या-
भाति न्यायोपेतमुक्तप्रयोगे ॥ ३१९ ॥

तथा हि चक्षुषोऽप्राप्तार्थप्रकाशकत्वे साध्ये श्रवणेन्द्रियस्य विपक्षताऽनुपपन्ना । चक्षुष इव तस्याप्यप्राप्तार्थप्रकाशकत्वात् । "**चक्षुःश्रोत्रमनसामप्राप्तार्थप्रकाशकत्वम्**" इत्यभिधानात् । प्राप्यकारित्वे च श्रोत्रस्य तद्गोचरे शब्दे दूरादिव्यवहारो न स्यात् । अस्ति चात्रायं दूरे शब्दो निकटे शब्दः श्रूयत इति प्रतीतिः । अतोऽप्राप्यकारित्वमेवास्योपपन्नम् । तथा च प्रयोगः । यो दूरादिप्रत्ययग्राह्यः स स्वग्राहकेणासन्निकृष्ट एव गृह्यते यथा तथाविधपादपो दूरादिप्रत्ययग्राह्यश्च शब्द इति । न चासन्निकृष्टस्य शब्दस्य ग्रहणे कथं ततः श्रोत्राभिघात इत्यभिधातव्यम् । भासुररूपस्यासन्निकृष्टस्य ग्रहणेऽप्यतश्चक्षुषोऽभिघातोपलम्भात् । इयांस्तु विशेषोऽत्र तेजस्विताऽभिघातहेतुः । शब्दे तु तीव्रतेति ।

एवमप्राप्यकारित्वं श्रवणस्य स्थितं ततः ॥
वैधर्म्येणास्य नो युक्तं दृष्टान्तत्वप्रदर्शनम् ॥ ३२० ॥

प्रामाणिकेषु प्रवरस्त्वमेव त्वमेव तथागत वावदूक ॥
सखे यदेतां जगतोऽप्यपूर्वां प्रमेयमुद्रां प्रकटीकरोषि ॥ ३२१ ॥

तत्र यदुक्तमनुमानं यो दूरादिप्रत्ययग्राह्य इत्यादि । तत्र शब्दः स्वग्राहकेणासन्निकृष्ट एव गृह्यत इत्येवंविधस्य गम्यमानपक्षस्य प्रत्यक्षबाधा । कर्णशष्कुलिप्रविष्टस्य मशकादिशब्दस्य सन्निकृष्टस्यैव प्रत्यक्षेण प्रतीतेः । दूरादिप्रत्ययग्राह्यत्वलक्षणो हेतुश्च गन्धेनानैकान्तिकः । तस्य स्वग्राहकेण सन्निकृष्टस्य ग्रहणेऽपि दूरादिप्रत्ययग्राह्यत्वप्रतीतेः । न च तथा प्रतीयमाने गन्धे दूरनिकटादिव्यवहारोऽसिद्धः । यतः

दूरादुच्छलृल्लोऽयं बहुलपरिमलः काममभ्येति भूयान्
गन्धाद्धारातिरेकं किमपि जलरुहां जृम्भतेऽसौ समीपे ॥
मध्यस्थाः प्रोद्भवन्ति प्रकृतिमुरभयः सौरभं सत्कदम्बाः
सुव्यक्तेयं प्रतीतिर्निखिलतनुभृतां निर्विवादा समस्ति॥३२२॥

किं च दूरादिप्रत्ययग्राह्यत्वं शब्दे साकारज्ञानवादिनः सौगतस्यानुपपन्नम् । श्रावणज्ञानेन स्वगते शब्दाकारे गृह्यमाणे दूरनिकटादिव्यवहारस्यायुज्यमानत्वात् । निराकारं हि यस्य ज्ञानं भिन्नदेशमर्थं परिच्छिनत्ति तस्येदं दूरमिदं निकटमिति वक्तुमुचितम् । साकारज्ञानवादिनः पुनर्यद्दूरादि न तज्ज्ञानवेद्यमवेद्ये च न दूरादिव्यवहारो युक्तः । न हि नष्टनयनस्येदं दूरमिदं निकटं चेति व्यवहारस्तात्त्विकोऽस्ति । यच्च वेद्यं ज्ञानस्य स्वाकारमात्रं न तत्तद्दूरादिस्वरूपम् । ज्ञानस्वरूपादभिन्नत्वात् ।

अथाकारधायकस्य दूरादित्वाद्दूरादिव्यवहारः तर्हि व्यर्थः श्रोत्रस्याप्राप्यकारित्वसाधनप्रयासः । श्रोत्रेण सन्निकृष्टस्यापि शब्दस्य ग्रहणे

तत्र दूरादिव्यवहारस्य दूरादिदेशादागतत्वेनोपपद्यमानत्वात् । दृश्यते हि गन्धस्य घ्राणेन्द्रियेण सन्निकृष्टस्यापि ग्रहणे दूरादिदेशादागतत्वेन दूरे बकुलपरिमल इत्यादिव्यवहारः ।

अथ यदिदं देशापेक्षया शब्दस्य दूरादित्वं तत्किं देशस्याग्रहणे स्याद्ग्रहणे वा । न तावदग्रहणे । देशस्य विशेषणत्वात् । यत्खलु विशेषणं तद्गृहीतमेव विशेष्ये विशिष्टप्रतीतिनिबन्धनम्। यथा दण्डादि । विशेषणं च शब्दस्य दूरादिप्रतीतौ देश इति । नापि ग्रहणे । यतः कथं तद्ग्रहणं श्रोत्रेण चक्षुरादिना वा । यदि श्रोत्रेण, तदा देशस्यापि शब्दत्वप्रसङ्गः । श्रोत्रग्रहणलक्षणत्वात्तस्य । चक्षुरादिना तु तद्ग्रहणं न सर्वत्र सम्भवती । व्यवहितदेशस्यापि शब्दस्य श्रूयमाणत्वात्। तदखिलमफलम् । अव्यवहितदेशसमुद्भवे ध्वनौ देशस्य चाक्षुषप्रत्यक्षेण लक्ष्यमाणत्वात् । इतरस्मिंतु तस्मिन् आनुमानिकी देशप्रतिपत्तिः । तथाहि यावतो दूरात्प्रत्यक्षागमोपलब्धकारणव्यापारभाविनः शब्दस्य समागतस्य यान्विशेषानुपलब्धवांस्तानदृष्टकारणस्यापि शब्दस्य विशेषानुपलभमानस्तावति दूरे शब्दोत्पादं प्रतिपद्यते । यथा कैश्चिदेव विशेषश्शङ्खादिकं च वक्तृविशेषं च प्रतिपद्यते । यस्तु तथाभूतान्विशेषान्न लक्षयति तस्य संशय एव दृश्यते । कस्य कुतो वायं शब्द इति । देशविशेषे चानुमिते ग्रामादिकं सम्भाव्य तत्र शब्दोत्पादं व्यपदिशति ।

भवतापि यद्येवं नोपेयते । तदा कुतस्तत्र प्रतीयमाने दूरादिताप्रतीतिः । किं स्वभावत एवास्य दूरादित्वाद्दूरादिकारणप्रभवत्वात् दूरादिदेशे स्थितत्वाद्वा । न तावदाद्यः पक्षः, प्रतिनियतदूरनिकटादिव्यवहाराभावप्रसङ्गात् । दूरादिकारणप्रभवत्वेन चास्य दूरादिव्यवहारार्हत्वे चे[1] वक्षःस्थललुठन्मुक्ताफलकलापे प्रेक्ष्यमाणे दूरत्वव्यवहारः स्यात् ।

1 ' च ' इति भ. पुस्तके नास्ति ।

तत्कारणस्य पारावारकुहरसञ्चारिशुक्तिसम्पुटादेर्दूरत्वात् । निकटकारण-कुटुम्बघटितस्य घटादेर्दूरं नीतस्य दूरतया प्रतीतिश्च न स्यात् । दूरदेश-स्थितत्वादेव तस्य तु दूरादित्वे स्वोत्पत्तिदेशस्था एव शब्दाः श्रोत्रैर्गृह्यन्ते नत्वागता इत्यभ्युपगन्तव्यं स्यात् । तथा च निर्वाते दूरस्थेन मनागपि न श्रूयते यः शब्दस्सोऽनुकूलवाते कथं श्रूयेत । यश्चासन्नेन प्रमात्रा श्रूयते स एव प्रतिवाते कस्मान्न श्रूयते । प्रतिवातेन श्रोत्राभिघाता-च्छब्दस्य नाशितत्वाद्वा । यदि श्रोत्राभिघातात्, तर्हि निर्वातप्रदेश-स्थेन दूरादपि श्रूयेत । प्रतिवाताभावेन तच्छ्रोत्रस्थानभिघातात् । शब्दस्य नाशितत्वे तु यस्याप्यसौ वातोऽनुकूलस्तेनापि न श्रूयेत । नाशितत्वाविशेषात् ।

अथ च

मुरजमधुरध्वानार्धीनं विकम्बरवल्लकी
क्षणितकलितं तालैस्तारन्तरङ्गितपञ्चमम् ॥
स्थितवति जनस्पन्दे मन्देऽनुकूलसमीरणे
विलसति तथा दूराद्गीतं निशासु निशम्यते ॥ ३२३ ॥

दूरदेशवर्त्तिप्रमातारं प्रति तेनास्य प्रेरणे तु तच्छ्रोत्रेण प्राप्तोऽसौ गृह्यते इति सिद्धमस्य प्राप्यकारित्वम् । अन्यच्च यदि स्वोत्पत्तिदेश एव सर्वे शब्दाः प्रलयभाजः । कथं तर्हि नलिकाशब्दस्य भेर्या-दिशब्दस्य वा कर्णशष्कुलीगृहादिप्रपूरणेन प्रतिपत्तिः स्यात् । कथं वा धवलगृहादौ प्रतिशब्दप्रादुर्भावः । न हि लोष्टादयः कांस्यपात्रादि-भिरसंसृष्टाः शब्दमुपजनयन्तः प्रतीयन्ते । यदि स्वोत्पत्तिदेशस्था एव शब्दाः श्रोत्रेण गृह्यन्ते । तदा तत्रस्थैर्भेर्यादिशब्दैर्महद्भिरल्पी-यसोऽपि मशकादिशब्दस्यानभिभवादनाकुलमिव गृहणं स्यात् । तथा च प्रयोगः । ये स्वोत्पत्तिदेशस्था एवेन्द्रियेणासन्निकृष्टा गृह्यन्ते न तेषु महद्भिरल्पीयसामभिभवो यथा पर्वतेन पादपादीनाम् । स्वोत्पत्ति-देशस्था एवेन्द्रियेणासन्निकृष्टा गृह्यन्ते च शब्दा इति ।

ननु दूरदेशवर्त्तिनां प्रमातृणां पर्वतः पादपादीनभिभूयात्मानमेवोपदर्शयत्यतः साध्यविकलो दृष्टान्त इति चेत् । तन्न सुन्दरम् । यतस्तेषां देशविप्रकृष्टतया तद्ग्रहणयोग्यत्वाभावादप्रतिभासो नाभिभवात् । मशकादिशब्दानां त्वविप्रकृष्टानामपि मेर्यादिशब्दैरभिभवः समस्ति ततो न तेषां स्वोत्पत्तिदेशस्थानामेव ग्रहणम् । यदपि प्रतिपाद्यते तच्छब्दतः श्रोत्राभिघातात्तेषामग्रहणं यथा भासुररूपेण चक्षुषोऽभिघातात्सूक्ष्माग्रहणमिति । तदप्यसम्बद्धम् । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । तिग्मरुचिमरीचयो हि मुकुरादेर्भासुररूपात्प्रतिनिवृत्य चक्षुषाभिसम्बध्यमानास्तस्याभिघातहेतवो दृष्टाः अतीव्रालोके तदभिघातादृष्टेः । न चात्र तथाविधं किञ्चिदस्ति यच्छब्दात् प्रतिनिवृत्य श्रोत्राभिघातकारणं भवेत् । वायुः स्यादिति चेत् । निर्वाते तर्हि न स्यात्तदश्रवणम् । श्रोत्राभिघातकारणाभावात् । दृश्यते च निर्वातेऽपि मेर्यादिकोलाहले सत्यल्पीयसो मशकादिशब्दस्याग्रहणम् । अतोऽन्योन्यप्रदेशोपसर्पणेनानल्पैरल्पशब्दानामभिभवोऽभ्युपगन्तव्यः।तथा च दूरादिदेशादागतत्वादेवास्य गन्धादिवद्दूरादित्वं ततोऽपि च श्रोत्रस्य प्राप्यकारित्वं सिद्धम्। १५

यदि चास्याप्राप्यकारित्वं सिद्धं स्यात्तदा रूप इव तद्विषये देशादिसन्देहो न स्यात् । यथैव हि रूपे प्रतीयमाने किमस्मिन् देशे रूपमेतत्प्रतिभात्यन्यस्मिन् वाऽस्यां दिश्यन्यस्यां वेति न सन्देहो नियतदिग्देशतयैवास्याप्राप्यकारिणेन्द्रियेण प्रतिपत्तिसम्भवात्तथात्राप्यसौ न स्यात् । अस्ति चायं किमन्तर्जातोऽयं शब्दो बहिर्वा प्राच्यां दिश्यन्यस्यां वेति । अथ चक्षुषा प्रेक्ष्यमाणे वस्तुनि देशस्यापि तेनैव प्रतीतेर्युक्तस्तत्र तदपेक्षयापि देशाद्यसन्देहः । शब्दे तु नैवम् । श्रवणेन देशाप्रतीतेः । तर्हि योऽपि क्वचित्तदसन्देहः सोऽपि न स्यात् । तत्रापि श्रोत्रेण देशाग्रहणात् । अथ चक्षुषा तद्ग्रहणं भविष्यति । कुड्यादिव्यवहितदेशसमुद्भवशब्दे किं ब्रवीषि । अनुमानेनास्त्येव तत्रापि

१ ' अभाव ' इति नास्ति प. भ. पुस्तकयोः ।

देशप्रतीतिरिति चेत् । किं तदनुमानम् । शब्दविशिष्टेति चेत् न । स्वस्थानस्थस्य शब्दस्य ग्रहणे दूरनिकटवर्तिप्रमातृप्रति विशेषाभावात् । येषां तु शब्दस्यागतस्य ग्रहणं तेषां तस्य मन्दमन्दतरादिशब्दपर्याय-परम्परोत्पत्त्या युक्तं विशिष्टत्वं ततोऽपि देशानुमानमिति ।

तस्मादेवं प्राप्यकारि प्रसिद्धं श्रोत्रं प्रोक्तन्यायतः स्पष्टमेव ॥
दृष्टान्तत्वं युक्तमेतस्य तस्माद्धर्म्येण व्याहृते वाक्प्रयोगे ॥ ३२४ ॥

शब्दागमनमसहमानभाट्टपूर्वपक्षस्य उद्भाव्य खण्डनम् ।

भाट्टस्तु समाचष्टे । प्रियं नः प्राप्यकारित्वप्रसाधनं श्रोत्रे, यत्पुनरनागतस्य शब्दस्य श्रवणं स पायसदात्रे पिचुमन्दकन्दलक्षोदक्षेपः । विशालशिलासंघातघटितभित्तिभागान्तरितस्य शब्दस्यागमनासम्भवेनाश्रवणप्रसङ्गात् । तदस्य श्रोत्रियस्यानुवेलजलसम्पर्कं प्रकटयति । एवंविधस्य गन्धस्याप्यनाघ्राणप्रसङ्गात् । अथ सूक्ष्माः कतिपयेऽपि गन्धपरमाणवः कुड्यादिकं भित्त्वा घ्राणेन सम्बद्धास्तेन गृह्यन्ते । तर्हि तथाविधा एव शब्दपरमाणवोऽपि श्रोत्रेण गृह्यताम् । न च तत्परमाणवोऽसिद्धाः । पौद्गलिकत्वेन तस्य तत्सिद्धेः । न च पौद्गलिकत्वमप्यसिद्धम् । पुद्गलपरिणामः शब्दो बाह्येन्द्रियगोचरत्वाद्गन्धवदित्यतस्तत्सिद्धेः ।

शब्दस्य पौद्गलिकत्वमसहमानजयन्तमतस्य खण्डनम् ।

यत्तूच्यते जयन्तेन, [1] ‘ वर्णस्यावयवाः सन्ति सूक्ष्माः केचन पुद्गलाः ॥ तैर्वर्णावयवा नाम जन्यन्ते पश्य कौतुकम् ॥ १ ॥ तेषामदृश्यमानानां कीदृक्च रचनाक्रमः ॥ केन तत्सन्निवेशेन कः शब्द उपजायते ॥ २ ॥ लघवोऽवयवाश्चैते निबद्धाश्च न केनचित् ॥ न पीनकठिनं कर्तुं येनावयविनं क्षमाः ॥ ३ ॥ कृतश्च गच्छन्स कथं न विक्षिप्येत मारुतैः । दलशो वा न भज्येत वृक्षाद्यभिहतः कथम् ॥ ४ ॥ प्रयाणकावधिः कश्च गच्छतोऽस्य तपस्विनः ॥

1 न्या मं. पृ. २१५ पं. २५.

एकश्रोत्रप्रवृत्तो वा स गृह्यतां परैः कथम् ॥ ५ ॥ निष्क्रम्य कर्णादेकस्मात्प्रवेशः श्रवणान्तरे ॥ यदीष्येत कथं तस्य युगपद्बहुभिः श्रुतिः ॥ ६ ॥ श्रोतृसंख्यानुसारेण न नानावर्णसम्भवः ॥ वक्तुस्तुल्यप्रयत्नत्वाच्छ्रोतृभेदतदैक्ययोः ॥ ७ ॥" इति ।

तदपि नोपपन्नम् । नासिकाशुषिरनिविशमानसूक्ष्मगन्धाधारद्रव्येऽप्यस्य सकलस्य समानत्वात् । किञ्च कुतस्ते सूक्ष्मवर्णावयवेष्वरुचिः । न तावद्वर्णानां त्वयापि नित्यत्वमुपेतम् । गुणत्वं तु तेषां प्रतिषेत्स्यते । यथा कार्यानुपपत्त्या सूक्ष्माणामपि परमाणूनां कल्पना तथा वर्णावयवानामपि । रचनाक्रमसन्निवेशावपि तादृशावस्य यादृग्भ्यां श्रूयते । यथा पवनस्य तौ यादृशाभ्यां स्पृश्यते । तथा "**यदि स्यान्निश्चितं कार्यं कृतं कारणचिन्तया ॥ अथाप्यनिश्चितं कार्यं कृतं कारणचिन्तया ॥१॥**" निबद्धा चामीषां लघूनामपि पुरुष एव । यथोच्छ्वासावयवानाम् । विक्षिप्यते चासौ मारुतैः । अत एव प्रतिवाते निकटस्थैरपि न श्रूयते । भज्यते चासौ वृक्षाद्यभिहतः । अत एव घनवनव्यवहितैरन्यवर्णसाधारणं वर्णशकलमेव श्रूयते । यतः संशयो जायते कोऽनेनोक्तो वर्ण इति । प्रयाणकावधिरप्यस्य यः कश्चित्क्षिप्तस्य शरादेः । कोऽन्योवधिस्त्वापि शब्दोत्पादसन्तानविरमणस्य । युगपद्बहुप्रमातृश्रवणाभावादिकं दूषणं स्वपक्षेऽपि तुल्यं नास्मानेव प्रतिप्रयोक्तुमर्हसि ।

प्रमेयविधुरा यस्य वचोरचनचातुरी ॥
जयन्तस्य जयं तस्य तर्कयामः कुतो वयम् ॥ ३२५ ॥

विस्तरेण च वक्ष्यामः पुरा पौद्गलिकं ध्वनिम् ॥
एवं स्थिते पुनः प्राह भट्टदर्शनलम्पटः ॥ ३२६ ॥

१ न्यायमञ्जरी पृ. २१५.

कथं मूर्त्ताः स्कन्धाः श्रावणस्वभावाः कुड्यादिना मूर्त्तिमता न प्रतिहन्यन्त इति चेत् । तवापि वायवीया ध्वनयः शब्दाभिव्यञ्जकाः कथं तेन न प्रतिहन्यन्त इति समानम् । अथ तत्प्रतिघाते तत्र शब्दाभिव्यक्तेरयोगादनभिव्यक्तस्य च श्रवणासम्भवादप्रतिघातस्तेषां कुड्यादिना सिद्ध इति चेत् । तत एव शब्दात्मनां पुद्गलानामप्रतिघातोऽस्तु, दृष्टहानिपरिहारात् । दृष्टो हि गन्धात्मकपुद्गलानामप्रतिघातस्तद्वच्छब्दानां न विरुध्यते । यदि पुनरमूर्त्तस्य सर्वगतस्य च शब्दस्य परिकल्पनात्तद्व्यञ्जकानामेवाप्रतिघाताच्छ्रवणमित्यभिनिवेशः । तदा गन्धस्यामूर्त्तस्य सर्वगतस्य कस्तूरिकाद्रव्यविशेषसंयोगजनिता वायवो व्यञ्जका मूर्त्तद्रव्यान्तरेणाप्रतिहतास्तदाघ्राणहेतव इति कल्पनानुपज्यमाना कथं निवारणीया । गन्धस्यैवं पृथिवीगुणत्वविरोध इति चेत् । शब्दस्यापि पुद्गलगुणत्वविरोधस्तथास्तु । परैः शब्दस्य द्रव्यान्तरत्वेनाभ्युपगमाददोष इति चेत् । तथा गन्धो द्रव्यान्तरमभ्युपगम्यताम् । प्रमाणबलायातस्य परिहर्त्तुमशक्तेः । स्पर्शादीनामप्येवं द्रव्यत्वप्रसङ्ग इति चेत् । तान्यपि द्रव्यान्तराणि सन्तु । निर्गुणत्वात्तेषामद्रव्यत्वमिति चेत् । तत एव शब्दस्य द्रव्यत्वं माभूत् । महत्त्वादिगुणाश्रयत्वाच्छब्दो द्रव्यमिति चेत् । तत एव गन्धस्पर्शादीनां द्रव्यत्वमस्तु । तेषूपचरिता महत्त्वादय इति चेत् , शब्देऽप्युपचरिताः सन्तु । कुतः शब्दे तदुपचार इति चेत् , गन्धादिषु कुतः । स्वाश्रयमहत्त्वादिसम्भवादिति चेत् , तत एव शब्देऽप्यस्तु । मुख्यमहत्त्वादेरसम्भवः शब्दे किमवगतः, त्वयापि गन्धादौ स किमु निश्चितः । गन्धादयो न मुख्यमहत्त्वाद्युपेताः शश्वदस्वतन्त्रत्वादभाववदित्यतोऽनुमानादसम्भवो निश्चित एवेति चेत्, तत एव शब्देऽपि स निश्चीयताम् । शब्दे तदसिद्धेर्न तन्निश्चयः । सर्वदा तस्य स्वतन्त्रस्योपलब्धेरिति

मूर्ताः श्रावणस्वभावाः स्कन्धाः कुड्यादिना मूर्त्तिमता कथं प्रतिहन्यन्त इति भाट्टपूर्वपक्षस्य निरासः ।

१ 'गन्धोऽपि' इति भ. पुस्तके पाठः

चेत्, गन्धादावपि तत एव तदसिद्धेः कुतस्तन्निश्चयः । तस्य क्षित्यादिद्रव्यतन्त्रत्वेन प्रतीतेरस्वतन्त्रत्वसिद्धिरिति चेत्, शब्दस्यापि वक्त्रादिद्रव्यतन्त्रस्योपलब्धेरस्वतन्त्रत्वसिद्धिरस्तु । वक्त्रादेः शब्दाभिव्यञ्जकध्वनिष्वेव कारणत्वान्न शब्दस्य तत्परतन्त्रत्वोपलब्धिरिति चेत्, तर्हि क्षित्यादिद्रव्यस्यापि गन्धादिव्यञ्जकवायुविशेषेष्वेव कारणत्वान्न गन्धादेस्तत्परतन्त्रत्वोपपत्तिः । शब्दस्य वक्त्रुरन्यत्रोपलब्धेर्न परतन्त्रत्वं सर्वदेति चेत्, गन्धाश्रयद्रव्यस्य किं न स्यात् । सूक्ष्मत्वादिति चेत्, तत एव शब्दाश्रयद्रव्यस्यापि न चक्षुषोपलब्धिरिति सर्वं समं पश्यामः।

ततो यदि गन्धादीनां शश्वदस्वतन्त्रत्वान्महत्त्वाद्युपेतत्वाभावान्मुख्यतो न द्रव्यत्वं तदा शब्दस्यापि न तत्। ननु च शब्दस्याद्रव्यत्वेऽप्यसर्वगतद्रव्याश्रयत्वे कथं सकृत्सर्वत्रोपलम्भः। यथा गन्धादेः समानपरिणामभृतां पुद्गलानां स्वकारणवशात्समं ततो विसर्प्पणात् । तदेवं प्रतिनिधिभूतो गन्ध एव ध्वनौ पराकरिष्यति तीर्थनिकुरम्बोदीरितदुरारेकानिकरमिति किमस्माकमायासेन ।

वक्तृवक्त्रकुहराद्विनिर्गतः श्रूयते श्रुतिमुपागतस्ततः ॥
गन्धवद्ध्वनिरतश्च मुच्यतां श्रोत्रिय स्वमतसाधनत्वरा ॥ ३२७ ॥

नैयायिकगृहाधीतं तदध्यक्षस्य लक्षणम् ॥
अव्याप्तिदोषदुष्टत्वादवस्थितमलक्षणम् ॥ ३२८ ॥

यदपि "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्" इति मीमांसकैः प्रत्यक्षलक्षणमाम्नायते । तदपि तेषाममीमांसकत्वमेव सूचयति । अतिव्याप्तिदोषानतिक्रमात् । तथा हीन्द्रियाणां सम्प्रयोगे सति पुरुषस्य जायमाना बुद्धिः प्रत्यक्षमिति सूत्रार्थः । तत्र चातिव्याप्तिः । संशयविपर्ययबुद्धचोरपीन्द्रियसम्प्रयोगजन्यत्वेन प्रत्यक्षत्वप्रसक्तेः । अथ सत्सम्प्रयोग इति सता विद्यमानेन सम्प्रयोग इत्येवं व्याख्यायते । तथापि कथं संशयविपर्ययव्युदासः । तत्रापि

सत्संप्रयोगेपुरुषस्येत्यादिमीमांसकोक्तप्रत्यक्षलक्षणस्य निरासः ।

विद्यमानेन केनाप्यर्थेन सम्प्रयोगस्य सम्भवात् । न खलु संशयविपर्यया-वपि सर्वथार्थनिरपेक्षजन्मानौ सम्भवतः । निरालम्बनस्य कस्यचित्संवेदनस्यासम्भवादिति ख्यातिविचारावसरे व्यवस्थापितमेव ।

अथ सति सम्प्रयोग इति सत्सप्तमीपक्ष एव न त्यज्यते । संशय-विपर्ययव्यवच्छेदी च सम्प्रयोग इत्यत्र सम्यगर्थः समुपसर्गो वर्ण्यते । तदुक्तम् " सम्यगर्थे च संशब्दो दुःप्रयोगनिवारणः ॥ दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात् ॥ १ ॥ " इति नन्वेवमपि प्रयोग-सम्यक्त्वस्यातीन्द्रियत्वेन प्रत्यक्षानवसेयत्वात्कार्यतो निश्चितिर्वाच्या । कार्यं च ज्ञानं तच्च नाविशेषितमेव प्रयोगसम्यक्त्वमवबोधयति । न च ज्ञान-विशेषणपरं किञ्चिदपि पदमत्रावलोकयामः । लोकव्यवहारत एव कार्यविशेषनिश्चयात् प्रयोगसम्यक्त्वमवभोत्स्यामहे इति चेत् । तर्हि लोकव्यवहारत एव प्रत्यक्षस्यापि सिद्धत्वात् किं तल्लक्षणव्याख्यानेन । यदपि शबरस्वामिना व्याख्यायते **'यद्यभिचरति न तत्प्रत्यक्षं यत्प्रत्यक्षं न तद्यभिचारि तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षं यद्विषयं ज्ञानं तेन सम्प्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म तत्प्रत्यक्षं यदन्यविषयं ज्ञानमन्यसम्प्रयोगे भवति न तत्प्रत्यक्षम्** ' इत्येवं तत्सतोर्व्यत्ययेन लक्षणमनपवादमवकल्प्यते इति । तदपि नोपपत्तिमियर्त्ति । संशयज्ञानेन व्यभिचारानतिवृत्तेः । तत्र हि यद्विषयं ज्ञानं तेन सम्प्रयोग इन्द्रियाणामस्त्येव । ननूभयविषयं संशयज्ञानं न चोभाभ्यां सम्प्रयुक्तमिन्द्रियमिति चेत् । तदप्यसत् । न हि धवखदिराविव द्वावपि पदार्थौ सिद्धतया संशयज्ञाने प्रतिभासेते । किन्तु स्थाणुर्वा स्यात्पुरुषो वेति अनिर्द्धारितौ तौ । नूनं च तयोरन्यतरेणेन्द्रियं संयुक्तमेवेति उभयावमर्शितत्वाच्च संशयस्य येन सम्पयुक्तमिन्द्रियं तद्विषयमपि तज्ज्ञानं भवत्येवेति नातिव्याप्तिः परिहृता भवतीति ।

इत्थं न युक्तिमनुगच्छति जैमिनी-
यमध्यक्षलक्षणमिदं परितर्क्यमानम् ॥
सांख्यादिकल्पितमदः पुनरक्षवृत्ति-
मुख्यं तिरस्कृतमिहादित एव युक्त्या ॥ ३२९ ॥

---

१ मी. श्लो. वा. प्र. प. सू. ४ श्लो. ३८।३९.

तथा हि श्रोत्रादिवृत्तिः प्रत्यक्षमिति सांख्याः प्रत्यक्षलक्षणमाचक्षते ।

सांख्याद्युक्तप्रत्यक्षलक्षणस्य खण्डनम् ।

एतच्च प्रमाणसामान्यलक्षणसूत्रे ज्ञानग्रहणेन तदुक्तबुद्धिवृत्त्याख्यप्रमाणसामान्यलक्षणान्तर्गतं यथाऽपास्तं तथा प्रागेव निरचायि । प्रत्यक्षं कल्पनापोढमिति प्रत्यक्षलक्षणं तथागताः कथयन्ति । एतदपि तत्रैव व्यवसायिग्रहणेन यथा पराकृतं तथा व्यावर्णितं प्रबन्धेनेति ।

स्पष्टं प्रत्यक्षमित्येतत्प्रत्यक्षस्यात्र लक्षणम् ॥
विक्षिप्तप्रतिपक्षं तल्लक्षयन्तु विचक्षणाः ॥ ३३० ॥ ३ ॥

अथ प्रत्यक्षस्य भेदंप्रकाशनायाह—

तत् द्विप्रकारं सांव्यवहारिकं पारमार्थिकं च ॥४॥

तत्स्पष्टत्वलक्षणलक्षितं प्रत्यक्षं द्विप्रकारम् । प्रकारावेवोल्लिखन्नाह सांव्यवहारिकं पारमार्थिकं चेति । समीचीनो बाधारहितो व्यवहारः प्रवृत्तिनिवृत्तिलक्षणस्तत्र भवं संप्रयोजनमस्येति वा सांव्यवहारिकम् । बाह्येन्द्रियादिसामग्रीसापेक्षत्वादपारमार्थिकमस्मदादिप्रत्यक्षमित्यर्थः । तद्धीन्द्रियानिन्द्रियव्यवहितात्मव्यापारसम्पाद्यत्वात्परमार्थतः परोक्षमेव । धूमादिज्ञानवत् व्यवधानाविशेषादिति । तथा पारमार्थिकं मुख्यम् । आत्मसन्निधिमात्रापेक्षितत्वाद्वक्ष्यमाणमवध्यादिप्रत्यक्षमित्यर्थः । तत्खल्वात्मनः साक्षाद्व्यापारमेवापेक्षते । न पुनः सांव्यवहारिकप्रत्यक्षमिवेन्द्रियादिव्यापारमपीति भावः ॥ ४ ॥

अथ सांव्यवहारिकस्य भेदप्रदर्शनायाह—

॥ तत्राद्यं द्विविधमिन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च ॥ ५ ॥

१ 'तत्र कल्पनापोढमभ्रान्तं प्रत्यक्षम्' इति न्यायबिन्दुः प.१ सू.४. २ 'भेद' इति भ. पुस्तके नास्ति ।

तत्र तयोः सांव्यवहारिकपारमार्थिकप्रत्यक्षयोर्मध्ये यदाद्यं सांव्यवहारिकं तद्विविधम् । द्वैविध्यमेव दर्शयति इन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं चेति । इन्द्रियाणि चक्षुरादीनि तानि मानसबलाधानसहितानि प्राधान्येन निबन्धनमस्येतीन्द्रियनिबन्धनमेकम् । अनिन्द्रियं मनस्तन्निबन्धनं द्वितीयम् । चः समुच्चये । तत्रेन्द्रियं द्रव्यभावेन्द्रियभेदाद्द्वेधा । तत्रापि द्रव्येन्द्रियं गोलकादि परिणामविशेषपरिणतरूपरसगन्धस्पर्शवत् पुद्गलात्मकं विज्ञेयम् । तद्विधा निर्वृत्त्युपकरणभेदात् । " **निर्वृत्त्युपकरणे द्रव्येन्द्रियम्** " इति वचनात् । तत्र निर्वृत्तिराकारः । सा च बाह्याऽभ्यन्तरा च । तत्र बाह्यानेकप्रकारा । अभ्यन्तरा पुनः क्रमेण श्रोत्रादीनां कदम्बधान्यमसूरातिमुक्तकपुष्पचान्द्रिकाक्षुरप्रनानाकारसंस्थाना । उपकरणेन्द्रियं विषयग्रहणे समर्थम् । छेद्यच्छेदने खड्गस्येव धारा । यस्मिन्नुपहते निर्वृत्तिसद्भावेऽपि विषयं न गृह्णातीति । भावेन्द्रियमपि " **लब्ध्युपयोगौ भावेन्द्रियम्** " इति वचनाद्विविधम् । तत्रावरणक्षयोपशमप्राप्तिरूपार्थग्रहणशक्तिर्लब्धिः । तद्भावे सतोऽप्यर्थस्याप्रकाशनात् । अन्यथाऽतिप्रसक्तेः । उपयोगस्तु रूपादिग्रहणव्यापारः । विषयान्तराशक्ते चेतसि सन्निहितस्यापि विषयस्याग्रहणात्सिद्धेः । एवं मनोऽपि द्वेधा द्रष्टव्यमिति ।

अत्राह **योगः** । ननु द्रव्येन्द्रियस्याविशेषतः पुद्गलात्मकत्वमयुक्तम् । अत्यन्तभिन्नजातीयेभ्यः पृथिव्यादिभ्योऽत्यन्तभिन्नजातीयानां घ्राणादीनामुत्पत्तिसिद्धेः । तथा च न्यायभाष्यम् । ' **पृथिव्यापोज्योवायुभ्यो घ्राणरसनचक्षुःस्पर्शनेन्द्रियभावः** ' इति । भवन्ति चानुमानान्यत्र । पार्थिवं घ्राणं रूपादिषु सन्निहितेषु गन्धस्यैवाभिव्यञ्जकत्वात् गोघृतवत्[5] । तथा तदभिव्यञ्जकं च घ्राणं तस्मात्पार्थिवमिति ।

अविशेषेण द्रव्येन्द्रियस्य पुद्गलात्मत्वमसहमानस्य नैयायिकस्य मतमुपपादनपूर्वकं खण्डयते ।

---

१ तत्त्वार्थसू. १।१७. २ तत्त्वार्थसू. १।१८. ३ ' सिद्धिः ' इति प. भ. पुस्तकयोः पाठः । ४ गौ. सू. ३।१. ५ कुंकुमाद्यभिव्यञ्जकगोघृतवत् ।

आप्यं रसनं रूपादिषु सन्निहितेषु रसस्यैवाभिव्यञ्जकत्वात् मुखशोषिणां लालावत्। चक्षुस्तैजसं रूपादिषु सन्निहितेषु रूपस्यैवाभिव्यञ्जकत्वात् प्रदीपवत्। वायव्यं स्पर्शनं रूपादिषु सन्निहितेषु स्पर्शस्यैवाभिव्यञ्जकत्वात्। अग्नसन्निसलिलशैत्याभिव्यञ्जकवायुवत्। श्रोत्रस्य तु पुद्गलात्मकत्वमतीवासम्बद्धम्। शब्दस्य स्वसमानजातीयविशेषगुणवतेन्द्रियेण ग्राह्यत्वोपपत्तेः। तथा हि शब्दः स्वसमानजातीयविशेषगुणवतेन्द्रियेण गृह्यते सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात् रूपादिवदिति। सामान्यविशेषवत्त्वादित्युच्यमाने परमाणुभिर्व्यभिचारस्तद्व्यवच्छेदार्थमिन्द्रियप्रत्यक्षत्वादित्युक्तम्। तथापि घटादिभिर्व्यभिचारस्तन्निरासार्थमेकग्रहणम्। एवमप्यात्मना व्यभिचारस्तदपाकरणार्थं बाह्यग्रहणम्। बाह्यैकेन्द्रियप्रत्यक्षत्वादित्युच्यमाने रूपत्वादिभिर्व्यभिचारस्तद्व्यपोहाय सामान्यविशेषवत्त्वे सतीति कृतम्। तदेतत्सर्वं स्वगृह एव मान्यम्। पृथिव्यादीनामत्यन्तभिन्नजातीयत्वासिद्धितः प्रत्येकं घ्राणादीन्द्रियाणां तदारब्धत्वासिद्धेः। अत्यन्तभिन्नजातीयत्वासिद्धिश्च तेषां विषयपरिच्छेदे समर्थयिष्यते। यदप्यवादीः पार्थिवं घ्राणमित्यादि। तदप्यसमीचीनम्। हेतोः सलिलविशेषेणानेकान्तात्। दृश्यते हि सलिलेन सिच्यमानायाः क्षितेर्गन्धस्याभिव्यक्तिः। न च सलिलं पार्थिवम्। आप्यं रसनमित्याद्यप्ययुक्तम्। हेतोर्लवणेन व्यभिचारात्। तस्यापि नाप्यत्वेऽपि रूपादिषु सन्निहितेषु रसस्यैवाभिव्यञ्जकत्वप्रसिद्धेः। दृष्टान्तश्चात्र साधनशून्यः। लालाद्रव्यस्य कुमारवृत्तिकायां क्षितस्य गन्धाभिव्यञ्जकत्वेनापि प्रतीतेः। चक्षुस्तैजसमित्याद्यप्यनुपपन्नम्। हेतोर्मणिनाऽनैकान्तिकत्वात्। स हि रूपादीनां मध्ये रूपस्यैव प्रकाशको न च तैजसः। पृथ्वीप्रकरणे "पाषाणा उपलमणिपर्वतादयः" इति प्रशस्तभाष्ये पार्थिवत्वाभिधानात्। वायव्यं स्पर्शनमित्याद्यप्यलौकि-

---

१ 'अपि' इति नास्ति प. म. पुस्तकयोः। २ प्रशस्तपादभाष्ये पृ. १३ पं. १०.

कम्प्यं । घनसारादिना हेतोर्व्यभिचारात् । स हि सलिलादौ रूपादिषु शक्तिमत्स्वेवाभिव्यञ्जको न च वाय्यव्य इति । शब्दः स्वसमानजातीय-विशेषगुणवत्त्वेत्यादिरपि स्वप्रक्रियोपदर्शनमात्रम् । शब्देऽम्बरगुणत्वस्य प्रतिषेत्स्यमानत्वात् । ततो नेन्द्रियाणां प्रतिनियतभूतकार्यत्वं कुतोऽपि प्रमाणात्सिद्ध्यतीति स्थितम् ॥

सांख्योपकल्पितस्येन्द्रियाणां मनसश्चाहङ्कारिकत्वस्य खण्डनम् ।

आहङ्कारिकत्वमपीन्द्रियाणां साङ्ख्योपकल्पितं नोपपद्यते । तथा हि नाहङ्कारिकाणीन्द्रियाणि करणत्वाद्वास्यादिवत् । प्रतिनियतविषयप्रकाशकत्वात् प्रदीपवत् । तथा नाहङ्कारिकाणीन्द्रियाणि प्रतिनियतज्ञानव्यपदेशनिमित्तत्वाद्रूपादिवत् । यथैव हि रूपज्ञानं रसज्ञानमित्यादिप्रतिनियतज्ञानव्यपदेशहेतवो रूपादयो नाहङ्काकारिकास्तद्वच्चक्षुर्ज्ञानं रासनज्ञानमित्यादिप्रतिनियतज्ञानव्यपदेशहेतुत्वाच्चक्षुरादीन्द्रियाण्यपि । तथा नाहङ्कारिकाणीन्द्रियाणि पौद्गलिकानुग्रहोपघाताश्रयत्वाद्दर्प्पणादिवत् । यथैव हि दर्प्पणादयः पौद्गलिकैर्भस्माश्मादिभिः क्रियमाणानुग्रहोपघाताश्रयभूता नाहङ्कारिकाः किं तु पौद्गलिकास्तथाञ्जनरेणुकणादिभिः पौद्गलिकैः क्रियमाणानुग्रहोपघाताश्रयभूतानि चक्षुरादीन्द्रियाण्यपि । एवं मनोऽपि नाहङ्कारिकमनियतविषयत्वादात्मवदिति । ततः पौद्गलिकत्वमेव द्रव्येन्द्रियाणीन्द्रियाणां प्रतिपत्तव्यम् । नन्विन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं चेत्यसाम्प्रतमुक्तम् । आत्मादेरपि तत्कारणस्यात्राभिधानार्हत्वात् । मैवम् । असाधारणस्यैव कारणस्याभिधातुमत्राकाङ्क्षितत्वात् । आत्मादेः पुनरनुमानादिप्वपि कारणत्वेन साधारणत्वात् ॥ ५ ॥

अथास्य द्विविधस्यापि प्रत्यक्षस्य भेदप्रकटनार्थमाह—

॥ एतत् द्वितयमवग्रहेहावायधारणाभेदादेकशश्चतुर्विकल्पमिति ॥ ६ ॥

एतदनन्तरोक्तम् । द्वितयमिन्द्रियनिबन्धनानिन्द्रियनिबन्धनप्रत्यक्षप्रमाणम् । एकशः प्रत्येकम् । चतुर्विकल्पं चतुर्भेदम् । कुत इत्याह अव-

ग्रहेहावायधारणाभेदात् अवग्रहश्चेहा चावायश्च धारणा चावग्रहेहावाय-धारणा वक्ष्यमाणलक्षणास्ताभिर्भेदो विशेषस्तस्मादिति ॥ ६ ॥

अवग्रहेहादीनां स्वरूपं क्रमतः सूत्रचतुष्टयेन व्याचष्टे—

॥विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रह इति ॥ ७ ॥

विषयो द्रव्यपर्यायात्मकोऽर्थः। विषयी चक्षुरादिरिन्द्रियानिन्द्रियग्रामः। तयोः समीचीनो भ्रान्त्याद्यजनकत्वेनानुकूलो यो निपातो योग्यदेशावस्थानम्। तस्मादनन्तरं समुद्भूतमुत्पन्नं यत्सत्तामात्रगोचरं निरशेषविशेषवैमुख्येन सन्मात्रविषयं दर्शनं निराकारबोधस्तस्माज्जातमाद्यं प्रथमं सत्त्वसामान्यादवान्तरैः सामान्याकारैर्मनुष्यत्वादिभिर्जातिविशेषैर्विशिष्टस्य वस्तुनो यद्ग्रहणं ज्ञानं तदवग्रह इति नाम्ना गीयते। ननु दर्शनानन्तरमवग्रहो भवतीत्ययुक्तमुच्यते अवग्रहाद्विलक्षणस्य दर्शनस्याभावादिति। अत्रोच्यते। ततोऽनन्तरसमयभाविषून्मेषेषु चक्षुरवग्रहमतिज्ञानावरणवीर्यान्तरायक्षयोपशमादङ्गोपाङ्गोपपृष्टमकत्वे मनुष्योऽयमित्यादिविभावितमनुष्यत्वाद्यवान्तरजातिविशेषं ज्ञानमुत्पद्यमानमवग्रह उच्यते इति सिद्धं दर्शनावग्रहयोर्विलक्षणस्वरूपत्वम्। अथ प्रथमसमयोन्मेषसमुद्भूतबालदर्शनमपि ज्ञानमिष्यते तर्हि तन्मिथ्याज्ञानं वा स्यात् सम्यग्ज्ञानं वा। मिथ्याज्ञानत्वेऽपि संशयस्वभावं तद्भवेद्विपर्ययस्वरूपमनध्यवसायात्मकं वा। तत्र न तावत्संशयविपर्ययात्मकं मिथ्याज्ञानं बाले सम्भवति। तस्य सम्यग्ज्ञानपूर्वकत्वात्। सम्यग्ज्ञानं च प्राथमिकत्वात्तस्य नास्तीति। नाप्यनध्यवसायरूपम्। वस्तुमात्रप्रतिपत्तेः। नापि सम्यग्ज्ञानं बालस्य दर्शनम्। अर्थाकारालम्बनाभावात्। किं च यथा मृत्त-

१ 'अथ' इत्यधिकं प. भ. पुस्तकयोः। २ 'अपि' इत्यधिकं प. भ. पुस्तकयोः। ३ 'देशाद्यवस्थानम्' इति प. भ. पुस्तकयोः पाठः। ४ अत्र किञ्चित्पतितमप्रतिभाति।

न्तुकारणभेदाद्घटपटलक्षणकार्यभेदस्तथा दर्शनज्ञानावरणक्षयोपशमकारणभेदात्तत्कार्यदर्शनज्ञानभेद इत्यस्ति प्रागवग्रहाद्दर्शनम् ॥ ७ ॥

॥ अवगृहीतार्थविशेषाकाङ्क्षणमीहेति ॥ ८ ॥

अवगृहीतोऽवग्रहेण विषयीकृतो योऽर्थोऽवान्तरमनुष्यत्वादिजातिलक्षणस्तस्य विशेषः कर्णाटलाटादिभेदस्तस्य काङ्क्षणं भवितव्यताप्रत्ययरूपतया ग्रहणाभिमुख्यम् ईहेत्यभिधीयते ॥ ८ ॥

॥ ईहितविशेषनिर्णयोऽवाय इति ॥ ९ ॥

ईहितस्येहया विषयीकृतस्य विशेषस्य कर्णाटलाटादिभेदस्य निर्णयो यथात्म्येन निश्चयनम् । अवाय इति कीर्त्यते । शास्त्रान्तरे त्वपाय इत्यपि संज्ञा दृश्यते । तत्रापि न कश्चिद्विशेषः । अन्यतरवचनेऽन्यतरस्य सामर्थ्यलब्धत्वात् । यदा हि दाक्षिणात्योऽयमित्यवायमधिगमं करोति प्रमाता । तदा नायमुदीच्यादिरित्यपायो व्यवच्छेदः सामर्थ्यालभ्यते । यदा च नायमुदीच्यादिरित्यपायं करोति । तदा दाक्षिणात्योऽयमित्यवायः सामर्थ्यालभ्यत इति ॥ ९ ॥

॥ स एव दृढतमावस्थापन्नो धारणेति ॥ १० ॥

स एवायमेव दृढतमावस्थापन्नः । सादरस्य प्रमातुस्तथाविधोपचयक्रमेण किञ्चित्कालमप्रच्यवमानो धारणेत्यभिधीयते । इदमस्य सूत्रचतुष्टयस्य तात्पर्यम् । इन्द्रियार्थयोर्योग्यतालक्षणसम्बन्धे सति सकलहेयोपादेयतासाधारणगोचरं निराकारबोधस्वरूपं दर्शनमात्मनः प्रथमतः प्रादुर्भवति । तदनन्तरमवान्तरजातिविशेषविषयं ज्ञानमवग्रहसंज्ञमुज्जिहीते मनुष्योऽयमिति यथा। तदनु तद्विशेषाकाङ्क्षालक्षणमीहाज्ञानमुन्मज्जति सम्भाव्यतेऽयं कर्णाट इति यथा । ततोऽप्याकाङ्क्षितविशेषावधारणस्वरूपोऽवायः समुल्लसति कर्णाट एवायमिति यथा । तस्मादपि प्रागवधारितकर्णाटादिविशेषाणामुत्तरकालं धारणा समुन्मीलतीति ।

यत्तु विद्यानन्दः प्रत्यपादयत् । "अक्षार्थयोगजाद्वस्तुमात्रग्रहणलक्षणात् ॥ जातं यद्वस्तुभेदस्य ग्रहणं तदवग्रहः ॥ १ ॥ तद्गृहीतार्थसामान्ये यद्विशेषस्य काङ्क्षणम् ॥ निश्चयाभिमुखं सेहा संशयाद्विकलक्षणा ॥ २ ॥ तस्यैव निर्णयोऽवायः स्मृतिहेतुः स धारणा" इति । तत्र स्मृतिहेतुत्वं धारणायाः साक्षात्पारम्पर्येण वा विवक्षितम् । यदि साक्षात्, तदक्षमम् । यतो धारणेति विवक्षितवस्तुगोचरोपयोगरूपपर्यायस्यैवाभिधानं यथा पृथुबुध्नोदराकारपर्यायस्य कलश इति । न चास्य स्मृतिकालं यावदनुवृत्तिरुपपद्यते । छाद्मस्थिकोपयोगानामान्तर्मौहूर्तिकत्वेन परमागमे गदनात् । न च तथानुभवोऽप्यस्ति । न खल्वद्यानुभूयमानस्य परेद्युः स्मरणीयस्य च घटस्यान्तरालिकानेकसुप्तमत्ताद्यवस्थास्वनुभवः कस्यचित्प्रतीतः । ततो धारणारूपपर्यायोपढौकितः पुरुषशक्तिविशेष एव संस्कारपर्यायः स्मृतेरानन्तर्येण हेतुर्न धारणेति ।

विद्यानन्देन कृतस्यावग्रहादीनां स्वरूपनिरूपणस्योपदर्श्य धारणालक्षणस्य खण्डनम् ।

अथ किमिदमसमञ्जसमुच्यते । न खलु संस्कारादन्या धारणास्य मता । तथा चायमेव श्लोकवार्तिके, "अज्ञानात्मकतायां तु संस्कारस्योहितस्य वा ॥ ज्ञानोपादानता न स्यादूपादेरिव सास्ति च ॥ १ ॥" इत्यत्र संस्कारशब्देन धारणामेवाभ्यधात् । महोदये च कालान्तराविस्मरणकारणं

श्लोकवार्तिकमहोदयग्रन्थाभ्यां धारणा संस्काररूपैवाभिमता । एतदेव विद्यानन्दस्यानन्तवीर्यस्याप्यभिमतमिति तटस्थाशंकोपदर्शं निराकृता ।

---

१ तत्त्वार्थश्लोकवार्तिके अ. १. सू. १५ श्लो. २।३।४. २ छाद्यते केवलज्ञानं केवलदर्शनं चात्मनोऽनेनेति छद्म (छद्मस्थो विशिष्टावध्यादिविकलो न त्वकेवली । यतो यद्यपि धर्माधर्माकाशान्यशरीरं जीवं च परमावधिर्न जानाति तथापि परमाणुशब्दौ जानात्येव, रूपित्वात्तयोः रूपिविषयत्वाच्चावधेरिति स्था. ६ स्था.) ३ मुहूर्तकालप्रमाणं—३७७३ उछ्वासैरेको मुहूर्तः घटिकाद्वयप्रमाणेत्यर्थः। मुहूर्तस्य अन्ते मध्ये वा अन्तर्मुहूर्तः । 'पारेमध्ये०' इति हैमसूत्रेण (३-१-३०) विकल्पेन अन्तरशब्दस्य प्राक् निपातो भवति । ४ मलयगिरीया प्रज्ञापनाटीका प. २९ प. ५२६. ५ तत्त्वार्थश्लो. वा. अ. १ सू. १५ श्लो. १२.

हि धारणाभिधानं ज्ञानं संस्कारः प्रतीयत इति वदन् संस्कारधारणयोरैकार्थ्यमचकथत् । अनन्तवीर्योऽपि 'तथानिर्णीतस्य कालान्तरे तथैव स्मरणहेतुस्संस्कारो धारणा' इति तदेवावदत् । ततः संस्कारस्य साक्षात्स्मृतिहेतुतां समर्थयमानाभ्यामाभ्यां धारणाया एव सा समर्थितेति चेत् । किमेवं वदतोरनयोर्यः स्मृतिकालानुयायी धर्मविशेषः संस्कार इति सर्ववादिनामविवादेन सिद्धः स धारणात्वेन सम्मतः । तथा चेत्, तर्हि यस्य पदार्थस्य कालान्तरे स्मृतिस्साप्रत्यक्षात्मिका धारणा तावत्कालं यावदनुवर्त्तत इति स्यात् । एतच्चानुपपन्नम् । एवं तर्हि यावत्पटपदार्थसंस्काररूपं प्रत्यक्षं पुरुषे भवेत्तावत्पदार्थान्तरस्य संवेदनमेव न स्यात् । क्षायोपशमिकोपयोगानां युगपद्भावविरोधस्याभ्यामपि प्रतिपन्नत्वात् । अथ तादृशि धर्मविशेषे प्रतीतामपि संस्कारसंज्ञां धारणायां सांकेत्य तथाव्यवहरतामेतौ । नन्वेवमपि कृते का नामार्थसिद्धिरनयोः । नह्येवमपि धारणायाः साक्षात्स्मरणहेतुत्वमुक्तं भवति । तस्यास्तदानीमेव ध्वस्तत्वेनात्मशक्तिविशेषस्यैव साक्षात्तद्धेतुत्वात् । न च स्मरणजनने नास्त्येवात्मनः शक्तिविशेष इति सङ्गतम् । एवं हि सर्वत्र शक्तिविलोपप्राप्तेश्चिरन्तनातीतस्य पर्यायविशेषस्यैव कस्यचित्कार्योत्पत्तौ सर्वत्र कारणत्वेन कल्पयितुं शक्तत्वात् । तस्मादात्मशक्तिविशेष एव संस्कारापरपर्यायः स्मृतेरानन्तर्येण हेतुः, न धारणा । पारम्पर्येण तु तस्यास्तद्धेतुताभिधाने न किञ्चिद्दूषणम् ॥ १० ॥

नन्वनिश्चयस्वभावत्वादीहा सन्देहान्न भिद्यत इत्यारेकामपाकुर्वन्नाह—

संशयपूर्वकत्वादीहायाः संशयात् भेद इति ॥११॥

संशयः पूर्वं कारणं यस्याः सा संशयपूर्विका तस्या भावः संशयपूर्वकत्वं तस्मादीहायाः सम्भावनाप्रत्ययस्वभावायाः संशयाद्दोलायमानज्ञानस्वभावात्सकाशाद्भेदः प्रेक्षाशालिभिरवगन्तव्यः । तथा हि पुरुषमवगृह्य किमयं दाक्षिणात्य उतोदीच्य इति चलितप्रतिपत्तिरूपः संशयः । एवं संशयितस्य प्रमातुरुत्तरकालं विशेषलिप्सायां प्रतिपतनमीहेति

सुव्यक्तमेव संशयादर्थान्तरत्वमीहायाः । अवग्रहादिप्रत्यक्षभेदसूत्रे च संशयस्याप्रतिपादनमप्रमाणत्वात् ॥ ११ ॥

अथ दर्शनादीनां कथञ्चिदव्यतिरेकेऽपि संज्ञाभेदसमर्थनायाह—

॥ कथंचिदभेदेऽपि परिणामविशेषादेषां व्यपदेशभेद इति ॥ १२ ॥

कथञ्चिदेकजीवद्रव्याविष्वग्भावेनाभेदेऽप्येकत्वेऽपि परिणामविशेषाद्विवर्त्तभेदादेषां दर्शनादीनां व्यपदेशस्य संज्ञाया भेदो नानात्वं सुघटमेवेति ॥ १२ ॥

अथैतेषामेव भेदभावनायाह—

॥ असामस्त्येनाप्युत्पद्यमानत्वेनासङ्कीर्णस्वभावतयानुभूयमानत्वादपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात्क्रमभावित्वाच्चैते व्यतिरिच्यन्त इति ॥ १३ ॥

असामस्त्येनाप्यसम्पूर्णत्वेनाप्युत्पद्यमानत्वेन कृत्वा यदसङ्कीर्णस्वभावतयानुभूयमानत्वं दर्शनादीनां तस्मादेते दर्शनादयो व्यतिरिच्यन्त इत्येको हेतुः । इदमुक्तं भवति । गभीरे दर्शनज्ञानावरणाम्भोधौ निमज्जनोन्मज्जने कुर्वाणस्यात्मनस्तत्तद्द्रव्यक्षेत्रकालाद्यपेक्षविचित्रततत्तत्क्षयोपशमवशात्कदाचिद्दर्शनमात्रमेव । कदाचिद्दर्शनावग्रहौ । कदाचिद्दर्शनावग्रहसंशयाः । कदाचिद्दर्शनावग्रहसंशयेहाः । कदाचिद्दर्शनावग्रहसंशयेहावायाः । कदाचित्तु धारणापर्यन्ताः । सर्वेऽप्येते चैतन्यविशेषाः यदुन्मीलन्ति तदेतेषां सामस्त्येनासामस्त्येन चोत्पद्यमानत्वं सिद्धम् । असामस्त्येनोत्पद्यमानत्वाच्चासङ्कीर्णस्वभावतयाऽनुभूयमानत्वम् । ततश्च व्यतिरेकः सिद्धो भवतीति । तथाऽपूर्वापूर्वस्यान्यान्यस्य वस्तुपर्यायस्य पदार्थधर्मस्य प्रकाशकत्वादिति द्वितीयो हेतुः । क्रमभावित्वादिति तृतीयः । चकारो हेतुसमुच्चये । प्रयोगाः पुनरत्रैवं कार्याः । येऽसङ्कीर्ण-

स्वभावतयानुभूयन्ते ते परस्परं व्यतिरिक्तमूर्तयो यथा स्तम्भादयस्तथा चैते दर्शनादयो धारणापर्यन्ताश्चैतन्यविशेषा इति । तथा येऽपूर्वापूर्ववस्तुपर्यायप्रकाशकास्ते यथोक्तसाध्याः यथानुमानादयस्तथा चैते इति । तथा ये क्रमभाविनस्ते पूर्वोक्तसाध्याधारा यथाङ्कुरकदलकाण्डादयस्तथा चैते इति ॥ १३ ॥

अथैते दर्शनादयः किमुक्तक्रमेणैव प्रादुर्भवन्त्याहोस्वित्क्रमान्तरेणापीत्यारेकां निराकुर्वन्नाह—

क्रमोऽप्यमीषामयमेव तथैवऽसंवेदनादेवं क्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्चेति ॥ १४ ॥

क्रमोऽपि परिपाटिरपि । न केवलं स्वरूपमित्यपिशब्दार्थः । अमीषां दर्शनादीनाम् । अयमेव यः पूर्वमुपन्यस्तः । अत्र हेतुद्वयमाह । तथैव यथोक्तक्रमेणैव । संवेदनादनुभवात् । तथा हि यदेव मया विषयिविषयसन्निपातदशायां सन्मात्रमालोकितं तदेव वर्णसंस्थानादिसामान्याकारेण पश्चादवगृहीतमनन्तरमनिर्धारितरूपतया संशयितं पुनः प्रतिनियतविशेषाकारेणेहितं तदनु तदेवाकाङ्क्षितविशेषाकारेणावेतं पुनर्दृढतमावस्थापन्नावायरूपतया धारितमित्यहमहमिकया सर्वैरपि दर्शनादीनां क्रमः संवेद्यमानः कथमपह्नोतुं पार्यते । तथा एवं क्रमेण दर्शनाद्युत्पत्तिक्रमेणाविर्भूतो योऽसौ निजकर्मणो दर्शनज्ञानावरणलक्षणस्य क्षयोपशमः समयसिद्धोऽपगमविशेषस्तेन जन्यत्वात्क्रमोऽप्यमीषामयमेवेति । चकारो हेतुसमुच्चये । इदमत्रैदम्पर्यम् । येन क्रमेणात्मनो दर्शनाद्यावरणकर्मक्षयोपशमो दर्शनादीनां कारणभूतः प्रादुर्भवति तेनैव क्रमेण दर्शनादयोऽपि तस्य समुल्लसन्ति । तथा हि ये यथाक्रमाविर्भूतनिजकारणजन्यास्ते तथा क्रमोपेताः । यथा स्थासकोशकुशूलादयस्तथा चैते दर्शनादय इति ॥ १४ ॥

दर्शनादीनां प्रदर्शितक्रमानभ्युपगमे दोषमाह—

अन्यथा प्रमेयानवगतिप्रसङ्ग इति ॥ १५ ॥

अन्यथेति दर्शनादीनां यथोक्तक्रमानभ्युपगमे, प्रमेयस्य परिच्छेद्यस्य वस्तुनोऽनवगतेरनवबोधस्य प्रसङ्गः । प्रतीयमानक्रमापह्नवे हि दर्शनादीनां प्रमेयापह्नव एव कृतो भवतीति भावः ॥ १५ ॥

उपवर्णितमेव क्रमं दर्शनादीनां व्यतिरेकद्वारा दर्शयन्नाह— ५

न खल्वदृष्टमवगृह्यते नचानवगृहीतं सन्दिह्यते न चासन्दिग्धमीह्यते नचानीहितमवेयते नाप्यनवेतं धार्यते इति ॥ १६ ॥

सुगमम् ॥ १६ ॥

क्वचिद्दर्शनादीनामुत्पत्तिक्रमानुपलक्षणे कारणमाह— १०

क्वचित्क्रमस्यानुपलक्षणमेषामाशूत्पादादुत्पलशतपत्रव्यतिभेदक्रमवदिति ॥ १७ ॥

अयमत्र भावः । यथोत्पलपत्रशतव्यतिभेदस्य सूच्यादिना क्रियमाणस्य क्रमः सन्नपि शीघ्रमुत्पादात् नोपलक्ष्यते तथा क्वचिदत्यन्ताभ्यस्ते करतलादौ विषये दर्शनादीनामपि । १५

सामान्यतस्तावदवग्रहादेरिदं स्वरूपं निरदेशि किञ्चित् ॥
भेदप्रपञ्चोऽस्य तु सम्प्रधार्यः सिद्धान्तसिन्धोरभियोगधीरैः॥ ३३१॥ १७ ॥

इत्थं भेदप्रभेदपरिकरितं सांव्यवहारिकं प्रत्यक्षं लक्षयित्वा सम्प्रति पारमार्थिकं प्रत्यक्षं लक्षयति— २०

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षमिति ॥१८॥

परमार्थिकं मुख्यं प्रत्यक्षं वक्ष्यमाणावधिज्ञानादिकम् । पुनःशब्दः सांव्यवहारिकप्रत्यक्षभेदादस्य भेदद्योतनार्थः । उत्पत्तौ स्वजन्मनि ।

---

१ लक्षणसूत्रम् २-२१.

आत्ममात्रापेक्षं केवलजीवद्रव्यसव्यपेक्षम् । इदमत्र हृदयम् । क्षयक्षयोपशमविशिष्टमात्मद्रव्यमेवाव्यवहितं समाश्रित्य पारमार्थिकमेव तदवध्यादिप्रत्यक्षं समुन्मीलति । न पुनः सांव्यवहारिकं प्रत्यक्षमिवेन्द्रियादिव्यवहितमात्मद्रव्यं समाश्रित्येति ॥ १८ ॥

एतत्प्रकारप्ररूपणायाह—

॥ तद्विकलं सकलं चेति ॥ १९ ॥

तत्पारमार्थिकमेकं तावद्विकलविषयत्वाद्विकलम् । द्वितीयं तु सकलविषयत्वात्सकलम् ॥ १९ ॥

विकलं भेदतो दर्शयन्नाह—

॥तत्र विकलमवधिमनःपर्यायज्ञानतया द्वेधेति॥२०॥

तत्र तयोर्विकलसकलयोर्मध्ये यद्विकलं तदवधिमनःपर्यायज्ञानरूपतया द्वेधा द्विप्रकारं भवतीति ॥ २० ॥

तत्रावधिज्ञानस्वरूपमाह—

॥ अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानमिति ॥२१॥

अवधिज्ञानस्य यदावरणमदृष्टविशेषस्तस्य योऽसौ विलयविशेषो विनाशभेदः क्षयोपशमापरनामा तस्मात्समुद्भव उत्पत्तिर्यस्य तत्तथा । भवगुणप्रत्ययं भवः सुरनारकजन्मलक्षणः । गुणः सम्यग्दर्शनादिः । तौ प्रत्ययौ कारणे यस्य तत्तथा । तत्र भवप्रत्ययः सुरनारकाणाम् । गुणप्रत्ययं तु नरतिरश्चाम् । रूपिद्रव्यगोचरं मूर्त्तद्रव्यविषयम् । अवधिज्ञानमिति अवशब्दोऽधःशब्दार्थः । अवधानादवधिर्धानं परिच्छेदः । अवधिश्चासौ ज्ञानं च अवधिज्ञानमिति समासः । एतदुक्तं भवति । अधोधो विस्तृतविषयमनुत्तरोपपातिकादीनामवधिज्ञानम् । विषयस्य च

---

१ न विद्यते उत्तर—प्रधानोऽस्मादित्यनुत्तरः । उपपतनं उपपातो जन्म अनुत्तरः प्रधानः संसारेऽन्यस्य तथाविधस्याभावात् उपपातोऽत्येषामित्यनुत्तरोपपातिकाः ।

बहुत्वमुररीकृत्यैव व्युत्पत्तिरास्थीयते । अन्यथा तिर्यगूर्ध्वं वा विषयं परिच्छिन्दानस्यावधिव्यपदेशो न स्यात् । यद्वा, अवधिर्मर्यादा । अवधेर्ज्ञानमवधिज्ञानम् । इदमुक्तं भवति । अमूर्त्तद्रव्यपरिहारेण मूर्त्तद्रव्यविषयत्वलक्षणया मर्यादया प्रवर्त्तमानत्वादस्यावधिज्ञानत्वम् । इदं च चतसृष्वपि गतिषु जन्तूनां प्रवर्त्तमानानामिन्द्रियनिरपेक्षं प्रतिविशिष्टक्षयोपशमनिमित्तं पुद्गलानामेव परिच्छेदकमुल्लसतीति ॥ २१ ॥

मनःपर्यायज्ञानं लक्षयन्नाह—

संयमविशुद्धिनिबन्धनाद्विशिष्टावरणविच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानमिति॥२२॥

संयमस्य चारित्रस्य विशुद्धिर्निर्मलता निबन्धनं कारणं यस्य स तथा तस्मात् । विशिष्टश्चासावावरणविच्छेदश्च मनःपर्यायज्ञानावरणक्षयोपशम इत्यर्थस्तस्माज्जातम् । मनोद्रव्याणां संज्ञिजीवमनस्त्वपरिणमितमनोवर्गणाना ये पर्याया वस्तुचिन्तनानुगुणा धर्मास्ते आलम्बनं परिच्छेद्यं यस्य तत्तथाविधम् । मनःशब्देन मनोद्रव्याणि गृह्यन्ते । तेषां पर्यायेषु ज्ञानं यत् तन्मनःपर्यायज्ञानमिति । इदमिहैदम्पर्यम् । मनुष्यक्षेत्रवर्त्तिसंज्ञिजीवगृहीतमनोद्रव्यपर्यायसाक्षात्कारि यज्ज्ञानं विशिष्टचारित्रिस्वामिकं तन्मनःपर्यायज्ञानमित्युच्यते । अनेन च मनःपर्यायज्ञानेन च परमार्थतो मनोद्रव्यपर्यायान् परिच्छिनत्ति । बाह्यांस्तु चिन्तनीयानर्थाननुमानादेवंविधमनःपर्यायान्यथानुपपत्तेरिदमनेन चिन्तितमित्येवं लक्षणादवगच्छति मनःपर्यायज्ञानीति ॥ २२ ॥

अथ सकलप्रत्यक्षप्ररूपणायाह—

॥सकलं तु सामग्रीविशेषसमुद्भूतसमस्तावरणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारस्वरूपं केवलज्ञानमिति ॥ २३ ॥

---

१ नारकतिर्यङ्मनुष्यदेवगतिचतुष्टयम् । २ मनोरूपतया परिणम्य आलंब्य च निसृष्टं मनःप्रायोग्यद्रव्यम् । ३ 'मानुष इति भ. पुस्तके पाठः । ४ 'मनोद्रव्यपर्यायान्' इति नास्ति प. भ. पुस्तकयोः ।

सकलं तु सकलप्रत्यक्षं । पुनः केवलज्ञानमित्युत्तरेण योगः । सामग्री सम्यग्दर्शनादिलक्षणान्तरङ्गा। बहिरङ्गा तु जिनकालिकमनुष्यभवादिलक्षणेह विवक्षिता । तस्या विशेषोऽधिकत्वं ततः समुद्भूतः सम्पन्नो योऽसौ समस्तावरणक्षयः सकलघातिकर्मविघातस्तमपेक्षते स्वोत्पत्तौ यत्तत्तथा । किं स्वरूपमित्याह । निखिलद्रव्यपर्यायाणां यः साक्षात्कारः स्पष्टतया प्रतिभासः स स्वरूपं यस्य तत्तथा । केवलज्ञानमिति । केवलं सम्पूर्णं ज्ञेयमुच्यते । तस्मिन् यज्ज्ञानं तत्केवलज्ञानम् । यद्वा केवलमेकं मत्यादिज्ञानरहितमविद्यमानस्वप्रभेदं च । ततः केवलं च तज्ज्ञानं च केवलज्ञानमिति समासः ॥ नन्वावृतिक्षयापेक्षमित्युक्तं यद्विशेषणं व्यर्थं तत् । आवृतेरेव स्वरूपस्याप्रसिद्धितः । तथा हि किमावरणमभिप्रेतमायुष्मताम् । किं शरीरमाहोस्विद्देशकालादिकम् । न तावच्छरीरम् । तत्सद्भावेऽप्यर्थोपलम्भात् । अथ देशकालादिकम् । तथा हि मेर्वादेर्दूरदेशता । रावणादेर्दूरकालता । परमाण्वादेः सूक्ष्मस्वभावता । मूलकीलकोदकादेश्च भूम्यादिरावरणं लोके प्रसिद्धमेवेति चेत् । तदप्यसारम् । एवं स्वरूपस्यावरणस्य क्षयानुपपत्तेः । न खलु सातिशयसमृद्धिशालिनापि योगिना देशादीनामभावः कर्तुं शक्यते । न चान्यत्किञ्चिदावरणं प्रतीतिपद्धतिमधिरोहति ।

तन्नावृतिक्षयापेक्षमित्येतज्ज्ञानकल्पितम् ॥
विशेषणं घटाकोटिसंटङ्कमटति स्फुटम् ॥ ३३२ ॥
अलीककल्पनाजालमलीमसधियामिदम् ॥
युक्तं भवादृशां वक्तुं न पुनः सूक्ष्मचक्षुषाम् ॥ ३३३ ॥

तथा हि न शरीरं नापि देशकालादिकमावरणम् । अपि तु तदतिरिक्तं कर्म्म । तच्चानुमानमाहात्म्यतः प्रतीतम् । तथा हि । स्वपरप्रमेयबोधैक-

---

१ ज्ञानावरणदर्शनावरणमोहनीयान्तरायाख्याचतुष्टयं घातिकर्म । २'तत्त्वावृत्ति' इति प. भ. पुस्तकयोः पाठः । ३ ' म्भसम्भवा ' इति प. भ. पुस्तकयोः पाठः । ४ अत्र किञ्चित्पतितमस्ति ।

स्वभावस्यात्मवेदमादौ मोहवत् । यच्च शरीराद्यतिरिक्तं तत्कर्म्मैव । तथा यदप्रवृत्तिमत्त्वविषये तत्सावरणम् । यथा तैमिरिकस्य लोचनविज्ञानमेकचन्द्रमसि । अप्रवृत्तिमच्च स्वविषये समस्तार्थलक्षणेऽस्मदादिज्ञानमिति । ननु चास्मदादिज्ञानस्य समस्तार्थविषयत्वं कुतः सिद्धम् । आवरणापाये तत्प्रकाशकत्वाच्चेत्, तर्हि परस्पराश्रयः । सिद्धे हि सकलविषयत्वे तस्यावरणापाये तत्प्रकाशनं सिद्ध्यत्यतश्च सकलविषयत्वमिति । तदप्यपरीक्षितलक्षितम् । यतोऽनुमानमिच्छता भवताप्यवश्यं निःशेषवस्तुविषयं व्याप्तिज्ञानमभ्युपगतमेवेति । तथा यदस्पष्टं स्वगोचरे ज्ञानं तत्सावरणम् । यथा रजोनीहाराद्यन्तरिततरुनिकरादिज्ञानम् । अस्पष्टं च स्वगोचरे सर्वं सदनेकान्तात्मकमित्यादिज्ञानमिति । तथामिथ्यात्वपटलविलुप्तविवेकदृशां यदेतत्सर्वस्मिन्ननेकान्तात्मके वस्तुनि विपर्ययज्ञानं तत्सावरणं मिथ्याज्ञानत्वाद्धत्तूरकाद्युपयोगिनो मृत्तिकाशकले कनकज्ञानमिवेति । ततः सिद्धमावरणं कर्म्म ॥

ननु प्रसिद्धस्यापि यथोक्तप्रकारस्य कर्म्मणः कार्यकारणप्रवाहे[1] प्रवर्त्तमानस्यानादित्वात्तद्विनाशहेतुभूतस्य सामग्रीविशेषस्य चाभावात्कथं क्षयो यत आवरणक्षयापेक्षत्वं केवलज्ञानस्य स्यादिति चेत् । तदपि नोपपद्यते । अनादेरपि तुषारगिरिगह्वरे शीतस्पर्शस्योष्णस्पर्शप्रकर्षे बीजाङ्कुरसन्तानस्य कार्यकारणरूपतया प्रवर्त्तमानस्य निर्दग्धबीजेऽङ्कुरे वा निर्म्मूलं प्रलयविलोकनात् । सम्यग्दर्शनादिरत्नत्रयलक्षणस्यावरणनिर्ज्जराहेतुभूतसामग्रीविशेषस्य सुप्रसिद्धत्वाच्च । निर्ज्जरा च द्वेधा । निरुपक्रमा सोपक्रमा च । तत्र निरुपक्रमा उपक्रमकारणमन्तरेण संसारिणां परिपाकोदयलक्षणप्राप्तस्य कर्म्मणः परिसादरूपा । सोपक्रमा तु सम्यग्दर्शनादिरत्नत्रयेश्वरैः साधुभिस्तपसा द्वादशविधेन

---

१ 'प्रवाहेण' इति प. भ. पुस्तकयोः पाठः । २ द्वादशविधस्तपः—बाह्याभ्यन्तरपट्टेदभेदात् । बाह्यतपः—अनशनमुनोदरता वृत्तेः संक्षेपणं रसत्यागः कायक्लेशः संलीनतेति । अभ्यन्तरतपः प्रायश्चित्तं विनयो वैयावृत्त्यं स्वाध्यायः ध्यानं चेति ।

विधेन विधीयमाना । इयमेव च प्रकृतार्थोपयोगिनी । ननु सम्यग्दर्शनादेरावरणनिर्जराहेतुत्वसिद्धावप्यंशत एव तन्निर्जरा भविष्यति न पुनः सामस्त्येनेति चेत् । तदसम्यक् । तद्विरोधिसम्यग्दर्शनादिपरमप्रकर्षे सति क्वचिदात्मनि तस्यात्यन्तं निर्जरासिद्धेः । यत्र यद्विरोधिपरमप्रकर्षसद्भावस्तत्र तदत्यन्तनिवृत्तिमत् । यथा चक्षुषि तिमिरादि । आवरणविरोधिसम्यग्दर्शनादिपरमप्रकर्षसद्भावश्च क्वचिदात्मनि । नेदमुदाहरणं साध्यसाधनधर्मविकलम् । कस्यचिच्चक्षुषि तिमिरादेरत्यन्तनिवृत्तिमत्त्वप्रसिद्धेः तद्विरोधिविशिष्टाञ्जनादिपरमप्रकर्षसद्भावसिद्धेश्च निर्विवादत्वात् । कथं पुनरावरणविरोधिसम्यग्दर्शनादि निश्चीयत इति चेत् । तत्प्रकर्षे तदपकर्षदर्शनात् । यत्खलु प्रकृष्यमाणं यदपकर्षति तत्तद्विरोधि । यथोष्णस्पर्शः । शीतस्पर्शस्य आवरणमपकर्षति च प्रकृष्यमाणं तत् । तथा यत्प्रकृष्यमाणं तत् क्वचित्परमप्रकर्षसद्भावभाक् । यथा नभसि परिमाणम् । प्रकृष्यमाणं च सम्यग्दर्शनादि । न च दुःखेन व्यभिचारः । सप्तमनरकभूमौ नारकाणां तत्परमप्रकर्षसिद्धेः । सर्वार्थसिद्धौ सुराणां सांसारिकसुखपरमप्रकर्षवत् । नापि संसारेण मिथ्यादर्शनादिना वा । तयोरप्यभव्येषु परमप्रकर्षसद्भावसिद्धेः । ज्ञानहान्याऽनेकान्त इति चेत्, न । तस्या अप्युपलशकलादौ परमप्रकर्षसद्भावसिद्धेः । इत्थं वा साकल्येनावरणप्रक्षये प्रयोगः । यद्यतो देशतः क्षीयमाणं समुपलभ्यते तत्ततः परमप्रकर्षावस्थाजायमानसर्वप्रक्षयम् । यथा चिकित्सासमीरणादिभ्यो रोगजलधरादि । समुपलभ्यते च देशतः क्षीयमाणमावरण सम्यग्दर्शनादिभ्य इति । यथा वा क्वचिदात्मनि साकल्येनावरणं विनश्यति विपाकान्तत्वाद्यत्तु न तथा न तद्विपाकान्तं यथात्मद्रव्यं विपाकान्तं चावरणं ततस्तथाविधम् । न च विपाकान्तत्वमावरणस्यासिद्धम् । तस्येतरकर्मवत्तत्सिद्धेः । न चेतरकर्मणां विपाकान्तत्वमसिद्धम् । नित्यत्वानुषङ्गात् । न च नित्यानि कर्माणि । नित्यं

---

१ अनुत्तरोपपातिकजन्मनि । २ तथाविधानादिपारिणामिकाभावात् (कदाचनापि) सिद्धिगमनायोग्यः ।

तत्फलानुभवनप्रसक्तेः । अथवा आवरणहानिः क्वचित्पुरुषविशेषे परमप्रकर्षं प्राप्ता प्रकृष्यमाणत्वात्परिमाणवत् । न च प्रकृष्यमाणत्वमसिद्धम् । तथा हि प्रकृष्यमाणावरणहानिरावरणहानित्वान्माणिक्याद्यावरणहानिवत् । आवरणहानिपरमप्रकर्षे च सिद्धे ज्ञानस्य परमप्रकर्षः सिद्धः । यत्खलु प्रकाशात्मकं तत्स्वावरणहानिप्रकर्षे प्रकृष्यमाणं दृष्टम् । यथा प्रदीपादि । प्रकाशात्मकं च ज्ञानमिति । तदेवमावरणप्रसिद्धिवत्तदभावोऽप्यनवद्यवेन प्रमाणतः सिद्धः । ततश्च सकलावरणक्षयसमुत्थमेव समस्तवस्तुविषयं ज्ञानं प्रतिज्ञातव्यम् । लेशतोऽप्यावरणसद्भावे तस्याशेषार्थगोचरत्वासम्भवात् । यत्रैवावरणसद्भावस्तत्रैवास्य प्रतिबन्धसम्भवात् । ननु पूर्वोपात्तसमस्तावरणविलयसम्भवेऽपि तदवस्थायामेव नवनवावरणोत्पादसम्भवात्कथं केवलज्ञानोत्पत्त्यवकाश इति चेत् । न । भाविनस्तस्य संवरात् । "आश्रवनिरोधस्संवर" इति वचनात् । आश्रवो हि मिथ्यादर्शनाविरतिप्रमादकषाययोगविकल्पात्पञ्चप्रकारस्तस्मिन्सति कर्म्मणामाश्रवणात् । तस्य च निरोधः संवर इत्यभिधीयते । स च पुंसि गुप्तिसमितिधर्म्मानुप्रेक्षापरीषहजयचारित्रैर्विधीयते इत्याद्यागमे विस्तरतः प्ररूपितस्तत एवावगन्तव्यः । इति सिद्धं समस्तावरणक्षयात् केवलज्ञानम् ।

आगमद्वारेणाशेषार्थगोचरं ज्ञानमित्यपि न प्रामाणिकमनोऽनुकूलम् । स्पष्टज्ञानस्य प्राकरणिकत्वात् । न चागमज्ञानं स्पष्टम् । अस्पष्टतया ततः पदार्थानां प्रतीतेः । न चागमस्य समस्तार्थविषयत्वमपि सम्भवति । अनभिलाप्येष्वर्थपर्यायेषु तस्याप्रवृत्तेः । "मतिश्रुतयोर्निबन्धः सर्वद्रव्येष्वसर्वपर्यायेषु" इति तत्त्वार्थे वाचकवचनात् । नापि करणद्वारेण समस्तवस्तुविषयज्ञानसम्भवः, करणानां हि रूपा-

आगमद्वारेणाशेषार्थगोचरं ज्ञानमिति मतस्य खण्डनम् ।

१ तत्त्वार्थसू. ९–१. २ समवा. ५ समवाये, स्था. सू. १ स्था. सू. १३–१४ इत्यादिषु । ३ तत्त्वार्थसू. १।२७.

दिमत्यव्यवहितानेकावयवप्रचयात्मकेऽर्थे प्रवृत्तिप्रतीतेस्तदुत्थज्ञानस्यातीन्द्रियार्थेषु प्रतिबन्धसम्भवात् ।

ननु योगजधर्मानुगृहीतानामिन्द्रियाणां गगनाद्यशेषातीन्द्रियार्थसाक्षात्कारिज्ञानजनकत्वसम्भवात्कथं तत्राशेषज्ञानस्येन्द्रियजत्वेऽपि प्रतिबन्धसम्भवः । एतदपि नोपपद्यते । यतो योगजधर्मः स्वविषये प्रवर्त्तमानस्येन्द्रियस्यातिशयाधायकत्वेन वा सहकारिमात्रत्वेन वानुग्राहकः स्यात् । तत्र प्रथमपक्षो न युक्तः । व्योमादौ स्वयमिन्द्रियस्य प्रवर्त्तमानत्वाभावात् । प्रवर्त्तने वा तदनुग्रहवैयर्थ्यम् । योगजधर्मानुग्रहादिन्द्रियस्य व्योमादिषु प्रवृत्तिसाधने च परम्पराश्रयः । सिद्धे हि योगजधर्मानुग्रहे तस्य तत्र प्रवृत्तिसिद्धिस्तस्यां च योगजधर्मानुग्रहसिद्धिरिति । द्वितीयपक्षोऽप्यसम्भाव्यः । सहकारिमात्रत्वेऽप्यस्य स्वविषयातिक्रमेणेन्द्रियानुग्रहायोगात् । अन्यथा एकस्मिन्नेवेन्द्रियस्याशेषरसादिविषयेषु प्रवृत्तौ योगजधर्मानुग्रहप्रसङ्गः स्यात् । अथैकमेवान्तःकरणं योगजधर्मानुगृहीतं युगपत्सूक्ष्माद्यशेषार्थविषयज्ञानजनकमिष्यते । तन्नोपपन्नम् । अणुपरिमाणस्य मनसः समस्तार्थैः समं सकृत्सम्बन्धाभावात्तज्ज्ञानजनकत्वासम्भवात् । अन्यथा दीर्घशष्कुलीभक्षणादौ सकृच्चक्षुरादिभिर्मनसः सम्बन्धप्रसक्तेः रूपादिज्ञानपञ्चकस्य सकृदुत्पत्तिप्रसङ्गात् " युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् " [1] इति सूत्रं विरुद्धयेत । क्रमशोऽन्यत्र तद्दर्शनादत्रापि क्रमकल्पनायां योगिनः सर्वार्थेषु सम्बन्धस्य क्रमकल्पनास्तु । तथा च कथमस्य सकलज्ञता । पुरुषायुषसहस्रेणापि सकलपदार्थानामानन्त्येन क्रमेण ज्ञातुमशक्तेः । अथ सर्वार्थानां साक्षात्करणसमर्थस्य योगिज्ञानस्योभयप्रसिद्धत्वान्यथानुपपत्तेस्तैर्योगिमनसः सकृत्सम्बन्धसिद्धिरिति चेत् । रूपादिज्ञानपञ्चकस्य क्वचिद्योगपद्येनानुभूयमानस्यान्यथानुपपत्तेर-

योगजधर्मानुगृहीतानामिन्द्रियाणां तदनुगृहीतमनसश्चाशेषार्थविषयकज्ञानजनकत्वमिति मतस्य खण्डनम् ।

---

१ गौ. सू. १।१।४.

योगिमनसोऽपि सकृच्चक्षुरादिभिः सम्बन्धोऽस्तु । कुतश्चिद्धर्मविशेषादत्रापि तथोपपत्तेः । तादृशो धर्मविशेषः कथमयोगिनः सिद्ध इति चेत् । योगिनोऽपि कथं सिद्धः । सकृत्सर्वार्थज्ञानात्तत्कार्यविशेषादिति चेत् । तर्हि सकृद्रूपादिज्ञानपञ्चकात्कार्यविशेषादयोगिनां तद्धेतुधर्मविशेषोऽस्तीति किं न सिद्धयेत् । तथा सति तस्य रूपादिज्ञानपञ्चकं नेन्द्रियजं स्यात्किं तर्हि धर्मविशेषजमेवेति चेत् । सर्वार्थज्ञानमप्येवं योगिनोऽन्तःकरणजं माभूत्समाधिविशेषोत्थधर्मविशेषजत्वात्तस्य । मनोऽनपेक्षस्य ज्ञानस्यादर्शनाददृष्टकल्पना स्यादिति चेत् । मनोपेक्षस्य वेदनस्य सकृत्सर्वार्थसाक्षात्कारिणः क्वचिद्दर्शनं किमस्ति । येनादृष्टस्य कल्पना न स्यात् । सर्वार्थज्ञानं मनोपेक्षं ज्ञानत्वादस्मदादिज्ञानवदित्यतस्तत्सिद्धेर्नादृष्टकल्पनेति चेत् । तदयुक्तम् । हेतोः कालात्ययापदिष्टत्वात्पक्षस्यानुमानबाधितत्वात् । तथा हि सर्वज्ञविज्ञानं मनोऽनपेक्षं सकृत्सर्वार्थपरिच्छेदकत्वात् । यत्पुनर्मनोपेक्षं तन्न सकृत्सर्वार्थपरिच्छेदकम् । यथाऽस्मदादिज्ञानम् । न च तथेदम् । तस्मान्मनोऽनपेक्षमिति । नन्वेवं शष्कुलीभक्षणादौ रूपादिज्ञानपञ्चकं मनोनपेक्षं सकृद्रूपादिपञ्चकपरिच्छेदकत्वात् । यन्नैवं न तदेवम् । यथा क्रमशो रूपादिज्ञानम् । न च तथेदम् । अतो मनोनपेक्षमित्यप्यनिष्टं सिद्धयेदिति मामंस्थाः । साधनस्यासिद्धत्वात् । जैनस्यापि हि नैकान्तेन शष्कुलीभक्षणादौ रूपादिज्ञानपञ्चकस्य सकृद्रूपादिपञ्चकपरिच्छेदकत्वं सिद्धम् । उपयुक्तस्य प्रमातुरनेकज्ञानस्यैकत्रात्मनि क्रमभावित्वेनोपगमात् । अनुपयुक्तस्य शक्तितो यौगपद्यप्रसिद्धेः । प्रतीतिविरुद्धं चास्य मनोऽनपेक्षत्वसाधनम् । तदन्वयव्यतिरेकानुविधायितया तदपेक्षत्वसिद्धेः अन्यथा कस्यचिदपेक्षा न स्यात् । ततः कस्यचित्सूक्ष्माद्यर्थसाक्षात्करणमिच्छता मनोऽनपेक्षमेव तदेषितव्यमिति ॥

शाक्याः पुनरेवमाहुः । "भावनाप्रकर्षपर्यन्तजं योगिज्ञानम्" इति ।

भावनाप्रकर्षपर्यन्तजं योगिज्ञानमिति बौद्धमतमुपदर्श्य तत्खण्डनम् ।

तथा हि भावना द्विप्रकारा । श्रुतमयी चिन्तामयी च । तत्र श्रुतमयी श्रूयमाणेभ्यः क्षणिकत्व-नैरात्म्यादिगोचरेभ्यः परार्थानुमानवाक्येभ्यः समु-

५ त्पद्यमानज्ञानेन श्रुतशब्दवाच्यतामाक्रन्दता निर्वृत्ता परमप्रकर्षं प्रतिपद्यमाना स्वार्थानुमानज्ञानलक्षणया चिन्तया निर्वृत्तां चिन्तामयीं भावनामारभेते । सा च प्रकृष्यमाणा प्रकर्षपर्यन्तं सम्प्राप्ता योगिप्रत्यक्षं जनयतीति कथमस्यावरणापायप्रभवत्वमिति । तेऽपि न यथावस्थितदर्शिनः । क्षणिकत्वनैरात्म्यादिभावनायाः श्रुतम-

१० य्याश्चिन्तामय्याश्च मिथ्यारूपत्वात् । न च मिथ्याज्ञानस्य परमार्थ-विषययोगिज्ञानजनकत्वम् । अतिप्रसक्तेः । यथा च न क्षणिकत्व-नैरात्म्यादिकं वस्तुनस्तथाग्रे वक्ष्यते । किं च निखिलप्राणिनां सुगतव-त्तथाविधभावनावशात् योगिज्ञानोत्पत्तिः किन्न स्यात् । तेषां तथाभूत-भावनाया अभावाच्चेत् । ननु प्रतिपन्नतत्त्वानां प्रवृत्तमनसां सर्वेषां

१५ सुगतभावनाया समाना भावनैव कुतो न स्यात् । प्रतिबन्धककर्म्म-सद्भावाच्चेत् । तर्हि भावनाप्रतिबन्धककर्म्मापाये योगिज्ञानोत्पत्तिरपि स्वीकर्त्तव्या ।

तस्मात् केवलसूत्रे संसूत्रितमावृत्तिक्षयापेक्षम् ॥
इत्येतद्युक्तिवशाद्विशेषणं सिद्धिमधिरूढम् ॥ ३३४ ॥

२० केवलाख्यं प्रत्यक्षं न तथा सर्वज्ञसत्तावेदकं किमपि मानं नेति वदतो मीमांसकस्य विस्तरशो मतनिर्देशः ।

अत्राह **मीमांसकवावदूकः**

प्रत्यक्षमस्तीह न केवलाख्यम् ॥
सर्वज्ञसद्भावसमर्थकं य-
न्न युज्यते किञ्चिदपि प्रमाणम् ॥३३५॥

---

१ न्यायबिन्दुः पृ. २० पं. ९. २ ' आरभते ' इति भ. पुस्तके पाठः । ३ ' भावनाप्रवृत्त ' इति प. भ. पुस्तकयोः पाठः ।

तथा हि ।

प्रत्यक्षं नैव तावत्कलयति सकलज्ञस्य सत्तां कथंचि-
ल्लिङ्गं नैवास्ति यस्मादनुमितिरुदयं प्राप्य तां ज्ञापयेच्च ॥
नित्यो वा नश्वरो वा गमयति न हि तामागमोऽप्यत्र कश्चित्
कर्तुं ज्ञप्तिं न तस्यामुपमितिमतिरप्येति सामर्थ्यमुद्राम् ॥३३६॥ ५

अर्थापत्तिर्नापि सर्वज्ञसत्तासिद्धौ सक्ता लक्ष्यते काचिदत्र ॥
तस्माद्भावग्राहकाणामयुक्तेः सर्वज्ञस्याभाव एवास्तु युक्तः॥३३७॥

तथा हि । प्रत्यक्षस्य तावत्प्रतिनियतासन्नरूपादिगोचरचारित्वेन परसन्तानवर्त्तिसंवेदनमात्रेऽपि शक्तिर्न सम्भवति । किं पुनरनन्तातीतानागतवर्त्तमानसूक्ष्मान्तरितादिस्वभावसकलपदार्थसाक्षात्कारिसंवेदनाध्यासितपुरुषविशेषपरिच्छेदे । न खलु निखिलपदार्थग्रहणं विना प्रत्यक्षेण तत्साक्षात्कारिग्रहणमुपपद्यते । ग्राह्याग्रहणेन तन्निष्ठग्राहकत्वस्याप्यग्रहणात् । लिङ्गस्यापि सर्वज्ञानुमानजनकस्य धर्मिसिद्धौ सत्यां सिद्धिः स्यात् । धर्म्मिणश्च सिद्धिः प्रत्यक्षेणानुमानेन वा । न प्रत्यक्षेण । अतीन्द्रियज्ञानशालिन्यतीन्द्रिये धर्मिणि प्रत्यक्षस्याप्रवृत्तेः । प्रवृत्तौ वा प्रत्यक्षेणैवास्य प्रतिपन्नत्वात् किमत्रानुमानपरिश्रमेण । नाप्यनुमानेन, हेतोः पक्षधर्म्मतानिश्चयमन्तरेण धर्म्मिनिश्चायकस्यानुमानस्यैवाप्रवृत्तेः । न चानिश्चिते धर्मिणि हेतोः पक्षधर्मत्वनिश्चयः सम्भवति । नाप्यनिश्चितः पक्षधर्मत्वे हेतुः प्रतिनियतसाध्यसिद्धिनिबन्धनमिति । किंचाविशेषेण सर्वज्ञः कश्चित्साध्यते विशेषेण वा । तत्राद्यपक्षे विशेषतोऽर्हत्प्रणीतागमाश्रयणं भवतामनुपपन्नम् । द्वितीयपक्षे तु हेतोरसाधारणानैकान्तिकत्वम् । जिज्ञासितसर्वज्ञादपरसर्वज्ञस्याभावेन सपक्षे वृत्त्यसम्भवात् । अन्यच्च, यतो हेतोः प्रतिनियतोऽर्हन् सर्वज्ञः साध्यते तत एव तथागतोऽपि तथाविधः साध्यताम् । विशेषाभावात् । तन्नानुमानेनापि सर्वज्ञसत्तासिद्धिः । नाप्यागमेन नित्येन, कार्यैकार्थे तत्प्रामाण्यप्रसिद्धेः । यश्च हिरण्यगर्भ

प्रकृत्य 'स सर्ववित्स लोकवित्' इत्यादिरागमस्तस्यापि कर्मार्थवादप्रधानत्वेन सकलज्ञविधायकत्वानुपपत्तेः । नापि सकलज्ञस्यानुवादकोऽसौ । पूर्वमन्यैः प्रमाणैरवोधितस्य तस्यानुवदितुमशक्यत्वात् । अनादिश्चागमस्ततः कथमादिमान् सर्वज्ञस्तदर्थः स्यात् । विरोधात् । नश्वरेणागमेन सर्वज्ञप्रणीतेन पुरुषान्तरप्रणीतेन वा तत्सिद्धिः । प्रथमपक्षेऽन्योन्याश्रयः । सर्वज्ञसिद्धौ हि तत्प्रणीतत्वेनागमस्य प्रामाण्यसिद्धिस्तत्सिद्धौ चातः सर्वज्ञसिद्धिरिति । पुरुषान्तरप्रणीतस्य चागमस्याप्रमाणभूतत्वात् कथं ततस्तन्निश्चयः । तथाभूतादप्यतः सर्वज्ञनिश्चये स्ववचनादेव तन्निश्चयः किन्न स्यादविशेषात् । न ह्यप्राप्तप्रमाणभावस्य पुरुषान्तरवाक्यस्य स्ववचनात्कश्चिद्विशेषः प्रतीयते । तन्नागमेनापि तत्सिद्धिः । नाप्युपमानेन, तस्य सदृशपदार्थग्रहणनान्तरीयकत्वात् । गवोपमानवत् । न च सर्वज्ञसदृशः कश्चिज्जगति प्रतीयते । सर्वज्ञाप्रतीतौ तत्सदृशप्रतीतेरनुपपत्तेः । नाप्यर्थापत्त्या तत्प्रतीतिः । निखिलार्थज्ञसत्तामन्तरेणानुपपद्यमानस्य षट्प्रमाणप्रमितस्य कस्यचिदर्थस्यासम्भवात् । न च धर्म्माद्युपदेशकरणान्यथानुपपत्त्या बुद्धादीनामखिलज्ञता भविष्यतीत्यभिधानीयम् । तेषां तदुपदेशकरणस्य व्यामोहादेवोपपद्यमानत्वात् । द्विविधो ह्युपदेशो व्यामोहपूर्वकः सम्यग्ज्ञानपूर्वकश्च । तत्र व्यामोहपूर्वको यथा स्वप्नोपलब्धार्थोपदेशः । सम्यग्ज्ञानपूर्वको यथा मन्वादीनां सकलार्थज्ञानोदयकारणवेदमूलो धर्म्माद्यशेषार्थोपदेशः । ते हि निखिलपदार्थज्ञानोत्पत्तिहेतोर्वेदादाविर्भूतशुद्धबोधा धर्म्माद्यशेषपदार्थसार्थमुपदिशन्ति । न पुनः सुगतादयः । अन्यथा मन्वाद्युपदेशवत्तदुपदेशोऽपि त्रयीविद्भिराश्रीयेत । न च तैरसावाश्रितः । ततो व्यामोहादेवासौ तद्विषयस्तैः कृतः इत्यवसीयते । यदाह भट्टः । "सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ॥ दृष्टो न चैकदेशोऽस्ति लिङ्गं यो वानुमापयेत् ॥ १ ॥" (एकदेश इति गम्यगमकभाव-

---

१ मी. श्लो. वा. सू. २ श्लो. ११७.

समुदायमध्यालिङ्गाख्य एकदेशोऽत्र दृष्टो नास्तीति भावः ।) "न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः । न च मन्त्रार्थवादानां तात्पर्यमवकल्पते ॥ २ ॥ न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते ॥ न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः ॥ ३ ॥ अनादेरागमस्यार्थो न च सर्वज्ञ आदिमान् ॥ कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ॥ ४ ॥ अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते । प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥ ५ ॥ सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदास्तिता ॥ कथं तदुभयं सिद्ध्येत्सिद्धमूलान्तरादृते ॥ ६ ॥ असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ॥ सर्वज्ञमवगच्छन्तः स्ववाक्यार्थिकं न जानते ॥ ७ ॥ सर्वज्ञसदृशं किञ्चिद्यदि पश्येम सम्प्रति ॥ उपमानेन सर्वज्ञं जानीयाम ततो वयम् ॥ ८ ॥ उपदेशो हि बुद्धादेर्धर्म्माधर्म्मादिगोचरः ॥ अन्यथा नोपपद्येत सर्वज्ञं यदि नाभवत् ॥ ९ ॥ बुद्धादयो ह्यवेदज्ञास्तेषां वेदादसम्भवः ॥ उपदेशः कुतोऽतस्तैर्व्यामोहादेव केवलात् ॥ १० ॥ ये तु मन्वादयः सिद्धाः प्राधान्येन त्रयीविदाम् ॥ त्रयीविदाश्रितग्रन्थास्ते वेदप्रभवोक्तयः ॥ ११ ॥" इति न च प्रमाणान्तरं सर्वज्ञसत्तासाधकं सम्भवति । तथा चेदमनुमानं तदभावसाधनाय लब्धावसरम् । न च कश्चित्पुरुषविशेषः सर्वज्ञोऽस्ति सदुपलम्भकप्रमाणपञ्चकागोचरचारित्वात् । य इत्थं स इत्थं यथा वान्ध्येय इति । अतोऽप्यनुमानात् प्रसिद्ध्यति तदभावः । तथाहि विवादविषयापन्ने देशकाले च प्रत्यक्षप्रमाणमत्रत्येदानीन्तनप्रत्यक्षप्रमाणग्राह्यसजातीयार्थग्राहकं तद्विजातीयसूक्ष्माद्यर्थग्राहकं न भवति प्रत्यक्षप्रमाणत्वात् । यदेवं तदेवं यथात्रत्येदानीन्तनप्रत्यक्षप्रमाणमिति । ननु गृध्रवराहपिपीलिकादीनां चक्षुःश्रोत्रघ्राणादिषु दूरस्थितरूपशब्दगन्धादिग्रहणलक्षणोऽतिशयो दृश्यते । तथा हि " द्विकरतलविनमन्कपोलपार्ली लङ्केशापहृतां रघोः पुरन्ध्रीम् ॥

---

१ बन्ध्यासुतः ।

योजनशतवर्त्तिनीमपि द्राक् संपातिः प्रविलोकयाञ्चकार ॥ १ ॥ सत्यपि पशुसंचयेऽपरस्मिन्करिनिकरस्य तुरङ्गहेषितानि ॥ सहसैव दवीयसोऽपि देशान्मूर्च्छन्ति श्रुतिकोटरेषु कामम् ॥२॥ आघ्राय च वसुं समाश्रगन्धं तनुतस्तस्य बिलान्यपत्य साधोः ॥ किल कुलमखिलं पिपीलिकानां पातालादपि तूर्णमुच्चचाल ॥ ३ ॥" ततश्च तद्वत् क्वचित्पुरुषविशेषे चक्षुरादीनां विषयान्तरग्रहणलक्षणो ह्यतिशयः सम्भाव्येत । प्रज्ञामेधादिभिश्च नराणामतिशयदर्शनात् । कस्यचिदतीन्द्रियार्थद्रष्टृत्वेनाप्यतिशयः स्यादिति । अत्रोच्यते । योऽपि गृध्रादिचक्षुरादीनामतिशयो दृष्टः सोऽपि स्वार्थापरित्यागेन दूरसूक्ष्मादिदृष्टौ दृष्टो न रूपादौ श्रोत्रादेः । चक्षुरादेरपि स्वार्थापरित्यागेनैवातिशयः स्यात् । तदुक्तम् । "यत्रोप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ॥ दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥१॥" इति । यश्च प्रज्ञामेधादिभिर्नराणामतिशयो दृष्टः सोऽपि नियतविषयस्तोकस्तोकान्तरत्वेनैव न विषयान्तरे नापि प्रकर्षपर्यन्तगमनेन । उक्तं च, "येऽपि सातिशया दृष्टाः प्रज्ञामेधाबलैर्नराः ॥ स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥ १ ॥ प्राज्ञोऽपि हि नरः सूक्ष्मानर्थान् द्रष्टुं क्षमोऽपि सन् ॥ सजातीरनतिक्रामन्नतिशेते परान्नरान् ॥ २ ॥ एकशास्त्रविचारेषु दृश्यतेऽतिशयो महान् ॥ न च शास्त्रान्तरज्ञानं तन्मात्रेणैव लभ्यते ॥ ३ ॥ ज्ञात्वा व्याकरणं दूरबुद्धिः शब्दापशब्दयोः॥ प्रकृष्यते न नक्षत्रतिथिग्रहणनिर्णये ॥ ४ ॥ ज्योतिर्विच्च प्रकृष्टोऽपि चन्द्रार्कग्रहणादिषु ॥ न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति ॥५॥ तथा वेदेतिहासादिज्ञानातिशयवानपि ॥ न स्वर्गदेवतापूर्वप्रत्यक्षीकरणे क्षमः ॥६॥ दशहस्तान्तरं व्योम्नि यो नामोत्प्लुत्य गच्छति ॥ न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥ ७ ॥" इति । प्रसङ्गविपर्ययाभ्यां च सर्वज्ञज्ञानस्य निःशेषार्थविषयत्वं बाध्यते ।

---

१ मी. श्लो. वा. सू. २ श्लो. ११४.

तथाहि सर्वज्ञस्य ज्ञानं यदि प्रत्यक्षमुपगम्यते तदा तद्धर्मादिग्राहकं न स्यात् । विद्यमानोपलम्भनत्वात् । विद्यमानोपलम्भनं तत्सत्सम्प्रयोगजत्वात् । सत्सम्प्रयोगजं तत्प्रत्यक्षशब्दवाच्यत्वादस्मदादिप्रत्यक्षवत् । अथ तद्धर्मादिग्राहकं स्वीक्रियते । न तर्हि प्रत्यक्षम् । अविद्यामानोपलम्भनत्वात् । अविद्यमानोपलम्भनं तदसत्सम्प्रयोगजत्वादसत्सम्प्रयोगजं तदप्रत्यक्षशब्दवाच्यत्वादिति । तदेवं धर्मज्ञत्वनिषेधसिद्धौ सत्यामन्याशेषार्थप्रत्यक्षत्वेऽपि न प्रेरणायाः प्रामाण्यं प्रतिहन्यते । धर्मे तस्या एव प्रामाण्यात् । तथा चाभ्यधायि, " **सर्वप्रमातृसम्बन्धिप्रत्यक्षादिनिवारणात् । केवलागमगम्यत्वं लप्स्यते पुण्यपापयोः ॥१॥ धर्मज्ञत्वनिषेधस्तु केवलोऽत्रोपयुज्यते ॥ सर्वमन्यद्विजानंस्तु पुरुषः केन वार्यते ॥ २ ॥** " इति । किं च कथं धर्मादिग्राहकज्ञानस्य समुत्पत्तिः । अभ्यासादिति चेत्, अभ्यस्यमानं हि ज्ञानं प्रतिसमयं क्रमेण परमप्रकर्षपर्यन्तमाप्तं धर्मादीन्परिच्छिनत्ति । तुच्छमेतत् । सामान्यतः सदेव हि क्वचिद्वस्तुनि ज्ञानमभ्यासात्प्रकर्षमासादयत्प्रसिद्धम् । धर्मादौ च सामान्यतो ज्ञानं चक्षुरादिजनितमनुमानाविर्भूतमागमप्रभवं वाऽङ्गीक्रियते। नाद्यः पक्षः । चक्षुरादीनां प्रतिनियतरूपादिविषयत्वेन तज्जनितज्ञानस्यापि तत्रैव प्रवृत्तेः । अनुमानाविर्भूतं तदित्यपि नोपपन्नम् । धर्मादेरतीन्द्रियत्वेन तज्ज्ञापकलिङ्गस्य तेन सम्बन्धासिद्धेरसिद्धसम्बन्धस्य चाज्ञापकत्वात् । आगमप्रभवं तदित्यप्ययुक्तम् । यतोऽसावागमोऽर्वाग्दर्शिप्रणीतोऽतीन्द्रियज्ञानवत्प्रणीतो वा स्यात् । आद्यपक्षे, नास्य प्रामाण्यम् । अतीन्द्रियार्थानिश्चयपूर्वकत्वात् । प्रचुरतरचारुचारिसंचारसाराङ्गहाराभिरामं रम्भाप्रभृतप्रगुणकणन्मणिकिङ्किणीकाणकन्दलितमृदङ्गवेणुवीणास्वनसुभगस्वर्गिगेयगोचरमधुरता श्लाघित्वदुपदेशवत्[1]। द्वितीयपक्षे तु चक्रकम् । अतीन्द्रियार्थज्ञाने सिद्धे हि तद्वत्पुरुषप्रणीतागमसिद्धिस्तत्सिद्धौ च तज्ज्ञाना-

१ ' प्रचुरचारि ' इति भ. पुस्तके पाठः ।

भ्याससिद्धिरिति । अथ स्यादेवं यद्येक एव कश्चिदतीन्द्रियदर्शी स्वीकृतः स्यात् । यावता रात्रिन्दिवपरम्परावदनादिरयमतीन्द्रियदर्शिनां सन्तानः । ततश्च पूर्वपूर्वातीन्द्रियदर्शिप्रतिपादितागमोद्भूतधर्मादिज्ञानमभ्यस्यन्पाश्चात्यः पुमानतीन्द्रियदर्शी सम्पद्यते । ततो नोक्तदोषानुषङ्गः । अनुमानेनापि वेद्यन्त एव धर्म्मादयोऽतीन्द्रियेन्द्रियवत् । अथार्थोपलम्भान्यथानुपपत्तिरूपार्थापत्तेरिन्द्रियादिगतिर्नानुमानादिति चेत् । न । अर्थापत्तेरनुमानादनर्थान्तरत्वेन प्रतिपादनात् । अस्तु वासौ ततो भिन्ना । तथापि तया ज्ञास्यन्त एव धर्मादयः । न खल्वर्थापत्तावनुमाने वा तात्पर्यमपि तु ज्ञानमात्र एवेति । तदप्यवल्गु । अस्पष्टं ह्यनुमानागमज्ञानमभ्यस्यमानमपि न तत्साक्षात्कारि भवितुमर्हति । न हि धूमानुमानज्ञानं ज्योतिःशास्त्रज्ञानं वाभ्यस्यमानमपि पावकग्रहादिसाक्षात्कारि कस्यचिद्दृष्टम् । एतत्तु स्यादनभ्यस्तं तत्कतिपयकालकलाविलम्बेनाभ्यस्तं तु सपदि समुन्मीलतीति । न च वचनीयं विलोक्यत एव कामशोकाद्युपप्लुतचेतसामस्पष्टस्यापि ज्ञानस्य वैशद्यम् । तदुक्तम् । **" कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः ॥ अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥ १ ॥ "** इति तद्वदस्याप्युपप्लुतत्वप्रसक्तेः । किं च केवलज्ञानस्य सकलार्थग्रहणं सकलत्वं प्रधानभूतकतिपयार्थग्रहणं वा । प्रथमपक्षे क्रमेण तद्ग्रहणं युगपद्वा । न तावत्क्रमेण । अतीतानागतवर्त्तमानार्थानां परिसमाप्त्यभावतस्तज्ज्ञानस्याप्यपरिसमाप्तेः सर्वज्ञत्वायोगात् । नापि युगपत् , परस्परविरुद्धशीतोष्णाद्यर्थानामेकत्र ज्ञाने प्रतिभासासम्भवात् । सम्भवे वा प्रतिनियतार्थस्वरूपप्रतीतिविरोधः । एकक्षण एव च समस्तार्थग्रहणादकिञ्चिज्ञोऽसौ द्वितीयक्षणे प्रसज्येत । परसन्तानवर्त्तिरागादिसाक्षात्करणाद्रागादिमानप्येष प्राप्नुयात् । इतरथा सर्वार्थसाक्षात्करणविरोधः । नापि प्रधानभूतकतिपयार्थग्रहणं केवलज्ञानस्य सकलत्वं युक्तम् । इतरार्थव्येवच्छेदेनैतेषामेवाभिमतप्रयोजननिष्पादित्वात्प्राधान्यमित्येवं हि

निश्चयः समस्तार्थपरिज्ञाने सत्येवोपपद्यते नान्यथा । न च समस्तार्थज्ञानं सम्भवतीत्यनन्तरमेवोपपादितम् । अपि च सर्वज्ञोऽतीतकालाद्याकलितं वस्तु स्वेन रूपेण प्रतिपद्यते । किं वा वर्त्तमानतयैव । प्रथमपक्षे ज्ञानस्य प्रत्यक्षतानुपपत्तिः । अवर्त्तमानवस्तुविषयत्वात् । द्वितीयपक्षे तु तज्ज्ञानस्य भ्रान्तत्वप्रसक्तिः । अन्यथास्थितस्यार्थस्यान्यथात्वेन ग्राहकत्वात् । अपि चेदमिदानीमिह सदित्यस्यां सकलविदि संविदि वस्तुसत्तावत्प्रागभावप्रध्वंसौ प्रतिभासेते न वा । यदि प्रतिभासेते । तदा युगपत्क्रमेण वा । युगपच्चेत् । तर्हि तदैव वस्तुनोऽनुत्पन्नोत्पन्नप्रध्वस्तत्वेन प्रतिभासाद्युगपदजातजातमृतव्यपदेशापत्तिः । यत्खलु येन स्वरूपेण प्रतिभासते तत्तेनैव व्यपदेशभाग्भवति । यथा नीलं नीलतया । प्रागभावसत्त्वप्रध्वंसरूपतया प्रतिभासते च सकलज्ञस्य निखिलं वस्त्विति । यथा च प्रतिनियतेन स्वरूपेण वस्तुप्रतिपत्तेरभावात्मुव्यवस्थितास्यासकलज्ञता । तन्न युगपत्प्रतीतिः । नापि क्रमेण, प्रागभावप्रध्वंसयोरनादित्वानन्तत्वाभ्यां परिसमाप्त्यभावतस्तज्ज्ञानस्याप्यपरिसमाप्तेः सर्वज्ञतायोगात् । अथ वस्तुसत्तावत्प्रागभावप्रध्वंसौ न प्रतिभासेते । तदा कथमसौ त्रिभुवनभवनान्तर्वर्तिवस्तुस्तोमाविर्भावककेवलावलोककलितः स्यादिति । अन्यच्च सर्वज्ञकालेऽप्यसर्वज्ञैः सर्वज्ञो ज्ञातुं न पार्यते । सर्वज्ञज्ञानग्राह्यसमस्तपदार्थपरिज्ञानाभावात् । तदुक्तम्

"सर्वज्ञोऽयमिति ह्येतत्तत्कालेऽपि बुभुत्सुभिः ॥ तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥ १ ॥ कल्पनीयाश्च सर्वज्ञा भवेयुर्बहवस्तव ॥ य एव स्यादसर्वज्ञः स सर्वज्ञं न बुद्ध्यते ॥ २ ॥ सर्वज्ञो नावबुद्धश्च येनैव स्यान्न तं प्रति ॥ तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत् ॥ ३ ॥" इति । एवं च व्यवस्थितमिदम्-

वन्ध्यास्तनन्धयनिभः सकलार्थवेदी
सद्भावसाधनपटुप्रमितेरयुक्तेः ॥

---

१ मी. श्लो. वा. स. २ श्लो. १३४।१३५।१३६.

त्रैलोक्यवर्त्तिनिखिलार्थमितौ समर्थं
ज्ञानं ततोऽस्ति न हि केवलनामधेयम् ॥ ३३८ ॥

इत्थं मिथ्यामतिभिरपरैस्तस्करैर्लुट्यमाने
त्रैलोक्यार्थप्रकटनपटावत्र सर्वज्ञसत्त्वे ॥
तेषां सम्प्रत्यमलमतयो निग्रहार्थं यतन्ते
स्याद्वादज्ञाः स्फुरितनिशितन्यायशस्त्रप्रहारैः ॥ ३३९ ॥

तथा हि यत्तावदवादि प्रत्यक्षं नैवेत्यादि । तदसत्यम् । यतोऽर्वाग्दर्शिप्रत्यक्षापेक्षयेदमुच्यते योगिप्रत्यक्षापेक्षया वा। प्रथमपक्षे सिद्धसाध्यता । अर्वाग्दर्शिप्रत्यक्षस्य सर्वज्ञसत्ताग्राहकत्वेनास्माभिरप्यनङ्गीकारात् । द्वितीयपक्षे तु माता मे वन्ध्येत्यादिवत्स्ववचनविरोधः । योगिप्रत्यक्षेण योगी न गृह्यतेऽतोऽसौ नास्तीह कस्त्वदपरो ब्रूयात् । अथ स्यादेवं यदि प्रत्यक्षमभ्युपगम्येत्थमुच्येत । यावता तस्याभावादेव तेन तद्ग्रहणं वार्यते । तदसत् । तदभावस्याद्याप्यसिद्धेः । भावोऽपि तस्य कुतः सिद्ध इति चेत् । मा सिधत्तावत् । तथापि सर्वज्ञसत्तायाः प्रत्यक्षेणाग्रहणं सान्दिग्धं भविष्यति । अनुमानं तु तद्ग्राहकं विद्यत एव । तथा हि कश्चिदात्मा समस्तवस्तूनि साक्षात्करोति तद्ग्रहणस्वाभाव्ये सति प्रध्वस्ततदावरणत्वात् । यद्यद्ग्रहणस्वाभाव्ये सति प्रध्वस्ततदावरणं तत्तत्साक्षात्करोति । यथा व्यपगततिमिरावरणं चक्षू रूपम् । तद्ग्रहणस्वाभाव्ये सति प्रध्वस्ततदावरणश्च कश्चिदात्मा । ततः समस्तवस्तूनि साक्षात्करोतीति । न तावदत्रात्मनः समस्तवस्तुग्रहणस्वाभाव्यं हेतोर्विशेषणमसिद्धम् । नोदनाबलान्निखिलार्थज्ञानोत्पत्त्यन्यथानुपपत्तेः सामस्त्येन व्याप्तिज्ञानान्यथानुपपत्तेश्च भवतां तस्य तत्सिद्धेः । सोऽयं सकलज्ञापलापि नोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुमिति स्वयं ब्रुवाणो धूमाद्यनुमानेषु सामस्त्येन व्याप्तिज्ञानं च स्वीकुर्वाणः सकलार्थग्रहणस्वभावता-

पूर्वोक्तमीमांसकमतस्य विस्तरशः खण्डनम् ।

मात्मनः प्रतिक्षिपतीति कथं सुधियामवधानार्हः । प्रध्वस्ततदावरणत्वं च प्रागेव प्रसाधितत्वान्नासिद्धम् । यच्च नाप्यनिश्चितपक्षधर्मत्वे हेतुः प्रतिनियतसाध्यसिद्धिनिबन्धनमित्यभ्यधायि । तदपि न साधु । न हि सर्वज्ञोऽत्र धर्मित्वेनोपात्तो येनास्यासिद्धेरयं दोषः स्यात् । किं तर्हि कश्चिदात्मा तत्र चाविप्रतिपत्तिः । न चापक्षधर्मस्यापि हेतोरगमकत्वम् । " **पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणतानुमा ॥ सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते** " इति स्वयमभिधानात् । यच्चोक्तमविशेषेण सर्वज्ञः कश्चित्साध्यते विशेषेण वेत्यादि । तत्राविशेषेणेति नः पक्षः । सामान्यतः सर्वज्ञसिद्धावेव साम्प्रतं विप्रतिपत्तेः । विशेषविप्रतिपत्तौ तु दृष्टेष्टाविरुद्धवाक्यत्वादर्हत एवाशेषार्थज्ञत्वं सेत्स्यति । तदित्थं सिद्धः सकलज्ञगोचरोऽनुमानसद्भावः । आगमोऽपि सर्वज्ञसाधकः समस्त्येव । स्वर्गकैवल्यार्थिना तपोध्यानादि कर्त्तव्यमिति । पौरुषेयागमस्य च प्रामाण्यमागमप्रमाणविचारावसरे समर्थयिष्यते । उपमानमपि समस्तवेदिसद्भावावेदकं विद्यत एव । हृद्वृताशेषसंशयपरिच्छेदादिना समुपलब्धसर्वज्ञस्य कस्यचित्पुंसस्तदन्योपलब्धौ तत्सादृश्यप्रतीतिसिद्धेः । अगृहीतगोगवयपिण्डस्य च गव्यप्युपमानं न सम्भवत्येव । न चैतावता गोस्तद्गोचरातिक्रान्तत्वम् । अनभ्युपगमादिति । अर्थापत्तिरपि समस्ति कश्चिदतीन्द्रियदर्शी चन्द्रोपरागाद्युपदेशान्यथानुपपत्तेरित्यादिका तद्ग्राहिका सम्भवत्येव । एवं च नाप्यागमेनेत्यादि प्रतिक्षिप्तम् । तथा चैतदन्ते प्रोक्तस्य सदुपलम्भकप्रमाणपञ्चकागोचरचारित्वादिति हेतोरसिद्धतादौस्थ्यमुपस्थितम् । यदपि विवादविषयापन्ने देशे काले च प्रत्यक्षप्रमाणमित्याद्यनुमानमुपन्यस्तम् । तदपि यथाभूतमिन्द्रियादिजनितं प्रत्यक्षमिदानीमत्र च यथाभूतस्याविप्रकृष्टस्य ग्राहकं तद्विजातीयस्य विप्रकृष्टस्याग्राहकं वा दृष्टं देशान्तरे कालान्तरेऽपि तथाभूतमेव प्रत्यक्षं तथाभूतस्यार्थस्य ग्राहकमन्यथाभूतस्याग्राहकं चेति साध्येत अन्यथाभूतं वा । यदि तथाभूतम् । तदा सिद्धसाध्यता । अन्यथाभूतं चेत्तथा

साध्यते । तद्धप्रयोजको हेतुः स्यात् । यथाभूतं हि प्रत्यक्षं यथाभूतस्यार्थस्य ग्राहकमग्राहकं वा दृष्टं तथाभूतस्यैव प्रत्यक्षस्य तथाविधार्थस्य ग्राहकत्वेऽग्राहकत्वे वा स्यात्प्रत्यक्षप्रमाणत्वस्य हेतोः प्रयोजकत्वं नान्यथाभूतस्योत्पत्तिमत्त्वादेरिव । तथा हि यादृग्भूतानां प्रासादादीनामुत्पत्तिमत्त्वादिबुद्धिमत्कारणपूर्वकं दृष्टं तादृग्भूतानामेव जीर्णप्रासादादीनां बुद्धिमत्कारणपूर्वकं तत्तस्य प्रयोजकं नान्यादृग्भूतानां भूधरादीनाम् । यदि पुनरन्यथाभूतस्यापि प्रत्यक्षप्रमाणस्य प्रत्यक्षप्रमाणत्वसाधनं यथोक्तसाध्यस्य प्रयोजकं स्यात्तदा तादृग्भूतानां भूधरादीनामप्युत्पत्तिमत्त्वादि बुद्धिमत्कारणपूर्वकत्वस्य प्रयोजकं भवेत् । तथा च समस्तस्य जगतः कर्तृसिद्धया ज्ञातृसिद्धेः सर्वज्ञाभावो न स्यात् । अथ नोत्पत्तिमत्त्वादावप्रयोजकत्वं ब्रूमो दूषणान्तरस्य दुष्टत्वात् । तदसत् । अस्य हेतोर्वाचस्पतिना विशिष्टमुत्पत्तिमत्त्वमसिद्धं पृथिव्यादिषु उत्पत्तिमत्त्वमात्रं त्वप्रयोजकम् । विशेषप्रयुक्तव्याप्त्युपजीवित्वेन स्वाभाविकप्रतिबन्धवैकल्यात् । स्वाभाविकप्रतिबन्धवतश्च हेतोरनुमानाङ्गत्वात् । इतरथोपाध्यायदर्शनादेरपि शिष्याद्यनुमापकत्वप्रसङ्गादिति वदता कणिकायामप्रयोजकत्वेनाभिधानात् । किं चोत्पत्तिमत्त्वादौ कुतोऽप्रयोजकत्वस्यावचनं किमेतद्दूषणमेव हेतोर्न भवति । किं वात्रैतन्न विद्यते । यद्वा सदप्युपेक्ष्यते । नाद्यः पक्षः । तत्पुत्रत्वादेः सम्यग्धेतुत्वप्रसङ्गात् । न द्वितीयः । तत्पुत्रत्वादिनास्य तुल्यकक्षत्वात् । अथ तत्र शाकाद्याहारपरिणामस्योपाधेः सत्त्वाद्युक्तमप्रयोजकत्वम् । नन्वत्राप्यक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वमुपाधिरस्त्येव । नापि तृतीयः । एवमप्युत्पत्तिमत्त्वादेरप्रयोजकत्वे दृष्टान्तत्वानपायात् । अथ तथाभूतमेव प्रत्यक्षं तथा प्रसाध्यते । न च सिद्धसाधनम् । सर्वप्रत्यक्षाणामीदृशत्वादित्युच्यते । नन्वीदृशमस्तीत्यर्वाग्दर्शिना कुतोऽवसीयते । ननु देशान्तरकालान्तरभाविप्रत्यक्षं समानं सदिन्द्रियसम्प्रयोगजत्वादत्रत्येदानीन्तनप्रत्यक्षवदित्यतोऽनुमानादेतदवसीयत इति चेत् । अत्रापि स्तोकस्तोकान्तरत्वेन

मनागपि विशेषो नास्तीति सर्वप्रत्यक्षाणामीदृशत्वं साध्येतातीन्द्रियार्थाविषयत्वेन वा विशेषो नास्तीति । प्रथमपक्षेऽनैकान्तिको हेतुः । गृध्रवराहपिपीलिकादीनां प्रत्यक्षेषु स्तोकस्तोकान्तरत्वेनास्मदादिप्रत्यक्षविलक्षणेषु सदिन्द्रियसम्प्रयोगजत्वस्य हेतोः सद्भावात् । अथातीन्द्रियार्थाविषयत्वेन विशेषाभावात् सर्वप्रत्यक्षाणामीदृशत्वं प्रसाध्यते । तर्ह्ये- ५
तस्मादेव सर्वप्रत्यक्षाणामतीन्द्रियार्थविषयत्वाभावसिद्धेरेतदेवास्तु । प्रथमानुमानोपन्यासे च द्वितीयमनुमानमुपन्यस्यमानं हेत्वन्तरं नाम निग्रहस्थानं स्यात् । अथ यदायमेव हेतुः प्रागुपादीयते तदायमदोष इति चेत्, न । यतस्तदाप्ययमस्मान्प्रत्यसिद्धो हेतुः । विवादास्पदीभूतस्य प्रत्यक्षस्यास्माभिः सदिन्द्रियसम्प्रयोगजत्वानभ्युपगमात् । अथ विवादा- १०
स्पदीभूतं प्रत्यक्षं सदिन्द्रियसम्प्रयोगजं प्रत्यक्षशब्दवाच्यत्वादस्मदादिप्रत्यक्षवदित्यतोऽनुमानात्तस्य सदिन्द्रियसम्प्रयोगजत्वं प्रसाध्यत इत्युच्यते । तर्ह्यत्रापि यथाभूतस्य प्रत्यक्षशब्दवाच्यस्य सदिन्द्रियसम्प्रयोगजत्वं दृष्टं तथाभूतस्यैव सदिन्द्रियसम्प्रयोगजत्वं प्रसाध्येतान्यथाभूतस्य वा । यदि तथाभूतस्य । तदा सिद्धसाध्यता । अथान्यथाभूतस्य, तर्ह्यु- १५
त्पत्तिमत्त्वादिवदप्रयोजको हेतुः स्यात् । तथाभूतस्यैव तत्साध्यते न च सिद्धसाधनं सर्वप्रत्यक्षाणामीदृशत्वादिति चेत् । ननु कुतस्तदीदृशत्वसिद्धिः । सदिन्द्रियसम्प्रयोगजत्वादिति चेत् । नन्वयमस्मान्प्रत्यसिद्धो हेतुः । किं च सर्वप्रत्यक्षाणामीदृशत्वासिद्धौ विवादास्पदीभूतस्य प्रत्यक्षस्य सदिन्द्रियसम्प्रयोगजत्वसिद्धिस्तासिद्धौ च सर्वप्रत्यक्षाणामीदृशत्व- २०
सिद्धिरिति परस्पराश्रयदूषणं दुष्परिहारं स्यात् । तदेवं सर्वप्रत्यक्षाणामीदृशत्वासिद्धिः । यथाभूतस्यार्थस्य ग्राहकं दृष्टं तथाभूतस्यार्थस्य ग्राहकमिति साधने च सिद्धसाधनमिति स्थितम् । यदप्यन्यदुक्तं यत्राप्यतिशयो दृष्ट इत्यादि । एतदपि कुतः प्रमाणादवगतम् । अथ विवादास्पदीभूताश्चक्षुरादयो न विषयान्तरे प्रवर्त्तन्ते चक्षुरादिशब्दवाच्य- २५
त्वादस्मदादिचक्षुरादिवत् । तथा विवादास्पदीभूता रूपादयो नेन्द्रि-

यान्तरग्राह्या रूपादिशब्दवाच्यत्वात्परिदृष्टरूपादिवदित्याभ्यामनुमानाभ्यामेतदवगम्यते । नन्वत्रापि किं यथाभूताश्चक्षुरादयो न विषयान्तरे प्रवर्त्तन्ते तथाभूता एव तथा साध्यन्ते अन्यथाभूता वा । यदि तथाभूताः । तदा सिद्धसाध्यता । अन्यथाभूताश्चेत्, तर्ह्यनुत्पत्तिमत्त्वादिवदप्रयोजको हेतुः । ननु तथाभूता एव चक्षुरादयस्तथा साध्यन्ते । न च सिद्धसाधनम् । सर्वचक्षुरादीनामीदृशत्वादिति चेत् । कुतस्तदीदृशत्वसिद्धिः । किमनुमानान्तरादुतास्मादेवानुमानात् । यद्यनुमानान्तरात्, तदा तत्रापि यदि मनागपि विशेषो नास्तीति सर्वचक्षुरादीनामीदृशत्वं प्रसाध्येत । तदानुमानविरुद्धः पक्षैकदेशः । गृध्रवराहपिपीलिकादीनां चक्षुःश्रोत्रघ्राणादिषु दूरादिस्वभावरूपशब्दगन्धादिग्रहणलक्षणातिशयस्य कार्यतः प्रतिपत्तेः । विषयान्तरग्रहणलक्षणातिशयाभावात्तदीदृशत्वप्रसाधनेऽनुमानान्तरादेव विषयान्तरे प्रवृत्त्यभावसिद्धेस्तदेवास्तु किं प्रकृतेनानुमानेन । तथाभ्युपगमे च हेत्वन्तरं नाम निग्रहस्थानं स्यात् । अस्मादेवानुमानात्तदीदृशत्वसिद्धिश्चेत् । अत्रापि यदि मनागपि विशेषो नास्तीति तत्साध्यते । तदा पूर्ववदनुमानविरुद्धः पक्षैकदेशः । विषयान्तरग्रहणलक्षणातिशयाभावात्तदीदृशत्वसाधने विवादास्पदीभूतानां चक्षुरादीनां विषयान्तरे प्रवृत्त्यभावसिद्धौ सर्वचक्षुरादीनामीदृशत्वसिद्धिस्तत्सिद्धौ च विवादास्पदीभूतानां चक्षुरादीनां विषयान्तरे प्रवृत्त्यभावसिद्धिरितीतरेतराश्रयः स्यात् । एवं सर्वचक्षुरादीनामीदृशत्वासिद्धेर्यथाभूतानां चक्षुरादीनां विषयान्तरे प्रवृत्त्यभावो दृष्टस्तथाभूतानामेव तथा साधने सिद्धसाधनमिति स्थितम् । द्वितीयेऽप्यनुमाने किं यथाभूतानां पुरुषाणामिन्द्रियान्तरेणाग्राह्या रूपादयो दृष्टा देशान्तरकालान्तरभाविनामपि तथाभूतानामेव तेषामिन्द्रियान्तरेण ग्राह्या रूपादयो न भवन्तीति प्रसाध्यतेऽथान्यथाभूतानामित्यादिदूषणं नातिवर्त्तते । अभ्युपगम्य चाक्षजत्वं सर्वज्ञज्ञानस्यातीन्द्रियार्थसाक्षात्कारित्वं समर्थितं न पुनः परमार्थतः । तज्ज्ञानस्य घातिकर्मचतुष्टयक्षयोद्भूतत्वेन समर्थ

नात् । यदप्युक्तम् । येऽपि सातिशया दृष्टा इत्यादि । अत्रापि यथाभूतानामिदानीमत्र च प्रज्ञामेधादिभिः स्तोकस्तोकान्तरत्वेनैवातिशयो दृष्टो न त्वतीन्द्रियदर्शनात्तथाभूतानामेव देशान्तरे कालान्तरे च तथाभूतोऽतिशयः कल्पयितुं च युक्तो नान्यथाभूतानाम् । यथास्मत्सदृशानां दशहस्तादूर्द्ध्वमुत्प्लुत्य गच्छतामनुपलम्भादस्मादृशानामेव दशहस्तादूर्द्ध्वमुत्प्लुत्य गमनं नास्तीति ज्ञायते नान्यथाभूतानां गृध्रभेरुण्डताार्क्ष्यसावकप्रकाराणाम् । तदेतेन लङ्घनदृष्टान्तः स्वमतविघातीत्युक्तं भवति । नन्वस्मद्विलक्षणेषु गृध्रादिषु हशहस्तादूर्द्ध्वमुत्प्लवनसामर्थ्यस्य दर्शनात्तत्प्रतिषेधो न युक्त इति युक्तम् । नैवमतीन्द्रियज्ञानं कदाचिदस्मद्विलक्षणेषु दृष्टम् । अस्मद्विलक्षणानां पुरुषाणामेवाभावात् । तस्मादस्मादृशेषु दृष्टोऽतिशयो युक्तः सर्वत्र कल्पयितुमदृष्टश्च निषेद्धुमिति चेत् । अहो श्रोत्रियाः, अस्मद्विलक्षणा न सन्ति पुरुषा इत्येतदसर्वज्ञः कथं विजानीयात् । यच्चोक्तं प्रसङ्गविपर्ययाभ्यां चेत्यादि । तदपि न साधु । साध्यसाधनयोर्हि व्याप्यव्यापकभावसिद्धौ हि व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयको यत्र प्रदर्श्यते तत्प्रसङ्गसाधनम् । व्यापकनिवृत्तौ चावश्यम्भाविनी व्याप्यनिवृत्तिर्यत्र प्रदर्श्यते स तद्विपर्ययः । न च प्रत्यक्षशब्दवाच्यत्वसत्सम्प्रयोगजत्वविद्यमानोपलम्भनत्वधर्म्माद्यग्राहकत्वानां व्याप्यव्यापकभावः क्वचित्प्रतिपन्नः । स्वात्मन्येवासौ प्रतिपन्न इति यदि प्रतिपाद्यते । तदसङ्गतम् । असत्सम्प्रयोगजेऽपि ज्ञाने प्रत्यक्षशब्दवाच्यत्वदर्शनात् । तथा हि, स्मरणसव्यपेक्षेन्द्रियादिजन्यं प्रत्यभिज्ञाप्रत्यक्षं कालविप्रकृष्टस्यातीततत्कालसम्बन्धित्वस्यातीतदर्शनसम्बन्धित्वस्य च ग्राहकं पुरोव्यवस्थितार्थे भवतैवाभ्युपगम्यते । प्रातिभं च ज्ञानमध्यक्षं शब्दलिङ्गव्यापारानपेक्षं श्वो मे भ्राता आगन्तेत्याकारमनागतातीन्द्रियकालविशेषेणार्थप्रतिभासं जाग्रदृशायां स्फुटतरमनुभूयते । यच्चाकथि कथं धर्म्मादिग्राहकज्ञानस्य समुत्पत्तिरिति । तत्रानन्तरकारणं समस्तावरणक्षयोऽभ्यासोऽपि च परम्परया तत्कारणमुच्यते ।

यच्चास्पष्टं ह्यनुमानागमज्ञानमित्यादि जल्पितम् । तदसमीक्षिताभिधानम् । न हि सर्वथा कारणसदृशं कार्यमुपजायते । विलक्षणस्याप्यङ्कुरादेः कार्यस्य बीजादेरुत्पत्तिदर्शनात् ।

किं चात्र सिद्धरससंस्कृतजात्यताम्रखण्डादकम्रवपुषोऽप्युपजायते नो ॥
५ चामीकरं किमपि पिङ्गलरश्मिजालैर्बालप्रवालपटलीचटुलैर्विलासि।३४०॥

सर्वत्र हि सामग्रीभेदात्कार्यभेदः । ततोऽत्राप्यनुमानादिज्ञानेनास्पष्टेनाप्यभ्यासादिसामग्रीसहायेन स्पष्टं यदि विज्ञानमाविर्भाव्येत । तदा को दोषः स्यात् । यदप्यभाणि । तद्वदस्याप्युपप्लवत्वप्रसक्तेरिति । तदसाम्प्रतम् । भावनाबलात् ज्ञानं वैशद्यमनुभवतीत्येतावन्मात्रेण कामाद्युपप्लुत-
१० ज्ञानस्य दृष्टान्ततोपपत्तेः । न चाशेषदृष्टान्तधर्माणां साध्यदर्मेणोपादानं युक्तम् । सकलानुमानोच्छेदप्रसङ्गात् । यच्चाकल्पि, केवलज्ञानस्य सकलार्थग्रहणं सकलत्वं प्रधानभूतकतिपयार्थग्रहणं वेति । तत्राद्य एव नः पक्षः । यत्तु तत्र विकल्पितं क्रमेण तद्ग्रहणं युगपद्वेति । तत्रापि युगपदिति ब्रूमः । सकलावरणप्रलये हि सहस्रमयूखवद्युगपदेव निखिलार्थद्योतकं केवलज्ञान-
१५ मुज्जृम्भते । यत्पुनरत्राभ्यधायि । परस्परविरुद्धशीतोष्णाद्यर्थानामेकत्र ज्ञाने प्रतिभासासम्भवादिति । तदपि न यौक्तिकम् । तत्र हि तेषां सकृदभावादप्रतिभासस्तत्प्रतिभासे तस्यासामर्थ्याद्वा । न तावत्सकृदभावात् । शीतोष्णाद्यर्थानां सकृत्सम्भवात् । तत्प्रतिभासे तस्यासामर्थ्यादित्यप्यसारम् । परस्परविरुद्धानामन्धकारोद्योतादीनां युगपदुद्योतनसमर्थस्यैक-
२० स्यापि ज्ञानस्य संवेदनात् । सकृदेकत्र विरुद्धानामर्थानां प्रतिभासासम्भवे यत्कृतकं तदनित्यमित्यादिव्याप्तिश्च न स्यात् । साध्यसाधनतया कृतकत्वानित्यत्वयोर्विरुद्धत्वसम्भवात् । नाप्येकत्र ज्ञाने सकृत्तेषां प्रतिभासे तस्य प्रतिनियतार्थग्राहकत्वविरोधः । सकृदन्धकारोद्योतादिविरुद्धार्थग्राहिणोऽपि ज्ञानस्य प्रतिनियतार्थग्राहकत्वप्रतीतेः । यत्पुनरु-
२५ क्तमेकक्षण एव समस्तार्थग्रहणादकिञ्चिज्ञोऽसौ द्वितीयक्षणे प्रसज्येतेति । तदप्यसम्बद्धम् । यदि हि द्वितीयक्षणे पदार्थानां तज्ज्ञानस्य

वा सद्भावो न भवेत्तदायं दोषः स्यान्न चैवम् । अनन्तत्वात्तद्व्यस्य । न च द्वितीयक्षणे गृहीतग्राहित्वेन सर्वज्ञज्ञानस्याप्रामाण्यं वक्तुमुचितम् । गृहीतग्राहितयापि ज्ञानानां प्रामाण्यस्य समर्थितत्वात् । यच्च परसन्तानवर्त्तिरागादिसाक्षात्करणाद्रागादिमानप्येष प्राप्नुयादिति गदितम् । तदप्यपेशलम् । तथापरिणामो हि रागादिमत्त्वकारणं न तत्संवेदनमात्रम् । अन्यथा ।

जीर्णा स्वादुरसा सुरेति वचनस्यार्थावबोधाद्ध्रुवं
सीधुस्वादनदोषदुष्टचरितः किं नाम नाभूद्भवान् ॥
तद्धोः सम्प्रति विप्रपुङ्गव गयागङ्गाप्रयागादिषु
प्रायश्चित्तपरिग्रहाय गमनं युक्तं तवेक्षामहे ॥ ३४१ ॥

इन्द्रियाजन्यत्वात्तदवबोधस्यादोषोऽयमिति चेत् । इतरत्रापि तुल्यम् । न खलु सकलज्ञज्ञानमिन्द्रियप्रभवमभ्युपगम्यते । अपि चाङ्गनालिङ्गनसेवनाद्यभिलाषस्येन्द्रियोद्रेकहेतोराविर्भावाद्रागादिमत्त्वं प्रसिद्धम् । न चासौ प्रक्षीणमोहे भगवत्यस्तीति कथं रागादिमत्त्वस्याशङ्कापि । यदप्यभ्यधायि सर्वज्ञः समस्तमतीतकालाद्याकलितं वस्तु स्वेन रूपेण प्रतिपद्यत इत्यादि । तदप्यनुपपन्नम् । यतः स्वेनैव रूपेण तत्प्रतिपद्यते सकलज्ञः । न चैवं ज्ञानस्य प्रत्यक्षतानुपपत्तिरवर्त्तमानवस्तुविषयत्वादिति वाच्यम् । परिस्फुटतयार्थस्य ग्राहकत्वात् । परिस्फुटतयार्थस्य प्रतिभासो हि प्रत्यक्षलक्षणम् । स चेदतीतादेरप्यर्थस्यास्ति कथं न तद्ग्राहकज्ञानस्य प्रत्यक्षता । यथा चेन्द्रियप्रभवप्रत्यक्षे दूरदेशार्थग्रहणेऽपि परिस्फुटप्रतिभासित्वं न विरुद्ध्यते । तथातीन्द्रियप्रत्यक्षस्य कालाविप्रकृष्टार्थग्रहणेऽपि नचैवमतीतादेर्वर्त्तमानतापत्तिर्वर्त्तमानार्थग्रहणग्राह्यत्वाद्वर्त्तमानार्थवदित्यभिधातव्यम् । दूरदेशार्थस्याप्यदूरदेशार्थग्रहणग्राह्यत्वाददूरदेशताप्राप्तेरिति । न च वाच्यमतीतादेरसत्त्वात्कथं सर्वज्ञज्ञानेन ग्रहणमिति । यतोऽतीतादेरतीतादिकालसम्बन्धित्वेनातीतादेरपि सत्त्वसम्भवात् । वर्त्तमानकालसम्बन्धित्वेन त्वतीतादेरसत्त्व-

मभितमेव । वर्त्तमानकालसम्बन्धित्वातीतादिकालसम्बन्धित्वयोः परस्परं विरोधात् न च वर्तमानकालसम्बन्धित्वेनासत्त्वे स्वकालसम्बन्धेनाप्यतीतादेरसत्त्वम् । अतीतादिकालसम्बन्धित्वेनासत्त्वे वर्त्तमानकालसम्बन्धित्वेनाप्यसत्त्वाद्वर्त्तमानस्याप्यसत्त्वप्रसङ्गान्निखिलशून्यतापत्तेः । न चातीतादेः सत्त्वेन ग्रहणे वर्त्तमानत्वानुषङ्गः । सकलनियतसत्त्वरूपतयैव तस्य ग्रहणात् । ननु चातीतादेस्तज्ज्ञानकाले सन्निधानाभावात्कथं प्रतिभासः । सन्निधाने वा वर्त्तमानवदिति । एतदपि व्याप्तिज्ञानेन कृतोत्तरम् । एतेनेदमिदानीमिह सदित्यस्यां सकलवेदिसंविदि वस्तुसत्तावत्प्रागभावप्रध्वंसौ प्रतिभासेते न वेत्याद्यपि प्रतिक्षिप्तम् । यथैव हीन्द्रियप्रभवप्रत्यक्षे यद्देशविशिष्टं वस्तु नीलरूपं वा भावरूपमभावरूपं वा तद्देशविशिष्टतयैव प्रतिभासते । तथैव समस्तार्थवेदिसंवेदनेऽपि यद्देशकालाकारविशिष्टं वस्तु भावरूपमभावरूपं वा तद्देशकालाकारतयैव तत्प्रतिभासते । ततः कथं युगपदजातजातमृतव्यपदेशप्रसक्तिः । प्रतिनियतार्थस्वरूपाप्रतीतिर्वा । यतः सर्वज्ञता पुरुषविशेषस्य सुव्यवस्थिता न स्यात् । अतीतादिकालस्य हि वस्तुस्वभावतया प्रतीतौ युगपदजातजातमृतव्यपदेशप्रसङ्गः प्रतिनियतार्थस्वरूपाप्रतीतिश्च स्यात् । न पुनर्यथाकालं तत्प्रतीताविति । यच्चान्यदवादि सर्वज्ञकालेऽप्यसर्वज्ञैः सर्वज्ञो ज्ञातुमपर्याप्त इत्यादि । तदपि न न्याय्यम् । विषयापरिज्ञाने विषयिणोऽप्यपरिज्ञानाभ्युपगमे कथं जैमिन्यादेः सकलवेदार्थपरिज्ञाननिश्चयः स्यादसकलवेदार्थविदाम् । तदनिश्चये च कथं तद्व्याख्यातार्थाश्रयणादग्निहोत्रादावनुष्ठाने प्रवृत्तिर्भवेत् । कथं वा व्याकरणादिसकलशास्त्रार्थापरिज्ञाने तदर्थज्ञतानिश्चयो व्यवहारिणाम् । यतो व्यवहारप्रवृत्तिः स्यादिति । अथैवं पर्यनुयुज्यते । पूर्वं पश्चाद्वा यदि कचित्कदाचिन्निखिलदर्शिनो विज्ञानं विश्रान्तम् । तर्हि तावन्मात्रत्वात्संसारस्य कुतोऽनाद्यनन्तता । अथ न विश्रान्तम् । तर्हि नानेन युगसहस्रेणापि सकलसंसारसाक्षात्करण-

मिति । अत्रोच्यते। किमिदं विश्रान्तत्वं नाम तज्ज्ञानस्य विवक्षितम् । किं किञ्चित्परिच्छेद्यः परस्यापरिच्छेदः । सकलविषयदेशकालगमनासामर्थ्यादवान्तरेऽवस्थानं वा । क्वचिद्विषये समुत्पद्य विनाशो वा । न तावत्प्राचीनः समीचीनः पक्षः । अनभ्युपगमात् । न खलु निखिलज्ञज्ञानं क्रमेणार्थपरिच्छेदकम् । युगपदशेषार्थोद्योतकत्वात्तस्येत्यनन्तरमेव निरणायि । द्वितीयपक्षोऽनभ्युपगमादेव प्रतिहतः । न हि विषयस्य देशं कालं वा गत्वा ज्ञानं तत्परिच्छेदकमिति केनाप्यभ्युपगतम् । अप्राप्यकारिणस्तस्य क्वचिद्गमनाभावात् । केवलं यथाऽनाद्यनन्ततया स्थितोऽर्थस्तथैव तं तत्प्रतिपद्यते । तृतीयपक्षोऽप्ययुक्तः । क्वचिदेव विषये तस्योत्पत्तेरनभ्युपगमात् । समकालं समस्तवस्तुविषयतयैव तस्याविर्भावस्वीकारात् । न चैवंस्वभावस्यापि तस्य विनाशः । आत्मद्रव्यस्वरूपतया विनाशासम्भवात् । एवं च ।

उत्पत्तिस्थितिभङ्गभङ्गिसुभगा विश्वापि विश्वत्रयी
यज्ज्ञाने युगपत्प्रतिक्षणमियं साक्षात्समाभासते ॥
गम्भीरे पयसां प्रभौ प्रविलसन्मुक्तेव सत्त्या यतः
सोऽयं सम्प्रति सिद्धिपद्धतिमगात्कश्चिन्नरग्रामणीः ॥३४२॥

एवं तावद्विश्ववेदिप्रसिद्धौ दोषापेतोऽदर्शि मानप्रबन्धः ॥
हंहो ब्रूताद्यापि वो यद्यतोषस्तस्यामन्यद्येन मानं वदामः ॥ ३४३ ॥

धर्म्मादयो विशदसंवेदनवेद्याः प्रमेयत्वाद्यदेवं तदेवं यथा स्तम्भस्तथा पुनरमी धर्म्मादयस्तस्मात्तथा । न तावदयमसिद्धो हेतुः स हि स्वरूपद्वाराश्रयद्वारा वा भवेत् । न स्वरूपद्वारा प्रमेयत्वस्वरूपस्यास्य सर्ववादिनामविवादसिद्धत्वात् । नाप्याश्रयद्वारा । आश्रयभूतानां धर्म्मादिपदार्थानामविवादेनावाच्यं प्रतिपन्नत्वात् । नापि विरुद्धः । साध्यवति स्तम्भादावन्वयस्योपलभ्यमानत्वात् । ननु सामान्ये साध्ये विरुद्धो मामूत् । अभिमतेन्द्रियानिन्द्रियनिमित्तविशदसंवेदनवेद्यत्वे तु साध्ये विरुद्धता

वारयितुं न पार्यते । तद्विपरीतेन विशदसंवेदनवेद्यत्वेन साधर्म्यदर्शने स्तम्भादावन्वयदर्शनात् । अनन्वयोऽप्युदाहरति दोषोऽत्र । साधो साधु द्रवसे । परं नात्र विशेषः सिषाधयिषितः । धर्म्मादीनां शाब्दमानेनैव श्रोत्रियैर्वेदनाभिप्रायात् । विशदसंवेदनसंवेद्यत्वमात्र एव तावद्विवाद इति तदेव प्रथमं प्रसाधनीयम् । सिद्धे पुनरस्मिन्ननुमानान्तरादिन्द्रियानिन्द्रियनिमित्तविशदसंवेदनवेद्यत्वरूपविशेषसिद्धिः । तथा हि । धर्म्मादिविशदवेदनं नेन्द्रियानिन्द्रियपरतन्त्रम् । अपर्यायत एवार्थावभासहेतुत्वात् । यत्तु नैवं न तदेवं यथास्मदादिवेदनम् । इदं तु न तस्मात्तथा । अवयवविशुद्धिस्तत्र पूर्ववद्विधातव्या । तस्मान्न विरुद्धानन्वयदोषावतारः । ननु साध्यानवबोधनोऽयं हेतुर्भविष्यति । उपाधिविशेषाविनाभावमूलत्वात् । तथा हि यद्यपि प्रमेयत्वविशदसंवेदनवेद्यत्वे नात्र सहावस्थिते अनुभूते । तथापि न प्रमेयत्वमात्रानुबन्धि विशदसंवेदनवेद्यत्वम् । अपि तु प्रमेयत्वावान्तरनेत्रादीन्द्रियविषयत्वानुबद्धम् । ततः प्रमेयत्वे सत्यपि य इन्द्रियविषयः स एव विशदसंवेदनवेद्यो नीपादिः । नापरं धर्मादि । तस्येन्द्रियाविषयत्वादिति न प्रमेयत्वमात्रं साध्यावबोधनम् । अत्राभिधीयते । विशेषस्य विशेषं प्रति बोधनेत्वेऽपि[1] सामान्यव्याप्तेर्निरासार्हत्वमेव । यथा धूमविशेषस्य खादिरादिवह्निविशेषसम्बन्धेऽपि न धूमसामान्यस्य वह्निसामान्यसम्बन्धो विशीर्यते । तथेहापि प्रमेयत्वावान्तरस्य नेत्रादीन्द्रियविषयत्वस्य नेत्रादीन्द्रियसमुद्भवविशदसंवेदनबोध्यत्वेन व्याप्तौ सत्यामपि न प्रमेयत्वमात्रस्य विशदसंवेदनवेद्यत्वसामान्येनाविनाभावो न भवतीति सर्वं[3] प्रसिद्धानुमानसमानमेव । नाप्ययं हेतुः सविसंवादः । प्रमेयस्य सतो विशदसंवेदनावेद्यस्य सर्वथैवाभावात् । नन्वस्य विसंवादितापनोदं न मृष्यामहे । अभावेन विसंवादस्य दुर्वारत्वात् । तथा हि प्रमेयोऽप्ययं न विशदसंवेदनवेद्यः । अभावमानेनैवा-

१ ' बोधत्वेऽपि ' इति भ. पुस्तके पाठः । २ ' वेद्यत्वेन ' इति प. भ. पुस्तकयोः पाठः । ३ ' सर्वम् ' इति भ. पुस्तके नास्ति ।

वसीयमानत्वात् । नैतत्साधु । अभावस्य वस्त्वंशतया विशदसंवेदनरूपमानावसेयतयापि समर्थितत्वात् । नन्वनुमानान्तरबाधितार्थसिद्ध्यर्थमुपस्थितत्वाद्बहिश्चैत्यानुमानवद्बाधितविषयमनुमानमिदम् । अमनोहरमेतत् । तथा ह्यत्र विशदवेदनमनुमानं शाब्दमुपमानमर्थापत्तिरभावो वा धर्मादिविशदवेदनस्य बाधायै प्रभवेत् । यदि विशदवेदनम् । तदापीन्द्रियप्रभवमनिन्द्रियप्रभवं वा तद्भवेत् । यदीन्द्रियप्रभवम् । तदापि त्वत्सम्बन्धि समस्तपुरुषसम्बन्धि वा तत्स्यात् । यदि त्वत्सम्बन्धि । तदापि नियतदेशदशाविशेषितस्य तत्स्याभावं साधयेदशेषदेशादिवर्त्तिनो वा । यदि नियतदेशदशाविशेषितस्य तदा सिद्धसाधनम् । अस्माभिरपि नियतदेशदशाविशेषितस्य तत्स्याभावसाधनात् । अथाशेषदेशादिवर्त्तिनः । तदापि तदिन्द्रियप्रभववेदनं तेऽशेषदेशादौ प्रवर्त्तते वा न । यदि प्रवर्त्तेत । तदा भवानेव समस्तदेशादिविशेषवेदी धर्मादिदर्शीति तव शरास्त्वय्यैव निपतिताः । अथ न प्रवर्त्तेत इति निवर्त्तमानमिन्द्रियवेदनं त्वत्सम्बन्धिधर्मादिदर्शनस्य बाधनम् । तदप्यसत् । यदि हि तत्तस्य हेतुर्व्यापी वा स्यात्तदा तस्य निवृत्त्या धर्म्मादिविशदवेदनस्यापि निवृत्तिर्विभाव्येत् । अन्यथा मन्दरामरमन्दिरादीनामप्यभावः स्यात् । न पुनरिदमिहास्ति । अथ समस्ति समस्तपुरुषसम्बन्धि तत्तद्बाधनम् । तदसिद्धम् । न हि सर्वे पुरुषा धर्मादिविशदवेदनं न विदन्तीत्यत्रासर्वविदः सामर्थ्यमस्ति । तथाभ्युपेत्य धर्मादिविशददर्शनस्येन्द्रियप्रभवसंवेदनविषयतां त्वत्सम्बन्धीत्यादिभेदवृन्दमवादि । यावतेन्द्रियप्रभवसंवेदनस्य धर्मादिविशदवेदनं विषय एव न भवति । न हि परपुरुषवर्त्तिनः संवेदनविशेषा अस्माभिरिन्द्रियोदितवेदनेन वेद्यन्ते । अविषयस्यापि यदि तेनाभावः साध्यते । तर्हि नयनोत्थेन संवेदनेन शब्दाभावः साध्येत । तन्नेन्द्रियप्रभवं वेदनं धर्मादिदर्शनं बाधते । नाप्यनिन्द्रियप्रभवम् । तस्यासिद्धत्वात् । सिद्धौ वा पर्याप्तं विवादेनेति

---

१ ' प्रवर्त्तते ' इति म. पुस्तके पाठः । २ ' प्रभवताम् ' इत्यधिकं प. म. पुस्तकयोः ।

न विशदवेदनं धर्मादिविषयविशदवेदनबाधनायोत्सहते। नाप्यनुमानम्। तत्र हि धर्मादिविशदसंवेदनं नास्तीति साध्यधर्मिनिर्देशः स्यात्। धर्मादयो विशदसंवेदनवेद्या न भवन्तीति वा। यद्वा विवादाध्यासितः पुरुषो धर्मादिदर्शी न भवतीति। यदि वा विवादाध्यासिता धर्मादयः सिद्धान्तेनैव वेद्या इति। आद्यविधायां साधनमनुपलम्भो विरुद्धविधिर्वा भवेत्। यद्यनुपलम्भः सोऽपि धर्म्मादिदर्शनस्य, तद्धेतोः, तद्व्यापिनः, तत्साध्यस्य वा स्यात्। यदि धर्मादिदर्शनस्य, तदाप्यसौ स्वसम्बन्धी सर्वसम्बन्धी वा। यदि स्वसम्बन्धी। नासौ तदभावहेतुः। विसंवादित्वात्। नापि सर्वसम्बन्धी। स्वरूपासिद्धत्वात्। न हि सर्वात्मनामप्रतिपत्तौ तत्सम्बन्धी धर्म्मादिदर्शनानुपलम्भो विभावयितुं पार्यते। नापि धर्म्मादिदर्शनहेतोरनुपलम्भोऽस्ति। तदावृतिप्रध्वंसस्य तद्धेतोरनुमानबलात्प्रसाधितत्वात्। नापि तद्व्यापिनः। धर्म्मादिदर्शनव्यापिनः संविद्रूपतादेस्तत्र सद्भावात्। तत्साध्यानुपलम्भोऽप्यसिद्धः। धर्म्माद्यशेषार्थप्रतिपादनपरस्य राद्धान्तस्य तत्साध्यस्योपलभ्यमानत्वात्। विसंवाददुस्थोऽप्येषः। धूमादिफलानुपलम्भेऽपि विभावसुप्रभृतिहेतोर्मुरुराद्यवस्थासु सद्भावविभावनात्। न ह्यवश्यं साधनानि साध्यवन्ति भवन्ति। तन्नानुपलम्भः साधनतां बिभर्त्ति। नापि विरुद्धविधिः। यतः सोऽपि प्रतिनियतदेशादौ तस्याभावं साधयेदशेषदेशादौ वा। आद्यभेदे सामस्त्येन धर्म्मादिदर्शनस्य नाभावः सिद्धयेत्। यत्रैव यदैव हि तद्विरुद्धस्य विधानं तत्रैव तदैव तदभावः साधयितुं पार्यते नान्यत्रान्यदा। अतिव्याप्तेः। द्वितीयभेदोऽप्यसम्भाव्यः। असर्वदर्शिनः सर्वत्र सर्वदा तद्विरुद्धविधेरसम्भवादिति न विरुद्धविधिरपि साधनत्वमश्नुते। तथा हेतुद्वयेऽप्यस्मिन् धर्मादिविशदसंवेदनस्वरूपः साध्यधर्म्मी स्वसिद्धः परसिद्धो वाभिधीयते। यदि स्वसिद्धः।

---

१ 'विभावात्' इति भ. प. पुस्तकयोः पाठः। २ 'न' इति नास्ति प. भ. पुस्तकयोः।

तर्हि तस्य प्रतिषेधो माता मे वन्ध्येति नीतिमनुसरति । अथ परासिद्धोऽयमुपादीयते । तदापि परस्यासौ यदि मानेन सिद्धः । तदा तवापि सिद्ध एवेति नोपपन्नस्तत्प्रतिषेधः । अथ नार्थं स्वस्य परस्य वा मानेन सिद्धः । तदाऽसिद्ध एवेति हेतोराश्रयासिद्धता दुष्प्रतिविधेया । तन्न धर्म्मादिविशदसंवेदनं नास्तीति साध्यधर्मिनिर्देशः सूपपादः । नापि धर्म्मादयो विशदसंवेदनवेद्या न भवन्तीति । अत्राप्यनुपहतस्य हेतोरभावात् । स ह्यमूर्त्तस्वरूपोऽतीन्द्रियत्वस्वभावो वा भवेत् । न तावदाद्यः । तस्य सविसंवादत्वात् । अमूर्त्तस्यापि सामान्यादेर्विशदसंवेदनवेद्यत्वेनाभ्युपेतत्वात् । अतीन्द्रियत्वस्वभावोऽत्र हेतुः । तथा हि न धर्मादयो विशदसंवेदनवेद्या अतीन्द्रियत्वाद्यत्तु नैवं न तदेवं यथा स्तम्भस्तथा च न धर्म्मादयस्तस्मान्न विशदसंवेदनवेद्या इति । एतदपि प्रलापमात्रम् । उपाधिविशेषाविनाभावमूलत्वेन हेतोः साध्यानवबोधनात् । तथा ह्यतीन्द्रियत्वे सत्यपि य एव भावनाविशेषातिशयविषयो भवति भावः स एव विशदसंवेदनवेद्यः । यथा विषमशरशरविसरनिरन्तरप्रहारहारितसमस्तसातवार्त्तस्य पुंसः प्रेयसीमयीं भुवनत्रयीं भावयतस्तद्वदनारविन्दम् । भावनाविशेषातिशयविषयीभूतास्तु पुरुषस्य धर्म्मादयस्तस्मादतीन्द्रियत्वेऽपि ते तस्य विशदसंवेदनवेद्या भवन्ति । अथ भावनाविशेषातिशयभाविप्रेयसीवदनारविन्ददर्शनं भ्रान्तं धर्म्मादिदर्शनं प्रत्युदाहृतित्वाय[1] नालम् । अन्यथा तत्सामान्येन धर्म्मादिदर्शनं भ्रान्तं स्यादिति । प्रलापमात्रमेतत् । विपदप्रतिभासमात्रतया तस्योदाहृतित्वोपपत्तेः[2] । यदि तु साध्यधर्म्युदाहृत्योः सर्वथा साम्यमभिप्रैति देवानांप्रियः । तदा सर्वत्रोदाहृतेरभाव एव स्यात् । महीधरमहानसयोरपि सर्वथा साम्याभावात् । तत्र भावनाविशेषभावित्वेऽपि बाधकमानोपनिपातेन प्रियतमावदनारविन्ददर्शनं भ्रान्तम् । धर्म्मादिदर्शनं तु बाधादिरहितत्वेनाभ्रान्तं

---

१ ' इति न तस्याभ्रान्तम् ' इति प. भ. पुस्तकयोरधिकम् । २ प्रत्युदाहृतित्वं पेशलम्' इति प. भ. पुस्तकयोः पाठः ।

भविष्यति। विशदप्रतिभासत्वं तूभयत्रापि समानमिति भवत्येतावतात्रास्योदाहृतित्वम्। तथाऽतीन्द्रियत्वादिति हेतुरपि इन्द्रियासम्बद्धत्वमिन्द्रियसम्भवसंवेदनाविषयत्वं वा स्यात्। तत्रेन्द्रियासम्बद्धत्वं विसंवादि। पदार्थानां नयनेन्द्रियासम्बद्धत्वेऽपि तदुत्पाद्यविशदसंवेदनवेद्यत्वात्। नयनेन्द्रियासम्बद्धत्वं तु तेषां नयनस्याप्राप्यदर्शित्वेन समर्थितत्वात्। इन्द्रियसम्भववेदनाविषयत्वं तु साध्यसमम्। भवतां मते इन्द्रियसम्भवस्यैव विशदसंवेदनस्य भावादिति। य एवार्थो विशदसंवेदनवेद्यो न भवतीति स एवातीन्द्रियत्वादिति। संशयितसाध्यशून्यपदार्थव्यावृत्तिरप्ययं हेतुः। अतीन्द्रिया अपि विशददर्शनवेद्या भविष्यन्ति विरोधाभावात्। तथा ह्यतीन्द्रियत्वविशददर्शनवेद्यत्वयोर्विरोधः सहानवस्थारूपो वा शीतवह्न्योरिव। परस्परस्थितिपरिहारस्वरूपो वा भावाभावयोरिव। न प्रथमस्तयोः सम्भवति। स हि समवहितसमस्तसाधनस्य भवतोऽन्यभावेऽभावाद्विशदवेदनानुपलम्भाभ्यामवसीयते। नन्वेवमिहापि भविष्यति। नैवम्। न हि धर्म्मादीनां विशददर्शनवेद्यत्वस्य पूर्वं भवतोऽतीन्द्रियत्वसन्निधानान्निवृत्तिर्विधैः समुपलभ्यते। यतस्तेन तस्य विरोधः स्यात्। उपलम्भे वा निष्फलं तन्निरासेनात्मानमायासयन्ति श्रोत्रियाः। द्वितीयोऽपि विरोधो नात्र सम्भवति। यतो नातीन्द्रियत्वं विशददर्शनवेद्यत्वव्युदासेन व्यवस्थितम्। अपि त्विन्द्रियविषयत्वव्युदासेनेति धर्म्मादयो विशदसंवेदनवेद्या न भवन्तीत्येषोऽपि साध्यधर्म्मिनिर्देशोऽनुपपन्न एव। योऽपि विवादाध्यासितः पुरुषो धर्म्मादिदर्शी न भवतीति। तत्राप्युपदेशित्वं पुरुषत्वं वा हेतुः स्यात्। यद्युपदेशित्वम्। तदापि मानविरुद्धार्थोपदेशित्वं तद्विपरीतार्थोपदेशित्वमुपदेशित्वमात्रं वा स्यात्। प्रथमभिदायां हेतोरसिद्धिः। तत्रभवतस्तथाभूतार्थोपदेशित्वासम्भवात्। उत्पादव्ययध्रौव्यस्वभाववस्तुवादी हि तत्रभवान्न तु तथाविधवस्तुनि

१ 'चेदथ' इति प. भ. पुस्तकयोः पाठः। २ 'संशयित्व' इति भ. पुस्तके पाठः।

मानविरोधः सम्भवतीति पुरतः प्रसाधयिष्यते । द्वितीयभिदायां विसंवादी हेतुः । तथार्थोपदेशित्वस्य धर्म्मादिदर्शित्वेन सह विरोधाभावात् । तथा विश्वत्रयवर्तिनोऽर्थानाश्रित्य विरुद्धार्थोपदेशित्वमभ्युपेयते नियतान्वेति । तत्र प्रथमभेदे विरुद्धत्वं हेतोः । तथाविधमानाविरुद्धार्थोपदेशित्वस्य धर्म्मादिदर्शित्वे सत्येव सम्भवात् । उत्तरभेदे त्वसिद्धं तावत्। न हि वयं प्रतिनियतमानाविरुद्धार्थोपदेशिनं विवादास्पदपुरुषमभ्युपेम। तस्य सर्वोपदेश्यपदार्थेषु तथाविधत्वात् । तृतीयभिदायां तु विसंवादित्वं हेतोः । उपदेशित्वमात्रस्य धर्म्मादिदर्शित्वेन विरोधासम्भवात् । अथ रथ्यापुरुषादौ धर्म्माद्यदर्शित्वे सत्येवोपदेशित्वस्योपलर्म्भादिदर्शने तु सर्वदापि तस्यानुपलम्भात्ततो व्यावृत्तिः सिध्यत्येवेति । तदपि त्रपास्पदम्। सर्वसम्बन्धिनोऽनुपलभ्यस्यासिद्धत्वेनात्मसम्बन्धिनस्तु विसंवादित्वेन प्रतिपादनात् । ननु धर्म्मादिदर्शिनः सर्वथैवाभावादुपपन्नं ततो व्यावृत्तिरुपदेशित्वस्य । तदेतदतिसाहसम् । धर्म्मादिदर्शिनोऽभावस्याद्याप्यप्रसिद्धेः । न हि तत्प्रसिद्धौ साधनमस्ति । तद्धि उपदेशित्वमेव भवेदन्यद्वा । प्रथमभिदि त्रिपददोषावतारः । उपदेशित्वाद्धि धर्म्मादिदर्श्यभावसिद्धौ ततोऽस्य व्यावृत्तिसिद्धिस्तत्सिद्धौ तु धर्म्माद्यदर्शित्वेन व्याप्तिस्तस्यां सिद्धायां पुनरतो धर्म्मादिदर्श्यभावसिद्धिरिति । अथान्यदनुपलम्भादि तदभावसाधनाय साधनमभिधीयते । तदप्यनुपपन्नम् । तस्यानल्पदोषदूषितत्वेन प्रतिपादितत्वादिति नोपदेशित्वमत्र हेतुः । नापि पुरुषत्वम् । विपर्यये बाधाविधायिमानासम्भवेन साध्यशून्यपदार्थाद्व्यावृत्तेस्तस्य सन्देहदोलावलम्बित्वात् । न हि नामायं सैम्भवी यत्सम्प्रतिपन्ने पुरुषे प्रतिभातमप्रतिभातं वा तेन सर्वत्र भवितव्यं चेति । अन्यथा रथ्यापुरुषो धर्म्मादिदर्श्यभावाऽनवसायी

---

१ ' तत्सिद्धौ ' इति प. भ. पुस्तकयोः पाठः । २ ' धर्माद्यदर्शिनैव ' इति प. भ. पुस्तकयोः पाठः । ३ ' न्यायः ' इत्यधिकं प. भ. पुस्तकयोः । ४ 'न भवितव्यं चेति ' इति भ. पुस्तके पाठः ।

वेदार्थधीशून्यः शूद्रः पशुप्रायः समुपलभ्यत इति भवदाराध्यपुरुषोऽपि तथा स्यात् । पुरुषत्वस्योभयत्राप्यविशेषादित्यतिलोमाभिभूतस्य तवाहो अशनिनिपातः शिरसि । अथ पुरुषत्वाविशेषोऽपि तस्य रथ्यापुरुषादुत्तमत्वाद्धर्मादिदर्श्यभाववेदनादिरतिशयो न विरुद्ध्यते । तर्हि तथाभूतस्यैव पुरुषविशेषस्य धर्मादिदर्शनातिशयोऽपि मा विरोधीति संशयितसाध्यशून्यपदार्थव्यावृत्तित्वेन विसंवादित्वात् पुरुषत्वमपि नात्र हेतुः । ततो विवादाध्यासित इत्यादिरपि साध्यधर्मनिर्देशो न सुन्दरः । नापि विवादाध्यासिता धर्मादयः सिद्धान्तेनैव वेद्या इति । हेतोरत्रापि दुर्लभत्वात् । अथास्त्येव धर्मादिशब्दाभिधेयत्वादिति । नन्वतो हेतोः साम्प्रतपुरुषसदृशानां । पुंसां सिद्धान्तेनैव धर्मादिवेद्यत्वं साध्यतेऽन्यादृशानां वा । यदि साम्प्रतपुरुषसदृशानाम् । तदा सिद्धसाधनम् । अथान्यादृशानाम् । तदा तत्साधनेनैव बाधितविषयमिदमनुमानम् । तन्नानुमानमपि धर्मादीनां विशदसंवेदनवेद्यत्वं बाधते । नापि शाब्दम् । ननु शान्तमेतत् । नित्यस्य सिद्धान्तस्य तद्विधानपरस्यादर्शनाद्बाधादिहेतुत्वमेव हि व्यवसीयते । अथ स्वयम्भुवं प्रतीत्य "**स सर्वविद्यस्यैषा महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्नात्मन्**" इत्यादिना तत्र तत्र वेदे विश्ववेदितापतिभासनपरा स्तुतिर्दृश्यते । सत्यां तु विश्ववेदितायां धर्मादिदर्शनमपि सिद्धमेवेति न सिद्धान्तस्य तद्बाधाविधायित्वमिति । अशोभनमेतत् अस्याः स्तुतेः सर्वविधिपरत्वाभावात् । तस्य स्वान्तेनाधीतत्वात् । अनादेः सिद्धान्तस्यादिमिति धर्मादिदर्शिनि प्रवृत्तावनादिताविरोधापत्तेः । अपि तु स्वयम्भुवमुद्दिश्य विधिश्रितस्य तथाविधाध्वरादेः प्रवर्त्तनायार्थवादमात्रमेतत् । अर्थवादास्तु विधिप्रशंसापरतया मानतां लभन्ते न स्वतन्त्रतयेति सर्वदर्शिविधिसाधनं न भवति । तथा यदि नित्यः सिद्धान्तः प्रमा । तदा निष्फलमेव सर्ववित्साधनम् धर्माद्युपदेशस्य तत एव सिद्धेः । अनित्यस्य तु सिद्धान्तस्य सर्वदर्शिसाधनत्वं तद्वि-

हितस्येतरस्य वा । यदि तद्विहितस्य । तदेतरेतराश्रयम् । तस्मिन् सिद्धे हि तद्विहितस्य सिद्धान्तस्य मानता तस्मात्तु तस्य सिद्धिरिति । नापीतरविहितस्य । तस्य मानत्वासम्भवात् । अमानादपि तस्मात्तत्प्रतिपत्तौ स्वविहितपदसमूहादपि तत्प्रतिपत्तिः स्यादेव । विशेषाभावादिति । सिद्धान्तबाधितविषयमिदमनुमानं भवत्येवेति । एतदपीर्ष्यापित्तसन्तापोपप्लुतस्यास्य प्रलापमात्रम् । यतो यावन्तं वेदसम्बन्धिनं विधिध्वनिप्रबन्धं भवान्निशामयति तावानेवास्ति, आहोस्विदन्योऽपि । न तावत्प्रथमः । वेदांशानामनन्तानां स्थाने स्थाने तिरोभावनिशमनात् । अथ द्वितीयः । तदा तत्र वेदांशे सर्ववेत्ता भविष्यति । तथा नित्यस्य सिद्धान्तस्य तद्विधानपरस्यादर्शनादित्यत्र सर्वविद्विधानं सर्ववेदभिधायित्वं सर्वविन्निष्पादनत्वं वाभिप्रेतम् । नाद्यो भेदः । यतः पूर्वमेव प्रतिपादितस्तदभिधायी वेदान्तः । नापि तस्यार्थवादमात्रत्वेनामानत्वमित्याद्यभिधेयम् । यतोऽर्थवादः प्रमां साधयति न वा । यदि साधयति तदा मानतैवास्य । प्रमासाधनत्वान्मानस्य । प्रमां न साधयतीति तु प्रतीतिपराहतम् । अर्थवादशब्देभ्योऽपि प्रमोत्पत्तिप्रतीतेः । सर्वविन्निष्पादनत्वं तु न मानधर्मः । परमभावनातिशयरूपहेतुधर्म्मत्वात्तस्य । अनादेः सिद्धान्तस्यादिमतीत्याद्यपि लुताततनुमात्रावलम्बनम् । यतः प्रवाहमाश्रित्य सर्वविद्विशेषमाश्रित्य वा । प्रथमभिदा नाभिमता । सर्वदर्शिपरम्पराया अनादित्वात् । द्वितीयभिदायां तु विसंवादिता । अश्वमेधादीनां नियतविषयमाश्रित्य सादीनामपि तत्र विधानदर्शनात् । अपि तु स्वयम्भुवमित्याद्यपि नानवद्यम् । यतो भवतु विधिप्रशंसापरतयार्थवादानां मानता । तथापि ये निर्बाधामर्थप्रतीतिं निष्पादयन्ति ते मानतां स्वार्थे लम्भन्ते न वा । यदि लम्भन्ते तदायमपि मानमेव । द्वितीयभेदे तूभयसम्प्रतिपन्नानुमानादिमानानामपि न मानता । नापि नित्ये सिद्धान्ते सर्ववेदो निष्फलता-

१ ' निशमयति ' इति प. भ. पुस्तकयोः पाठः ।

विषयदर्शनोत्थस्य धर्म्माद्युपदेशस्य सर्वविदैव विधीयमानत्वात् । अनित्योऽपि संवादशाली सिद्धान्तः सुरपुरसर्वदर्शनार्थिनां तपोध्यानादि विधेयमित्यादिः सर्वदर्शिनमभिदधानः शतशो दृश्यते । नाप्यत्रेतरेतराश्रयम् । सर्ववित्समयपरम्पराया अनादित्वात् । इति सिद्धान्ते सर्वदर्शिप्रतिपादनप्रसिद्धया न शाब्दमपि धर्म्मादीनां विशदसंवेदनवेद्यतां बाधितुं समर्थम् । नाप्युपमानम् । तथा हि यद्युपमानभूताः सर्व एवेदानीन्तनाः पुरुषा अपरे वोपमेयास्त्रिभुवनान्तर्वर्त्तिनोऽवधारिता भवेयुस्तदेदानीन्तनपुरुषसादृश्योपमानेनान्येषामपि धर्म्मादिदर्शित्वाभावसाधनं भवेत् । यावता परिमितदेशविशेषिताः पुरुषा इदानीन्तना विभाविता न सर्वे । विभाविता अपि न धर्म्माद्यदर्शित्वेनावधारिताः । परात्मधर्मस्य धर्म्मादिदर्शनाभावस्य पिशितनयनैर्वैशद्येन प्रतिपत्तुमपर्याप्तत्वात् । नापि शेषाः प्रमिताः । तस्मादुपमानोपमेययोर्वैशद्येनाप्रतिपत्तेर्नोपमानमत्र सम्भवति । अथोपमानभूतानामिदानीन्तनानामुपमेयभूतानामन्येषां वा पुंसामसर्वदर्शित्वेन विशदा प्रतीतिरिष्यते । तत्रापि नोपमानेन फलम् । विशददर्शनेनैव सर्वेषामसर्वदर्शित्वसिद्धेः । ततोऽपीदानीन्तनानन्यान्वा सर्वानसर्वदर्शित्वेन पश्यन् भवानेन सर्वदर्शी स्यादिति सिद्धं नः समीहितम् । ततो नोपमानमपि धर्म्मादीनां विशदसंवेदनवेद्यतां बाधते । नाप्यर्थापत्तिः । सा हि सर्वदर्श्यसाधनतया सर्वदर्श्यभावसाधनतया वा तां बाधेत । न तावत् सर्वदर्श्यसाधनतया । असिद्धत्वात् । धर्म्मादिदर्शिसाधनोद्भुराया अर्थापत्तेः पूर्वं प्रतिपादितत्वात् । नापि सर्वदर्श्यभावसाधनतया । असिद्धत्वात् । न हि नाम सोऽर्थः सम्भवति यः सर्वविदभावं विना नोपपद्यते । नाप्यभावस्तां बाधितुमीशः । स हि सत्तासाधनप्रमानिवृत्तिरूपो वा स्यादभावविषयमानसप्रतीतिरूपो वा । न तावदाद्यो भवति भेदः । सत्तासाधनप्रमा-

---

१ 'वेदित्वाभाव' इति प. भ. पुस्तकयोः पाठः । २ 'सर्वदर्श्यसाधनतया' इति भ. पुस्तके पाठः ।

निवृत्तेरसंवेदनरूपतया धर्म्मादिदर्शनाभावसाधनत्वानुपपत्तेः । भवतु वा तदभावसाधनत्वम् । तथाप्यसिद्धैव तन्निवृत्तिः । प्रस्तुतानुमानस्यैव तत्र प्रवृत्तेः । तथा तन्निवृत्तिर्नियतदेशविशेषिता स्यादनियतदेशविशेषिता वा । न प्रथमा सर्वत्र सर्वदा धर्म्मादिदर्शनाभावं साधयति । अन्यथा स्तम्भादीनां देशान्तरवर्त्तिनामत्र देशविशेषे स्वविषयमानाप्रवृत्तेर्देशान्तरेऽप्यभावः स्यात् । ततो निःशेषव्यवहारविलोपः । नापि द्वितीया । सा हि विशदसंवेदनसिद्धा तदितरमानसिद्धा वा भवेत् । विशदसंवेदनमपीन्द्रियप्रभवमनिन्द्रियप्रभवं वा । इन्द्रियप्रभवमपि सर्वदेशवेदि नियतदेशवेदि वा । न प्रथमो भेदः । इन्द्रियप्रभवसंवेदनस्य सर्वदेशाविषयत्वात् । नापि द्वितीयः । सर्वदेशावेदने तद्विशेषितधर्मादिदर्शनसत्तासाधनप्रमानिवृत्तेरपि वेदयितुरपार्थत्वात् । नाप्यनिन्द्रियप्रभवम् । तद्धि स्वसंवेदनरूपं तदितरद्वा । न स्वसंवेदनरूपम् । प्रमानिवृत्तेरसंवेदनरूपतया स्वसंविदितत्वासम्भवात् । नापीतरत् । तदितरस्यानिन्द्रियसम्भवस्य विशदसंवेदनस्य परेषामसिद्धेः । यदि त्वनिन्द्रियप्रभवं तत्सर्वत्र तन्निवृत्तिसाधनं सिद्धम् । तदा तद्यस्यास्ति स एव धर्म्मादिदर्शी प्रसिद्ध इत्यलं विवादेन । अथ तदितरमानसिद्धा । तदापि तदितरमानमनुमानं सिद्धान्तो वा । न तावदनुमानम् । प्रसिद्धाविनाभावस्य हेतोरसम्भवात् । नापि सिद्धान्तः । तस्यापि वादिप्रतिवादिसम्मतस्याभावात् । तन्न सत्तासाधनप्रमानिवृत्तिरूपोऽभावः । नाप्यभावाविषयमानसप्रतीतिरूपः । सोऽपि हि नियतदेशे धर्म्मादिदर्शनाभावं भावयेत्सर्वत्र वा । यदि नियतदेशे । तदा सिद्धसाधनम् । देशविशेषे तदभावस्य सम्मतत्वात् । अथ सर्वत्र तदनवधारिताभिधानम् । आधारविरोधिनोरेव बोधस्याभावप्रतीतिनिबन्धनस्यात्रासम्भवात् । यथा हि नीपाभावस्य प्रतीतावाधारस्य भूतलादेर्विरोधिनस्तु नीपस्यावबोधोऽस्ति । नैवमिहाधारविरोधिनोरवबोधः सम्भवति । अत्र ह्याधारस्त्रिभुवनं तद्विषयोऽप्यवबोधस्तव नास्त्येव । तद्भावे वा सर्वदर्शिता तवैव संवृत्तेत्यप्रया-

सोपनतोऽस्मन्मनोरथः । नापि विरोधिनो धर्म्मादिदर्शनस्यावबोधोऽत्र सम्भवति । सम्भवे वा नात्यन्तं तस्याभाव इति नाभावोऽपि धर्मादीनां विशदसंवेदनवेद्यतां बाधत इति न बाधितविषयोऽप्ययं हेतुः । तस्मादशेषदोषरहितत्वात् स्वसाध्यसिद्धिसौधमध्यमध्यासयन्नयं हेतुर्विदशशापेनापि नापहस्तयितुं पार्यत इति । अथाभिधीयते भवतु धर्म्मादिदर्शी । तथापि धर्मादिदर्शनस्य हेतुरभिधातव्यः । स हि बाह्येन्द्रियं भावना तत्सहितं बाह्येन्द्रियं मनो विलीनमलोपलेपमात्मस्वरूपं वा । न बाह्येन्द्रियम् । तस्य पुरो वर्त्तमानरूपादिमदर्थसंदर्शनमात्रहेतुत्वेन समस्तान्नभुवनवर्त्तिधर्म्मादिदर्शनहेतुत्वासम्भवात् । नापि भावना, तस्याः स्मृतिमात्रहेतुतयाऽननुभूतपूर्वधर्म्मादिदर्शनं प्रत्यहेतुत्वात् । नापि भावनासहितं बाह्येन्द्रियम् । तस्य पुरोवर्त्तिवर्त्तमानार्थदर्शनहेतुतया भावनायास्त्वनुभूतविषयस्मृतिमात्रसाधनतया परस्परसहविधायित्वासम्भवात् । नापि मनो हेतुः । बाह्येन्द्रियरहितस्य मनसो बहिर्विषयेष्वप्रवृत्तेः । अन्यथा अन्धबधिराद्यभावः स्यात् । नापि विलीनमलोपलेपमात्मस्वरूपमेव । मलोपलेपस्य हि सर्वथा विलयो भवेद्देशतो वा । न प्रथमः । सर्वथा मलोपलेपस्य विलयासम्भवात् । तथा हि स मलोपलेप आत्मनोऽभिन्नो भिन्नो वा । यद्यभिन्नः । तदा तद्विलये आत्मनोऽपि विलयः स्यात् । तथा सति मूलनाशाद्विलीनं धर्म्मादिदर्शनम् । अथ भिन्नः तदा तथासत्यात्मस्वरूपस्य तदवस्थत्वात्पूर्वमिव तद्विलयसमयेऽपि न धर्म्मादिदर्शनं स्यात् । तदवस्थावत्पूर्वमपि वा भवेत् । विशेषाभावात् । तथा स मलोपलेपः सादिरनादिर्वा । यदि सादिः । तदा मलोपलेपात्पूर्वं धर्म्मादिदर्शनप्राप्तिः मलोपलेपाभावाविशेषात् । अथानादिः । तर्हि न तद्विलयः । अनादित्वादात्मस्वरूपवत् । भवतु वा मलोपलेपविलयः । तथापि पुनर्मलान्तरोपलेपसम्भवाद्धर्मादिदर्शनाभावः स्यात् । तथा मलोपलेपविलये हेतुरभि-

१ ' तत्तथा ' इति प. पुस्तके पाठः । २ ' स ' इत्याधिकं प. पुस्तके

धानीयः । स तु प्रतिदर्शनभिन्न इति । तस्यापि न नैयत्यं सम्भवति । तन्न सर्वथा मलोपलेपविलये आत्मस्वरूपं धर्म्मादिदर्शनस्य हेतुः । नापि देशतो मलोपलेपविलयः । यतस्तस्मिन् सति यद्यात्मस्वरूपं धर्म्मादिदर्शनहेतुः स्यात् । तदा सर्वेषां धर्म्मादिदर्शनोपपत्तिः । देशतो मलोपलेपविलयस्य सर्वेषां सम्भवात् । तन्न विलीनमलोपलेपमात्मस्वरूपमपि धर्म्मादिदर्शनहेतुः । ततो हेत्वभावाद्धर्म्मादिदर्शनाभाव इति फलितमस्मदाशावल्लरीभिः । एतदपि **तरस्विनीशैवलिनीप्रवाहनीयमानदेहस्य दूर्वापल्लवलवावलम्बनम्** । सिद्धे हि प्रमाबलेन धर्म्मादिदर्शने नूनं तदनुसारवता हेतुना भाव्यम् । साध्यं हि निःसंशयमुपलभ्य साधनं तदनुसारि सम्भाव्यते[1] । न तु साधनानुपपत्तिमात्रान्निर्मलानुमानसिद्धमपि साध्यं प्रतिषिध्यते । तत्र न बाह्येन्द्रियं भावना भावनासहितं बाह्येन्द्रियं मनो वा धर्म्मादिदर्शनहेतुरभिधीयते । येन तद्भेदोपदर्शितदोषा नः पतेयुः । विलीनमलोपलेपं चात्मस्वरूपं तस्य हेतुरिष्यत एव । तत्र तु यदुदितं मलोपलेपस्य हि सर्वथा विलयो देशतो वेत्यादि । तत्र सर्वथा मलोपलेपविलये सर्वथा देशतो मलोपलेपविलये देशतः । ततो नात्र दोषलेशोऽपि । तथा यदन्यत्मलपितम्, स मलोपलेप आत्मनो भिन्नोऽभिन्नो वेत्यादि । तदप्यसम्बद्धम् । मलोपलेपस्यात्मनः सर्वथा भिन्नस्य अभिन्नस्य वानभ्युपेतत्वात् । भिन्नाभिन्नस्य तस्य प्रमाबलतः प्रतीतेः । अतः सर्वथा भेदेऽभेदे वा दर्शिता दोषा अनभ्युपगमपरिहृता एव । तथा स मलोपलेपः सादिरनादिर्वेत्याद्यप्यवधानशून्यव्याहृतम् । प्रवाहतोऽनादेर्विशेषाश्रयात्तु सादेस्तस्य संदर्शितत्वात् । तपनीयोपलादौ मलोपलेपस्य तथाविधस्यैव दर्शनात् । भवतु वेत्यादिना मलोपलेपान्तरोत्पादप्रतिपादनमपि नोपपन्नम् । मलोपलेपान्तरहेतोर्मिथ्यादर्शनादेः पूर्वमलोपलेपस्य सर्वथा विलयात् । न हि हेतुविनाशे साध्यं सम्भवति । सर्वथाप्यशुद्धि-

[1] 'सम्भाव्येत' इति भ. पुस्तके पाठः ।

विनाशे हेम्न इव । मलोपलेपस्यापि विलये हेतुरभिधानीय इत्याद्यपि प्रमाविधापरिश्रमाभावपिशुनम् । भेदेऽपि मलोपलेपविलयस्य हेतोर्यः पूर्वापराविरुद्धसिद्धान्तप्रतिपादितः स एव रत्नत्रयरूपोऽस्य हेतुर्भविष्यति । यदि तु भवता सर्वथा संशयितेन स्थीयते । तदा सुरपुरादिप्राप्तेऽपि न यतनीयम् । तत्रापि प्रवादिनां परस्परं विप्रतिपत्तेः । एवमपि ।

विश्वत्रयोदरदरीविवरान्तरस्थ-
धर्म्माद्यतीन्द्रियपदार्थपरम्परायाः ॥
निर्भीसमानगुणताभ्युदितः स एव
श्रीसर्ववेदिदिवसाधिपतिः प्रसिद्धः ॥ ३४४ ॥
त्रिवर्गपरिहारेण कृतं सर्वज्ञसाधनम् ॥
त्रिवर्गपरिहारेण स्थितायास्तु पदाय नः ॥ ३४५ ॥
सर्वज्ञसामान्यमिदं प्रसिद्ध-
मित्थंविशेषस्तु कथं प्रसिद्धयेत् ॥
तस्यापि सिद्धिर्ननु नातिदूरे
स्याद्वादिनां दर्शयतां प्रमाणम् ॥ ३४६ ॥ २३ ॥

तदाह—

॥ तद्वानर्हन्निर्दोषत्वादिति ॥ २४ ॥

तद्यथोक्तलक्षणलक्षितं केवलज्ञानं नित्यमस्यास्ति स तद्वानिति नित्ययोगे मत्वर्थीयः । अर्हति देवादिकृतां पूजामित्यर्हन् श्रीवर्धमानादिः । अत्र हेतुर्निर्दोषत्वादिति । दोषा रागद्वेषाज्ञानलक्षणाः निष्क्रान्तो दोषेभ्यो निर्दोषस्तस्य भावस्तत्त्वं तस्मात् । प्रयोगस्त्वेवम् । अर्हन् सर्वज्ञो निर्दोषत्वाद्यस्तु न सर्वज्ञो नासौ निर्दोषो यथा सम्प्रतिपन्नो निर्दोषश्चार्हंस्तस्मात्सर्वज्ञ इति ॥ २४ ॥

१ ' निर्भासनाय सतताभ्युदितः स एष ' इति प. भ. पुस्तकयोः पाठः ।

अथ विप्रतिपन्नम्प्रति निर्दोषत्वमर्हतः प्रसाधयन्नाह—

॥ निर्दोषोऽयं प्रमाणाविरोधिवाक्त्वादिति ॥२५॥

निर्दोष इति पूर्ववत् । अयमित्यर्हन् । अत्र हेतुः प्रमाणाविरोधिवाक्त्वादिति । प्रमाणं प्रत्यक्षादि तेनाविरोधिनी वाग् यस्य स तथा तस्य भावस्तत्त्वं तस्मात् । प्रयोगः पुनरेवम् । अर्हन् मोक्षसंसारतत्कारणेषु निर्दोषस्तत्र प्रमाणाविरोधिवाक्त्वाद्यो यत्र प्रमाणाविरोधिवाक् स तत्र निर्दोषो यथा क्वचिद्व्याध्युपशमे भिषग्वरः ; प्रमाणाविरोधिवाक्चार्हन् मोक्षसंसारतत्कारणेषु । तस्मान्निर्दोष इति ॥ २५ ॥

प्रमाणाविरोधिवाक्त्वमप्यर्हतः प्रसाधयन्नाह—

॥ तदिष्टस्य प्रमाणेनाबाध्यमानत्वात्तद्वाचस्तेनाविरोधसिद्धिरिति ॥ २६ ॥

तस्यार्हत इष्टं प्रतिपाद्यतया सम्मतं मोक्षादितत्त्वं तस्य । प्रमाणेनाबाध्यमानत्वाद्धेतोः । तस्यार्हतो वाक् तस्याः । तेन प्रमाणेनाविरोधसिद्धिः । प्रयोगस्त्वेवम् । अर्हन् मोक्षसंसारतत्कारणेषु प्रमाणाविरोधिवाक् तत्र प्रमाणाबाध्यमानाभिमततत्त्वत्वात् । यस्य यत्राभिमतं तत्त्वं प्रमाणेन न बाध्यते स तत्र प्रमाणविरोधिवाक् । यथा रोगस्वास्थ्ये तत्कारणतत्त्वे भिषग्वरः । न बाध्यते च प्रमाणेनार्हतोऽभिमतं तत्त्वं मोक्षसंसारतत्कारणेषु । तस्मात्तत्रासौ प्रमाणाविरोधिवागिति । एवं च मोक्षसंसारतत्कारणतत्त्वलक्षणस्य विषयस्य प्रमाणेनाबाध्यमानत्वाद्विषयिण्या अर्हद्वाचः प्रमाणाविरोधित्वसिद्धिः ।

भगवतोऽभिमतं मोक्षतत्त्वं न प्रत्यक्षादिप्रमाणेन बाधितमित्युपपादनम् ।

तत्र न तावद्भगवतोऽभिमतं मोक्षतत्त्वं प्रमाणेन बाध्यते । प्रत्यक्षस्य तदविषयत्वेन तद्बाधकत्वानुपपत्तेः । अनुमानमपि मोक्षप्रतिक्षेपदक्षं न सम्भवत्येव । नास्ति कस्यचिन्मोक्षः सदुपलम्भकप्रमाणपञ्चकागोचरत्वात् कूर्मरोमादिवदित्यत्रानुमानं बाधकमस्तीति चेत् । मैवम् । असिद्धसाधनत्वादस्यानुमानस्य । अनुमानादागमाच्च

प्रसिद्धप्रामाण्यान्मोक्षास्तित्वस्य व्यवस्थापयिष्यमाणत्वात् । अत एवागमोऽपि मोक्षतत्त्वं न बाधते । तथा मोक्षकारणतत्त्वमपि न प्रमाणेन विरुध्यते । प्रत्यक्षेणाकारणकमोक्षप्रतिपत्तेरभावात्तेन तद्बाधनायोगात् । नानुमानेनापि तद्बाधनम् । ततो मोक्षस्य कारणवत्त्वप्रसिद्धेः । तथा हि सकारणको मोक्षः प्रतिनियतकालादित्वात्कलशादिवत् । तस्याकारणकत्वे सर्वदा सर्वत्र सर्वस्य सद्भावानुषङ्गः । परापेक्षारहितत्वादिति । नागमेनापि मोक्षकारणतत्त्वं बाध्यते । तस्य तत्साधकत्वात् । " **सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः** " इति वचनात् । तथा संसारमपि न प्रमाणेन बाध्यते । प्रत्यक्षतः संसाराभावासिद्धेस्तस्य च तद्बाधकत्वाघटनात् । तथा हि स्वोपात्तकर्मवशादात्मनो भवान्तरावाप्तिः संसारः स न प्रत्यक्षविषयो येन प्रत्यक्षं तं बाधेत । अनुमानं तद्बाधकमिति चेत् । न । संसारतत्त्वाभावप्रतिबद्धलिङ्गाभावात् । ननु गर्भादिमरणपर्यन्तचैतन्यविशिष्टकायात्मनः पुरुषस्य जन्मनः पूर्वं मरणाच्चोत्तरं नास्ति भवान्तरमनुपलब्धेः खपुष्पवदित्यनुपलम्भः संसारतत्त्वाभावग्राहकः संसारतत्त्वस्य बाधक इति चेत् । नैतत् । चैतन्यानुपलम्भस्यासिद्धेः । प्राणिनामाद्यं चैतन्यं चैतन्योपादानकारणकं चिद्विवर्त्तत्वान्मध्यचैतन्यविवर्त्तवत् । तथान्त्यचैतन्यं चैतन्यकार्यकं तत एव तद्वदित्यनुमानाभ्यां पूर्वोत्तरभावोपलम्भाद्यथोक्तसंसारतत्त्वसिद्धेः । गोमयादेरचेतनाच्चेतनस्य वृश्चिकादेरुत्पत्तिदर्शनात्तेन व्यभिचारी प्रथमानुमाने हेतुरिति न वाच्यम् । वृश्चिकादिचैतन्यस्य पक्षीकरणात् । तथा हि वृश्चिकादिशरीरस्याचेतनस्यैव गोमयादेरचेतनात् सम्मूर्च्छनं न पुनर्वृश्चिकादिचैतन्यविवर्त्तस्य । तस्य पूर्वचैतन्यविवर्त्तनादेवोत्पत्तिप्रतिज्ञानात् । बुद्धचरमचित्तेन चित्तान्तरस्याजनकेन व्यभिचारो द्वितीयानुमाने हेतोरित्यपि न मन्तव्यम् । बुद्धचरम-

१ तत्त्वार्थसू. १।१. २ ' बाधते ' इति प पुस्तके पाठः । ३ 'नैतद्वचनीयम् । अनुपलम्भस्य ' इति प. भ. पुस्तकयोः पाठः ।

चित्तस्यैव चित्तान्तराजनकस्य प्रमाणतोऽप्रसिद्धत्वात् । निरन्वय-क्षणक्षयस्य प्रतिक्षेप्स्यमानत्वात् । अथ यथा प्रथमः पथिकाग्निररणिनिर्मन्थनसमुत्थो नाग्निपूर्वको दृष्टः । परस्त्वग्निपूर्वक एव । तथाद्यं चैतन्यं कायाकारपरिणतभूतेभ्यो भविष्यति । परं तु चैतन्यपूर्वकं विरोधाभावादिति चेत् । अनुत्तरमेतत् । चिद्विवर्त्तत्वस्य हेतोः साध्येन व्याप्तेरखण्डनात् । प्रथमपथिकाग्नेरनभ्युपादानत्वं च जलादीनामप्यजलाद्युपादानत्वापत्तेः पृथिव्यादिभूतचतुष्टयस्य तत्त्वान्तरभावविरोधः । तथा हि येषां परस्परमुपादानोपादेयभावस्तेषां न तत्त्वान्तरत्वम् । यथा क्षितिविवर्त्तानाम् । परस्परमुपादानोपादेयभावश्च पृथिव्यादीनामित्येकमेव पुद्गलतत्त्वं पृथिव्यादिविवर्त्तमवतिष्ठेत । अथ क्षित्यादीनां न परस्परमुपादानोपादेयभावः सहकारिभावोपगमादित्युच्यते । तर्हि कथमपावकोपादानः प्रथमः पथिकपावकः प्रसिद्ध्येत् । यतस्तद्वदचेतनपूर्वकं प्रथमं चैतन्यं प्रसज्येत । यथैव हि प्रथमाविर्भूतपावकादेस्तिरोहितपावकान्तरादिपूर्वकत्वम् । तथा गर्भचैतन्यस्याविर्भूतस्वभावस्य तिरोहितचैतन्यपूर्वकत्वमिति किं न व्यवस्था स्यात् । स्यान्मतं सहकारिमात्रादेव प्रथमपथिकाग्नेरुत्पादस्वीकारात्तिरोहिताभ्यन्तरोपादानत्वमसिद्धमिति । तदनुपपन्नम् । अनुपादानस्य कस्यचिदुत्पादादर्शनात् । शब्दविद्युदादेरुपादानादर्शनाददोषश्चेत् । नैवं वाच्यम् । शब्दादिः सोपादान एव कार्यत्वात्कुम्भादिवदित्यनुमानात्तस्याद्दृश्योपादानस्यापि सोपादानत्वसाधनात् । नन्वस्तु सर्वोऽग्निरभ्यन्तरोपादान एव । सर्वस्य[1] सजातीयोपादानत्वव्यवस्थितेः । चेतनस्य[2] चेतनान्तरोपादानत्वनियमो न युक्तः । तस्य भूतोपादानत्वघटनात् । भूतचेतनयोः सजातीयान्तरत्वासिद्धेरिति चेत् । तदपि न न्यायसङ्गतम् । तयोर्भिन्नलक्षणत्वात्तत्त्वान्तरत्वोपपत्तेः। तोयपावकयोरपि भिन्नलक्षणत्वादेव परैस्तत्त्वान्तरत्वसाधनात् । तथा हि

१ ' सर्वस्य ' इति प. भ. पुस्तकयोः पाठः । २ 'चेतनस्य तु ' इति प. भ. पुस्तकयोः पाठः ।

तत्त्वान्तरं भूतेभ्यश्चैतन्यं तद्भिन्नलक्षणत्वान्यथानुपपत्तेः । नात्रासिद्धो हेतुः । क्षित्यादिभूतेभ्यो रूपादिसामान्यलक्षणेभ्यः स्वसंवेदनलक्षणस्य चैतन्यस्य भिन्नलक्षणत्वसिद्धेः । न हि भूतानि स्वसंवेदनलक्षणानि अस्मदाद्यनेकप्रतिपतृप्रत्यक्षत्वात् । यत्पुनः स्वसंवेदनलक्षणं तन्न तथा प्रतीतं यथा ज्ञानम् । तथा च भूतानि तस्मान्न स्वसंवेदनलक्षणानि । अनेकयोगिप्रत्यक्षेण सुखादिसंवेदनेन व्यभिचारी हेतुरिति न शङ्कनीयम् । अस्मदादिग्रहणात् । न च ज्ञानस्य स्वसंवेदनलक्षणत्वमसिद्धम् । अधस्तात्सप्रपञ्चमुपपादितत्वात् । तदेवं भूतचैतन्ययोर्भिन्नलक्षणत्वं प्रसिद्धं सत्तत्त्वान्तरत्वं तयोः साधयति । तच्चासजातीयत्वम् । तदप्युपादानोपादेयभावाभावम् । उपादानोपादेयभावस्य सजातीयत्वप्रयोजकत्वात् । तदेवं भूतचेतनयोर्नास्त्युपादानोपादेयभावो भिन्नलक्षणत्वादिति । व्यापकविरुद्धस्य व्याप्तोपलब्धिः । उपादानोपादेयभावव्यापकस्य सजातीयत्वविशेषस्योपादानोपादेयभावव्यापकत्वमसिद्धम् । विजातीयत्वाभिमतयोः पयःपावकयोः सत्त्वादिना सजातीययोरप्युपादानोपादेयभावानभ्युपगमात् । कथंचिद्विजातीययोरपि मृद्घटाकारयोः पार्थिवत्वादिना विशिष्टसामान्येन सजातीययोरुपादानोपादेयभावसिद्धेः । कथं तर्हि सजातीयत्वविशेषस्य तत्त्वान्तरभावेन विरोध इति चेत् । तत्त्वान्तरभूतयोर्जलानलयोः सजातीयत्वविशेषस्य जलत्वादेरनुपलम्भात् । पूर्वाकारापरित्यागाजहद्वृत्तोत्तराकारान्वयप्रत्ययविषयस्योपादानत्वप्रतीतेः । परित्यक्तपूर्वाकारेण द्रव्येणात्मसात्क्रियमाणोत्तराकारस्योपादेयत्वविज्ञानात् । अन्यथातिप्रसङ्गात् । कथं तत्त्वान्तरभावेन भिन्नलक्षणत्वं व्याप्तमिति चेत् । उच्यते । तत्त्वान्तरभावस्याभावे भिन्नलक्षणत्वस्यानुपपद्यमानत्वात् । किण्वादिमदिरादिपरिणामयोरतत्त्वान्तरभावेऽपि भिन्नलक्षणत्वस्य दर्शनात्तस्य तत्त्वान्तरभावेनाव्याप्तिरिति चेत् । न । तयोर्भिन्नलक्षणत्वासिद्धेः । किण्वादिरपि मदजननशक्तिसद्भावान्मदि-

---

१ 'तस्मान्न' इत्यधिकं प. म. पुस्तकयोः ।

रादिपरिणामवत्। सर्वथा मदजननशक्तिविकलत्वे हि कण्वादेर्मदिरादि-
परिणामदशायामपि तद्वैकल्यप्रसङ्गः । नन्वेवं भूतान्तस्तत्त्वयोरपि
भिन्नलक्षणत्वं मामूतत्कायाकारपरिणतभूतविशेषावस्थातः प्रागपि
क्षित्यादिभूतानां चैतन्यशक्तिसद्भावात् । अन्यथा तदवस्थायामपि
चैतन्योद्भूतिविरोधादिति चेत् । नैवं प्रत्यवस्थेयम् । चैतन्यस्यानाद्य- ५
नन्तत्वसिद्धेरात्मवादिनामिष्टप्रतिष्ठानात् । न चैवं चैतन्यस्य भूतवि-
वर्त्तत्वापत्तिः । क्षित्यादितत्त्वस्यापि चैतन्यविवर्त्तत्वप्रसङ्गात् । अनाद्यन-
न्तत्वाविशेषात् । ततो भिन्नलक्षणत्वं तत्त्वान्तरत्वेन व्याप्तं भूतचैतन्य-
योस्तत्त्वान्तरत्वं साधयत्येवेति चैतन्यपरिणामोपादान एवाद्यचैतन्य-
परिणामः । प्राणिनामन्त्यचैतन्योपादेयश्च जन्मान्तराद्यचैतन्यपरिणामः १०
सिद्धः । पूर्वभवत्यागेन भवान्तरपरिग्रह एव संसार इति न संसार-
तत्त्वमनुमानेन बाध्यते । नाप्यागमेन । तस्य तत्प्रतिपादकतया श्रुतेः,
"संसारिणस्त्रसस्थावराः" इति वचनात् । तथा संसारो-
पायतत्त्वमपि मिथ्यादर्शनादिकं न प्रमाणेन बाध्यते । प्रत्यक्षस्य तद-
विषयत्वेन तदबाधकत्वात् । निर्हेतुकः संसारोऽनाद्यनन्तत्वादाकाशा- १५
दिवदित्यनुमानेन । तद्बाध्यत इति चेत् । नैतदुचितम् । पर्यायार्था-
देशात्संसारस्यानाद्यनन्तत्वासिद्धेः । दृष्टान्तस्यापि व्योम्नः क्षिति-
खननकूपोत्सेचनादौ सहेतुकतया सादिसान्ततया साध्यसाधनविकल-
त्वात् । द्रव्यार्थादेशात्तु संसारस्य निर्हेतुकत्वेन सम्भतत्वात् ।
सुखदुःखादिभावपरिवर्त्तनलक्षणस्य संसारस्य द्रव्यक्षेत्रकालभावभव- २०
विशेषहेतुकत्वप्रतीतेः नाहेतुसंसारसाधनानुमानमनवद्यमिति । न
किंचिदनुमानं संसारोपायतत्त्वस्य बाधकं सम्भवति । नाप्यागमः ।
तस्य तत्साधकत्वात् "मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्ध-
हेतवः" इति वचनात् । बन्धहेतूनामेव च संसारहेतुत्वात् । तदेवं

१ 'एव च' इति प. भ. पुस्तकयोः पाठः । २ तत्त्वार्थ. २।१२. ३ 'प्रतीतेश्च' इति प. भ. पुस्तकयोः पाठः । ४ तत्त्वार्थ. ८।१.

मोक्षसंसारतत्कारणतत्त्वं भगवतोऽभिमतं प्रमाणेन प्रत्यक्षादिनाऽबाध्यं सिध्यत्तद्बाचस्तेनाविरोधित्वं साधयति । तच्च निर्दोषत्वम् । तदपि सर्वज्ञत्वमिति । एवं च ।

निष्कण्टकेन ऋजुना तदनेन तूर्णं निष्कम्पयुक्तिसुपथा निरुपद्रवेण ॥
५ अर्हन्महीधरशिखाशिखरे सुखेन सर्वज्ञता समधिरोहति नेतरत्र॥३४७॥

कपिलादीनां सर्वज्ञत्वस्य मोक्षतत्त्वस्य च खण्डनम् ।

ननु निर्दोषत्वेन कपिलादयोऽपि किमिति सर्वज्ञा न भवन्ति । उच्यते । तेषां प्रमाणविरुद्धभाषित्वेन निर्दोषत्वासिद्धेः । तथा हि कपिलादयो न निर्दोषाः प्रमाणविरुद्धभाषित्वाद्ये प्रमाणविरुद्धभाषिणस्ते
१० न निर्दोषा यथा दुर्वैद्यादयस्तथा च कपिलादयस्तस्मान्न निर्दोषा इति । न चात्र प्रमाणविरुद्धभाषित्वं कपिलादीनामसिद्धम् । तदभिमतस्य मोक्षसंसारतत्कारणतत्त्वस्य प्रमाणेन बाधनात् । तत्र कपिलस्य तावत्स्वरूपे चैतन्यमात्रेऽवस्थानमात्मनो मोक्ष इत्यभिमतम् । तत्प्रमाणेन बाध्यते । चैतन्यविशेषेऽनन्तज्ञानादौ स्वरूपा-
१५ वस्थानस्य मोक्षत्वस्य साधनात् । न ह्यनन्तज्ञानादिकमात्मनोऽस्वरूपम् । सर्वज्ञत्वादिस्वरूपं नात्मन इति च मिथ्या । तस्याचेतनत्वादाकाशवत् । ज्ञानादेरप्यचेतनत्वादचेतनप्रधानस्वभावत्वं युक्तमेवेत्यपि विचारबाह्यम् । प्रमाणाभावात् । नन्वचेतना ज्ञानादय उत्पत्तिमत्त्वाद्घटादिवदित्यनुमानं प्रमाणमस्त्येवेति चेत् । नैतद्वाच्यम् । हेतोरनुभवेन व्यभिचारात् ।
२० तस्य चेतनत्वेऽप्युत्पत्तिमत्त्वात् । कथमुत्पत्तिमाननुभव इति चेत् । परापेक्षत्वात् युद्धादिवत् । परापेक्षोऽसौ, " बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते " इति वचनात् । बुद्धध्यवसितार्थानपेक्षत्वेऽनुभवस्य सर्वत्र सर्वदा पुंसोऽनुभवप्रसङ्गात् सर्वस्य सर्वदर्शित्वापत्तेस्तदुपायानुष्ठानवैयर्थ्यमेव स्यात् । यदि पुनरनुभवसामान्यं नित्यमनुत्पत्तिमदेवेति मतम् ।
२५ तदा ज्ञानादिसामान्यमपि नित्यत्वादनुत्पत्तिमद्भवेदित्यसिद्ध उत्पत्तिमत्त्वादिति हेतुः । ज्ञानादिविशेषाणामुत्पत्तिमत्त्वान्नासिद्ध इति चेत् ।

तर्ह्यनुभवविशेषाणामप्युत्पत्तिमत्त्वादनैकान्तिकोऽसौ कथं न स्यात् । नानुभवस्य विशेषाः सन्तीति चायुक्तम् । वस्तुत्वविरोधात् । तथा हि नानुभवो वस्तु सकलविशेषरहितत्वात् । खरविषाणवत् । नात्मनानेकान्तः । तस्यापि सामान्यविशेषात्मकत्वात् । अन्यथा तद्वदवस्तुत्वापत्तेः । अचेतना ज्ञानादय इति पक्षश्च प्रत्यक्षबाधितः । ज्ञानादीनां स्वसंवेदनप्रत्यक्षत्वाच्चेतनत्वप्रसिद्धेः । अथ चेतनसंसर्गादचेतनस्यापि ज्ञानादेश्चेतनत्वप्रतीतिः प्रत्यक्षतो भ्रान्तैव । तदुक्तम् । "**तस्माच्चित्संसर्गादचेतनं चेतनावदिव लिङ्गम्**" इति । एतदप्यचर्चिताभिधानम् । शरीरादेरप्येवं चेतनत्वप्रतीतिप्रसङ्गात् । चेतनसंसर्गाविशेषात् । शरीराद्यसम्भवी बुद्ध्यादेरात्मना संसर्गविशेषोऽस्तीति चेत् । स कोऽन्योऽन्यत्र कथञ्चित्तादात्म्यात् । आत्मादृष्टकृतत्वादिविशेषस्य च शरीरादावपि भावात् । ततो नाचेतना ज्ञानादयः स्वसंविदितत्वादनुभववत् । स्वसंविदितास्ते परसंवेदनान्यथानुपपत्तेरिति प्रतिपादितप्रायम् । तथा चात्मस्वभावा ज्ञानादयश्चेतनत्वादनुभववदेवेति न चैतन्यामात्रेऽवस्थानं मोक्षः । अनन्तज्ञानादिचैतन्यविशेषावस्थानस्य मोक्षत्वप्रतीतेः । एवं च ।

कपिलः कल्पयामास यदिदं मोक्षलक्षणम् ॥
परीक्षां क्षमते तन्न स्याद्वादन्यायशालिनाम् ॥ ३४८ ॥

एतेन बुद्ध्यादिविशेषगुणोच्छेदादात्ममात्रेऽवस्थानमात्मनो मुक्तिरिति कणभक्षाक्षपादमतमपि प्रमाणेन बाधितमुपदर्शितम् । पुंसोऽनन्तज्ञानादिस्वरूपत्वसाधनात् । स्वरूपोपलब्धेरेव मुक्तित्वसिद्धेः । स्यान्मतम् । न बुद्ध्यादयः पुंसः स्वरूपं तद्विरुद्धधर्माधिकरणत्वात् घटादिवत् । तद्विरुद्धधर्माधिकरणत्वं पुनस्तेषामुत्पादविनाशधर्मकत्वादात्मनोऽनुत्पादविनाशधर्मकत्वात् प्रसिद्धमिति । तदयुक्तम् । विरुद्धधर्माधिकरणत्वेऽपि सर्वथा भेदाभेदासिद्धेः । मेचकज्ञानतदाकारवत् । एकं हि मेचकज्ञान-

---

१ सां. का. २०.

मनेकश्च तदाकारो नीलादिप्रतिभासविशेष इत्येकत्वानेकत्वविरुद्धधर्माधिकरणत्वभेदेऽपि स्यादिति मतम् । तदा तत्किमनेकया शक्त्याऽनेकमर्थं युगपद्गृह्णाति किं चैकया । यद्यनेकया, तदेकमनेकशक्त्यात्मकमिति स एव विरुद्धधर्माध्यासः । अनेकशक्तेरनेकत्वधर्माधारभूताया ज्ञानात्पृथक्त्वे ज्ञानस्य त्वेकधर्माधारत्वान्नैकत्र विरुद्धधर्माध्यास इति चेत् । तर्हि कथमनेका शक्तिस्तस्येति व्यपदिश्यते, ततो भेदादर्थान्तरवत् । सम्बन्धादिति चेत् , तर्हि तदनेकया शक्त्या सम्बध्यमानमनेकेन रूपेण कथमनेकरूपं न स्यात् । तस्याप्यनेकरूपस्य ततोऽन्यत्वादेकमेवेति चेत् । कथं तर्हि तत्तस्येति व्यपदेष्टव्यम् । सम्बन्धादिति चेत् , तर्हि स एव दोषः । अनिवृत्तश्च पर्यनुयोगोऽनवस्थानात् । यदि पुनरेकेनैव रूपेणानेकया शक्त्या सम्बध्यते । तदा येनैव पीतग्रहणशक्त्या सम्बध्यते तेनैव नीलादिग्रहणशक्त्या चेत्पीतग्राहित्वविशेषणमेव मेचकज्ञानं स्यान्न नीलादिग्राहित्वविशेषणमिति पीतज्ञानमेव तन्न तु मेचकज्ञानम् । अथैकया शक्त्यानेकमर्थं गृह्णातीति द्वितीयविकल्पः समाश्रीयते । तदापि सर्वार्थग्रहणप्रसङ्गः । तथा हि, पीतग्रहणशक्त्यैकया यथा नीलादिग्रहणं तथातीतानागतवर्त्तमानाशेषपदार्थग्रहणमपि केन वार्येत । अथ न पीतग्रहणशक्त्या नीलग्रहणशक्त्या वा पीतनीलाद्यनेकार्थग्राहि मेचकज्ञानमिष्यते किं तर्हि नीलपीतादिप्रतिनियतानेकार्थग्रहणशक्त्यैकयेति मतम् । तदा न कार्यभेदः कारणशक्तिभेदव्यवस्थाहेतुः स्यादित्येकहेतुकं विश्वस्य वैश्वरूप्यं प्रसज्येत । तथा चानेककारणप्रतिवर्णनं सर्वकार्योत्पत्तौ विरुध्यते । तदभ्युपगच्छता मेचकज्ञानमनेकार्थग्राहि नानाशक्त्यात्मकमुररीकर्त्तव्यम् । तेन च विरुद्धधर्माधिकरणेनैकेन प्रकृतहेतोरनैकान्तिकत्वान्न ज्ञानानामात्मनो भेदैकान्तसिद्धिर्येनात्मा तज्ज्ञानादिरूपो न भवेत् । निराकरिष्यमाणत्वाच्च पुरस्ताद्गुणगुणिनोरन्य-

---

१ ' ज्ञानादीनाम् ' इति प. भ. पुस्तकयोः पाठः ।

तैकान्तस्य । न ज्ञानादयो गुणः सर्वथात्मनः पृथग्भूताः शक्याः प्रतिपादयितुम् । यतोऽशेषविशेषगुणनिवृत्तिर्मुक्तिर्व्यवतिष्ठेत । ननु धर्म्माधर्मयोस्तावन्निवृत्तिरात्यन्तिकी मुक्तौ प्रतिपत्तव्या । अन्यथा मुक्तेरनुपपत्तेः । धर्म्माधर्मनिवृत्तौ च तत्फलबुद्ध्यादिविनिवृत्तिरवश्यंभाविनी । निमित्तापाये नैमित्तिकस्यानुपपत्तेः । मुक्तस्यात्मनोऽन्तःकरणसंयोगाभावेन च तत्कार्यस्य बुद्ध्यादेरनुत्पत्तिरित्यशेषगुणनिवृत्तिर्मुक्तौ सिध्यत्येवेति केचित् । तेऽपि धर्म्माधर्मनिबन्धनानां बुद्ध्यादीनामात्मान्तःकरणसंयोगजानां च मुक्तौ निवृत्तिं ब्रुवाणा न निवार्यन्ते । कर्मक्षयहेतुकयोस्तु प्रशमसुखानन्तज्ञानयोर्निवृत्तिमाचक्षाणास्ते न स्वस्थाः । प्रमाणविरोधात् । तथा ह्यात्मा मुक्तो ज्ञानादिमान् सत्त्वान्यथानुपपत्तेः । न खल्वात्मनः सर्वथापि ज्ञानाद्यभावे किंचिदपि स्वरूपं स्यात् । तल्लक्षणत्वात्तस्य । ततः कथञ्चिद्बुद्ध्यादिविशेषगुणानां निवृत्तिर्मुक्तौ व्यवतिष्ठते । न चैवं सिद्धान्तविरोधः । **"औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः"** इति सूत्रसद्भावात् । अत्र ह्यौपशमिकक्षायौपशमिकौदयिकभावानां दर्शनज्ञानगत्यादीनां पारिणामिकभावस्य च भव्यत्वस्याभावान्मोक्ष इत्यभिसम्बन्धान्मुक्तौ विशेषगुणनिवृत्तिरिष्टा । **"अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्य"** इति वचनादनन्तज्ञानदर्शनसम्यक्त्वानामनिवृत्तिश्चेति युक्तमुक्तं कथञ्चिद्बुद्ध्यादिविशेषगुणानां निवृत्तिर्मुक्तौ व्यवतिष्ठत इति । ननु कथमेवमनन्तसुखसद्भावो मुक्तौ सिद्ध्येदिति चेत्, उच्यते । सिद्धत्ववचनात् । सकलदुःखनिवृत्तिरात्यन्तिकी हि भावतः सिद्धत्वम् । सैव चानन्तप्रशमसुखमिति संसारिकसुखनिवृत्तिरपि मुक्तौ न विरुध्यत इति । ततश्च ।

बुद्ध्याद्युच्छेदरूपापि मुक्तिर्योगोपकल्पिता ॥
न्यायबाह्येति नो मान्या स्याद्वादसुभगात्मनाम् ॥ ३४९ ॥

१ बुद्ध्यादरुत्पत्ति' इति प. भ. पुस्तकयोः पाठः । २ तत्त्वार्थ. १०।४. ३ त. श्लो. वा. १०। ४.

अनन्तसुखमेव मुक्तस्य न ज्ञानादिकमित्यानन्दोपरोधेन सुखैकस्वभावाभिव्यक्तिर्मोक्ष इति ब्रह्माद्वैतवादिमतम् । "आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते" इति वचनात् । एतदपि प्रमाणेन बाध्यत एव ।

ब्रह्माद्वैतवादिसंमतस्य मोक्षस्य खण्डनम् ।

तथा ह्यनन्तसुखं मुक्तौ पुंसः संवेद्यमसंवेद्यं वा । संवेद्यं चेत्, तत्संवेदनस्यानन्तस्य सिद्धिः । अन्यथानन्तस्य सुखस्य स्वयम्भुसंवेद्यत्वविरोधात् । यदि पुनरसंवेद्यमेव तत् । तदा कथं सुखं नाम । असंविदितस्य व्यवस्थापयितुमशक्यत्वात् । स्यान्मतं तेऽभ्युपगम्यते एवानन्तसुखसंवेदनं परमात्मनः । केवलं बाह्यार्थानां ज्ञानं नाभ्युपगम्यते, तदप्येवं सम्प्रधार्यम् । किं बाह्यार्थवेदनाभावो मुक्तस्य । बाह्यार्थाभावादिन्द्रियापायाद्वा । प्रथमपक्षे न सुखस्यापि संवेदनं युक्तम् । तस्यापि बाह्यार्थवदभावात् । पुरुषाद्वैतवादे हि बाह्यार्थाभावो यथाभ्युपगन्तव्यस्तथा सुखाभावोऽपि । अन्यथा द्वैतप्रसङ्गात् । अथ द्वैतवादावलम्बिना सतोऽपि बाह्यार्थस्येन्द्रियापायादसंवेदनं मुक्तस्येति मतम् । तर्हि सुखसंवेदनमपि तस्य न स्यात् । अन्तःकरणस्य तद्ग्राहकस्येन्द्रियस्यापायात् । अथान्तःकरणाभावेऽपि मुक्तस्यातीन्द्रियसंवेदनेन सुखसंवेदनमिष्यते । तर्हि बाह्यार्थवेदनमप्यस्तु तस्यातीन्द्रियज्ञानेनैवेति मन्यताम् । सर्वथा विशेषाभावात् ।

नैवमुक्तिरुपपद्यते ततो ब्रह्मवादिपरिकल्पितापि च ॥
एवमस्तु विजयैकभूषणं जैनशासनमपास्तदूषणम् ॥ ३५० ॥

सौगतास्तु केचिन्निराश्रयचित्तसन्तानोत्पत्तिर्मोक्ष इत्याचक्षते । तत्राविद्यातृष्णारहितं चित्तं निराश्रयमित्यभिधीयते । अविद्या रागद्वेषाभिलाषः । तृष्णा तु भाविभोगाभिलाषः । अपरे पुनः "प्रदीपनिर्वाणवत्सर्वथा चित्तसन्तानोच्छेदो मोक्ष" इति सञ्जिरन्ते । तेषामुभयेषामपि मोक्षतत्त्वं

बौद्धाभिमतमोक्षस्य खण्डनम् ।

प्रमाणेन बाध्यते । चित्तानां तत्त्वतोऽन्वितत्वस्य सर्वथा सन्तानोच्छेदानुपपत्तेश्च समर्थयिष्यमाणत्वात् । निरन्वयक्षणक्षयैकान्ताभ्युपगमे च मोक्षाङ्गीकारबाधनस्याभिधास्यमानत्वादिति ।

तदित्थं बौद्धसिद्धान्तवासनाग्रस्तमानसैः ॥
मोक्षस्वरूपं कथितं न न्यायमनुगच्छति ॥ ३ ९१ ॥ ५

कपिलादिपरिकल्पितमोक्षकारणतत्त्वसंसारतत्त्वयोः खण्डनम् ।

तथा मोक्षकारणतत्त्वमपि कपिलादिभिः परिकल्पितं प्रमाणविरुद्धम् । तथा हि ज्ञानमात्रं न परं निःश्रेयसकारणम् । प्रकर्षपर्यन्तावस्थायामप्यात्मनि शरीरेण सहावस्थानान्मिथ्याज्ञानवत् । न तावदिहासिद्धो हेतुः । सर्वज्ञानामपि कपिलादीनां प्रकर्षपर्यन्तावस्थाप्राप्तस्यापि १० ज्ञानस्य शरीरेण सहावस्थानाभ्युपगमात् । साक्षात्सकलार्थज्ञानोत्पत्त्यनन्तरं शरीराभावे कुतोऽयमाप्तस्योपदेशः प्रवर्त्तेत । अशरीरस्याप्तस्योपदेशकरणविरोधादाकाशवत् । अनुत्पन्नसकलार्थज्ञानस्याप्तस्योपदेश इति चेत्, मैवम् । तथाविधाप्तोपदेशस्याप्रमाणत्वशङ्कनानिवृत्तेः । अन्याज्ञानपुरुषोपदेशवत् । यदि पुनः शरीरान्तरानुत्पत्तिर्निःश्रेयसं १५ न गृहीतशरीरनिवृत्तेः । शरीरान्तरानुत्पत्तिरूपस्य च निःश्रेयसस्य साक्षात्त्रिलितत्त्वज्ञानं कारणम् । नतु गृहीतशरीरनिवृत्तिः फलोपभोगाद्गृहीतशरीरनिवृत्तेः स्वीकारात् । ततः पूर्वोपात्तेन शरीरेण सहावतिष्ठमानतत्त्वज्ञानादाप्तस्योपदेशो युक्त इति मतम् । तदा शरीरेण सहावस्थानादिति हेतुः सिद्धोऽभ्युपगतस्तावत् । स च पर- २० निःश्रेयसाकारणत्वं तत्त्वज्ञानस्य साधयत्येव । भाविशरीरस्येवोपात्तशरीरस्यापि निवृत्तेः परनिःश्रेयसत्वात् । तस्य च तत्त्वज्ञानसद्भावेऽप्यभावात् । अथ फलोपभोगकृतोपात्तकर्मक्षयापेक्षं तत्त्वज्ञानं परनिःश्रेयसकारणमित्युच्यते । तदप्ययुक्तम् । फलोपभोगस्योपक्रमिकविकल्पानतिक्रमात् । फलोपभोगस्योपक्रमिकत्वे कुतस्तदुपक्रमोऽन्यत्र तपोतिशयादिति तत्त्वज्ञानं २५

१ ' प्रवर्तते ' इति प. पुस्तके पाठः ।

तपोतिशयहेतुकं परनिःश्रेयसमायातम्। समाधिविशेषादुपात्ताशेषकर्मफलोपभोगाभ्युपगमाददोष इति चेत्, कः पुनरसौ समाधिः। स्थिरीभूतं ज्ञानमेव स इति चेत्, तदुत्पत्तौ परनिःश्रेयसस्य भावे स एवास्योपदेशाभावः। ननु सकलतत्त्वज्ञानस्यास्थैर्यावस्थायामसमाधिरूपस्योत्पादे युक्तो योगिनस्तत्त्वोपदेश इति चेत्, नैतदुपपन्नम्। सकलतत्त्वज्ञानस्यास्थैर्यविरोधात्। तस्य कदाचिच्चलनादुपपत्तेः। यौगपद्येन प्रवृत्तत्वाद्विषयान्तरसंचारणाभावात्। अन्यथा सकलतत्त्वज्ञानत्वासम्भवादस्मदादिवत्। अथ तत्त्वोपदेशदशायां योगिनोऽपि ज्ञानं विनेयजनप्रतिबोधाय व्याप्रियमाणमस्थिरमसमाधिरूपं पश्चान्निवृत्तसकलव्यापारं स्थिरं समाधिव्यपदेशमास्कन्दतीत्युच्यते। तर्हि समाधिश्चारित्रमिति नाममात्रं भिद्यते नार्थः। तत्त्वज्ञानादशेषाज्ञाननिवृत्तिफलादन्यस्य परमोपेक्षालक्षणस्य स्वभावस्य समुच्छिन्नक्रियाप्रतिपातिपरमशुक्लध्यानस्य तपोतिशयस्य समाधिव्यपदेशकारणत्वात्। तथा च चारित्रसहितं तत्त्वज्ञानमन्तर्भूततत्त्वार्थश्रद्धानं परनिःश्रेयसकारणमनिच्छतामपि कपिलादीनामग्रे व्यवस्थितम्। ततोऽनुमानविरुद्धं सर्वथैकान्तवादिनां मोक्षकारणतत्त्वं स्वागमविरुद्धं च। सर्वेषामागमे प्रव्रज्याद्यनुष्ठानस्य सकलदोषापगमस्य च बाह्यस्याभ्यन्तरस्य च चारित्रस्य मोक्षकारणतया श्रवणात्।

तदित्थं कपिलादीनामभिप्रायेण सर्वथा ॥
न मोक्षकारणं किञ्चिद्घटामञ्चति तत्त्वतः ॥ ३५२ ॥

संसारतत्त्वं चान्येषां प्रमाणविरुद्धम्। तथा हि नास्ति नित्यत्वादि एकान्ते कस्यचिद्विक्रियानुपलब्धेरित्यनुमानविरोधः। तथागमविरोधश्च, **"तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् ॥ संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ १ ॥"** इति

१ 'अस्मदादिज्ञानवत्' इति प. पुस्तके पाठः। २ 'कारणात्' इति प. भ. पुस्तकयोः पाठः। ३ सां का. ६२.

वचनेन कापिलैः प्रकृतेरेव संसाराभ्युपगमतः पुरुषस्य संसाराभाव-प्रतिपादनात् । सौगतैः पुनः संवृत्त्यैव सर्वव्यवहारस्वीकरणेन परमार्थवृत्त्या संसारानभ्युपगमादिति ।

न संसारस्वरूपं च तदेवमुपपद्यते ॥
स्याद्वादन्यायबाह्यानां सर्वेषामपि वादिनाम् ॥ ३५३ ॥ ५

संसारकारणतत्त्वमप्यपरेषां प्रमाणविरुद्धम् । तद्धि मिथ्याज्ञानमात्रं तैरङ्गीकृतम् । न च तत्कारणकः संसारः । तन्निवृत्तावपि संसारानिवृत्तेः । यन्निवृत्तावपि यन्न निवर्तते न तत्तन्मात्रकारणकम् । यथा सूत्रधारादिनिवृत्तावप्यनिवर्तमानं प्रासादादि न तन्मात्रकारणकम् । मिथ्याज्ञाननिवृत्तावप्यनिवर्तमानश्च संसारः । तस्मान्न मिथ्याज्ञान- १०
मात्रकारणक इति । नात्र हेतोरसिद्धिः । सम्यग्ज्ञानोत्पत्तौ सत्यां मिथ्याज्ञाननिवृत्तावपि दोषानिवृत्तौ संसारानिवृत्तेः स्वयमभिधानात् । दोषाणां संसारकारणत्वप्रतिपादकागमस्वीकरणाच्चेति । मिथ्याज्ञानमात्रं संसारकारणतत्त्वं प्रमाणविरुद्धम् । एवं च,

संसारकारणमपीह विचार्यमाणं १५
सन्न्यायतः कथमपि स्थितिमेति नैव ॥
जैनेन्द्रदर्शनपराङ्मुखमानसानां
सिद्धिं गतः प्रकृतहेतुरतश्च नूनम् ॥ ३५४ ॥

एवं प्रसिद्धत्वे प्रमाणविरुद्धभाषित्वादिति हेतोः कपिलादीनां सदोषत्वं सिद्धम् । तथा च, २०

नैवैते कपिलादयः कथमपि प्राप्तुं भवन्तीश्वराः
सर्वज्ञत्वमशेषदोषविसरप्रध्वंशलभ्योद्भवम् ॥
अर्हन्नेव ततः समस्तजगतां साक्षात्कृतौ प्रत्यलः
सिद्धः प्रौढतरप्रमाणवशतः प्रेक्षावतां पश्यताम्॥ ३५५॥

ईश्वरसर्वज्ञत्वखण्डनमसहमानस्य नैयायिकस्य मतमुद्भाव्य तत्खण्डनम् ।

अत्राह योगपरिपत्प्रतिषिध्यते स्म
सर्वज्ञता स्मररिपोर्यदि दोषवत्त्वात् ॥
युक्तं न तन्निखिलदूषणजालमुक्तो
यस्मादयं सततमुक्ततया स्थितत्वात् ॥३५६॥

किं च ।

असर्ववित्त्वं हिमरश्मिमौलेर्युक्तं न वक्तुं मतिमांसलानाम् ॥
यदेष विश्वत्रयसूत्रणायामेकः परं शाश्वतसूत्रधारः ॥ ३५७ ॥
विश्वत्रयीसूत्रणमप्रसिद्धं नैतस्य वाच्यं चतुरैः कथञ्चित् ॥
सर्वानुमानोपरिवर्तमानाच्छुद्धानुमानादिह तत्प्रसिद्धेः ॥ ३५८ ॥

तथा हि,

विवादं बुद्धिमद्धेतु कार्यत्वात् कार्यमत्र यत् ॥
तत्तथा घटवत्कार्यमेतच्चातस्तथामतम् ॥ ३५९ ॥
न तावदाश्रयासिद्धिः साधनेऽत्र [1]विलोक्यते ॥
सम्भवन्ति यतस्तावद्भावानां राशयस्त्रयः ॥ ३६० ॥
प्रसिद्धकर्तृकाः केचित्कटकुड्यकुटादयः ।
अकर्तृकाः पुनः केचित्कालान्तःकरणादयः ॥ ३६१ ॥
सन्दिग्धकर्तृकाः केचित्काश्यपीपर्वतादयः ।
एत एवानुमानेऽत्र विवादपदशब्दिताः ॥ ३६२ ॥
प्रतीताश्च प्रमाणेन प्रमातृणाममी स्फुटम् ।
कार्यत्वं वात्र तन्नास्ति स्वरूपेणाप्यसिद्धता ॥ ३६३ ॥
तथा हि केचिदङ्कुरशक्रचापाम्बुजादयः ।
प्रत्यक्षेणैव वीक्ष्यन्ते जायमानाः शरीरिभिः ॥ ३६४ ॥
भूधरादौ तु कार्यत्वं सिद्धं सावयवत्वतः ।
महत्त्वे वा क्रियावत्त्वाद्गतावत्त्वतोऽथवा ॥ ३६५ ॥

---

१ ' विबाध्यते ' इति प. भ. पुस्तकयोः पाठः ।

एतेभ्य एव हेतुभ्यो विवादास्पदवस्तुनः ।
कर्ता यद्वा प्रसाध्योऽत्र तर्कतर्कणकर्कशैः ॥ ३६६ ॥
आकाशकालकाष्ठादेर्व्यावृत्तत्वाद्विपक्षतः ।
व्यभिचारित्वमप्यत्र कार्यत्वस्य न पेशलम् ॥ ३६७ ॥
अत एव विरुद्धत्वमभिधेयं न धीधनैः ।
कालात्ययापदिष्टत्वमत्र कालकटाक्षितम् ॥ ३६८ ॥
प्रत्यक्षेणानुमानेन शब्देनाप्यतिरस्कृतात् ।
पक्षादनन्तरं प्रोक्तं यस्मात्कार्यत्वसाधनम् ॥ ३६९ ॥
प्राक्रियासमताप्यस्य कीर्त्यमाना न कीर्तिकृत् ।
विपक्षाक्षेपिका काचिदनुमा नात्र विद्यते ॥ ३७० ॥
अथ स्थाणुर्विवादस्य कर्ता नैवोपपद्यते ।
शरीररहितत्वेन मुक्तात्मेवेति जल्प्यते ॥ ३७१ ॥
तन्न सद्येन केनापि प्रमाणेन त्रिलोचनः ।
धर्मी प्रसिद्धस्तेनैव साध्यस्यात्र विसूत्रणात् ॥ ३७२ ॥
सिध्येन्नयं हि तन्वादिर्[1] निर्मितिनिरङ्कुशः ।
सिध्येत्ततश्च को हेतुस्ते भाति तत्त्वकीलितः ॥ ३७३ ॥
दोषैरशेषैरपि विप्रमुक्तैर्व्यक्षस्य कर्तृत्वविधौ मुदक्षे ।
अत्रानुमाने सति जागरूके निराधयः सम्प्रति संचरामः॥३७४॥

ननु बुद्धिमद्धेतुतामात्रमत्र सिषाधयिषितं तद्विशेषो वा । आद्ये पक्षे सिद्धसाधनम् । अभिमतं हि परेषामपि बुद्धिमद्धेतुतामात्रं गोत्रादौ । कर्मजत्वात्कार्यजातस्य कर्मणश्च चेतनहेतुकत्वात् । द्वितीये तु विरुद्धता हेतोः । तथा हि सकलज्ञो बुद्धिमानत्र साध्यतयाभीष्टो दृष्टान्ते च कुटे तद्विलक्षणोऽसौ समुपलभ्यते । दृष्टान्तदृष्टधर्म्मानुसारेण

---

१ ' तत्त्वादि ' इति म. पुस्तके पाठः ।

च दृष्टार्थे प्रतिपत्तिर्भवतीति सिषाधयिषितधर्मविपर्ययप्रसाधनाद्विरुद्धं कार्यत्वम् । दृष्टान्तश्च साध्यविकलः । कलशे तथाविधस्य बुद्धिमतोऽभावात् । न च बुद्धिमद्धेतुतामात्रं साधनविषयस्तद्विशेषस्य तु सर्वज्ञत्वस्यातद्विषयस्यापि ततः सिद्धिरिति साम्प्रतम् । यतो यद्यसौ विशेषो न साधनविषयः कथमतस्तत्सिद्धिः । सिद्धत्वाद्विषयश्चेत् । कथं न स्वाश्रयां दोषगतिं स्पृशेत् । तदसुन्दरम् । सामान्यमात्रव्याप्तावप्यन्तर्भावितविशेषस्य सामान्यस्य पक्षधर्मतावशेन साध्यधर्मिण्यनुमीयमानत्वात्। इतरथा सर्वानुमानोच्छेदप्रसङ्गात् । तथा हि वह्न्यनुमानमपि न वह्निसामान्यमात्रविषयम् । तस्य प्रागेव सिद्धत्वात् । नापि तद्विशिष्टगिरिगोचरम्। वह्निसामान्यस्य तत्सम्बन्धित्वाभावेन तद्विशेषणत्वानुपपत्तेः । सम्बन्धस्वीकारे तु यथा गोत्वसमवायाद्गावः शाबलेयादयस्तथा पर्वतो वह्नित्वसमवायाद्वह्निः स्यात् । अस्त्येव वह्नित्वेन गिरेः संयुक्तसमवायः सम्बन्ध इति चेत् । तर्हि नाप्रतिपन्न पर्वतसंयुक्तं वह्निविशेषमसौ शक्यप्रतिपत्तिरिति वह्निविशेषस्यैवानुमानम् । तत्र च प्रोक्तदोषप्रसङ्गः । एवमिन्द्रियानुमानेऽपि स एव दर्शनीयः । तथा हि तत्रापि नेन्द्रियकरणिका काचित् क्रियोपलब्धा । न खलु च्छिदादयः क्रिया इन्द्रियसाधनाः । परश्वधादीनामनिन्द्रियत्वात् । न च परश्वधादिसाधना रूपादिपरिच्छित्तिरूपा क्रिया सम्भवति । तस्माद्यथैव क्रियात्वसामान्यस्य सत्यपि करणमात्राधानत्वव्याप्तत्वे पक्षधर्मतावशादिन्द्रियलक्षणकरणविशेषसिद्धिस्तथेहापि । सत्यपि कार्यत्वस्य बुद्धिमद्धेतुमात्रव्याप्तत्वे विवादाध्यासितेषु पक्षधर्मतावशाद्विशिष्टस्य बुद्धिमतः सिद्धिः । अन्यथा सामान्यस्यापि व्यापकाभिमतस्य न सिद्धिः स्यात् । निर्विशेषस्य तस्यानुपपत्तेः । न चासर्वज्ञस्य क्षितिधराङ्कुरादिकार्यग्रामोपादानोपकरणसम्प्रदानप्रयोजनानभिज्ञतया तत्कर्तृत्वं सम्भवति । ये हि यत्कर्त्तारस्ते तदुपादानाद्यभिज्ञाः । यथा कुलालादयः । सर्वेषां च कार्याणामीश्वरः कर्त्तेति समस्तकार्योपादानाद्यभिज्ञाः । उपादानं चेह पार्थिवाद्याः परमाणवः

उपकरणं समस्तक्षेत्रसमवायिनौ धर्माधर्मौ । सम्प्रदानं क्षेत्रज्ञाः । यानयं स्वकर्मभिरभिप्रैति । प्रयोजनं सुखदुःखोपभोगः क्षेत्रज्ञानामिति । तेन यद्यपि बुद्धिमद्धेतुकत्वमात्रं व्याप्तिविषयस्तथापि तद्विशेषस्य पक्षधर्मताबलात्प्रतिलम्भ इति विशेषविषयमनुमानम् । न चोक्तदोषप्रसङ्गः । स्यादेतन्न कार्यत्वमात्रं स्वभावप्रतिबद्धं बुद्धिमद्धेतुत्वेन । किन्तु तद्विशेषः । यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुत्पद्यते । तस्य च दृष्टेः सोपजायते यद्बुद्धिसद्भावाभावानुविधायि दृष्टम् । घटादिकार्यविशेषश्च तथा न कार्यमात्रं तनुभुवनाद्यपि । तस्य तद्भावाभावानुविधानादर्शनात् । तदेतेन विशेषेणोपाधिना प्रयुक्तां बुद्धिमद्धेतुकत्वव्याप्तिमुपजीवन् कार्यत्वसामान्यं न तेन स्वभावप्रतिबद्धमिति न तद्गमयितुमर्हति । इतरथा धूमप्रयुक्तां धूमध्वजव्याप्तिमुपजीवतः पाण्डुत्वादेः कुमुदकपोतादिगतादपि मकरकेतनानुमानप्रसङ्गः । तन्न्यायबाह्यम् । न हि यत्कार्यं तदखिलमपि कृतबुद्धिमात्मन्युपजनयतीति नियमः कृत्रिममणिमौक्तिकेषु खातप्रतिपूरितपृथिव्यां च तथादर्शनाभावात् । किं च कोऽयं कार्यत्वस्य विशेषः । किं बुद्धिमदन्वयव्यतिरेकानुविधानं तद्दर्शनं वा । यदि पूर्वः कल्पः । स बुद्धिमद्धेतुकत्वं तनुभुवनादीनामातिष्ठमानैरभ्युपेयत एव । न हि कारणं कार्याननुविहितभावाभावमन्यो वक्तुमर्हति ग्रहगृहीतात् । अथ तद्दर्शनम् । तर्हि य एव पटोऽनेन बुद्धिमदन्वयव्यतिरेकानुविधायी दृष्टः स एव तत्कार्यो न तु विपणिवर्त्ती । अथ तज्जातीयस्य तदन्वयव्यतिरेकानुविधानदर्शनाददृष्टान्वयव्यतिरेकानुविधानमपि तज्जातीयं तथेति चेत् । किं न तनुभुवनाद्यपि तथा मन्यते । पटजातीयमेव कार्यं बुद्धिमद्धेतुकमिति चेत् । ननु प्रासादादिकं तद्धेतुकं न भवेदपटजातीयत्वात् । अथापटजातीयस्यापि प्रासादादिकस्य केनचिद्विशेषेणास्त्येव पटेन सजातीयत्वम् । तर्हि तनुभुवनादेरपि तथा तत्किं न भविष्यति । ततः स्वभावप्रतिबद्धं कार्यत्वं बुद्धिमद्धेतुकत्वेनेति ।

१ ' भवनाद्यपि ' इति प. भ. पुस्तकयोः पाठः ।

एकत्वं च क्षित्यादिकर्तुः । अनेकेषां कारकाणामेकाधिष्ठातृनियमितानां प्रवृत्तिप्रतीतेः । अनेकेषां स्थपतीनामेकसूत्रधारनियमितव्यापाराणां प्रासादादिकार्यकरणे प्रवृत्तिः प्रतीयते । न च त्रिलोचनस्य तज्ज्ञानस्य च नित्यतायामेकरूपतायां च कार्याणां कादाचित्कत्वं वैचित्र्यं च विरोधमधिरोहति । कादाचित्कविचित्रसहकारिलाभेन कार्याणां कादाचित्कत्वस्य वैचित्र्यस्य चोपपत्तेः । अथ यथाकाललब्धपरिपाकाभ्यां धर्म्माधर्म्माभ्यामेव च शरीरादिसकलकार्योत्पत्तिर्भविष्यति किमीश्वरकल्पनयेति चेन् । तदपि न क्षोदक्षमम् । धर्म्माधर्मयोरचेतनयोश्चेतनमधिष्ठातारमन्तरेण स्वकार्ये क्वचिदपि प्रवृत्त्ययोगात् । तथा हि धर्म्माधर्मौ चेतनाधिष्ठितौ स्वकार्ये प्रवर्त्तते अचेतनत्वाद्यदित्थं तदित्थं यथा कुठारस्तथा चैतौ तस्मात्तथा । न चास्मदात्मैव धर्म्माधर्मयोरधिष्ठायकत्वेन कल्पनार्हः । तस्य साक्षात्कारिसंवेदनासम्भवात् । नाप्यचेतनस्य कस्यचिदकस्मादेव प्रवृत्तिरुपपद्यते । अन्यथा निष्पन्नेऽपि कार्ये तत्प्रवर्त्तेत । विवेकविकलत्वात् । अथ कथमयं धर्म्माधर्म्मावधितिष्ठति क्षेत्रज्ञेष्वेव तयोः समवेतत्वात् । उच्यते । सम्बन्धात् । न हि साक्षात्संयोगसमवायावेव सम्बन्धौ । संयुक्तसंयुक्तसमवायस्यापि तद्भावात् । संयुक्ताः खल्वीश्वरेण क्षेत्रज्ञशरीराद्यारम्भकाः परमाणवस्तैश्च क्षेत्रज्ञास्तत्समवेतौ च धर्म्माधर्म्माविति । संयुक्तसमवायो वा । क्षेत्रज्ञैरीश्वरस्य संयोगात् । अनुमानादजसंयोगसिद्धेः । तथा हि ईश्वरः क्षेत्रज्ञसंयुक्तो मूर्त्तद्रव्यसंयोगित्वाद्यो मूर्त्तद्रव्यसंयोगी स क्षेत्रज्ञसंयुक्तो यथा घटस्तथा चायं तस्मात्तथा । स चास्य संयोगोऽन्यतरोभयकर्मसंयोगानां तत्कारणानामभावादजः । न च वाच्यं धर्म्माधर्म्मौ परमाणून्वा स्वधर्म्माधर्म्मानुपगृहीतान्कथमीश्वरः प्रेरयतीति । विषविद्याविदा स्वकीयधर्म्माधर्म्मानुपगृहीतस्य विषस्य प्रेरणदर्शनादिति । भवति चात्र श्रुतिः-

" **विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् ।**

---

१ श्वेताश्वतरोपनिषत् ३।३.

संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः " इति । अत्र प्रथमेन विशेषणेन सर्वज्ञत्वं लभ्यते, चक्षुषा दृष्टेरुपलक्षणात् । द्वितीयेन वक्तृत्वम्, मुखेन वागुपलक्षणात् । तृतीयेन सर्वसहकारित्वम्, बाहुना साहाय्योपलक्षणात् । चतुर्थेन व्यापकत्वम्, पदा व्याप्तेरुपलक्षणात् । पञ्चमेन धर्माधर्मलक्षणप्रधानकरणत्वम्, तौ हि लोकयात्रावहनाद्बाहू षष्ठेन परमाणुरूपप्रधानाविष्टेयत्वम् । ते हि गतिशीलत्वात्पतन्तीति व्युत्पत्त्या पतत्रव्यपदेश्याः । सन्धमति संजनयन्निति च व्यवहितोपसर्गसम्बन्धः । ते न संयोजयति उत्पादयतीति वार्थः । द्यावेत्यूर्ध्वसप्तलोकोपलक्षणम् । भूमीत्यधस्तात् । एकेत्यनेनानादिता लक्ष्यत इति । तथा " अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् " । स्मृतिरपि " अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा" इति । व्यासवचनं च, " द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १ ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥२॥" इति ।

तस्मादेकः सकलजगतां सूत्रणासूत्रधारः
कर्मक्लेशादिभिरभिहतः क्वापि काले न नाम ॥
नित्यज्ञानाद्विशदविदिताशेषविश्वप्रपञ्चः
सोऽयं सिद्धक्षितिपुरविजयी जात्ययुक्तिप्रबन्धात् ॥ ३७५ ॥

हंहो विमोहवदसत्यमपास्य शाठ्यं
क्रीडा तवेयमथवा हृदि कोऽपि कोपः ॥
येनास्तिकानपि वितर्कपटूनपीमान्
यौगान्विमोहयसि विश्वविदः स्वरूपे ॥ ३७६ ॥

१ ' अत्र च ' इति प. भ. पुस्तकयोः पाठः। २ श्वेताश्वतरोपनिषत् ३।१९. ३ म. भा. व. प. अ. ३० श्लो. २८. ४ भ. गी. अ. १५ श्लो. १६।१७.

तथा हि यौगाः सततं विमुक्तिर्निर्दोषतासिद्धिकृते शिवस्य ।
सा संगतिं नैति यतो विरोधः सातत्यमुक्त्योरिह दुर्निरोधः ॥३७७॥

मुक्तः प्रसिद्धः सुधियां स एव यस्य ध्रुवं बन्धविधिः परामृत् ॥
उच्छृङ्खलेभ्यः खलु शृङ्खलेभ्यो यथा व्यपेतः पुरुषोऽत्र मुक्तः ॥३७८॥

बन्धे च सत्यस्तु कथं कथञ्चिन्मुक्तौ सदात्वेन समन्वितत्वम् ॥
स्याच्चेत्तदा चन्द्रकलावचूलः कार्यं सदेत्येतदपि स्फुटं स्यात् ॥३७९॥

कार्यंतैवास्य नास्तीति तस्याः सखे किं सदात्वं घटाकोटिमाटीकते ॥
मुक्तंतैवास्य नास्तीति तस्याः सखे किं सदात्वं घटाकोटिमाटीकते ॥ ३८० ॥

मुक्ततास्त्येव चेत्पार्वतीप्रेयसः कार्यताप्यस्ति सत्यं त्वदुत्प्रेक्षया ॥
कारणाभावतः कार्यता नास्ति चेन्मुक्तता मास्तु बन्धक्षयाभावतः ॥ ३८१ ॥

ध्वस्तमोहेन यत्कन्दलीकृन्मतं नेश्वरो मुक्तिमाञ्जैव बद्धो यतः ॥
नाप्यमुक्तो न यत्क्लेशसंश्लेषवान्नित्यमुक्तस्ततो युक्तितः स्यादिति ॥ ३८२ ॥

यच्चोपि विश्वत्रयसूत्रणायामेकः परं शाश्वतसूत्रधारः ॥
कात्यायनीकामुक इत्यकीर्तिं कीर्त्तिं तदप्यत्र न ते करोति ॥ ३८३ ॥

तथा हि शशभृन्मौलेर्लोक्यघटना भवेत् ॥
यथारुचि प्रवृत्तिः किं कर्मतन्त्रतयाथवा ॥ ३८४ ॥

धर्म्माद्यर्थमथोद्दिश्य यद्वा क्रीडाकुतूहलात् ॥
निग्रहानुग्रहार्थं वा सुखस्योत्पत्तयेऽथ वा ॥ ३८५ ॥

यद्वा दुःखविनोदार्थं प्रत्यवायक्षयाय वा ॥
भविष्यत्प्रत्यवायस्य परीहारकृते किमु ॥ ३८६ ॥

१ ' यथाहि ' इति प. पुस्तके पाठः ।

अपारकरुणापूरार्किं वा किंवा स्वभावतः ॥
एकादशैवमेते स्युः प्रकाराः परदुःसहाः ॥ ३८७ ॥

जायेत पौरस्त्यविकल्पनायां कदाचिदन्यादृगपि त्रिलोकी ॥
न नाम नैयत्यनिमित्तमस्याः किञ्चिद्विरूपाक्षरुचेः समस्ति ॥ ३८८ ॥

करोत्ययं तां यदि कर्मतन्त्रः स्वतन्त्रतैतस्य तदा कथं स्यात् ॥ ५
सखे स्वतन्त्रत्वमिदं हि येषां परानपेक्षैव सदा प्रवृत्तिः ॥ ३८९ ॥

कर्मव्यपेक्षस्य च कर्तृतायामीशस्य युक्ता न खलु प्रवृत्तिः ॥
कर्मैव यस्मादखिलत्रिलोकीं करिष्यते चित्रविपाकपात्रम् ॥ ३९० ॥

नाचेतनं कर्म करोति कार्यमप्रेरितं चेदिह चेतनेन ॥
यथा मृदित्येतदपास्यमानमाकर्णनीयं पुरतः सकर्णैः ॥ ३९१ ॥ १०

तृतीयकल्पे कृतकृत्यभावः कथं भवेद्भूतपतेः कथञ्चित् ॥
प्रयोजनं तस्य तथाविधस्य धर्मादिकं हन्त विरुध्यते यत् ॥ ३९२ ॥

अथापि शम्भुर्जगतां विधाने प्रवर्तते क्रीडनकौतुकेन ॥
कथं भवेत्तर्हि स वीतरागः सखे प्रमत्तार्भकमण्डलीव ॥ ३९३ ॥

पश्यन्पत्तनमत्र भूपतिरयं राज्ञीयमेते सुता- १५
स्तुङ्गन्तस्तुरगा इमे मदमुचामेषा घटा दन्तिनाम् ॥
सामन्ताः सभयं नमन्ति नितरामेते तदेवं शिशु-
व्रातोऽप्यारमति स्फुटं सिकतिलस्रोतस्विनीनां तटे ॥ ३९४ ॥

विनिग्रहानुग्रहसाधनाय प्रवर्त्तते चेद्विरिशस्तदानीम् ॥
विरागता द्वेषविमुक्तता वा तथाविधस्वामिवदस्य न स्यात् ॥ ३९५ ॥ २०

उत्पत्तये न च सुखस्य तथा प्रवृत्तिः
शम्भोर्यतः सुखगुणोऽत्र न सम्मतस्ते ।
स स्वीकृतो दशगुणेश्वरवादिभिर्यै-
स्तैरप्यसावुपगतो बत नित्य एव ॥ ३९६ ॥

एतस्य दुःखं न सुखं तथास्य न प्रत्यवायोऽस्ति कदाचनापि ॥
दुःखादिभेदत्रितयं न वक्तुं युक्तं ततो यौगधुरन्धरस्य ॥ ३९७ ॥
पुण्यकारुण्यपीयूषपूरेणात्यन्तपूरितः ॥
प्रवर्त्तते जगत्सर्गे भर्ग इत्यपि भङ्गुरम् ॥ ३९८ ॥

यतः ।

क्षुद्रग्रामे निवासः क्वचिदपि सदने रौद्रदारिद्र्यमुद्रा
जाया दुर्दर्शकाया कटुरटनपटुः पुत्रिकाणां सवित्री ॥
दुःस्वामिप्रेष्यभावो भवति भवभृतामत्र येषां बतैतान्
शम्भुर्दुःखैकदग्धान् सृजति यदि तदा स्यात्कृपा कीदृगस्य ॥३९९॥

अथ धर्ममधर्ममङ्गभाजां सचिवं कार्यविधावपेक्षमाणः ॥
सुखमसुखमिहाप्यये द्विरीशस्तदवरमुपरिनिषेधनादमुष्य ॥ ४०० ॥
स्वभाव एवैष पिनाकपाणेः प्रवर्त्तते विश्वविधौ यदेतत् ॥
स्वभाव एवैष रवेर्जगन्ति प्रकाशयत्येष यदित्ययुक्तम् ॥ ४०१ ॥
एवं हीश्वरसंविदो विफलता तस्मान्निसर्गान्निजान्
किं माभूज्जगतां प्रवर्त्तनविधिर्निश्चेतनानामपि ॥
तत्तेषां परिकल्पयन्ति किमधिष्ठातारमेते शिवं
व्यर्थे वस्तुनि युज्यते मतिमतां किं पक्षपातः क्वचित् ॥ ४०२ ॥
निश्चेतनानां जगतां प्रवृत्तौ कार्यं कथं स्यान्नियतप्रदेशे ॥
जातेऽपि कार्ये विरतिश्च न स्यादित्येतदप्येति न युक्तिवीथीम् ॥४०३॥
स्वभाववादाश्रयणप्रसादादेवंविधानां कुविकल्पनानाम् ॥
नास्ति प्रसङ्गः कथमन्यथा स्यान्नायं सुधादीधितिशेखरेऽपि ॥ ४०४ ॥
अथ ब्रवीथाः किमिमैर्विकल्पैर्यथा तथायं कुरुतां त्रिलोकीम् ॥
कर्त्ता हि तस्याश्च्युतदोषपङ्क्तात्कार्यत्वतस्तावदसौ प्रसिद्धः ॥ ४०५ ॥
चेतस्विनामिदं नैव सुवर्णं भासते वचः ॥
कथञ्चित् क्षमते यन्न परीक्षाकषपट्टिकाम् ॥ ४०६ ॥

---

१ ' यदेवम् ' इति भ पुस्तके, ' यदैवम् ' इति प. पुस्तके पाठः ।

तथा हि किमिदं कार्यत्वं नाम । स्वकारणसत्तासमवाय इति व्योमशिवः । यः स्वकारणैराधारभूतैस्तन्त्वादिभिराधेयभूतया सत्तया च सार्धं पटादिवस्तुनः समवायः सम्बन्धः स तस्य कार्यत्वमित्यर्थः । नैतच्छेकोच्छेककारि । स्वकारणसमवाय इतीयतैव त्वदाकांक्षितकार्यत्वस्य लक्षितत्वेन सत्तापदस्यातिरिक्तत्वात् । न हि किञ्चिदसदपि स्वकारणेषु समवैति । असतः स्वकारणानामेवाभावात् । द्रव्यादिपदार्थपञ्चकवृत्तित्वाच्च समवायस्येति नास्ति सत्तापदव्यवच्छेद्यं किञ्चित् । सम्भवद्विशेषणमेतदिति चेत् । किं वयमाचक्ष्महे न सम्भवत्येतदिति । किन्त्वधिकम् । अधिकस्यापि सद्भावमात्रेण लक्षणत्वाभिधाने बहुतरमिदानीमभिधानीयं स्यात् । अथ द्वितीयमेतल्लक्षणं कार्यत्वस्य सत्तासमवाय इति । मैवम् । अकार्यमतेष्वपि व्योमादिष्वस्य गतत्वेनातिव्यापकत्वात् । अथास्तु कारणसमवाय एव कार्यत्वम् । ननु तत्पटादिवस्तु सदसदुभयरूपमनुभयरूपं वा स्वकारणेषु समवेयात् । यदि सत् । तत्किं स्वतः सत्तासमवायाद्वा । स्वतश्चेत्, किं कारणव्यापारेण । स्वतः सतः समवायादेरिवास्य नित्यत्वात् । तथापि तद्व्यापारेऽनुपरमप्रसङ्गः । अथ सत्तासमवायात्तत्सत् । ननु सत्तापि सत्यसत्युभयरूपेऽनुभयरूपे वा तस्मिन्समवैति । नाद्यः पक्षः । यतो विवादास्पदं वस्तु न तावत्स्वतः सत् । समवायादिवन्नित्यत्वापत्तेः । सत्तासमवायाभावप्रसङ्गाच्च । तथा हि यत्स्वतः सन्न तत्र समवैति यथा सत्तायामेव । स्वतः सदभ्युपगतं घटादीति । अथ सत्तासमवात्तत्सत् । ननु सोऽपि सत्तासमवायोऽपरेण सत्तासमवायेन सत्येव वस्तुनि स्यात् सोऽपि सत्तासमवायोऽपरेण तेन सत्येव तस्मिन् भवदित्याद्यावर्त्तनेनानवस्था । अथ न सन्ति भूयांसः सत्तासमवाया यतोऽनवस्था स्थेमानमास्कन्देदिति चेत् । तर्हि भवत्वितरेतराश्रयदोषः । सिद्धे हि वस्तुनः सत्त्वे सत्तासमवायः सिध्यति तत्सिद्धौ च वस्तुनः सत्त्वं सिध्यतीति । नापि द्वितीयः

१ 'पटादि' इति प. पुस्तके पाठः ।

कल्पः। असति करिकेसरिकलापकल्पे कथं न स्यात्। तस्य पदार्थपञ्चतयी-वृत्तित्वेन स्वीकृतत्वात्। असतश्च तदन्यतरत्वाभावात्। नापि तृतीयः। एकान्तवादीनां सदसद्रूपताया अनभ्युपगमबाधितत्वात्। नापि चतुर्थः। यतोऽयमत्राभिसंन्धिः। स्वरूपेण तन्न सन्नाप्यसत्सत्तासम्बन्धात्तु सदिति। दुरभिसन्धिरयम्। विधिप्रतिषेधयोरन्यतरतिरस्कारनान्तरीयत्वात्। यस्त्वत्र व्योमाशिवस्यैव तदयुक्तम्। निष्ठासम्बन्धयोरेककालत्वाभ्युपगमात्। तथा हि पदार्थानां स्वकारणसम्बन्ध एवोत्पत्तिर्न पूर्वसत्त्वं सत्कार्यवादप्रतिषेधादिति। यश्च कन्दलीकारस्य अनित्येषु तु प्रागसत एव सत्ता कारणसामर्थ्यात्। न च खरविषाणादिषु प्रसङ्गः। तदुत्पत्तौ कस्यचित्सामर्थ्याभावादिति समाधिः। सोऽपि न सुधीसमाधेये। एवमप्यसति वस्तुनि समवाय इति पक्षस्यैव कक्षीकारात्। तत्र च प्रोक्तो दोषः। प्रसङ्गविपर्ययाभ्यां च बाध्यते। असति सत्तासमवायस्तत्सदेवेति प्रसज्यते। यथा व्योम। सत्तासमवायश्चाभ्युपगतः पटादिकार्येषु। अथ न तेषां सत्त्वमिष्यते। भवतु तर्हि विपर्ययः। यदसन्न तत्र सत्तासमवायः। यथा व्योमकमले। असन्ति हि विवादास्पदपटादीनीति। न सत्तासमवायादपि कार्यं सद्यतस्तथाभूतं कारणेषु समवेयात्। नाप्यसत्तत्र समवैति। असतः खपुष्पस्येव क्वचिदपि समवायासम्भवात्। उभयरूपमित्यादिपक्षद्वयं त्वनन्तरदूषितैतादृशपक्षद्वयवद्दूषणीयम्। किंच यदि स्वकारणेषु समवायः कार्यत्वम्। तदा समवायस्यानित्यताप्रसक्तिः। कादाचित्कत्वात्। अथ नायं कादाचित्कः। तर्हि घटादिकार्यमपि कथं कादाचित्कं स्यात्। तल्लक्षणभूतस्य स्वकारणसमवायस्य सदा सत्त्वात्। अथ नास्य सदा सत्त्वे कारणरूपोपाधिमानेव ह्ययं कार्यत्वमुच्यते। तद्व्यावृत्तौ च नायं तदुपाधिमान्। यथा दण्डव्यावृत्तौ पुरुषो न दण्डीति। न चोपाध्यभावे विशेषे-

१ 'अभिसन्धेः' इति भ. पुस्तके पाठः। २ 'च' इति प. भ. पुस्तकयोः पाठः।

णमात्रस्यैवाभावो विशिष्टस्तु तदवस्थ एवेति वाच्यम् । यतो विशेषणाभावेऽपि विशिष्टोऽस्तीति कस्तार्किकः प्रकटयेदिति । तदखिलं स्खलितं वचः। यस्मात्कारणरूपोपाधिनापगच्छता समवायस्वरूपं किंचिदपहृतं न वा । न चेत्, तर्हि तथैव तत्स्वरूपस्य सत्त्वात्पूर्वावस्थायामिवेदानीमपि समवायस्य कार्यत्वलक्षणत्वानपायः । अपहृतं चेत्, तर्हि तत्स्वरूपापहारे सिद्धं तस्य कादाचित्कत्वम् । अथ स्वरूपं स्वकीयो धर्मः स्वरूपमुच्यते तस्य च भिन्नस्यापहारेऽपि न समवायस्य धर्मिणस्तुषांशमात्रमपि विपद्यते । तदसुन्दरम् । यतः स्वरूपशब्देनास्माभिः स एवास्य स्वभावो विवक्षितो यः सकलधर्म्माधारभूतोऽसाधारणः । स चेत्तदवस्थः । तदा पूर्ववत् प्रसक्तिः । अन्यथा तु कादाचित्कत्वम् । ननु यद्यत्यन्तभिन्नकारणरूपोपाध्यपगमेऽपि वस्तुस्वरूपापगमः । तर्हि पुरुषेण मुक्ते दण्डे तत्स्वरूपमप्यपेयात् । सोऽपि परस्यापचिकीर्षया पीयूषपाण्डूपोपदेशः । अभ्युपगम्यत एव हि कथञ्चित्स्वरूपापगमः । दण्डग्रहणपरिणामपरिहारपूर्वं पुरुषेण तदपरपरिणामस्वीकारात् । सर्वथाभ्युपगमाभावाच्च पुरुषत्वेन प्रत्यभिज्ञानम् । अथास्तु समवायेऽप्येवं स्वरूपापगम इति चेत् । कादाचित्कत्वमप्येवमस्तु । अस्तु चेत्, कथंचिदनित्यत्वमप्यस्तु । ओमिति चेत्, अहो वैनयिकतास्य । किं तु कुम्भादिकार्यं कर्तुकामेन कुलालेन प्रथमं समवायः कर्त्तव्यः । तस्यापि कार्यत्वं स्वकारणसमवायः इति प्रथमतरं स विधेयः । तस्याप्यन्यस्तत्समवायः कार्यत्वमिति प्रथमतमं स सूत्रणीय इत्यनवस्था । ततः स्वरूपासिद्धं स्वकारणसत्तासमवायरूपं कार्यत्वम् । भागासिद्धं च । योगिनां निःशेषकर्म्मप्रलये प्रध्वंसाभावरूपतया समवायस्य सत्तायाश्चाभावात् । अथाभावपरिहारेण भाव एव क्षित्यादिः पक्षीक्रियते ततो न भागासिद्धः । ननु कुतोऽभावस्य परिहारः । किमबुद्धिमद्धेतुकत्वादेतस्य । यद्वा तत्पक्षीकरणमन्तरेणापीश्वरसिद्धेः । यद्याद्यः पक्षः । तदा

योगिनामसममुक्तिकामिनीसङ्गमं किमपि वाञ्छतां सताम् ॥
चन्द्रचूलचरणाम्बुजद्वयाराधनं निरुपयोगमापतेत् ॥ ४०७ ॥

संहारोऽपि चैवं न बुद्धिमद्धेतुकः स्यात् । एवं निर्हेतुकोऽपरहेतुको वा भवेत् । निर्हेतुकत्वे संहारस्य नित्यसत्त्वापत्त्या **शाक्य-**
५ **दर्शनानुप्रवेशः** । नित्यमसत्त्वापत्त्या वा तस्य समस्तवस्तूनां नित्यत्वं स्यात् । तथा च प्रारम्भस्याप्यभावात्कौतस्कुतं क्षित्यादेर्बुद्धिमत्कारणकल्पनासंरोहेण । द्वितीयपक्षोऽप्ययुक्तः । अभावपक्षीकरणमन्तरेणेश्वरसिद्धेः सप्रत्यूहत्वात् । यस्यैव हि वसुधादेरसौ बुद्धिमान् कर्त्ता तन्मात्रज्ञ एव स्यान्न पुनः सर्वज्ञः । तथा च कथमीश्वरसिद्धिः ।
१० अथान्यतोऽनुमानादभावकर्त्ताऽसौ सेत्स्यति । न तर्हि कार्यत्वानुमानात्सर्वज्ञत्वसिद्धिः । न चान्यदनुमानं तस्याभावकर्तृत्वसिद्धिनिबन्धनमीक्षामहे । तन्न **व्योमशिवोक्तं** स्वकारणसत्तासमवायस्वरूपं कार्यत्वमुपपद्यते । प्रागसतः सत्तासमवायः कार्यत्वमित्येके । तदपि प्रागुक्तयुक्त्यैव निरस्तमवसेयम् । " **अभूत्वाभावित्वं कार्यत्वम्** " इति
१५ **किरणावली**[1]कारः अभूतत्वाभावित्वं हि भिन्नकालक्रियाद्वयाधारभूते कर्त्तरि सिद्धे सति सम्भवति । क्त्वाप्रत्ययान्तपदविशेषितवाक्यार्थत्वात् । श्रुत्वा चिन्तयतीति वाक्यार्थवत् । न चात्र भवनाभवनयोराधारभूतस्य कर्त्तुः प्रतीतिरस्ति । अभवनाधिकरणस्याविद्यमानत्वेन भवनाधारस्य विद्यमानतया भावाभावयोरेकाधारत्वानुपपत्तेः । तर्हि कुटादयो भावा
२० भवता भूत्वा भवन्तः स्वीकृताः । तथा चेत्, तर्हि **सांख्यकक्षाप्रकार-**प्रवेशः शरणीकृतः । सत्कार्यवादाश्रयणात् । तदसत् । अस्माकमभूत्वा भवनस्य सुघटत्वात् । भवनाभवनयोरेकस्याधारस्य सत्त्वात् । घटो हि द्रव्यरूपतया सन् पर्यायरूपतया चासन् कुलालकरचक्रचीवरादिसम्पर्कात्पर्यायरूपतया प्रादुर्भवति । न चैवं **कपिलमतोपनिपातः** । तन्मते हि
२५ सर्वप्रकारैः सतो वस्तुनो व्यक्तिमात्रं कारणैः क्रियते । यथा तिमिरसंचय-

---

१ ' किरणावली ' पृ. १४५ पं. १.

संघटितघटस्य प्रदीपप्रकाशेनेति । अस्मदभिप्रेतस्य चाभूत्वा भावित्वस्य त्वया स्वीकारे स्वमतप्रकोपः । ततः स्वरूपासिद्धं त्वन्मतमभूत्वा भावित्वस्वरूपं कार्यत्वम् । सिध्यतु वानुपलभ्योपलभ्यमानेषु जलधरमहीरुहशरीरादिषु, पर्वतादिषु पुनः कथं तत्सिद्धिः । न खलु मेरुमकरादयः सर्वथा प्रागसन्तः सञ्जायन्त इत्यत्र किंचित्प्रमाणमस्तीति भागासिद्धं तल्लक्षणं कार्यत्वम् । सर्वथा प्रलयासिद्धेः प्रोक्तासत्त्वसिद्धिरिति चेत् । न । सर्वथा प्रलयासिद्धेः । शम्भुसिद्धेस्तत्सिद्धिस्वीकारे च चक्रकाक्रान्तिः । शम्भुसिद्धौ हि सर्वथा प्रलयसिद्धिस्तस्यां च सत्यां मेर्वादेरभूत्वा भवनसिद्धिस्ततश्च शम्भुसिद्धिरिति । यत्पुनः सावयवत्वसाधनं कार्यत्वसिद्धावभ्यधायि तत्किमवयवसमवायोऽवयवसंयोगोऽवयवाविष्वग्भावो वा भवेत् । अवयवसमवायपक्षे किमवयवाधिकरणत्वमवयवाधेयत्वं वा सावयवत्वं स्यात् । आद्यकल्पनायामुभयासिद्धिः । न ह्यवयविन्यवयवाः समवेता इति वादिप्रतिवादिनोरभ्युपगमः । द्वितीयकल्पे पुनरवयवाधेयेनावयवत्वसामान्येनानेकान्तः । तस्य तत्र वृत्तावप्यकार्यत्वात् । यत्पुनरेवं केनचिदुक्तं संहावयवैर्वर्तत इति योगबलेन सावयवत्वमिति । तदपि नोपपन्नम् । साधनस्य नः प्रति विशेष्यासिद्धत्वादवयवसमवायस्वभावसावयवत्वस्य समवायानभ्युपगमेनासिद्धत्वात् । अवयवसंयोगपक्षस्तु व्योमादिना व्यभिचारी । घटादिपदार्थावयवसंयोगवतोऽपि तस्याकार्यत्वात् । न च नास्त्यवयवसंयोगोऽस्येति वाच्यम् । अव्यापकत्वापत्तेः । सकलमूर्तद्रव्यसंयोगस्वरूपत्वाद्व्यापकत्वस्य । नाप्यवयवाविष्वग्भावः सावयवत्वम् । वाद्यसिद्धत्वात् । यत्पूदयनः प्राह । अन्यत्र यद्यपि सावयवत्वं विकल्पदूषितं तथाप्यत्र द्रव्यान्तरसमवेतत्वमित्यभिमतं सावयवत्वमिति । तत्राप्यवयवैः सह वर्तते यत्तत्सावयवमिति सामान्यतः सावयवशब्दवृत्तौ कुतोऽयं द्रव्यस्य द्रव्यान्तरसमवेतत्वं सावयवत्वमिति विशेषं लब्धवान् । न हि शब्दानित्यत्व-

---

१ ' यद्यपि ' इत्यधिकं प. म. पुस्तकयोः ।

सिद्धये प्रमेयत्वहेतुमुपादाय यद्यपि प्रमाणविषयत्वं प्रमेयत्वमुच्यते तथापि पटाद्यनित्यपदार्थवृत्त्येव तदिहाभिमतमिति विशेषो लभ्यते । लाभेऽपि वा कथञ्चित्समवायस्यासिद्धेरसिद्धो द्रव्ये द्रव्यान्तरसमवेतत्वस्वरूपोऽपि विशेषः । यदपि महत्त्वे सति क्रियावत्त्वादिति साधनमावेदि । तत्र विशेषणस्य भागासिद्धिः । द्व्यणुके पक्षान्तःपातिनि महत्त्वस्यासत्त्वात् । न च न तत्पक्षीकृतमिति वाच्यम् । तत्र कार्यत्वस्याप्रसिद्धिप्रसङ्गात् । न च मूलानुमानेऽपि न तत्पक्षीकार इति सारम् । यतस्तत्र विशेषणमन्तरेण कुतः पक्षाद्बहिर्भावोऽस्यावसेयः । विरुद्धो हि वादो यत्र तद्विवादमावेद्यते । विरुद्धवादो द्व्यणुकेऽप्यस्त्येव । तथा हि भवानाह द्व्यणुकं बुद्धिमद्धेतुकं वयं तु ब्रूमोऽन्यथेति । अथ द्व्यणुकादन्यद्विवादमिति विशेषेण वा पक्षः क्रियते । तर्हि पक्षान्तरम् । किञ्चैवं कथं द्व्यणुकस्य बुद्धिमद्धेतुकत्वसिद्धिः तदसिद्धौ च कथं कस्यचित्सर्वज्ञत्वसिद्धिः । द्व्यणुकस्याबुद्धिमद्धेतुकस्य केनचिदज्ञानात् । यो[1] यत्करोति स तदुपादानाद्यभिज्ञ एवेति द्व्यणुकस्य बुद्धिमद्धेतुकत्वसिद्धौ तदुपादानभूतस्य द्व्यणुकस्यापि ज्ञानं सिद्धमेव । तथा च सर्वज्ञत्वमपीति चेत् । तदपि न पेशलम् । एवमपि सर्वज्ञत्वाप्रसिद्धेः । द्व्यणुकस्य बुद्धिमद्धेतुकत्वाप्रसिद्धौ हि तदुपादानीभूतानामज्ञानमेवावतिष्ठते । तथा च कुतः सर्वज्ञतासिद्धिः । किं च परमाणूनां केनचिदज्ञाने कथं द्व्यणुकस्योत्पादः । ईश्वरेण स्वल्वधिष्ठिताः परमाणवो द्व्यणुकमारभन्त इति त्वन्मतम् । न चाज्ञातानामधिष्ठानं सम्भवति ।

द्व्यणुके च वताकार्ये सति त्रिलोकी सुदुःस्थिता समभूत् ॥
यद्वा किमत्र चित्रं यदकार्यं भवति दौस्थ्याय ॥ ४०८ ॥

एवं च वरिष्ठा भो योगगरिष्ठाः, चक्रे शिवसिद्धिर्मानेन भवद्भिः ।

१ ' अथ यो ' इति प. भ. पुस्तकयोः पाठः ।

द्व्यणुके कार्यतासिद्धौ ब्रूयाश्चेदन्यसाधनम् ।
तदैव तर्हि प्रगुणः शृणुयास्तत्र बाधनम् ॥ ४०९ ॥

यदपि रचनावत्त्वमवाचि । तदपि न चारु । यतः केयं रचना नाम । विचित्रप्रदेशशालित्वमवयवसंयोगो वा । यद्याद्यः पक्षः । तदान्तरिक्षेणानेकान्तः । समस्तमूर्तद्रव्यसंयोगनिबन्धनानां प्रदेशानां तत्रापि सद्भावात् । न च वाच्यमुपचरिता एव तत्र त इति । समस्तमूर्तक्रियाकारित्वं न स्यात् । उपचरितनभोदेशत्वभावाद्विशिष्टादृष्टोपकाराच्तस्यार्थक्रियाकारित्वमपि न कान्तम् । उपचरितस्यासद्रूपस्य श्रोत्रस्य वाच्येयस्येवादृष्टेनाप्युपकारायोगात् । अथ द्वितीयः । तर्हि कः सम्बन्धः । तदसमवायिकारणकत्वं एकार्थसमवायो वा । आद्यश्चेत्, तदा प्रतिवाद्यसिद्धिः । न खल्ववयवसंयोगस्यासमवायिकारणतामाकं सिद्धा । एकार्थसमवायस्तु व्यभिचारी । संयोगेन सार्धमेकस्मिन्नर्थेऽवयवरूपेऽवयविवदकार्याणामपि सामान्यादीनां समवेतत्वात् । एतर्तार्हि वक्ष्यमाणकार्यत्वसामान्यदूषणानुमानेन दूषितं प्रतिपद्येथाः । एतेन तदपास्तं यदुक्तम् "एतेभ्य एव हेतुभ्यः कर्ता कश्चन साध्यते" इति । नन्वेवमेतान्यनुमानानि प्रतिक्षिपतां भवतां किं न कार्यत्वं पर्वतादिषु सिद्धम् । तथा सति नित्यत्वमेषां स्यात् । उच्यते । अभिमतमेव तदत्र, किन्तु नैतान्यनुमानानि कार्यत्वसिद्धिसाधिष्ठानीति ब्रूमः । किं तर्ह्यभिरनुमानैर्भवतूभयसिद्धात्कार्यत्वात्साध्यसिद्धिरिति चेत् । नैवमुभयसिद्धादपि । प्रतिबन्धग्रहणोपायापायेन सन्दिग्धव्यभिचारित्वादस्य । अथातिप्रतीतावेव प्रत्यक्षानुपलम्भस्तद्ग्रहणकारणतयेति चेत् । तर्हि प्रत्यक्षानुपलम्भयोग्य एव गोचरे व्याप्तिग्रहणस्वीकारादनुपलब्धपुरुषव्यापारैः तृणतरुतडिन्नेता (?) दिभिर्निश्चितो व्यभिचारोऽस्तु । पक्षीकृतास्तृणादयो न च पक्षीकृतेन व्यभिचार इति चेन्नैवम् । प्रत्यक्षप्रतिक्षिप्तस्य पक्षीकरणे न्यायाभावात् । अन्यथानुष्णोऽग्निः प्रमे-

१ अत्र किञ्चित्पतितमिव प्रतिभाति ।

यत्वादित्यादावपि पक्षीकरणमेव शरणं स्यात् । अथ पक्षीकृतेनैव व्यभिचारोद्भावनेऽनुमानमात्रमुद्राभङ्गप्रसङ्गः । तथा हि धूमानुमानेऽपि शक्यमेवं वक्तुम् । वह्निव्यभिचारी धूमः पर्वतनितम्बे तमन्तरेण । यदि हि तत्रापि प्रत्यक्षेणाशुशुक्षणिः प्रक्षिप्तः स्यात्तदा को नाम न मन्येत व्यभिचारम् । न चैवम् । अयोग्यदेशस्थतया तत्र प्रत्यक्षस्य विधौ प्रतिषेधे वा कुण्ठितत्वेन सन्देहात् । अत एव हेतोरत्रावसरः । "सन्दिग्धे हेतुवचनम्" इति वचनात् । न चैवं प्रस्तुतेऽस्ति । नेदीयस्थैरवचनैरप्यवधानैकचित्तैरपि तृणादिषु प्रत्यक्षेण प्रतीतेरनुपलम्भात् । अप्यक्षमेव च प्रतियोगिनः प्रतियोग्यन्तरापेक्षयानुपलब्धिरुच्यते । ततोऽनुपलब्धिबाधितमेव व्यवहारसाधनापेक्षयानुमानबाधितमुच्यते । न चानुमानबाधितेऽप्यनुमानान्तरावकाशः । अथ दृश्यविशेषणस्यैवाभावं व्यवहारयति । दृश्यादृश्यसाधारणं च बुद्धिमत्त्वमिति दृश्यतानियमानुपपत्तेर्बुद्धिमतः कथमनुपलब्धिमात्रेण तृणादिजन्मनि निषेधः । ततः सन्देहात्पक्षीकरणं न्याय्यमिति चेत् । तदेतदतिस्थवीयः । व्याप्तिसाधनायाध्यक्षानुपलब्धेरधिकारदानादेव दृश्यताम्वीकारस्य प्रसञ्जायातत्वात् । न ह्यदृश्ये प्रत्यक्षमन्वयसाधनमनुपलब्धिर्वा व्यतिरेकसाधिनीभवितुमर्हति । दृश्यते तु नियतस्तृणादिना व्यभिचारचकितचेताः प्रत्यक्षागोचरेण बुद्धिमता व्याप्तिं गृह्णीयात् । गृह्णातु, न तु तत्र प्रत्यक्षानुपलम्भाश्रयः श्रेयानस्य । ननु दृश्यादृश्यविशेषणमनपेक्ष्य प्रेक्षावत्त्वमात्रेण व्याप्तिग्रहः । नैवम् । तावतापि हि प्रत्यक्षकृताया व्याप्तेरनवकाश एव । दृश्यैकस्वभावनियता हि सा कथं दृश्यादृश्यसाधारणरूपविषया भवेत् । तद्धि दृश्यमदृश्यं च रूपमेकबुद्धिमत्त्वादिधर्म्मानुवृत्तावपि स्वभावविप्रकर्षेतराभ्यामत्यन्तं भिन्नजाति । ततः प्रत्यक्षं दृश्यैकजातिस्वीकारेण प्रवृत्तमितरवार्तानभिज्ञं तद्विशिष्टमेव साधारणमपि धर्मं व्यापकमादर्शयति । यद्यपि देशकालविप्रकृष्टमपि न दृश्यम् । तथापि दर्शनयोग्यतयैकजात्येवेति । स्वभावविप्रकृष्टस्यैव प्रत्यक्षेण परिहारात् । सर्वान्यवर्जने हि नियतविशेषपर्यवसानाद्व्याप्तिरेव न स्यात् । यथा हि स्वप्रवृत्ति-

---

१ ' तु सानुमानमुच्यते ' इति प. भ. पुस्तकयोः पाठः ।

योग्यज्वलद्धासुराकारपुरस्कारेण प्रवर्तमानाध्यक्षकृता व्याप्तिः सप्तार्चिषि न जठरानलसाधारणरूपपर्यवसायिनी । अन्यथा तार्णादिभेद इवाभिमतेऽपि रूपे सन्दिहानो न तत्साध्यार्थक्रियालाभैकाग्रबुद्धिः प्रवर्त्तते । यथा वा पल्लवोल्लासने समीरणेन व्याप्तिरध्यक्षकृता स्पृश्यरूपपुरस्कारान्न स्तिमितमारुतसाधारणरूपपर्यवसायिनी । अन्यथा किसलयकम्पेन पवनमनुमिन्वन् स्पृश्यप्रभञ्जनानुरूपे प्रवृत्तिनिवृत्ती निश्चयेन नाचरेत् । तथा बुद्धिमत्यपि प्रत्यक्षकृता व्याप्तिर्नादृश्यसाधारणरूपपर्यवसायिनी । तस्मात्, प्रत्यक्षव्याजेन यदि प्रमितिमात्रमेव व्याप्तिसिद्धावभिधीयते । तदा प्रत्यक्षकृतकारणत्वनिश्चयस्य तस्य दृश्यादृश्यरूपपर्यवसायित्वाभावेन व्याप्तत्वात् । प्रयोगः—यो यः प्रत्यक्षकृतः कारणत्वनिश्चयो नासौ दृश्यादृश्यरूपपर्यवसायी । यथाग्नौ जठरजातजातवेदःसाधारणरूपं परिहरन्प्रत्यक्षकृतश्चासौ बुद्धिमतीति व्यापकविरुद्धोपलब्धिः । दृश्यादृश्यरूपपर्यवसायित्वं हि प्रत्यक्षाकृतत्वेन व्याप्तं तद्विरुद्धश्च प्रत्यक्षकृतकारणत्वनिश्चय इति व्याप्तेरभावात्सन्दिग्धविपक्षव्यावृत्तिकत्वमेव कार्यत्वस्य । किं च यदि दृश्यादृश्यविशेषणमवधूय धीमन्मात्रेण व्याप्तिर्विवक्षिता । तर्हि यदा बुद्धिमदभावे कुम्भकार्यस्याभावमुपदर्शयेद्वादी व्यतिरेकप्रतिपादनाय । तदा दृश्यादृश्यविशेषणशून्यचेतनमात्रस्याभावः केन प्रमाणेन सिद्धः । दृश्यानुपलब्धेर्दृश्यस्यैव प्रतिषेधेऽधिकारात् । अन्यथा तृणादिना व्यभिचारस्याशक्यपरिहारत्वात् । न हि दृश्यपुरुषविषयैवानुपलब्धिर्बुद्धिमन्मात्रस्य व्यतिरेकबोधसाधनीभवितुमर्हति । आत्यन्तिकविषयभेदस्य व्यक्तत्वात् । अन्यथा तृणादिजन्मन्यपि दृश्यपुरुषविषयैवानुपलब्धिः कार्यत्वव्यभिचारस्थिरीकरणकारणं किं न स्यात् । तयैव तत्राप्यदृश्यस्यापि कर्तुः प्रतिषेधसम्भवात् । **नं हि लामे प्रवेशश्छेदं निःसरणमिति न्याय्यम्** । तस्मादृश्यविशेषणापोहे व्यतिरेकग्रहणोपायाभावादव्याप्तेः पुनरपि विपक्षव्यावृत्तिसन्देहः । न च नभस्युभयाभावविभावनमुपायो व्यतिरेकग्रहणस्य । कार्यत्वाभावस्य बुद्धिमद्व्यापाराभावप्रयुक्तत्वनिश्चयानुपपत्तेः । तदपरकारणसाकल्ये हि तन्मात्राभावेऽभावः कार्यस्य तदभावप्रयुक्तः प्रत्येतुं

१ स्वार्थबुद्धयः पुरुषाः स्वार्थसिद्धेसमये प्रवर्तन्ते स्वार्थविनाशमालोच्य निवर्तन्ते तद्वत् ।

शक्यः। निवृत्तिमात्रं तु दासीगर्दभन्यायेनाकार्यकारणयोरपि सुलभम्। एवं च किं बुद्धिमत्कारणव्यापाराभावाद्विहायसि कार्यत्वाभाव उत कारणमात्रविप्रयोगादिति सन्देहः। तथा च स विफलः प्रयासः। अन्वयोऽपि हि कार्यमात्रस्य कारणमात्रेण गृह्यन्तामुतस्वित् पुरुषविशेषणेन कारणेनेति सन्देह एव। अथ दृष्ट एवायं पुरुषविशेषणकारणरूपो विशेषः कथं परिहर्तुं शक्यो धूमे दहनात्मवत्। यद्येवं दृश्यशरीररूपो विशेषः प्रतीत एव कथं परिहर्तुं शक्यः। चित्रभानोर्भास्वराकारवत्। स हि तर्हि विशेषो व्यभिचार्यते भूधरादिषु दृश्यशरीरकर्तारं विनापि कार्यत्वस्य दर्शनादिति चेत्। व्यभिचार्यतां नाम। किन्तु यथा दृष्टत्वात्पुरुषविशेषणकारणेऽन्वयो भवताभिधीयते तथा कार्येऽपि परिदृष्टविशेष एव पुरातनप्रासादादावन्वयोऽभिधीयतां न तु भूधरादाविति किं नश्छिन्नम्। नन्वेवं जैनानामपि कथं क्वाप्यनुमानादतीन्द्रियवस्तुसिद्धिः। तदसाधीयः। उपलम्भानुपलम्भप्रभवतर्कप्रमाणाद्व्याप्तिग्रहणवादिनामेवंविधदोषप्रक्षेपासम्भवात्। प्रत्यक्षानुपलम्भाभ्यां तु तद्ग्रहणवादिनां नास्ति तद्दोषेभ्यो मोक्ष इति। अपि च कथं प्रत्यक्षानुपलम्भाभ्यां कार्यमात्रस्य बुद्धिमत्कारणविशेषेण व्याप्तिग्रहणमनुगुणम्। यतोऽमू प्रत्यक्षानुपलम्भौ विशिष्टकार्यकारणजात्युल्लेखेनैव कार्यकारणभावग्रहणाय प्रवर्तते। तथा हि प्रत्यक्षानुपलम्भप्रवृत्तिसमनन्तरमीदृशात् ज्वलद्धासुरस्वरूपविशेषादीदृशकपोतकण्ठधूसरमक्षिकण्ठविकारकारि वस्तु जायते। ईदृशात्पुरुषविशेषात्पृथुबुध्नो-

१ ' अन्यथासिद्धिशून्यस्य नियता पूर्ववृत्तिता। कारणत्वं भवेत्तस्य–' इति कारणत्वलक्षणेऽन्यथासिद्धस्य न कारणतेति निश्चितम्। तथा च घटोत्पत्तौ शिरसि मृत्तिकामानीतवती दासी तथा तदानयनकारी गर्दभश्च न कारणं किंतु मृत्तिकैव। अन्यथासिद्धिशून्यत्वात्। मृत्तिकाहर्त्री दासी गर्दभश्चान्यथासिद्धौ। उपायान्तरेणापि मृत्तिकानयनस्य सुकरत्वात्। एतद्विचार्य निवृत्तिमात्रं तु' इत्यादिनिर्देशः। २ ' सकलप्रयासः ' इति प. भ. पुस्तकयोः पाठः। ३ ' न तथा ' इति प. पुस्तके पाठः। ४ ' ग्रहवादिनां तेषामेवंविधं ' इति प. भ. पुस्तकयोः पाठः।

दराद्याकारमीदृशात्तु तस्मादातानवितानीभूततन्त्वात्मकमित्यनेनाकारेण हेतुफलभावः सर्वापरकार्यकारणजातिव्युदासेन विशिष्टमेव जातियुग्ममुल्लिखन् प्रवर्तते। इयमेव गतिः सर्वत्र हेतुफलभाववेदने विदिता ध्रुवमीश्वरानुरोधात्प्रसिद्धनयलङ्घनमिदं वचः। अथाभिदधीथाः। कः पुनरत्रानुरोधः। यदि तार्णादिभेदमुदस्य वह्निना धूममात्रस्येव भूधरादिभेदमुदस्य कार्यमात्रस्य बुद्धिमता व्याप्तिं प्रतीयात्प्रत्यक्षम्। यथैव तर्हि बर्हिषा कार्यजातिविशेषस्य धूमस्यावान्तरसूक्ष्मजातिमात्रमन्तर्भाव्य व्याप्तिग्रहः। तथा बुद्धिमताप्यस्तु कार्यजातिविशेषस्यैव वस्त्रादेर्न तु कार्यमात्रस्य। यथा वात्यन्तविसदृशीरपि जातीरन्तर्भाव्य कार्यमात्रस्य बुद्धिमता व्याप्तिं जिघृक्षसि तथा कार्यमात्रस्यैव यत्र कार्यमात्रं तत्र वह्निरित्येवं वह्निनापि किं न तां गृह्णीयाः। इन्द्रियप्रत्यक्षप्रत्ययस्यैव बहिर्व्यापार उभयत्र कथं भिन्नां प्रवृत्तिमाश्रयेत्। अथ कार्यमात्रं व्यभिचरति चित्रभानुं ननु बुद्धिमन्तमिति व्यभिचारदर्शनादर्शनकृतोऽयं विभाग इति चेत्। तर्हि दर्शनादर्शनं विमर्शमनारूढं गच्छतृणस्पर्शवन्न व्यवहारायेति तदनुरूपेण विमर्शेनावश्यं भाव्यम्। न चायमस्ति। न हि कश्चिदग्निधूमादिष्वन्वयव्यतिरेकग्राहिप्रत्यक्षानुपलम्भाप्रवृत्तौ कार्यजातिरखिलाऽनलादुत्पद्यत इति संकल्पमनुभूय भूयोव्यभिचारदर्शनाद्यतः कार्यान्तराणि वह्निमन्तरेणाप्युपलभ्यन्ते ततो धूम एवानेन जन्यत इति निश्चयं परिचिनोति। किं तु झटित्येव प्रत्यक्षानुपलम्भानन्तरमस्मादस्मादेरिदं धूमादीति जातिविशेषद्वयं हेतुफलभावतया निश्चिनोति। किं चैतद्व्यभिचारदर्शनं किं सत्यामेव व्याप्तावनुमानमात्रं खण्डयति यद्वा व्याप्तिरेव मिथ्येति व्यवस्थापयति। नाद्यः पक्षः। विरोधात्। न हि साध्याविनाभावलक्षणा व्याप्तिश्च हेतोः। साध्याभावसम्भवकृतश्चानुमानाभावः सङ्गच्छते। द्वितीयेऽपि स्वसामर्थ्येन स्फुरत्येव व्याप्तिग्राहिणि प्रमाणे व्याप्तिमिथ्यात्वं तदवस्थापयेत्किं वा तस्यैव प्रामाण्यक्षयमादधानम्। पौरस्त्यपक्षे प्राचीन एव प्रतिक्षेपः। चरमे तु

सर्वत्रानुमानरूपे विषये तत्तस्य प्रामाण्यक्षयमादधाति नियते वा। प्राक्तने प्रकारे धूमध्वजानुमानमपि न स्यात्। किमिदानीं शरणमीश्वरानुमाने भविष्यति। नियतेऽपि विषये किमिष्टिवशाद्व्यभिचारदर्शनं व्याप्तिग्राहिप्रमाणस्य प्रामाण्यक्षयं कुरुते स्वयं तत्रैव प्रवृत्तितो वा। इष्टिवशान्नियते विषये व्याप्तिविहितौ व्यभिचारदर्शनं वराकमुदासीनमिति न कश्चिद्धेतुरहेतुर्वा तत्त्वतः। धूमेऽपि स्वेच्छया व्याप्तिखण्डनप्रसङ्गात्। तत्रैव प्रवृत्तितस्तु नियतविषयत्वं व्यभिचारगोचरस्यापि प्रत्यक्षस्य कथम्। यावता यथा नियतजातिप्रवृत्तिबुद्धिमत्त्वेन कार्यत्वमात्रस्य व्याप्तिग्राहिप्रत्यक्षं सर्वविषयमिष्टम्। तथा व्यभिचारगोचरमपि सर्वविषयमेवास्तु। कथं नियतविषयम्। अन्यूनानतिरिक्तविषयैकत्वादुभयोः। तस्मादेकविषय एव व्याप्तिग्रहो व्यभिचारचेतनं चेति किमधुनापि साधनमसाधनं वा स्यात्। भवतु भवदुपरोधाद्व्यभिचारदर्शनस्य नियतविषयत्वम्। तथापि न सकृदेव व्यभिचारवतां तद्बोधः। किन्तु क्रमेण। व्याप्तिग्रहणकाले च व्यभिचारिणामपि व्यभिचारदर्शनमाहात्म्य नास्तीति धूमस्य पटादिकार्याद्विशेषाभावादहेतुत्वम्। हेतुत्वे वा धुमस्येव पटादिकार्यस्यापि हेतुत्वं स्यात्। न च सर्वस्यान्यस्य कार्यस्य व्यभिचारदर्शनाद्धूमे व्याप्तिर्विश्राम इति वाच्यम्। अशक्यो ह्ययमर्थो व्यभिचारविषयाणामनन्तत्वाद्देशादिविप्रकर्षवतां गोचरीकरणकालापेक्षया पुरुषायुषः कनीयस्त्वात्। तस्माद्व्यभिचारदर्शनवन्नियतविषय एव व्याप्तिग्रहोऽपि निरपवादः। नन्वेवं केनचित् क्वापि व्याप्तिग्रहणे परेण व्यभिचारोपदर्शनार्द्येषा साधारणानेकान्तव्यवस्था सा दुःस्थेति चेत्। एवमेतद्यदि बुद्धिपाटवनियमः सर्वेषाम्। मन्दबुद्धिस्तु सादृश्यादिना जातिविशेषप्रवृत्तेऽपि प्रत्यक्षे जात्यन्तरेणैकीकृत्य व्याप्तिग्रहणाभिमानादनुमानमातिष्ठमानः पटुना परेण व्यभिचारमादर्श्य

१ शक्तिकत्वादुभयोरिति प. भ. पुस्तकयोः पाठः। २ 'विश्राम' इति तु अपाणिनीयम्।

व्याप्तिदुर्ग्रहं प्रत्याय्यते । अतः साधारणानेकान्तव्यवस्था । यथा धूमप्रवृत्तेऽपि व्याप्तिग्राहिण्युच्छलत्कपोतकण्ठधूसरं वस्तु वह्निव्याप्तमनुस्मरन् मारुतोद्धूतधूलिपटलादनलमनुमिन्वन् बाष्पोदयेन प्रसिद्धोषर्बुधवैधुर्येण व्यभिचारमादर्श्य वार्यते । ततो जातिविशेषप्रतिबद्ध एवाध्यक्षेण प्रतिबन्धोऽवसेयः । ननु यदि जातिविशेषप्रतिबद्धँबोधः । तदा एते पटादयो हरिद्रादिद्रव्यसंस्कारवन्तो रागयोगित्वात्पूर्वोपलब्धपटवदित्यादौ कथमत्यन्तविजातयोऽपि पैटकुट्याद्या रागमात्रयोगिनो हरिद्रादिद्रव्यसंस्कारमनुमापयेयुः । अनुमापने वा तद्वदेवात्यन्तविजातीया अपि कैलाशकुलिशादयः साधारणकार्यत्वधर्म्मकाः पुरुषमनुमापयिष्यन्तीति चेत् । नैवम् । कार्याख्यव्याप्यस्यात्र गमकत्वात्तदपेक्षयैव सजातीयविजातीयतायाश्चिन्त्यत्वात् । तच्च निर्वर्त्यविकार्यकर्मापेक्षया यथाक्रमं द्विविधं धर्मिरूपं धर्मरूपं च । तत्र सर्वथाऽपूर्वोत्पत्तौ धर्म्मिणो व्याप्तिरुच्यते धूमादिवत् । तदा हि धूमान्तरमेव सजातीयं विजातीयमन्यवस्तु । यदा तु पूर्वस्थितस्यैव धर्म्मान्तरोत्पत्तिस्तदा च व्याप्तिरुच्यते पयस्यौष्ण्यादिवत् । तदा चौष्ण्यान्तरमेव सजातीयो धर्मः । नाधुना धर्मिजातेरपेक्षा । तथा ह्यग्निसंयुक्तमिदं जलमुष्णत्वाद्धृतवदित्यत्रौष्ण्यारूप्ययोर्जलघृतसमाश्रितयोर्धर्मयोरेव सजातीयत्वम् । ननु जलघृतयोर्धर्मिणोः । एवं रागोऽपि पटकट्टादिद्रव्यवैजात्यमवमत्य स्वरूपसजातीयत्वापेक्षयैव द्रव्यसंस्कारस्य गमकः । अत एव तद्विशेषे क्वचित्कुङ्कुमस्य क्वचिद्धरिद्रादेः सक्तः संस्कारोऽनुमीयते । न चैवं पूर्वस्थिते भूधराम्भोधरादौ कार्यत्वमात्रनिर्वर्तकः पुरुष इष्टः, किन्तु कुम्भकारादिवदपूर्वोत्पादकः । तस्माद्धर्मिवन्तुव्याप्तिग्रहो न धर्ममात्रप्रत्यासत्तिमनुरुध्यते । नापि धर्मव्याप्तिर्धर्मिणः सजातीयत्वम् । अतो न रागवद्धर्मिवैजात्येऽपि कार्यत्वस्य गमकत्वम् । अन्यथा पाण्डु-

१'धूम्रधूलि' इति प. भ. पुस्तकयोः पाठः । २ ' जातिविशेषप्रतिबद्ध एवाध्यक्षेण प्रतिबन्धबोधः ' इति प. भ. पुस्तकयोः पाठः । ३ ' पटकट ' इति भ. पुस्तके पाठः ।

द्रव्यादपि हव्याशनानुमानप्रसङ्गो दुष्परिहारः । व्यभिचारोत्तरस्य दूषितत्वात् । तस्मात्कार्यजातिविशेषप्रबद्धमेवाध्यक्षेण प्रतिबन्धबोधनम् । यदि च कार्यजातिभेदे प्रवृत्तमपि प्रत्यक्षं कार्यमात्रमधिष्ठानीकरोति । कारणेऽपि तर्हि प्रवर्तमानं कारणमात्रमेव व्यापकमवधारयतु । कस्मा-
५ द्बुद्धिमद्रूपं तदवलम्बते । ततो यदि न भवदभिप्रायानुरोधोऽध्यक्षस्योभयत्र सामान्यावलम्बिना विशेषावलम्बिना वा भवितव्यमनेन । सामान्यावलम्बने कार्यात्कारणमात्रानुमितौ का वार्ता विरूपाक्षसिद्धेः । विशेषावलम्बने च कार्यमात्रेण व्याप्तिरसिद्धेति । तस्मादनुभवाद्युक्तेश्च विशिष्टामेव कार्यजातिं हेतुविशेषव्याप्तामुपदर्शयति प्रत्यक्षमिति स्थितम् ।
१० प्रयोगः— यद्यत्कार्यकारणभावग्राहि प्रत्यक्षं तत्तद्विशिष्टजातिप्रतिनियतव्यापारम् । यथाग्निधूमयोः । तथा चेदं बुद्धिमता कार्यस्य व्याप्तिसाधनमिति । नास्यान्यथा व्यापाराशङ्कयाऽनैकान्तः । कारणानुपलब्धिबाधितत्वात् । कारणभेदो हि कार्यभेदस्य कारणम् । अन्यथा सर्वस्याहेतुकत्वप्रसङ्गात् । न च प्रत्यक्षस्य कारणभेदः[1] । विषयेन्द्रियालोकादि-
१५ लक्षणसमानसामग्रीप्रभवत्वादिति । दृष्टान्ते साध्यशून्यताशङ्कायां च यद्यत्प्रत्यक्षं तत्तद्विशिष्टजातिप्रतिनियतव्यापारं यथा व्यभिचारग्राहि । प्रत्यक्षं चाग्निधूमयोः कार्यकारणभावग्राहीति बाधकमभिधानीयम् । अत्रापि स एवानैकान्तपरिहारः । एवं च कार्यजातीनामत्यन्तविलक्षणानामानन्त्यात्प्रतिजातिभेदं च व्याप्तिग्रहणापेक्षणाद्यावज्जातिकं
२० कार्यं बुद्धिमत्पूर्वकं परिच्छिन्नं तावत एवानुमानमसमञ्जसमित्यसमञ्जसम् । कीदृशी पुनः कार्यजातिर्बुद्धिमता व्याप्तेति चेत् । उच्यते । यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिः । किं सा साधनबुद्धिरथ प्रकृतसाध्यबुद्धिः । साधनबुद्धिस्तावद्भवतां सिद्धैव क्षित्यादीनां कार्यतया सम्मतत्वात् । अथोत्तरः पक्षः । तेनायमर्थो भवति नेदं क्षित्यादिषूपलभ्यमानं
२५ साध्यानुमानसमर्थं कार्यत्वं किन्त्वन्यदेव साध्यबुद्धयजननात् । न

---

१ ' कारणभेदोऽस्ति ' इति प. भ. पुस्तकयोः पाठः ।

चैतत् युक्तम् । सर्वानुमानोच्छेदप्रसङ्गात् । धूमादिष्वपि हि शक्यमेवं वक्तुं नायमस्यनुमितिसमर्थो धूमः किं त्वन्य एव साध्यबुद्ध्यजननात् । तथा च तावन्न साधनं सिद्ध्यति यावत्साध्यबुद्धिर्न सिध्यतीति तावन्न साध्यं सिद्ध्यति यावत्साधनबुद्धिर्न सिद्ध्यतीति स्फुटतरमितरेतराश्रयत्वमिति । तदमनोरमम् । यतः कृतबुद्धिरिति न साधनबुद्धिर्नापि प्रकृतसाध्यबुद्धिः किं तु कुविन्दादिस्वभावसाध्यबुद्धिः । तदभावाच्च न साक्षाद्भवदीयहेत्वसिद्धिः प्रकृतसाध्यासिद्धिर्वा विवक्षिता । किन्त्वात्यन्तिकवैजात्यप्रदर्शनमेतत् । तद्बलेन हेतोरसिद्धिरव्याप्तिर्वाभिमतैव । तथा हि शून्यनगरपरिदृष्टदेवकुलादौ शिल्पिबुद्धिराविरस्ति न मलयमकरालयादौ । तदस्याः शिल्पिबुद्धेर्भावाभावौ न जातिभेदमात्यन्तिकमन्तरेणेत्यभिप्रायः । ततो यथा धूमादग्निबुद्धिर्भवन्ती गर्दभादेरभवन्ती धूमाद्गर्दभस्य नियतं जातिभेदमापादयति । तथेदमपि निश्चितपौरुषेयभावेभ्यो भावेभ्यः कैलाशकुलिशादीनाम् । कथं पुनरत्र सजायतीयत्वाभाव एव प्रतिपत्तव्य इति चेत् । कुविन्दादेरम्भोददम्भोलिप्रभृतिसम्भव इति स्वप्नेऽपि शङ्काविरहात् । अन्यथा कुविन्दपादमर्दनान्नानावृष्टिकष्टमाविशेल्लोकः । परचक्राक्रान्तिकातरो वा क्षितिधरजलधिव्यवधिमभिलषंस्तत एव निवृत्तिमासादयेत् । कुविन्दस्थानीयस्तवाप्यपरोऽपेक्ष्य एवेति चेत् । न । सजातीयं चेत्कार्यं विजातीयकारणगवेषणानुपपत्तिः । कुविन्देनैव साध्यसिद्धेः । न हि पटान्तरेऽपि कुविन्दादपरस्यापेक्षास्ति । वस्त्रविशेषे विशिष्टशिल्पिनोऽपेक्षास्तीति चेत् । अस्ति यावदेव तु वस्त्रान्तरेणैकजातीयत्वपरामर्शो दृढः । अत एव कुविन्दस्यैव शिल्पिनः कल्पनम् । तद्विमर्शाभावे तु पौरुषेयतायां एव सन्देहः । मेरुमन्दरादयस्तु न केनचित्पौरुषेयेणैकप्रत्यवमर्शभाजः । तदेषामध्यक्षसिद्धमत्यन्तवैजात्यमपह्नवानः पटात्पटान्तरे समानशिल्प्यनुमानविरहप्रसङ्गेन तदेव स्वीकार्यते । यथा

---

१ ' तथेयमपि ' इति प. म. पुस्तकयोः पाठः ।

हि वल्मादिसजातीयेऽपि भूधरादौ कुविन्दादिविलक्षणः कर्तानुमीयते तथाऽदृष्टकुविन्दादिव्यापारे वल्मान्तरादावपि न कुविन्दादिरेव कर्तानुमीयेत । न चैवम् । ततो न वल्मादिसजातीयत्वं भूधरादेरिति सिद्धे जातिभेदे यादृक्कार्यं कुम्भादि पुरुषप्रतिबद्धं न तादृग्गर्भार्भकादीत्यसिद्धिस्तत्र कार्यत्वविशेषस्य । यादृग्गर्भार्भकादिकार्यं न तादृक् पुरुषव्याप्तमित्यव्याप्तिः कार्यत्वमात्रस्य । एवं च स्थिते प्रकृतसाध्यबुद्ध्यजननद्वाराणि दूषणानि दूरमपास्तानि । न हि वयं प्रकृतसाध्यबुद्धेरभावात्कार्यत्वहेतोरसिद्धिं ब्रूमः । किं तर्हि मन्दरादौ कुविन्दादिकर्तृबुद्धेरभावाद्वल्मादिसजातीयकार्यत्वासिद्धिम् । ततश्च प्रकृतसाध्यबुद्धिवैधुर्यमिति न कश्चिद्दोषः । अपि च यदि घटादौ तथा दर्शनात्कार्यतामात्रं गोत्रादौ बुद्धिमद्धेतोरनुमापकमङ्गीक्रियते । तर्हीदानीं तद्वदेव मृद्विकारतापि शक्रमूर्धनि मनुष्यनिर्मित्यनुमापिका किं माभूत् । न खल्वत्रापि कलशवल्मीकयोर्मृद्विकारत्वं भिद्यते । न च तादृशसंस्थानविशेषो मनुष्येणाशक्यक्रियः । तादृशत्वेऽपि तस्य तदन्वयव्यतिरेकानुविधानादर्शनान्न तत्कार्यमिति चेत् । न । इहापि साम्यात् । इहापि यस्य यस्य बुद्धिमद्भावानुविधानमस्ति तस्य सर्वस्यास्तु तत्पूर्वता प्रासादादीनाम् । न पुनस्तथाविधस्यापि भुवनादेर्भवितुमर्हति । तस्य तदन्वयव्यतिरेकानुविधानाभावात् । नन्वेवं यो यो धूमविशेषो वह्निभावाभावानुविधायिभावाभाव उपलब्धः स सर्वोऽस्तु वह्निपूर्वो न तु पर्वतनितम्बवर्तीति कथं ततो वह्निरनुमीयते सामान्यबुद्धिविशेषविषयत्वेन । कारणाभावावधारणस्येहापि साम्यादिति चेत् । तत्किमिदानीं मनुष्यकार्या कुड्यादय उपलब्धा इति शक्रमूर्धापि तथास्तु । कस्यचिद्विशेषस्य कुड्यादिभ्यः शक्रमूर्धादेः सम्भवान्नैवमिति चेत् । स तर्हि प्रासादादिभ्यः सम्भवति भुवनादेरपीति न विशेषः । न त्वेवंविधो वह्न्यन्वयव्यतिरेकानुविधायिनां धूमविशेषाणां पर्वतगताद्धूमात्स्वरूपेण विशे-

---

१ ' कार्यकारणभावावधारणस्य ' इति प. म. पुस्तकयोः पाठः ।

षोऽस्ति । अत एव न पाण्डुद्रव्यमात्रात्कुमुदकपोतादेर्दहनानुमानम् । धूमत्वासामान्यस्यैव ततो भेदापादकत्वात् । किं च । यदि कुम्भादौ कार्यत्वमात्रस्य बुद्धिमदन्वयव्यतिरेकानुविधानदर्शनात्पृथिव्यादावपि कार्यतेप्यते । तर्हि केषाञ्चिन्मणिमुक्तादीनां पुरुषान्वयव्यतिरेकानुविधानस्योपलम्भाद्रत्नाकरसमुत्थानामपि तत्कार्यत्वप्रसङ्गः । इष्यत एवं पुरुषस्तत्रापीश्वरः कर्तेति चेत् । कथं तर्हि तत्राकृत्रिमव्यवहारो लोकस्यास्खलद्रूपः । तत्रेश्वरस्य कर्तुरतीन्द्रियत्वेनानुपलम्भादिति चेत् । न । अन्यत्रापि सर्वत्र कर्तुरनुपलम्भाद्देशकालविप्रकृष्टस्य कर्तुरुपलम्भासम्भवादतस्तेष्वप्यदृष्टकर्तृकेष्वकृत्रिमव्यवहारः । सागरसमुत्थादिभिः समानार्थतायां वा स्यादविशेषात् । तज्जातीयेषु कर्तुरुपलम्भाददृष्टकर्तृकेष्वपि कर्तुरनुमानात्कृत्रिमव्यवहार इति चेत् । सामुद्रेष्वपि दृष्टकर्तृकसमानजातीयत्वेन कर्तुरनुमानात् कृत्रिमव्यवहारः किं न स्यात् । अन्यथात्रापि माभूदविशेषात् । सामुद्राणां दृष्टकर्तृकमण्यादिविजातीयत्वेन कर्त्रनुमानायोगात्कृत्रिमव्यवहाराभावे स्थावरादिकार्यस्यापि दृष्टकर्तृकप्रासादादिकार्यविजातीयत्वात् । कर्त्रनुमानं न स्यादविशेषात् । तस्माद्दृष्टकर्तृकसजातीयानामेव कर्त्रनुमानं युक्तम् । यथा जीर्णकूपप्रासादादीनाम् । तत्रापि मानेन लौकिकपरीक्षकाणामक्रियादर्शिनामपि कृत्रिमबुद्धयुत्पत्तेः । न तद्विजातीयानां कर्त्रनुमानं युक्तम् । यथा नदनदीपर्वतादीनाम् । लौकिकपरीक्षकयोस्तत्र कृतबुद्धयनुत्पत्तेः । एवं विशिष्टं कार्यत्वमसिद्धं वसुधादिषु । कार्यत्वमात्रं पुनरप्रसिद्धव्याप्तिकमिति स्थितम् । यच्च प्रत्यक्षादिभिरबाध्यमानपक्षत्वेन कालात्ययापदिष्टत्वं प्रत्यादिष्टम् । तदपि न स्पष्टम् । पक्षैकदेशस्य तृणादेर्ग्रहणयोग्यकर्तृकस्याप्यगृह्यमाणकर्तृकतया प्रत्यक्षेण बाधनात् । अथ न प्रत्यक्षेण पक्षैकदेशोऽत्र बाधितुं शक्यः । कर्तुः प्रत्यक्षेण ग्रहीतुमयोग्यत्वादिति चेत् । न । प्रत्यक्षानुपलम्भाभ्यां व्याप्तिग्रहणाङ्गीकारेण दृश्य एव विषये

---

१ ' लौकिकेतरयोः ' इति भ. पुस्तके पाठः ।

साधनाभिधानस्य हठेनायातत्वादित्युक्तम्। अपि च। ज्ञातचिकीर्षाप्रयत्नशरीरशाली खल्वात्मा मूर्तः कर्ता भवति। कुलालादेस्तथोपलम्भात्। एवंभूतश्च कर्ता प्रत्यक्षग्रहणयोग्य एव। यद्यपि ज्ञानादिभागो न योग्यः। तथापि योग्यशरीरभागबाधाद्भवति प्रत्यक्षं बाधकम्। अथ ज्ञानचिकीर्षाप्रयत्नवानेव कर्ताभिधीयते न शरीरवानपि। ननु शरीरं कुतो न कर्तृत्वभागनिवेशि। ज्ञानोत्पत्तावुपयुक्तत्वादिति चेत्। तर्हि ज्ञानमपि त्यज्यताम्। इच्छोपयोगित्वात्। इच्छापि त्यज्यतां प्रयत्नोपयोगित्वात्। ततः प्रयत्नमात्रशाली कर्ता प्राप्तः। तथा च न चेतनः कर्तेत्यहो कमनीयं कर्तृत्वमालोकयाञ्चक्रुर्योगाः। तस्माज्ज्ञानादिचतुष्टयशाली कर्ता वाच्यः। एवञ्च भवति प्रत्यक्षं बाधकम्। अथ न शरीरं कर्तृभागनिविष्टमन्यत्रोपक्षीणत्वात्। ज्ञानमन्तरेण तु न कर्तृत्वम्। न ह्यत्र ज्ञानमिच्छामात्रोपयोगि। किन्त्विच्छाप्रयत्नयोर्विषयावच्छेदोपयोग्यपि। न हीच्छाप्रयत्नौ स्वयं स्वविषयप्रवणावपि तर्हि ज्ञानविषयावच्छेदद्वारेणैव तयोः सविषयत्वम्। तयोः स्वभावाद्विषयावच्छेदे तदपलापप्रसङ्गः। अयमेव हि ज्ञानस्य ताभ्यां भेदो यदिदं विषयप्रवणं स्वभावात्। तस्मान्नान्यत्रोपयोगितामात्रेण ज्ञानं त्यक्तुं युज्यते। इच्छाप्रयत्नयोर्विषयावच्छेदार्थमधिकोपयोगात्। तस्माज्ज्ञानचिकीर्षाप्रयत्नाधार एव कर्ता। शरीरं तु ज्ञानोपयोगीति न कर्तृत्वनिवेशि। एवं च सति न प्रत्यक्षं बाधकम्। ज्ञानादित्रयाधारस्य हि कर्तुः प्रत्यक्षेण ग्रहीतुमयोग्यत्वादिति। तदयुक्तम्। यतो यस्यास्मदादेरनित्याविच्छाप्रयत्नौ भवतस्तस्य पूर्वं विषयपरिच्छेदः। परिच्छिन्ने च तस्मिन् सुखदुःखसाधनतामवधार्य तदनुरूपाविच्छाप्रयत्नौ प्रवर्तेते इति वक्तुं युक्तम्। यस्य पुनरेतौ नित्यौ तस्य यत्र क्वचन स्वयं सिद्धौ स्तस्तत्र स्वत एवेति किं कार्यं ज्ञानेन। न हि तौ ज्ञानपूर्वौ प्रवर्तेते। नित्यताव्याहतिप्रसङ्गात्। ननूक्तमिच्छाप्रयत्नयोः स्वयं विषया-

ज्ञानदर्शनचारित्रत्रयमिति ज्ञानादिचतुष्टयम्।

वच्छेदप्रवणत्वे ज्ञानरूपता स्यादिति । तदसत् । यतो विषयावच्छेद इत्यत्र कोऽर्थः । किं प्रतिनियते विषये ज्ञप्तिः प्रवृत्तिर्वा । पौरस्त्यपक्षे स्यात्तयोर्ज्ञानरूपता । परं नामुं पक्षमाचक्ष्महे । द्वितीयपक्षे तु कथमनयोर्ज्ञानरूपत्वम् । न च विषयविज्ञानं विना प्रवृत्तिरेवानयोर्न प्राप्नोतीति वाच्यम् । नित्ययोस्तयोः परिमाणस्येव व्योम्नि क्वापि विषये सदा प्रवृत्तत्वात् । अथ नित्यावप्येतौ नैकविषयावेव तत्तद्भावभेदोपधाने तत्तद्विषयत्वसम्भवात् । तथा च यत्र यत्रोपधानीभूते भावे ज्ञानं भवति तत्तद्विषयाविच्छाप्रयत्नौ भवतः सवितृप्रकाशवत् । ज्ञानं विना तयोस्तत्तद्विषयत्वं दुरापम् । तदयुक्तम् । यस्मादुत्पन्नेनैव भावेन न तावदुपधानं सम्भवत्येवं चेतरेतराश्रयम् । उत्पन्नेनैव हि भावेनोपधाने सतीच्छाप्रयत्नयोस्तद्विषयत्वं तस्मिंश्च सत्युत्पन्नेन भावेन तयोरुपधानमिति । अथास्मदादौ शरीरसहितानामेव विलोकनात्तत्कल्पनाप्यस्तु । अथ तदीयज्ञानेच्छाप्रयत्नानामस्मदादिज्ञानेच्छाप्रयत्नविलक्षणत्वाच्छरीरसाहित्यं विनापि सद्भावः स्वीक्रियते । तर्हि तदिच्छाप्रयत्नयोरस्मदादीच्छाप्रयत्नविलक्षणत्वाज्ज्ञानसाहित्यमपि त्यज्यताम् । रुचीनां कान्तास्वेव सन्मानार्हत्वात् । अपि च विषयावच्छेदाय चेज्ज्ञानं मृग्यते । मृग्यताम् । इच्छया तु किं कार्यम् । प्रयत्नविषयस्य ज्ञानेनैवावच्छिन्नत्वात् । न चेच्छां विना प्रयत्नः कथं प्रवर्तताभिति वाच्यम् । तस्य नित्यत्वेन यत्र क्वचन सदा प्रवृत्तत्वात् । अन्यत्र दृष्टथावेच्छाकल्पने शरीरमपि कल्प्यताम् ।

ईश्वरेऽदृश्यशरीरस्वीकारस्य खण्डनम् ।

अथास्तु शरीरमदृश्यं तु तदिति न तृणादिषु तददर्शनात्कालात्ययापदिष्टेति चेत् । ननु कुतोऽयं शरीरवानप्यदृश्यः । विद्यादिप्रभावाज्जातिविशेषाद्वा । विद्यादिप्रभावस्य शम्भावदृश्यत्वेहतुत्वे कदाचिदसौ दृश्येत । न खलु विद्यातन्त्रादिमतां शाश्वतिकमदृश्यत्वमुपपन्नम् । यदैव हि विद्यादीनां प्रयोगस्तदैव तस्यादृश्यत्वसम्भवः । जातिविशेषोऽ-

स्यादृश्यत्वे हेतुरित्यप्यलौकिकम् । एकस्य जातिविशेषासम्भवात् । अनेकव्यक्तिनिविष्टत्वात्तस्य । पिशाचादौ हि सन्त्यनेकव्यक्तय इति युक्ता तत्र जातिविशेषादृश्यतेति । दृश्यशरीरस्य कर्तुस्तृणादावदर्शनात्सिद्धं कालात्ययापदिष्टत्वम् । यच्चोक्तं प्रकरणसमत्वोद्भावननिमित्तोपन्यस्तानुमाने येन केनापि प्रमाणेन त्रिलोचन इत्यादि । तदपि नोपपन्नम् । अत्र धर्मिणो विकल्पसिद्धत्वात् । यथा च विकल्पसिद्धोऽपि धर्मी भवति तथा पुरस्तात्प्रकटयिष्यते । यद्वास्तु प्रमाणसिद्ध एवायं धर्मी । न च कालात्ययापदिष्टत्वनिष्टङ्कः शक्यः कर्तुम् । यदि हि क्षितिधरादिनिर्म्माणनैपुण्यादिद्वारेण केनचिदस्य सिद्धिरभिधीयते । तदा स्यात्प्रकृतदूषणस्पर्शः । यावता भगवदागमप्रसादात्तत्सिद्धिरुच्यते । न चास्मादसौ तत्कर्तैव सिध्यतीति वाच्यम् । अणिमाद्यष्टविधैश्वर्यशालिनो नितान्तबलीयसः खेचरविशेषस्यैव तस्य तत्राभिधानात् । क्षित्यादिकर्तृत्वस्य सर्वथा तत्राश्रवणात् । अथैवं सिद्धिसाध्यतावतारः । विद्याधरविशेषस्य क्षित्याद्यकर्त्तृत्वेनास्माभिरपि स्वीकृतत्वात् । अस्मदभिप्रेतस्य तु तस्य न प्रतिरोधः । मैवम् । य एव हि भवतः सर्वज्ञत्वाद्यतिशयशाली शूली सम्मतः स एवास्माकं विद्याधरविशेष इति न पुनरतोऽन्यः । ततो विशेषविप्रतिपत्तावपि सामान्येन शम्भुर्धर्मी युक्त एव । अन्यत्रापि सर्वत्र धर्मी सामान्येनैव निगद्यते । अन्यथानुमानमात्रमुद्राभङ्गप्रसङ्गः । शक्यं हि वक्तुं शब्दानित्यतानुमानेऽपि । किमयं शब्दो द्रव्यं गुणो व्यापी तदितरः श्रूयमाणोऽन्यो वा धर्मितयोपात्त इति । अतः सामान्येन धर्मिणोऽभिधानान्न कालात्ययापदिष्टता । अथ यः कर्ता स शरीरीत्येवं शरीरकर्तृत्वयोर्व्याप्यव्यापकभावसिद्धौ सत्यामीश्वरे शरीरं निवर्तमानं कर्तृत्वमपि निवर्तयेत् । न चैवम् । शरीरस्य कर्तृत्वं प्रति व्यापकत्वासिद्धेः । कर्तुर्बुद्ध्यनित्यत्वोपाधिकत्वाच्छरीरसम्बन्धस्य । अनित्यबुद्धिसमन्वित

---

१ सर्वकर्तृत्वेत्यधिकं प. भ. पुस्तकयोः ।

एव हि कर्ता शरीरसम्बन्धमपेक्षते नापरः । तदसुन्दरम् । यतः किमुपाधिलक्षणम् । साधनाव्यापकत्वे साध्येन समव्याप्तिकत्वमिति चेत् । तत्तर्हि कर्तुः शरीरसम्बन्धे सम्भावनाभुवं नावतरत्येव । यथा हि शरीरं कर्तुर्व्यापकं तथा बुद्ध्यनित्यत्वमपि । न च साधनव्यापकत्वमुपाधिरिति त्वयैव व्याहृतम् । अन्यथा आर्द्रेन्धनसम्बन्धोऽप्यग्निसम्बन्धे धूमस्योपाधिः स्यात् । अग्निवत्तस्यापि धूमरूपसाधनव्यापकत्वात् । तस्मान्नोपाधिसम्भवेन शरीरस्य कर्तृव्यापकत्वासिद्धिः । अथ स्यादेवं यदि कर्तुर्बुद्ध्यनित्यत्वं व्यापकं स्यात् । न चैवम् । या बुद्धिः सा नित्यैवेत्यनित्यत्वसम्बन्धस्य बुद्धावौपाधिकत्वात् । तथा क्वचिद्बुद्धेरनित्यत्वाभावे क्वचिन्नित्यत्वबुद्धिसम्भवेनापि कर्तृत्वभावात्कथं तदनित्यत्वं तद्व्यापकं स्यात् । उपाधिबुद्धेरनित्यत्वेन सम्बन्धोऽदृष्टकार्थसमवायः । सैव हि बुद्धिरनित्या याऽदृष्टेन साकमेकस्मिन्नस्मदादावेव समवेतेति । तन्न सारम् । अदृष्टैकार्थसमवायस्य बुद्ध्यनित्यत्वेन सार्धं व्याप्त्यभावेनोपाधित्वायोगात् । न हि शाकाद्याहारपरिणामः श्यामत्वेनाव्याप्तावुपाधिर्नाम । व्याप्त्यभावश्चात्र मुक्तात्मसु नास्तीति वाच्यम् । एवंरूपाया मुक्तेः पराकरिष्यमाणत्वात् । यद्वाऽस्त्वेवंरूपा मुक्तिः । तथापि नादृष्टैकार्थसमवायस्योपाधिता । अनित्यत्वात् । साधनव्यापकत्वस्य चार्द्रेन्धनादेरिवानुपाधित्वात् । अथ दोषनिमित्तोऽदृष्टसमवायस्ततश्च यत्रैव दोषवत्त्वाश्रयेऽदृष्टसमवायस्तत्रैव बुद्धिरनित्या निर्दोषे पुनराश्रयभेदे बुद्धिरपि भविष्यत्यदृष्टसमवायोऽपि न भविष्यतीति चेत् । ननु निर्दोषस्तावदाश्रयो मुक्तात्मनस्तत्र च न बुद्धिमङ्गीकृतवानसि । ईश्वरस्य तु निर्दोषता नाद्यापि प्रसिद्धा । तस्मात्त्वदुक्तोपाधीनामघटनात्सिद्धं कर्तुर्व्यापकं शरीरम् । यत्तु कन्दलीकारः प्राह । "किं शरीरित्वमेव कर्तृत्वमुत परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वम् । न तावच्छरीरित्वमेव कर्तृत्वम् । सुषुप्तस्यो-

१ न्यायकन्दल्यां पृ. ५६ पं. १०.

दासीनस्य च कर्तृत्वप्रसङ्गात् । किन्तु परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वम् । तस्मिन् सति कार्योत्पत्तेः । तच्चाशरीरस्यापि निर्वहति । यथा स्वशरीरप्रेरणायामात्मनः । अस्ति तत्राप्यस्य स्वकर्मोपार्जितं तदेवेति चेत् । सत्यमस्ति । परं प्रेरणोपायो न भवति । स्वात्मनि क्रियाविरोधात् । प्रेर्यतयाऽस्तीति चेत्, ईश्वरस्यापि प्रेर्यः परमाणुरस्ति" इति । तदपि नावदातम् । यतः स्वकर्मोपार्जितशरीरज्ञानचिकीर्षाप्रयत्नशालित्वं कर्तृत्वमाचक्ष्महे । सुषुप्तोदासीनावस्थायां तु शरीरमात्रसद्भावेऽपि विवक्षितकार्यगोचरज्ञानेच्छाप्रयत्नाभावान्न तदुत्पादः । स्वशरीरप्रेरणालक्षणकार्यकर्त्ताऽपि स्वकर्म्मोपार्जितशरीरसम्बद्ध एवेति क्व व्यभिचारप्रचारः । स्वात्मनि क्रियाविरोधोऽपि नास्ति । शरीरावयविनः क्वापि प्रध्वंस इव प्रेरणेऽपि स्वस्योपायत्वाविरोधात् । पूर्वप्रसाधितज्ञानस्वप्रकाशवच्चात्राप्यविरोधः प्रतिविधेयः । एतेन तदप्यपास्तं यदवादि केनचित्, किं साक्षाच्छरीरस्य कार्यं व्यापारः परम्परया वा । नाद्यः पक्षः । व्यभिचारात् । यदा हि योगी योगशक्त्या सर्पादीनाहरति न तदाहत्य शरीरस्य व्यापारः । अथ द्वितीयः । तदास्त्येवेश्वरेऽपि कर्त्तरि परम्परया शरीरव्यापारः । ईश्वरोऽपि हि कार्यजातमारभमाणः क्षेत्रज्ञाश्रितमदृष्टमपेक्षते । तच्च शरीरावच्छिन्ने आत्मन्युत्पन्नमित्यस्ति परम्परयाऽत्रापि शरीरव्यापार इति । यस्मात् क्षेत्रज्ञशरीरमीश्वरस्य न स्वकर्म्मोपार्जितमिति सिद्धं स्वकर्म्मोपार्जितं शरीरं कर्तृव्यापकं तदभावाच्च रुद्रे कर्तृत्वाभाव इति । अतोऽप्यनुमानात्प्रकरणसमत्वमत्र । विवादं बुद्धिमद्धेतुकं न भवति कर्तृसुखदुःखाजनकत्वात् । यद्बुद्धिमद्धेतुकं तन्नियमेन[1] कर्तृसुखदुःखजनकम् । यथा घटः । न चेदं तथा । तस्मान्न बुद्धिमद्धेतुकमिति । यत्पुनर्बुद्धिमद्धेतुतामात्रमत्र सिषाधयिषितं विशेषो वेत्याशङ्कापर्यन्ते तद्विशेषस्य पक्षधर्मतावलात् प्रतिलम्भ इत्यभाणि ।

---

१ ' नियमेन ' इत्यधिकं प. भ. पुस्तकयोः ।

तदप्यनिपुणम्। पक्षधर्मता हि साध्यस्य पक्षायोगव्यवच्छेदमात्रमेव दर्शयति धूमानुमानादौ तथैव दर्शनात्। अन्यथा धूमात् क्षितिधर-कुहरायोगव्यवच्छेदवद्धेतोः पञ्चवर्णशिखाकलापताया अप्यनुमानप्रसङ्गः। नात्र सामर्थ्यमिति चेत्, एवं तर्हि समायातं पक्षायोगव्यवच्छेदमात्र एव सामर्थ्यम्। एवमिहापि पक्षधर्मतावलात्पक्षायोगव्यवच्छेदमात्र- सिद्धिरस्तु। नित्यज्ञानस्तु कर्त्ता कथं सिद्ध्येत्। नहि महीधरादि कार्यमिति तत् कचिन्नित्यज्ञानेन भवितव्यमिति भवति। मति-मन्मात्रेण तत्कर्तृत्वमनुपपद्यमानं नित्यज्ञानं स्वकर्त्तारमाक्षिपतीति चेत्। यद्येवं प्रमाणान्तरप्रसाद एषः। अन्यथानुमितानुमानोच्छेदः। न च नेष्टं तत्। इच्छादयः समवायिकारणवन्तो गुणत्वादित्यस्मादिच्छादीनां समवायिकारणवत्त्वं प्रसाध्य परिशेषानुमानादष्टद्रव्यातिरिक्तस्यात्म-रूपद्रव्यविशेषस्य साधनात्। किं च पक्षधर्मतावशादधिष्ठातृविशेषो निखिलविषयवर्त्तिनित्यविज्ञानमात्रशाली कपाली सिद्ध्यतीति षड्गुणे-श्वरवादिनां मतम्। तच्चाष्टगुणेश्वरवादिनो न क्षमन्ते। वदन्ति च नोपादानादिज्ञानमात्रेण विश्वकार्यजातमुत्पत्तुमर्हति। न जातूपादानादि-ज्ञोऽपि कुम्भकारः कुम्भमचिकीर्षुश्चिकीर्षुर्वा तदुपादानादिष्वलसतयाऽ-प्रयतमानः कुम्भारम्भाय कल्पते। तस्माज्ज्ञानचिकीर्षाप्रयत्नसमुदायजन्मा कार्योत्पादो न ज्ञानमात्राद्भवितुमर्हति। न ह्यल्पार्द्रेन्धनदहनजन्मा धूमः केवलार्द्रेन्धनाद्वह्नेर्वा जायते। अथास्त्येवं पृथग्जनज्ञानेषु। भगवज्ज्ञानं तु तद्विलक्षणमित्यसहायमेव विश्वस्मिन्कार्ये पर्याप्तमिति चेत्। हन्त भोः किमस्य ज्ञानेनापि। स्वरूपादिशय एवास्या-सहायस्तत्र तत्र कार्ये वर्त्स्यतीति। न किंचित्कार्यमसहायादे-कस्मात्कुतोऽपि जायत इति चेत्। ननु स्त एव क्षेत्रज्ञगतौ धर्म्मा-धर्म्मौ सन्ति च परमाणवः सहाया इति किमस्य ज्ञानेन। नाज्ञातास्ते प्रवर्त्तन्त इति तज्ज्ञानमेषितव्यमिति चेत्। कस्माद-

१ 'उच्छेदप्रसंग' इति भ. पुस्तके पाठः।

विज्ञातास्ते न प्रवर्त्तन्ते । कुम्भाद्युपायेषु तथानुपलम्भादिति चेत् । तर्हि ज्ञानवच्चिकीर्षाप्रयत्नावप्यास्थेयौ । तत्रापि च ज्ञानं साक्षाच्चिकीर्षाविशेष उपयुज्यते । स च प्रयत्नभेदे इति प्रयत्न एव साक्षात्कार्योत्पादहेतुरिति कथं तमन्तरेण तत्सम्भवः । न हि वह्निमन्तरेण प्रचुरतरदारुसंघट्टमात्राद्वटवेटिकास्फुटस्फुरत्फूत्कारमारुतमात्राद्वा सिध्यत्योदनः । तस्मादृगुणाधिकरणमेवेश्वरोऽतः सिध्यतु । तदपि न साधीयः । यतोऽस्येच्छाप्रयत्नौ नित्यावनित्यौ वा स्याताम् । नित्यौ चेत्, कृतमीश्वरस्य ज्ञानेन चिकीर्षाप्रयत्नानुपयोगिना । तयोर्नित्यतया स्वोत्पादोपयोगानपेक्षणात् । न च प्रयत्नवदस्य ज्ञानमपि साक्षात्कार्योत्पादनाङ्गम् । प्रयत्नभेदे तथैव स्वस्वयमधितिष्ठत्युपादानादि न तु तत्समवेते ज्ञानस्य कस्यचिदुपयोगश्चिकीर्षाया वा । निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य साधनव्यापादिति दत्तजलाञ्जलिरीश्वरस्य सर्वज्ञता । उक्तं चैतत्प्रागेव । अथानित्यौ तौ । तर्हि तयोरुत्पत्तिकारणं वक्तव्यम् । ननु नित्यज्ञानमेवोत्पत्तिमूलकारणमास्ति तत्किमपरेण कारणेनेति चेत् । अहो बत प्रमादः, यदयमात्ममनःसंयोगविशेषासमवायिकारणाविच्छाप्रयत्नौ तमन्तरेण ज्ञानमात्रादेव भवति इत्यपि वक्तुमध्यवसितः । तथा सत्ययमतण्डुलमपि मण्डं साधयेदेव । सन्त्येवास्य मुक्तात्ममनोभिः संयोगास्तेन तत्सहायस्तत्र तत्र चिकीर्षाप्रयत्नावधं युगपत्प्रसूते तत्कार्योपजननायेति चेत् । ननु मनांसि तत्संयोगाश्च किमनधिष्ठितानि चिकीर्षाप्रयत्नौ प्रस्तुवाते अधिष्ठितानि वा । यद्यनधिष्ठितानि । तदैताभ्यामेव चिकीर्षाप्रयत्नाभ्यां कार्यत्वहेतोर्व्यभिचारः । अधिष्ठानं तु प्रयत्नमन्तरेणायुक्तमेव । प्रयत्नान्तरेण चिकीर्षान्तरजन्मना तदधिष्ठानम् । न चानवस्था । अभ्युपगमनत्वाच्चिकीर्षाप्रयत्नप्रवाहस्येति चेत् । नन्वयमुत्पन्नसंजिहीर्षः ईश्वरः क्षेत्रज्ञेषु प्रतिबद्धवृत्तिधर्माधर्मनिचयेषु जगति च परमाण्ववस्थामापन्ने निर्व्यापारः

१ ' न्यायातिपातात् ' इति प. भ. पुस्तकयोः पाठः ।

कियन्तमपि कालं स्थित्वा यदा चिकीर्षति प्रयतते च तदाऽस्य चिकीर्षा-प्रयत्नयोर्जनयितव्ययोर्न पूर्वावस्थितं चिकीर्षान्तरं प्रयत्नान्तरं वा समस्तीति कुतो मनसां तत्संयोगानां चाधिष्ठानमिति चेतनानधिष्ठितेभ्यो मनस्तत्संयोगेभ्यो न चिकीर्षाप्रयत्नावुत्पाद्येयातामुत्पद्यमानौ वा कथं कार्यत्वं हेतुं न व्यभिचारयतः । किं च शरीरमपि कर्तृव्यापकमित्युक्तम् । न चास्य तदस्तीति कथमसौ कर्त्ता स्यात् ।

अस्त्येवास्य शरीरमिति शङ्करः । ननु तन्नित्यमनित्यं वा । नित्यं चेत्, निरवयवं सावयवं वा । न तावन्निरवयवम् । तद्धि पार्थिवपरमाण्वादिनित्यद्रव्येभ्योऽन्यतरत्स्वतन्त्रं वा । न च स्वतन्त्रम् । द्रव्यसंख्याक्षयप्रसङ्गात् । पार्थिवपरमाण्वादिनित्यद्रव्येभ्योऽन्यतरदपि व्यापकमव्यापकं वा । न व्यापकम्, अस्येश्वरेणाधिष्ठानविरोधात् । अव्यापकमपि न मनः । तस्य प्रतिनियतात्मसम्बन्धित्वात् । पृथिव्यादिपरमाणुरूपता तु तस्य कथं निश्चीयते । तदारब्धस्य पृथिव्यादिकार्यद्रव्यस्य कस्यचिदभावात् । नापि सावयवं तच्छरीरम् । सावयवस्य नित्यत्वविरोधात् । नाप्यनित्यम् । यतस्तद्बुद्धिमद्धेतुकमितरद्वा । न तावदितरत् । कार्यत्वस्य तेनैव व्यभिचारापत्तेः । बुद्धिमद्धेतुकमप्यन्यकर्तृकं स्वकर्तृकं वा । यद्यन्यकर्तृकम् । तदाऽसावपि सशरीरोऽशरीरो वेत्याद्यावर्त्तत[1] । तथा चेश्वरानन्त्यप्रसक्तिः । अथ भवत्वियमुत्सवायैवास्माकम् । एकोऽपि हि भगवान् दुर्लभ आसीदिदानीमानन्त्यं तेषां क लभ्यते । तदप्यापातदर्शिनो वचः । बहूनां व्याहतमनसां व्यापारे पृथिवीप्रमुखकार्यस्यानुत्पादप्रसङ्गात् । उत्पन्नस्यापि वा विविधेश्वरस्य वशादसामञ्जस्यापत्तेः । स्वकर्तृकत्वेऽपि तदपि शरीरं शरीरी करोत्यशरीरी वा । अशरीरी चेत्, तथैव त्रैलोक्यमप्यशरीरीश्वरो रचयतु । शरीरी चेत्, तदा तच्छरीरनिष्पाद-

अस्त्येवेश्वरस्य शरीरमिति वादिनः शङ्करस्य खण्डनम् ।

---

1 ' आवर्तते ' इति म. पुस्तके पाठः ।

नाय प्रथमं तेन शरीरान्तरमारचनीयम् । तस्यापि निष्पादनार्थं प्रथमतरं शरीरान्तरं करणीयमेवं चानवस्था स्यात् । तथा चापरापरशरीरनिर्म्माण एवोपक्षीणशक्तिकत्वान्न कदाचित्प्रकृतमसौ कार्यं कुर्यात् । अथ स्यादनवस्था दोषाय यद्यशरीरोऽसौ कार्यकरणाय तत्काल एव स्वशरीरमारभेत यावता सदैवास्य शरीरमस्त्येव । कार्यकालभावि खलु शरीरं प्राक्तनशरीरसहितेन निर्मितं तदपि प्राक्तनतरशरीरसहितेनैवेत्यनवस्थापीयं न दोषाय जायते । बीजाङ्कुरादिवदनादित्वाच्छरीरसन्तानस्य । तथा चाहुर्मूलक्षतिकरीमाहुरित्यादि । तदप्यपूतम् । अदृष्टसण्टङ्कघटितत्वात्सर्वत्र शरीरनाशोत्पादयोः । येन हि यावदायुःकर्म्म पूर्वमुपार्जितं भवति तस्य तावत्कालं शरीरमवतिष्ठते । यादृशं च तद्भवे तदुपार्जितं भवति तदनुरूपेणोत्तरभवे तदुपजायत इति युक्तमस्मादृशेषु सर्वम् । ईश्वरे तु नास्ति तदितरत्र मुक्तात्मनीव कौतस्कुती तत्कल्पना । अथास्त्येवात्रेच्छा भगवती तद्वशात्तन्नाशोत्पादौ भविष्यत इति चेत्, नैवम् । अस्या अप्यदृष्टापेक्षयैवात्र सर्वत्र प्रवर्त्तनात् । अन्यथा कृतं सर्वत्रादृष्टकल्पनया । यथा यथा स्थाणोरिच्छा प्रवर्त्तते तथा तथा प्राणिनां सुखदुःखोपभोगस्य सम्भवात् । ततो नास्य शरीरमपि घटत इति कथमीश्वररूपविशेषस्य पक्षधर्मतावलात्सिद्धिः । नन्वसति विशेषे बुद्धिमत्त्वसामान्यस्यानुमानिकस्य तर्हि का गतिरिति चेत् । तत्किमवश्यं भवितव्यमस्य गत्या । ननु प्रमाणसिद्धमुपपादनीयमिति चेत् । यस्य नामानुपपद्यमानेनोपपादनं तस्य च वरमनुपपत्तिरेवास्तु । ननु प्रमाणसिद्धमनुपपन्नमिति विरुद्धम् । एवं तर्हि प्रमाणसिद्धिप्रतिघात एवास्त्वविरोधाय । न पुनरनुपपन्नस्योपपत्तिः । कथं तर्हि साधनस्येदं दूषणम् । नेदं साधनस्य दूषणम् । किन्तु वादिनो योगस्य । यौ हि ज्ञानमात्रोपेतत्वनित्यानित्येच्छाप्रयत्नोपेतत्वसशरीराशरीरत्वादिविशेषपरिहाण्या गगनकुसुमाय-

माने क्षित्यादिवर्त्तिनि बुद्धिमत्पूर्वकत्वसामान्ये साधनानर्हे साधनं योजयति । न च सम्भवति तादृशो विशेषः । यमास्थाय क्षित्यादौ बुद्धिमत्पूर्वकत्वसामान्यं व्यवतिष्ठेत । न चैवं सर्वानुमानोच्छेदप्रसङ्गः । सम्भवद्विशेषविषयत्वादितरेषामनुमानानाम् । न हि न सम्भवति पर्वतनितम्बवर्त्ती बहिर्विशेषः । तस्माद्यथा कश्चिन्निशान्तमसिमच्छेद्यमाकाशं प्रति व्यापारयन्पुरुषो निगृह्यते, न पुनरसिराकाशं वा । तद्वत् कार्यत्वमपीश्वरं इति । यच्च पक्षधर्म्मतासमर्थनाप्रस्तावे एवोक्तम् । ये हि यत्कर्त्तारस्ते तदुपादानाद्यभिज्ञाः । यथा कुलालादयः । सर्वेषां च कार्याणामीश्वरः कर्त्तेति । तदप्ययुक्तम् । यतः किमेते कुलालादयः स्वकार्यस्य निरवशेषोपादानोपकरणादिवेदिनः कतिपयोपादानोपकरणादिवेदिनो वा । नाद्यः पक्षः । अदृष्टस्य सर्वोत्पत्तिमतां निमित्तहेतोरुपकरणस्यापरिज्ञानात् । नापि सम्प्रदानप्रयोजनविशेषवेदिनः । तस्य सम्प्रदानभेदस्य देवदत्तादेः प्रयोजनभेदस्य च मधूदकधारणादेरनेकस्यापि सम्भवात् । अथोपादानोपकरणादिमात्रविज्ञानं न समस्तोपादानोपकरणज्ञानं कुलालादीनाम् । तर्हि तेनैव निदर्शनेनेश्वरस्यापि तदुपकरणमात्रज्ञानं स्यात् । तन्मात्रज्ञाने च सर्वज्ञताऽसिद्धेः । कतिपयज्ञो हि तथा सति स्यात् । अथ चोन्मत्तादिवत्तावन्मात्रज्ञानमपीश्वरस्य न सिध्यति । तथा हि ।

गुजति गुञ्जति गर्जति गायति श्वसिति शुष्यति शाम्यति शङ्कते ॥
खलति खेलति खादति खिद्यते मिषति मेद्यति माद्यति मद्यपः ॥४१०॥

न चास्य वचनादिहेतूनां तालवादिकानां परिज्ञानमस्ति । निरभिप्रायस्यैव तस्य तत्र तत्र प्रवृत्तिदर्शनात् । यदप्यवादि न हि यत्कार्यं तदखिलमपि कृतबुद्धिमात्मन्युपजनयतीति नियम इत्यादि । तदपि न निष्कृत्रिमम् । कृत्रिममणिमौक्तिकादौ खातप्रपूरितवसुन्धरायां वाऽकृत्रिममणिमौक्तिकभूभागादिसंस्थानसारूप्यस्य कृत्रिमबुद्धेरनुत्पादकस्य सद्भावतस्तदनुत्पादस्योपपत्तेः । न च भूभूधरादावप्यकृतक-

संस्थानसादृश्यं सम्भवति । अकृतकसंस्थानस्यैव त्वयाऽनङ्गीकारात् । यत्पुनरुक्तम् । कोऽयं कार्यत्वस्य विशेषः । किं बुद्धिमदन्वयव्यतिरेकानुविधानं तद्दर्शनं वेत्यादि च । तत्रायमेव कार्यत्वस्य विशेषो बुद्धिमता स्वभावप्रतिबद्धोऽभिधीयते । यः खल्वक्रियादर्शिनोऽपि कृतबुद्धिमात्मनि जनयति । प्रोक्तश्चायमर्थः प्रागेव । यदप्युक्तमेकत्वं च क्षित्यादिकर्तुरित्यादि । तदपि नावदातम् । बुद्धिमतः साध्यस्यैकत्वनियमे निश्चयाभावात् । एकत्वेन हि तस्य सिद्धिर्नित्यत्वविभुत्वसर्वज्ञत्वसिद्धौ स्यात् । तथा चेश्वरव्यवहारभाजनमसौ स्यात् । न च नित्यत्वादिसिद्धिः सम्भाव्यते । भिन्नदेशकालकलितं हि कार्यजातमनेकेन संख्यातिक्रान्तेन कर्त्रा कृतं सम्भाव्यते । तथा च सति न तावद्विभुत्वनित्यत्वे । अनेकस्य च कर्तुः स्वस्वविषयोपादानादिमात्रवेदनसिद्धौ क सर्वज्ञत्वम् । अथ बहूनां व्याहतमनसां व्यापारे कार्यमेव नोत्पद्यते । उत्पन्नमपि वा सपदि विपद्येतेति प्रतिकलमुत्पत्तिविपत्तिमात्रव्यापारा वराकी त्रिलोकी कथं कामप्यर्थक्रियां कुर्यादिति चेत् । तदचतुरस्रम् । प्रत्येकं हि वैभवादिगुणयोगादीश्वरादीनां व्यापारे स्यादपीयमाशङ्का । यावता साम्प्रतमेकोऽपि तादृङ्न सिध्यतीत्युच्यते । अर्वाचीनशक्तयश्च भूयांस एकमनेकं वा कार्यमारभ्य निष्पादयन्तो दृश्यन्त एव । ननु नैकत्रापि प्रधानभूतेनैकेन भवितव्यम्, बलीयसा वा, सूत्रधारवत्सेनानीवद्वा । अतस्तस्यैव कर्तृत्वमितरेषां तदनुवर्तित्वादिति चेत् । न । तत्रापि नियमाभावात् । स्वस्वप्रयोजनानुरोधेन स्वतन्त्राणामपि केषांचिदेकसत्त्वादिघटनदर्शनात् । तत्रापि कश्चिदेव प्रथमप्रयोजक इत्यपि नास्ति । अनेकस्यापि तथा हृदयोत्कलितकार्यानिवारणात् । नीचस्यापि वा प्रयोजकत्वसम्भवात् । तस्मात् भ्रमरमधुमक्षिकापिपीलिकादिभिर्मधुक्षत्तवाल्मीकादिवत्क्षुद्रप्राणिभिरप्येकैकमैनाकैकलाशादिकरणसम्भावनायां का वार्त्ता विश्वस्यैकेन क्रियायाः । तत्रादृष्टजन्मानस्तावत्कृतचेतनानुमितयः क्षितिधरादयस्तावतैव कृतार्थाः ।

ते च तत्कर्तृजन्तव उपादानमतिक्षुद्रपृथिव्यादिद्रव्यमुपकरणं मुखादि सम्प्रदानमात्मानमेव प्रयोजनमात्मनः स्थितिमुखादि जानन्त एव वल्मीकजन्तुवत्प्रवर्त्तेरन्[1]। सिद्धे च नावश्यमधिष्ठायकं दृश्येरन् स्वभावविप्रकर्षात्। येऽपि दृष्टजन्मानो वृक्षादयः पौरुषेयाः। तत्र चिन्तैव नास्ति। अदृष्टपुरुषव्यापारास्तु ये विन्ध्यादिपरिसरभुवः तेऽपि पिशाचादिप्रकारैरधिष्ठातृभिरसंख्यैः कर्तृमन्त इति कः सर्ववेदी भवतु। ते चाधिष्ठातारो देशकालयोर्भिन्ना एवेति कुतो विभुत्वनित्यत्वे। न चैवं शङ्काया विरोधकं किंचिदस्ति वस्तुबलप्रवृत्तमनुमानम्। ननु चैवं भवद्भिरपि न स्वीकृतमेव, एतावच्चातिकष्टतरं कल्पयतां वरमीश्वरकल्पनैव लाघवादिति चेत्। सत्यम्। यदि कल्पनामात्रे भरन्यासस्तदा भवदुपदेशमेव पुरस्करिष्यामः। यावत्पुनरनुमानव्याजं न वर्जयसि। तावदेवास्माकमवश्यमनिनिपुणनिरूपणाभियोगः। अथ क्षुद्रैरसंख्यैर्निर्मिता नर्मदादय इति दुनोति चेतश्चेत्। एकेनाशरीरेण निर्मितास्त इति तु सुष्ठुतराम्। तस्मात् प्रमाणमेव सर्वतो बलवद्यथा स्थापयति तथाऽर्थस्थितिः। अत एतत्[1] दृढं निरूप्यते। न च क्षुद्रेष्वनुरोधः कश्चित्। क्षुद्रैरक्षुद्रैरदृश्यैः समानशक्तिभिरधिकशक्तिभिरस्वतन्त्रैः प्रधानसम्मतैरेकैकजन्तुसनाथापरिमितयूथैर्वा स्थूलकाणुकैकानेकस्वकार्थैकभागोपादानादिमात्रवेदिभिश्चतुर्गतिपर्यापन्नैः कृतो भवतु भुवनसन्निवेशः। एक एव कर्त्ताऽस्य मा भूत्। न च जैनैस्तथानुपगमादेक एव कर्त्ता कार्यत्वात्प्रसिद्ध्यतीति वक्तव्यम्। एकस्याप्यप्रसिद्धिप्रसङ्गात्। न च वस्तुबलप्रवृत्तेऽनुमाने परोपगमापेक्षा। तदेवं बुद्धिमन्मात्रे साध्ये उपादानाद्यभिज्ञलक्षणविशेषनान्तरीयकतयाऽभिमतसर्वज्ञसिद्धिरनैकान्तिकी। सर्वकार्यक्रियाया एकाधारत्वनियमासिद्धेः।

1 'एवं तत्' इति म. पुस्तके पाठः।

यच्च वाचस्पतिना कार्यतानुमानात्कस्यचित्तनुभुवनाद्यभिज्ञतां प्रसाध्य सर्वज्ञतासिद्धये परिशेषानुमानं व्यतिरेकापरपर्या-

वाचस्पत्यभिमतस्य कर्तुः सर्वज्ञत्वापपादनप्रकारस्य तदुपपादनप्रकारान्तरस्य च खण्डनम् ।

यमुद्यते । तनुभुवनाद्युपादानाद्यभिज्ञः कर्त्ता नानित्यासर्वविषयबुद्धिमान् । तत्कर्तुस्तदुपादा-
५ नाद्यनभिज्ञत्वप्रसङ्गात् । न ह्येवंविधस्तदुपादाना-

द्यभिज्ञो दृष्टो यथाऽस्मदादिः । तदुपादानाद्यभिज्ञश्चायम् । तस्मात्तथेति । तदपि प्रोक्तनीत्या निराकृतमवसेयम् । एवं तस्यैकत्वनिश्चयाभावात् । अनित्यासर्वविषयबुद्धिमत्त्वेऽप्युपादानादिवेदनसम्भवस्योपपादितत्वात् । ननु द्व्यणुकस्यापि कार्यत्वात्कर्त्ता तदुपादानपरमाणुदर्शनायैषितव्यः । न
१० च मांसचक्षुषस्तथा भवितुमर्हन्ति । अन्यथा किमस्मदादिभिरपराद्धम् । यत्तथा न भवामः । तदवश्यं तत्कर्त्ताऽतीन्द्रियदर्शी स्वीक्रियमाणो नेश्वरादन्यो युक्तः । तदपि न युक्तम् । न हि मांसचक्षुष्ट्वेऽपि सर्वेषां साधारणं करणसामर्थ्यम् । अस्मदत्यन्तापकृष्टानामपि पिपीलिका-गृध्रवराहादीनामिन्द्रियपाटवातिशयदर्शनात् । क्षोदिष्ठानामेव च केषां-
१५ चित्परमाणुदर्शनमपि स्यात् । कर्म्मशक्तिविशेषात् । यथा पिपीलिकानामस्मदगोचरगन्धाणुग्रहणम् । न च कैश्चित्परमाणुरूपसूक्ष्मपदार्थप्रेक्षणे दशकालविप्रकृष्टस्य सूक्ष्मान्तरस्य सकलस्थूलस्य वा तैर्दर्शनं स्यात् । पिपीलिकादिनिदर्शनेनैव कृतोत्तरत्वात् । एवं तर्हि भवतु परमाणोर्दर्शनसम्भावना सकलक्षेत्रज्ञतत्समवेतकर्म्माशयविशेषाणां तु
२० कथमिति चेत् । न कथंचिदिति ब्रूमः । न हि कार्यक्रिया क्षेत्रज्ञस्वरूपादिपरिज्ञानेनापि व्याप्ता कुलालादौ दृष्टा । किन्तु सम्प्रदानोपकरणवेदनद्वारेण तदाकृष्टिरिष्यते । सा च प्रस्तुतेऽशक्या । उक्तक्रमेणापि तन्मात्रवेदनस्य चरितार्थत्वात् । कर्म्मणा स्वस्याभिप्रेयमाणत्वेन सम्प्रदानताया दुर्वारत्वात् । यथा स्वस्मै मन्दिरं
२५ करोमीति । अन्यथाऽनेनैव व्यभिचारप्रसङ्गः । तत्र परसम्प्रदानवेदन-

---

१ 'सम्भवेनासकल' इति प. भ. पुस्तकयोः पाठः ।

मन्तरेणापि प्रवृत्तेः । स्वमन्दिरस्य केनचित्कारणात् । अथ मन्दिरादावपि पशुपतिरेव कर्त्ता नास्मदादिः । सकलकार्यकूटघटनलम्पटो हि धूर्जटिः । स्वप्नाद्यपि सकलं स एव विधत्ते । परसम्प्रदानवेदी चायमिति । तदचतुरस्रम् । एवं कुलालादेरप्यकर्तृत्वप्रसङ्गेन दृष्टान्ताभावात्कार्यानुमानानुदयापत्तेः । तस्माद्यद्यवश्यं सम्प्रदानतापेक्षं कर्तृत्वम् । तदा स्वात्मापि सम्प्रदानमेषितव्यः । अस्तु वा पर एव सम्प्रदानम् । किन्तु तमपि सम्प्रदानव्यवहारप्रसिद्धं तथाविधचेष्टाविशिष्टदेहाकारं विहाय क्षेत्रज्ञस्वरूपं कुलालादिर्न ज्ञातुमीशः । उपकरणशब्दसंगृहीतान् कर्म्माशयभेदान् वा । ततो यथा कुलालस्तान् भेदानविद्वान् दण्डचक्रादिवेदनेनैवोपकरणज्ञस्तथानुमीयमाना अपि क्षुद्रजन्तवः स्वकीयकरणमुखादिज्ञानेनाप्युपकरणज्ञा भविष्यन्तीति कुतस्त्यमेतत्क्षेत्रज्ञस्वरूपतदीयधर्म्माधर्म्माशयभेदपरिज्ञानम् । अथ पृथिव्यादिकर्तुरशरीरस्य कुतोऽमुखाद्यसंगतिरिति चेत् । अशरीरस्य सिद्धिसङ्गतिरेव नास्तीति कुतोऽस्याङ्गसङ्गतिचिन्ता । एकत्वे हि सिद्धे शरीरी प्रादेशिको न सर्वकर्मणि समर्थ इति सामर्थ्यादशरीरिकर्तृसिद्धिप्रत्याशा स्यात् । एकत्वं च दुःसाध्यमित्युक्तम् । अस्तु वाऽयमशरीरी । तथापि न दोषः । नन्वशरीरत्वे दण्डचक्रकरमुखाद्युपकरणानुपपत्तेः पारिशेष्यानुमानेन कर्म्माशयभेदज्ञानेनैवोपकरणज्ञाननिष्ठेति चेत् । तदसुन्दरम् । दिक्कालसमवायादेरप्युपकरणशब्दसंगृहीतस्य ज्ञानेन तज्ज्ञतामात्रस्यैव कृतार्थत्वात् । कः पुनरसौ विशेषो यतस्तदवस्थस्य दिगादिज्ञानेनैवोपकणरज्ञता न धर्म्मादिज्ञानेनेति । उभयज्ञानेनैव भवत्विति चेत् । तदयुक्तम् । न हि यावदुपकरणं तावत्कर्त्राऽवश्यं ज्ञेयमिति दृष्टम् । न दिगादिज्ञानेनैवोपकरणविधिस्तदवस्थस्येति निश्चयं ब्रूमो यतो विशेषपर्यनुयोगः क्रियेत । किन्तूपकरणज्ञानेनैवेति दिगादेरपि चोपकरणत्वसम्भवात्तज्ज्ञानमात्रेणैव वोपकरण-

१ 'न' इति नास्ति भ. पुस्तके ।

ज्ञतायाश्चरितार्थत्वान्न पारिशेष्यविश्रान्तिस्तत्रेत्युच्यते । ततो यथा परापरकर्तृषु दण्डचक्रादितुरीवेमाद्युपकरणविरहपरम्परायामपरापरैरुपकरणैर्द्धर्म्मादिवाह्यैरेवोपकरणज्ञतास्थितिरुपलब्धा तत्र, तथा किमत्राप्यस्तु, यद्वा धर्म्मादिमादायैवेति संदेह एव । यदि पुनरन्यदुपकरणं न स्यात् पारिशेष्यव्याख्यानं शोभन । तस्मादशरीरत्वेऽपि न धर्म्मादिज्ञानाकृष्टिः, किं पुनस्तदसिद्धौ । अथ माभूदुपकरणज्ञतया धर्म्मादेर्वेदयिता, नियमेन कार्यज्ञतया भविष्यति । यतः कर्त्ता कार्यरूपस्य वेदकः, स एवेश्वरः । इत्यपि न सारम् । यतः कार्यस्य रूपं स्वरूपमात्रमेवोच्यते धर्म्माधर्म्महेतुत्वविशेषितं वा । नाद्यः पक्षः । दानहिंसादिकं हि कुर्वन्तो जनास्तं वेदयन्त एव स्वरूपमात्रेण । न च त ईश्वराः । नापि द्वितीयः । यतो न धर्म्माधर्महेतुत्वेन कार्यरूपनिश्चयस्तत्कारिणोऽप्यवश्यं भावी कुम्भकारवत् । न हि कुम्भकारः कुम्भोऽयं धर्महेतुरधर्महेतुर्वेति निश्चिनोति । अथास्ति क्वापि कार्ये धर्म्माधर्महेतुत्वनिश्चयः । इदं दानादिकार्यं धर्महेतुर्हिंसादिकं त्वधर्महेतुरिति प्रतीतिरिति चेत् । अस्त्येव क्वचित्कार्येऽसौ । परं नास्मादेकान्तिकी सिद्धिः । केषांचित्तन्निश्चयं विनापि कार्यकरणदर्शनात् । तद्वदत्रापि कार्यकरणस्य सम्भाव्यमानत्वात् । ततो न धर्म्माधर्मयोः कस्यचिज्ज्ञानसम्भवः । तदभावाच्च कथं तदधिष्ठानम् । ततो यथा चेतनानधिष्ठितावपि धर्म्माधर्मौ कार्याय पर्याप्तुतस्तथा परमाण्वाद्यपि शरीराद्यारम्भे प्रभविष्यति कृतं चेतनेनाधिष्ठायकेन । ननु परमाण्वादेरचेतनस्य चेतनानधिष्ठितस्य स्वयमेव कथं प्रवृत्तिरिति चेत् । अस्तु तावदचेतनयोरपि धर्म्माधर्म्मयोश्चेतनेनानधिष्ठितयोरेव कथं स्वयं प्रवृत्तिरिति प्रतिबन्दिन्यायः । ईश्वरस्यैव तु कथं प्रवृत्तिः । नन्वसौ चेतनस्ततो बुद्धिपूर्वं प्रवर्त्स्यतीति चेत् । तर्ह्यसाविष्टानिष्टोपादानपरिवर्जनार्थं प्रवर्त्तमानोऽकृतार्थत्वेनानीश्वरः स्यात् । बुद्धिपूर्विकायाः प्रवृत्तेर्हेयोपादेयजिहासोपादित्से अप्यवश्यमङ्गीकर्त्तव्ये । यत्र ते तत्राकृतार्थत्वं यत्राकृतार्थत्वं तत्रानीश्वरत्वमिति प्रसज्यते ।

अथ स्यादेवं प्रसङ्गः, यदि बुद्धिपूर्विका प्रवृत्तिर्हेयोपादेयजिहासोपादित्से, परानुजिघृक्षया प्रवृत्तिसम्भवादिति चेत्।

परानुग्रहेच्छयेश्वरस्य प्रवृत्तिरित्यस्य पक्षस्य खण्डनम्।

एवं तर्हि परार्थेनासौ प्रवृत्तः सदा सर्वजन्तूनां सुखमेव जनयेन्न दुःखम्। धर्माधर्मसहकारिणः कर्तृत्वात्सुखं च दुःखमप्यसौ जनयतीति चेत्। न तर्हि परानुजिघृक्षयाऽसौ प्रवर्त्तते, अपि तु सहकारिवशात्। यदा यत्र सन्निहितसहकारिकारणमिष्टमनिष्टं वा तत्तदा तत्र जनयतीत्यभ्युपगमात्। परानुजिघृक्षया हि प्रवृत्तिः सत्यपि दुःखहेतुसन्निधाने तं विनिवर्त्य सुखमेव निष्पादयेत्। अथ धर्माधर्मयोः सुखदुःखफलोपभोगेन प्रक्षयादपवर्गः स्यादिति सुखं च दुःखमपि करोति। तस्य हि संसारात्प्राणिनो मोचयिष्यामीति परोपकारार्थैव प्रवृत्तिः। मुक्तिश्च प्राणिगणानां धर्माधर्मप्रक्षयात्। तत्प्रक्षयश्च स्वफलोपभोगमन्तरेण न सम्भवतीत्यपारकरुणाकूपारः परमेश्वरस्तथाविधयातनाशरीरादिकरणे प्रवर्त्तत इति चेत्। ननु धर्माधर्मावपीश्वरव्यापारनिष्पादनीयावन्यथा वा। आद्यपक्षे धर्माधर्मौ निष्पाद्य पुनस्तयोः क्षयकरणे वरमुत्पत्तिरेव न कृता। तावुत्पाद्य पुनर्विनाशयन्प्रक्षालिताशुचिमोदकपरित्यागन्यायानुस्मरणादीश्वरो न भौतादतिरिच्यते। कथं वा प्राकृतजनवेद्यमपि "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इत्यप्यजानानः सर्वज्ञोऽसौ। धर्माधर्मोत्पत्तावीश्वरस्य तु व्यापाराभावे तद्विनाशेऽपि न व्यापारः स्यात्। धर्माधर्मवत्सुखदुःखयोरपीश्वरव्यापारमन्तरेणैव कारणान्तरादुत्पत्तेः। फलोपभोगेन धर्माधर्मयोः क्षयसम्भवात्। न हीश्वरस्यापि सुखदुःखफलोत्पादनादन्यद्धर्माधर्मक्षयकर्तृत्वम्। धर्माधर्मयोरनीश्वरकार्यत्वे च सर्वो हेतुरीश्वरसिद्धयेऽभिहितोऽनैकान्तिकः स्यात्। प्राणिनां चापवर्गनिष्पादनार्थमीश्वरस्य प्रवृत्तौ

---

१ 'सुखवत्' इति भ. पुस्तके पाठः। २ 'धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा' इति पूर्वार्धम्। पञ्चतन्त्रे पृ. १५०.

कथमपूर्वकर्मसंचयकर्तृत्वमिति न किंचिदेतत् । तस्मान्न बुद्धिपूर्विकेश्वरप्रवृत्तिः ।

स्वभावत्वादेवासौ प्रवर्त्तत इति चेत् । एवं सति सतोऽपि चैतन्यस्य प्रवृत्त्यनङ्गत्वादचेतनस्यैव स्वभावः किं स्वभावत्वादेवेश्वरस्य प्रवृत्तिरित्यस्य पक्षस्यान्यान्यपक्षाणां च खण्डनम् । नेष्यते, किमदृष्टकल्पनया । कारकशक्तिपरिज्ञानलक्षणस्यास्त्येव चैतन्यस्य प्रवृत्तिं प्रत्यङ्गभावस्तत्परिज्ञानाभावेऽधिष्ठातृव्यापारायोगात् । केवलमिदमित्थं स्वार्थं परार्थं वा करोमीति चेतनाया अभावात्स्वभावतः करोतीत्युच्यत इति चेत् । ननु तत्कारकशक्तिपरिज्ञानं कतिपयकारकशक्तिविषयं समस्तकारकशक्तिविषयं वा । आद्यकल्पनायामधिष्ठातुरसर्वज्ञत्वम् । किं चैतन्नित्यमनित्यं वा । नित्यं चेत्, तदा कारकशक्तिपरिज्ञानस्य नित्यत्वात्सर्वदा तत्कार्यस्योत्पत्तिः स्यात् । अथ न कारकशक्तिपरिज्ञानमित्थं कार्यस्योत्पत्तिः, किन्तु यदा कारकं तेनाधिष्ठितं भवति, न च यज्ज्ञानं तदधिष्ठीयत एवेति नियमः, किन्तु ज्ञानमेवाधिष्ठीयत इति, ततो न कश्चिद्दोषः । तदसत् । यतः प्रयत्नगोचरीभूयमापन्नत्वमधिष्ठितत्वमुच्यते । प्रयत्नस्यापि च नित्यत्वात्तदवस्था सदा तत्कार्योत्पत्तिः । अथानित्यं तत्, यदा हि यत्कारकं यत्कार्यमुत्पादयति तच्छक्तिपरिज्ञानमपि तदैवास्योत्पद्यते । तदप्ययुक्तम् । यतो यदि कारकं तावत्स्वयमेव कार्योत्पादनप्रागल्भ्यमभ्यस्यति तदा तच्छक्तिपरिज्ञानेन सिद्धोपस्थायिना किं नाम कर्त्तव्यम् । अथ यदा यत्कारकशक्तिगोचरं संवेदनं जायते तदा तत्कारकं कार्यं करोतीत्युच्यते । नन्वेतस्य विज्ञानस्य प्रतिनियतकारकशक्तिगोचरतायां किं नियामकम् । न खल्वेतदैन्द्रियकं मानसं वा । तद्धि यत्र यत्रेन्द्रियं मनो वा व्यापिपर्त्ति तत्र तत्र समुत्पाद्यत इति युक्तम् । ईश्वरस्य त्विन्द्रियमनसोरभावात्कथमेवं प्रतिनियमः । अथ समस्तकारकशक्तिविषयं तत्परिज्ञानम् । ननु तदपि नित्यमनित्यं वा । यद्यनित्यम् ।

तदा सर्वत्र सर्वकार्याणामेकदैवोत्पत्तिः स्यात् । तत्परिज्ञानस्य प्रवृत्तिहेतोरक्रमत्वात् । नित्यं चेत्, सर्वदा सर्वत्र सर्वकार्याणामुत्पत्तिर्भवेत् । सर्वदा सर्वत्र सहकारिणामभावान्नेति चेत् । न तर्हि तत्परिज्ञानस्य समस्तकारकशक्तिविषये प्रवृत्तिः । प्रवृत्तौ तु सर्वसहकारिणामपि तत्परिज्ञानायत्तजन्मनां किं न सर्वदा सर्वत्रोत्पत्तिः । सहकारिणां तत्परिज्ञानायत्तोत्पत्तिकत्वे कार्यमपि तथैव स्यात् । तत्परिज्ञानस्याक्रमत्वेऽपि स्वभाव एव तस्येत्थं भूतो येन कदाचित्किंचित्कचित्करोतीति चेत् । न तर्हि तत्परिज्ञानस्य प्रवृत्तिं प्रत्यङ्गभावः । प्रवृत्तेस्तदक्रमानुविधानाभावात् । यः खलु यत्कारणं तत्तस्य क्रमाक्रमावनुविधत्ते । अन्यथा कारणस्याक्रमत्वेऽपि कार्यस्य क्रमेण भवतः, क्रमेऽपि वा कारणस्याक्रमेण कार्यस्य भवतः, स्यातन्त्र्ये तत्कार्यत्वमेव न स्यात् । तस्मात्तत्परिज्ञानस्याक्रमत्वेऽपि क्रमेणाविर्भवन्ती प्रवृत्तिः स्वभावभेव कारणत्वेनात्मसात्करोति न तत्परिज्ञानलक्षणं चैतन्यमित्यचेतनस्यापि स्वभावत एव प्रवृत्तिरस्त्वलमधिष्ठातृकल्पनया । नन्वधिष्ठातारमन्तरेणैवाचेतनस्य प्रवृत्तौ तन्वादेरप्यनधिष्ठितस्यैव किं न प्रवृत्तिः स्यादिति चेत् । न । तस्यानधिष्ठितस्यैव प्रवृत्तौ विष्टिकर्म्मकरादेरपि प्रवृत्तिस्तथैव किं न भवेत् । अनधिष्ठितस्याप्रवृत्तिरिति चेत् । तन्वादेरप्येवमस्तु । तन्वादिबीजादेरप्यनधिष्ठितस्यैवं किं नाप्रवृत्तिः स्यादिति चेत् । तवाऽपि विष्टिकरादिवत्कुम्भकारेश्वरादेरप्यनधिष्ठितस्याप्रवृत्तिः किं न प्रसज्यते । कुम्भकारादेरनधिष्ठितस्यैव प्रवृत्त्युपलम्भान्नाधिष्ठितस्य प्रवृत्तिरिति । तत्किमन्यत्राधिष्ठातृवशात्प्रवृत्तिरुपलब्धा । येनानधिष्ठितस्य बीजादेरप्रवृत्तिः समर्थ्येत । प्रत्यक्षेणानुपलभ्यमानाऽप्यधिष्ठितस्य बीजादेः प्रवृत्तिर्वास्यादिसाधर्म्येणाचेतनत्वहेतुनाऽनुमीयत इति चेत् । तथा कुम्भकारेश्वरादेरप्यधिष्ठातृवशात्प्रवृत्तिरप्रत्यक्षाऽपि विष्टिकर्म्मकरादिसाधर्म्याच्चेतनत्वहेतुनाऽनुमीयत इति किं नेष्यते । चेतनत्वाचेतनत्वहेतोर्विशेषाभावात् । न विशेषाभावः पक्षस्य प्रत्यक्षबाधितत्वेन

चेतनत्वाभ्यस्य हेतोः कालात्ययापदिष्टत्वादिति चेत्। न। कालात्ययापदिष्टत्वस्याचेतनत्वसाधनेऽपि समानत्वात्। बीजादावप्यधिष्ठातृसद्भावस्य प्रत्यक्षबाधितत्वात्। बीजादावधिष्ठातुरतीन्द्रियत्वात्प्रत्यक्षेणाबाधनमिति चेत्। तदन्यत्रापि समानम्। कुम्भकारेश्वरादावप्यधिष्ठातुरतीन्द्रियत्वात्। अप्रेरितः करोमीत्यनुभवः। कुम्भकारादेरधिष्ठातुर्बाधक इति चेत्। न। अदृष्टवदज्ञातस्यापि प्रेरकस्य प्रेरकत्वसम्भवात्। कुतोऽन्यथा पश्वादीनां प्रेरकत्वेनादृष्टमजानतां प्रवृत्तिः। तस्मादचेतनत्वहेतोर्बीजादावधिष्ठातृसद्भावस्याप्रत्यक्षस्यापि सिद्धिमिच्छता विष्टिकरादिव्यतिरिक्तस्याशेषस्यापि चेतनवर्गस्यापि, अधिष्ठातृसद्भावसिद्धिश्चेतनत्वहेतोरिष्यतामविशेषात्। एवं चापरापराधिष्ठातृसद्भावकल्पनयाऽनवस्थानान्न बहुष्वपि युगसहस्रेषु कार्योत्पत्तिः स्यात्। ननु स्वतोऽचेतनस्य देशकालनियमेन प्रवृत्त्ययोगादधिष्ठितत्वप्रयोजकादचेतनत्वहेतोर्बीजादावधिष्ठातृसद्भावसिद्धिर्युक्ता। न तु चेतनत्वहेतोः कुम्भकारेश्वरादौ। चेतनस्याधिष्ठात्रभावेऽपि देशकालनियमेन प्रवृत्तिसद्भावादिति चेत्। तदसत्। अचेतनस्याधिष्ठातारमन्तरेणैव प्रवृत्तिनियमस्य प्रागेव समर्थितत्वादचेतनत्वस्याप्यधिष्ठातृसद्भावप्रयोजकत्वाभावात्। अतः क्वचिदचेतने तन्त्वादावधिष्ठितत्वाचेतनत्वयोः सहभावो दृष्ट इत्यचेतनत्वस्य भवता गमकत्वमङ्गीकर्तव्यम्। तच्च क्वचित्सहभावदर्शनं चेतनत्वाधिष्ठितत्वयोरप्यस्तीति चेत्, तस्यापि गमकत्वमभ्युपेयम्। नो चेत्, अन्यत्रापि नोपेयम्। यतो यत्राधिष्ठातोपलभ्यते तत्रैवाऽसावस्ति नान्यत्रेत्येतदेव ज्यायः। एतेन तदप्यपास्तं यदवादि कादाचित्कविचित्रसहकारिलाभेनेत्यादि धर्माधर्मौ चेतनाधिष्ठितौ प्रवर्तेते अचेतनत्वादित्यादि च। किं च धर्माधर्मयोरचेतनत्वं सर्वथा स्यात्कथञ्चिद्वा। आद्यकल्पे प्रतिवाद्यसिद्धो हेतुः। चेतनादात्मनः कथंचिदभिन्नयोर्धर्माधर्मयोरपि चेतनत्वेन जैनैः स्वीकरणात्। द्वितीयपक्षे तु वाद्यसिद्धिः। कथञ्चिदचेतनत्वस्य धर्माधर्मयोर्भवतामसिद्धेः।

१ 'विष्टिकर्मकरादि' इति भ. पुस्तके पाठः।

सितरश्मिकलावच्चूलसिद्धौ समयो यः पुनरौच्यत प्रमाणम् ।
ननु तस्य सखे प्रमाणभावं परतः किं यदि वा स्वतो ब्रुवीथाः ॥४११॥

विकल्पे प्राचि संवादाद्विसंवादव्यपायतः ।
आप्तेन गदितत्वाद्वा स्यात्प्रामाण्यविनिर्णयः ॥ ४१२ ॥

संवादोऽस्ति न तावदत्र निखिलप्रोक्तोपपत्तिक्षया- ५
देकत्र क्वचिदस्ति दृष्टविषये तस्यैष चेत्किं ततः ।
नह्येकं न समस्ति सत्यमुदितं लोकायतानामपि
ग्रन्थे किं च ततो यतोऽपि स भवेत्सत्यः समन्तादपि ॥४१३॥
विसंवादाभावः पुनरिह कथं निर्णयपदं
प्रसर्पेत् ब्रूयाश्चेत् क्वचन तदनालोकनवशात् । १०
त्वदीयं तन्त्रत्वाद्यभिचरति विश्वस्य तु न त-
द्विना विश्वज्ञातृन् प्रभवति सुविज्ञातुमपरः ॥ ४१४ ॥
आप्तेन गदितत्वात्तु तत्प्रामाण्यस्य निश्चये ।
परस्पराश्रयाभिख्यादोषान्मोक्षः कथं भवेत् ॥ ४१५ ॥
आप्तसिद्धौ हि तत्प्रोक्तशब्दस्य स्यात्प्रमाणता । १५
सत्यां च तस्यामानस्य सिद्धिः स्यादपकल्मषा ॥ ४१६ ॥
न स्वतन्तु समयप्रमाणतामक्षपादतनयाः प्रपेदिरे ।
आगमादपि पुरारिसाधनं धीमतां तदुपपद्यते कथम् ॥ ४१७ ॥

एवं च—

कार्यत्वादिविचित्रयुक्तिपटलीकोदण्डयष्टिः स्फुटं २०
सेयं सम्प्रति दुष्टदूषणघुणैर्भिन्ना बभञ्जे क्षणात् ॥
तस्मादस्तु कथं समस्तजगता निर्वर्तनैकाग्रधी-
श्चन्द्रार्धाभरणो भवेदखिलविघ्नैःसंशयं यद्वशात् ॥ ४१८ ॥

केचित्प्लवन्ते बहिरेव तावत् कोचित्पुनर्मध्यममाप्नुवान्ति ॥
कुम्भोद्भवाम्भश्च भवेत्स कश्चिद्वादाब्धिमेतं रभसात्पिवेद्यः ॥४१९॥ २५

अत्र कापिलः कश्चिदाह ।

सेश्वरसांख्यमनुपपाद्य तत्खण्डनं विस्तरतः ।

कापिले दर्शनेऽद्यापि प्रतिष्ठामधितिष्ठति ॥
प्रवादिनः पराकर्तुमीश्वरं कथमीश्वराः ॥४२०॥

तथा चाह पतञ्जलिः, "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" इति । तत्र च 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः' । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । दृग्दर्शनशक्त्योरेकात्मतैवास्मिता । दृक्शक्तिरात्मा दर्शनशक्तिर्बुद्धिस्तयोरेकात्मतैव या मोहादभानस्य स्मिता । सुखानुशायी रागः । सुखनिबन्धलक्षणश्चित्तधर्मोपरागः । दुःखानुशायी द्वेषः । दुःखजनके पदार्थे हेयत्वनिबन्धो द्वेषः प्रसिद्धः । स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः । स्वरसवाही कारणनिरपेक्ष एव न केवलमविदुषो विदुषोऽपि तथा तेनात्मना रूढोऽभिनिवेशः । यथा जन्मनः प्रभृति प्राणिनां मरणत्रास इति । कर्माणि शुभाशुभानि । तद्विपाको जात्यायुर्भोगाः । आशया नानाविधास्तदनुगुणाः संस्काराः । तैरपरामृष्टोऽमलिनीकृतो यः स ईश्वर इति । न चेत्थं तदपरामृष्टताविशेषे मुक्तात्मनामीश्वरत्वं प्रसज्यतेत्यभिधातव्यम् । तेषां सर्वदैव बन्धेनापरामृष्टताया असम्भवात् । बन्धत्रयस्य प्राकृतिकवैकारिकदाक्षिणसंज्ञस्य मुक्तेः पूर्वं तेषां सद्भावात् । तत्र प्रकृतावात्मनो ज्ञानाद्ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः । यतः पुराणे प्रकृतिलयान्प्रत्युच्यते, " पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः " इति । वैकारिको बन्धस्तेषां ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते । यान्प्रतीदमुच्यते " दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥ १ ॥ बौद्धाः शतं सहस्राणि तिष्ठन्ति विगतज्वराः " इतीष्टापूर्ते दाक्षिणः । "पुरुषतत्त्वानभिज्ञो हीष्टापूर्तकारी कामोपहतमना बध्यत"

१ पातञ्जलदर्शने १।२४. २ पा. द. २-३.

इति । अनेन[1] बन्धत्रयेण सकलकालमनाकलितः कलानिधिकलावचूल एव भगवान् । तदपरे त्वात्मनो बन्धत्रयमिदं विवेकज्ञानेन समूलमुन्मूल्य मुक्ताः सम्पद्यन्ते । नित्यमुक्तस्य चेश्वरस्य न पूर्वा बन्धकोटिरस्ति । यथा संसारिमुक्तात्मनाम् । नाप्युत्तरा । यथा प्रकृतिलीनतत्त्वज्ञानानां योगिनाम् । ते हि मुक्तिं प्राप्याऽपि पुनर्बन्धभाजो जायन्ते । ऐश्वर्ययोगाद्वाऽयमीश्वरः । तच्चैश्वर्यमष्टप्रकारम् । तद्यथा, अणिमा, लघिमा, महिमा, प्राप्तिः , प्राकाम्यं, वशित्वं, ईशित्वं, यत्र कामावसायित्वं चेति । तत्राणिमा भवत्यणुः । यतः सर्वभूतैरदृश्यः सन्, सर्वत्र लोके संचरति । लघिमा लघुर्भवति । यतः सूर्यमरीचीनालम्ब्य सूर्यलोकं याति । महिमा महान् भवति । यस्मादल्पोऽपि नागनगनगरगगनपरिमाणः सम्पद्यते । प्राप्तिर्यतः सर्वे भावाः सन्निहिता भवन्ति । तद्यथा भूमिष्ठ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । प्राकाम्यमिच्छानभिघातः । यतो भूमावुन्मज्जति निमज्जति च यथोदके । वशित्वं यतः पृथिव्यादिषु भूतेषु गोघटादिषु च भौतिकेषु वशी स्वतन्त्रो भवति । ईशित्वं यस्माद्भूतिभौतिकेषु प्रभवस्थितिव्ययानामीष्टे । यत्र कामावसायित्वं यतः सत्यसंकल्पता भवति, यथा अस्य संकल्पो भवति भूतेषु तथैव भूतानि भवन्ति । अन्येषां हि निश्चया निश्चेतव्यमनुविधीयन्तेऽस्य तु निश्चेतव्याः पदार्था निश्चयमिति । प्रवृत्तिश्चास्य सकलसंसारिजनानुग्रहार्थमिति । अयं हि कल्पप्रलयमहाप्रलयेषु समग्रं जगदुद्धरिष्यामीति प्रतिज्ञावानवतिष्ठते । अयं च योगिभिर्वाचकेन प्रणवेन जप्यमानस्तेभ्योऽभिमतं फलं प्रयच्छति । कालेनानवच्छेदाच्चासौ पूर्वेषामपि कपिलमहर्षिप्रभृतीनां गुरुः । ते हि कल्पमहाकल्पादिकालेनावच्छिद्यन्ते न त्वीश्वर इति ।

निःशेषां यः प्रतिकलामिमां भूर्भुवःस्वस्त्रिलोकी-
मेकः सम्यक्कलयतितरां शाश्वतैकस्वभावः ॥ २५

---

१ ' अनेन च ' इति प. म. पुस्तकयोः पाठः ।

सिद्धस्तस्मादणिमलघिमाद्यष्टधैश्वर्यशाली
कर्मक्लेशैर्न खलु कलितः सोऽत्र देवः कपाली ॥ ४२१ ॥
स्वप्नक्रियाविरचनप्रगुणाशयेन
श्रद्धाजडेन भवता गदितं यदत्र ॥
५ किंचित्सखे कपिलदर्शनबद्धबुद्धे
तद्दूष्यमाणमधुना शृणु सावधानः ॥ ४२२ ॥

तथा हि यत्तावदवादि क्लेशेत्यादि तन्नोपपत्तिपथमवतरति । यतः क्लेशादिभिरपरामृष्टत्वमात्रं तस्य स्वरूपं तस्मिन्सत्यशेषज्ञत्वं वा । प्रथमपक्षे मुक्त एवासौ स्यात्तैरपरामृष्टत्वात्तदन्यमुक्तवत् । न पुनरीश्वरः ।
१० अन्यथा तदन्यमुक्तानामपीश्वरत्वप्रसक्तिः । सर्वदा तैरपरामृष्टत्वे सत्यशेषज्ञत्वं तस्य स्वरूपं वक्तव्यम् । तत् कुतः सिद्धम् । अशेषकर्तृत्वादैश्वर्याश्रयत्वाद्वा । प्रथमपक्षे स किं स्वतन्त्रः सर्वं कार्यं कुर्यात्, प्रकृतिपरतन्त्रो वा । यदि स्वतन्त्रः, तदा नैयायिकाद्यभ्युपगतगिरीशान्न विशिष्यत इति तद्दूषणेनैव दुष्टताऽस्य प्रतिपत्तव्या । अथ प्रकृतिपर-
१५ तन्त्रः, तदपि न सुसूत्रम् । प्रकृतेः स्वरूपत एवासिद्धेरसिद्धिश्चास्याः पुरतः पराकरिष्यमाणत्वात् । प्रकृतिपरतन्त्रता च त्रिलोचनस्याऽतिशयाधानान्मिलित्वैकैककार्यकारित्वाद्वा स्यात् । न प्रथमपक्षः श्रेयान् । सर्वथा नित्यत्वेनाविकारिणः शङ्करस्य प्रकृत्यातिशयाधानासम्भवात् । द्वितीयपक्षोऽपि न न्याय्यान् । सकलकार्याणां यौगपद्येनोत्पत्तिप्रसक्तेः । अप्रति-
२० हतसामर्थ्यस्य शङ्करप्रधानाख्यकारणयुग्मस्य नित्यसन्निहितत्वेनाविकलकारणत्वात्तेषाम् । अथ यद्यपि कारणयुग्ममेतन्नित्यसन्निहितं तथापि सकलकार्याणां न यौगपद्येनोत्पत्तिः यस्मादीश्वरस्य प्रधानगतास्त्रयो गुणाः सहकारिणः सन्ति रजःप्रभृतयः । तेषां च क्रमेणोद्भूतवृत्तित्वात्कार्येष्वपि क्रमो भवति । तथा हि यदोद्भूतवृत्तिना रजसा युक्तो
२५ भवति भर्गस्तदा सर्गहेतुः कार्याणाम् । यदा तथाविधेन सत्त्वेन संसृज्यतेऽसौ तदा स्थितिहेतुस्तेषाम् । यदा पुनस्तादृशेन तमसा

समायुक्तोऽयं तदा प्रलयहेतुस्तेषामिति चेत् । तदप्ययुक्तम् । यतः प्रकृतीश्वरयोः सृष्टिस्थितिप्रलयानां मध्येऽन्यतमोत्पादने शक्तिरस्ति न वा । अस्ति चेत्, तर्हि सृष्टिसमयेऽपि स्थितिप्रलयप्रसक्तिरविकलकारणतया सृष्टिवत् । एवं स्थितिकालेऽपि सृष्टिप्रलययोः प्रलयकालेऽपि सृष्टिस्थित्योः प्रसक्तिः । न चैतद्युक्तम् । प्रतीतिविरोधात् । अथ नास्ति सामर्थ्यं तदैकमेव सृष्ट्यादीनां मध्ये कार्यं सदा स्यात् । यज्जनने तयोः सामर्थ्यमस्ति, नापरं तज्जनने तयोः सामर्थ्यासम्भवात् । अविकारिणोश्चानयोः पुनः सामर्थ्योत्पत्तिविरोधात् । अन्यथा नित्यैकस्वरूपताव्याहतिः । उद्भूतवृत्तित्वं च रजःसत्त्वतमसां नित्यमनित्यं वा भवेत् । न तावन्नित्यम्, कादाचित्कत्वात् । सृष्ट्यादियौगपद्यप्रसक्तेश्च । अथाऽनित्यम्, तर्हि कुतो जायेत । प्रकृतीश्वरादेवाऽन्यतो वा स्वातन्त्र्येण वा । प्रथमपक्षे सदाऽप्यस्य सद्भावप्रसङ्गः । प्रकृतीश्वराख्यस्य हेतोः शाश्वतिकतया सदा सन्निहितत्वात् । अथान्यतः, तदपि स्वसिद्धान्तबाधाविधायकम्, प्रकृतीश्वरव्यतिरेकेणापरकारणस्य भवताऽनभ्युपगमात् । तृतीयपक्षे तु देशकालनियमेनास्याविर्भावविरोधः । स्वातन्त्र्येण भवतस्तन्नियमानुपपत्तेः । स्वभावान्तरायत्तप्रवृत्तयो हि भावाः कादाचित्काः स्युस्तद्भावाभावप्रतिबद्धत्वात्तत्सत्त्वासत्त्वयोः । नाऽन्ये । तेषामपेक्षणीयस्य कस्यचिदभावात् । अपेक्षणीयसद्भावे वा स्वातन्त्र्येणोत्पादविरोधात् । तन्न प्रकृतिपरतन्त्रोऽपि व्यक्षः सर्वकार्यकारी । कर्तृत्वाभ्युपगमे वाऽस्य "अकर्त्ता निर्गुणः शुद्धः" इत्यादेरात्मलक्षणस्यानुपपत्तिः । अथाऽन्यात्मनामेवैतल्लक्षणं नेश्वरस्य, तस्य तेभ्यो विशिष्टत्वात्तेनायमदोष इति । नन्वेवं शुद्धत्वादेरपीश्वरस्वरूपत्वाभावप्रसङ्गादतीव तस्य तेभ्यो विशिष्टत्वं स्यात् । ततः सर्वकर्तृत्वस्य त्रिलोचने विचार्यमाणस्य कथञ्चिदप्यसिद्धेर्नातस्तस्य सर्वज्ञत्वसिद्धिः । नाप्यैश्वर्याश्रयत्वात् । ऐश्वर्यं हि तत्र स्वाभाविकं प्रकृतिकृतं वा स्यात् । न तावत्स्वाभाविकम्, बुद्धिधर्मतया सांख्यै-

स्तस्याभ्युपगमात् । चैतन्यमेव हि तैरात्मनि स्वाभाविकं रूपमभ्युपगतम् । अथ प्रकृतिकृतम्, तथा हि यदा प्रकृतिर्बुद्धिलक्षणेन विकारेण परिणमते तदा बुद्ध्यवस्थाविशेषा धर्मज्ञानैश्वर्यादयः प्रादुर्भवन्ति इति । एतदपि नोपपत्तिमत् । इत्थमीश्वरस्य त्वयैवैश्वर्याभाव-
५ प्रतिपादनात् । न खलु बुद्धिपरिणामस्यैश्वर्यस्यासम्भवे ततोऽर्थान्तरभूतस्य भूतपतेस्तद्युक्तम् । अन्यात्मनोऽपि तत्प्रसक्तेः । अथ प्रमथाधिपतेर्बुद्ध्या सह सम्बन्धात्तस्यैव तन्नान्यस्येत्युच्यते । ननु कोऽयमीश्वरेण साकं बुद्धेः सम्बन्धः, समवायः संयोगादिरीश्वरोद्देशेन प्रवृत्तिमात्रं वा । न तावत्समवायः । अन्यधर्मस्यान्यत्रानुपपत्तेः । यो यद्धर्मः स ततोऽन्यत्र
१० न समवैति । यथा चिद्रूपता पुरुषस्य । प्रकृतिधर्मश्च बुद्धिः । तस्मात्ततोऽर्थान्तरशम्भौ न समवैतीति । न च स्फटिकादिसमवेतेन शोणिमादिधर्मेणानैकान्तः । जपापुष्पसन्निधाने स्फटिकादेरेव तथा परिणमनात् । एतच्च प्रतिबिम्बोदयविचारावसरे सविस्तरमुपपादयिष्यते । आत्मनोऽपि बुद्धिरूपतया परिणते प्रकृतिसन्निधाने तथा परिणामाङ्गीकारे
१५ चिच्छक्तिरपरिणामिनी, अप्रतिसंक्रमेत्यभ्युपगमविरोधः । तन्नेश्वरेण सह बुद्धेः समवायलक्षणः सम्बन्धो युज्यते । नापि संयोगस्वरूपः । बुद्धेरद्रव्यत्वात् । अतिप्रसङ्गाच्च । सर्वैरप्यात्मभिर्नित्यव्यापिभिर्बुद्धेः संयोगो विद्यत एव । एतेन संयुक्तसमवायादिरपि प्रतिव्यूढः । असम्भवस्यातिप्रसङ्गस्यात्राप्यविशेषात् । अथेश्वरोद्देशेन प्रवृत्तिमात्रमे-
२० वास्यास्तेन सम्बन्धः । तदप्यसाधु । ईश्वरोद्देशेनास्याः प्रवृत्तेरसम्भवात् । पुरुषार्थकर्त्तव्यतावशेन हि प्रकृतेः प्रवर्त्तमानाया बुद्ध्यादयो विकारा व्यक्तिमासादयन्ति । न चेश्वरस्य कश्चित्पुरुषार्थः कर्त्तव्योऽस्ति । नित्यमुक्तत्वेनास्य कृतकृत्यत्वात् । कथं तमुद्दिश्य बुद्धिः प्रवर्त्तेत । अप्रवृत्तायां चास्यां कथं तस्यैश्वर्यसम्भवः । तन्नैश्वर्याश्रयत्वादपि
२५ तस्य सर्वज्ञत्वसिद्धिः । एवं च, ऐश्वर्ययोगाच्चायमीश्वर इत्यादिकं नन्वीश्वर इत्यन्तं सर्वं प्रत्युक्तमवगन्तव्यमिति ।

---

१ 'सम्बन्धसद्भावात्' इति प. भ. पुस्तकयोः पाठः ।

भो भोः सांख्यास्तदयमियता विस्तरेण व्यपास्तः
सर्वः सम्यग्भवदभिहितः पूर्वपक्षप्रबन्धः ॥
एवं चैताः सितकरकलामौलिसंसिद्धिवार्त्ताः
कीर्त्तैरन्तर्झटिति भवता पश्यतामेव याताः ॥ ४२३ ॥ २६॥

विक्षिप्य तीर्थिकमतान्यखिलानि युक्त्या ५
सर्वज्ञसाधनमिदं विहितं यदित्थम् ॥
तद्युक्तमेव कवलैः पुनरस्य भुक्तौ
सार्वज्ञमेति घटनां न कथञ्चनापि ॥ ४२४ ॥

इति ब्रुवाणमाशाम्बरं प्रत्याह—

न च कवलाहारवत्त्वेन तस्याऽसर्वज्ञत्वं, कवलाहार- १०
सर्वज्ञत्वयोरविरोधादिति ॥ २७ ॥

तस्याऽर्हतः । शेषमुत्तानार्थम् ।

नन्वविरोधादित्यसिद्धम् । तयोर्विरोधसाधकस्यानुमानस्य सद्भावात् ।

छद्मस्थाद्विजातीयत्वेन केवलिनः कवलाहारनिषेध इति दिगम्बरपूर्वपक्षस्य विस्तरशः उपपादनम् ।

तथा हि विवादाम्पदः केवली कवलाहारवान्न भवति छद्मस्थाद्विजातीयत्वाद्यः पुनः कवलाहारवान्स न च्छद्मस्थाद्विजातीयो यथास्मदादिः । छद्मस्थाच्च विजातीयः केवली तस्मात्कवलाहारवान्न भवतीति । न चात्र हेतोरसिद्धत्वमुद्भावनीयम् । वादिप्रतिवादिभ्यां छद्मस्थाद्विजातीयत्वस्य केवलिनि प्रतिपन्नत्वात् । अन्यथा छद्मस्थ इव केवलिन्यप्यकेवलित्वप्रसक्तेः । न च केवली कवलाहारवान्, देहित्वादस्मदादिवदित्यनुमानबाधितत्वं पक्षस्य शङ्कनीयम् । देहित्वस्य त्रिदशादिभिर्व्यभिचारात् । ते हि देहिनोऽथ च कवलाहारवन्तो न भवन्ति । कवलाहारविलक्षणाहारवत्त्वेन तेषां परमागमे प्रतिपादनात् । ननु केवलिनः कवलाहारवत्त्वं यदि नाभ्युपेयते तदा

१५ २० ५

१ दिगम्बरम् ।

कथं तस्य शरीरे औदारिकत्वव्यपदेशः स्यादित्यपि नारेकणीयम् । न खलु तत्र कवलाहारनिबन्धनमौदारिकव्यपदेशं प्रतिजानते सन्तः । किं तर्हि प्रधानपुद्गलारब्धत्वनिबन्धनम् । उदारैः सर्वपुद्गलराशिमध्यप्रधानैः पुद्गलैरारब्धमौदारिकमिति व्युत्पत्तेः । यद्यपि " **सुहुमिगिन्दियपभई जावसजोगिकेवलिंति सव्वे आहारगा जीवा** " इत्यनेन वचनेनैकेन्द्रियप्रभृतीनां सयोगिपर्यवसानानां प्राणिनामाहारवत्त्वेन सूत्रे प्रतिपादनात्कवलाहारित्वं केवलिनः सितवाससः प्रतिपेदिरे । तदपि सूत्रार्थानवबोधविजृम्भितम् । तत्र हि सूत्रे भगवतः केवलिन एकेन्द्रियादिभिः सह निर्देशान्निरन्तराहारोपदेशाच्च शरीरप्रायोग्यपुद्गलग्रहणमात्रमाहारत्वेन विवक्षितम् । अन्यथा निरन्तराहारः कवलाहारेण भगवान्केवली भवेत् । न चैतदिष्टं भवद्भिरपि । अथैकेन्द्रियादिभिः सह निर्देशेऽपि निरन्तराहारोपदेशेऽपि च सूत्रे यथासम्भवमाहारवत्त्वव्यवस्थितेः केवलिनः कवलाहारोऽपि कादाचित्को व्यवस्थाप्येत । इतरथाऽस्मदादेरिव तस्य दीर्घकालं देहस्थितेरभावप्रसंगादित्यभिधीयते । तदपि न परीक्षाक्षमम् । एवं हि सर्वज्ञतानिश्चयोऽपि तत्र दुर्लभः स्यात् । कावलिकाहारोपलब्धशरीरेऽस्मदादावसर्वज्ञत्वस्यैवोपलम्भात् । समाकर्ण्यते च समये कावलिकाहारं विनाऽप्यौदारिकदेहावस्थानातिशयः **प्रथमतीर्थाधिनाथ**प्रमुखाणाम् । तथा हि ।

श्रीनाभेयजिनेश्वरः किल पुरा पीनांसपीठीं लुठन्
कालिन्दीजलनीलकुन्तलजटाजालं सलीलं वहन् ॥

---

१ न शङ्कनीयम् । २ तत्त्वार्थ. अ. २ सू. २.

३ चैत्रबहुलस्य अष्टम्यांदिवसे दिवसस्य पश्चिमे भागे सुदर्शनायां नाम शिबिकायां देवमनुजासुरसहितया पर्षदा-जनश्रेण्या समनुगम्यमानमार्गः यावत् विनीतायाः नगर्याः मध्यभागेन निर्गच्छति निर्गत्य यत्रैव सिद्धार्थवनमुद्यानं यत्रैव अशोकनामा प्रधानवृक्षः तत्रैवोपागच्छति । उपागत्य अशोकवृक्षस्याधः यावदात्मनैव चतुर्मौष्टिकं लोचं करोति । चतसृभिर्मुष्टिभिर्लोचे कृते सति अवशिष्टां एकां मुष्टिं सुवर्णवर्णयोः स्कन्धयोरुपरि लुठन्तीं कनककलशोपरि विराजमानां नीलकमलमालामिव विलोक्य हृष्टचित्तस्य शक्रस्य आग्रहेण रक्षितवान् ।

प्रव्रज्यासमनन्तरं निरशनः सम्पूर्णसंवत्सरं
म्लेच्छप्रायबहुप्रकारविषयेष्वेको विहारं व्यधात् ॥ ४२५ ॥
एवं बाहुबली मुनिः स भगवान्नानाविधैः पक्षिभि-
श्चञ्चत्कूर्चकचप्रपञ्चरचितप्रालम्बिनीडव्रजः ॥
कायोत्सर्गविधौ स्थितः स्थिरमतिर्षोपवासान्व्यधा- ५
दुद्दामातिशयान्सखे कति यतीन्यद्वेदशान्ब्रूमहे ॥ ४२६ ॥

१ भगवांश्चान्नपानादिदानाकुशलैः सम्भ्रान्तैर्भद्रिर्जनैर्बस्त्राभरणकन्यादिभिर्निम-न्त्र्यमाणोऽपि योग्यां भिक्षां अलभमानोऽदीनमनाः कुरुदेशं हस्तिनागपुरे प्रविष्टः। तत्र च बाहुबलिसुतसोमप्रभसुतः श्रेयांसो युवराजः। स च मया श्यामवर्णो मेरु-मूतकलशेनाभिषिक्तोऽतीव शोभितवानिति स्वप्ने दृष्टवान्। सुबुद्धिनामा नगर-श्रेष्ठी सूर्यमण्डलात्त्रस्तं किरणसहस्रं पुनः श्रेयांसेन तत्र योजितं ततस्तदतीवा-शोभत इति स्वप्नमैक्षत्। राजापि स्वप्ने महापुरुष एको रिपुबलेन युध्यमानः श्रेयांससहायाज्जयी जात इति ददर्श। त्रयोऽपि प्रातः सभायां सम्भूय स्वप्नान् परस्परं न्यवेदयन्। ततो राज्ञा कोऽपि श्रेयांसस्य महान् लाभो भावीति निर्णीय विसर्जितायां पर्षदि श्रेयांसोऽपि स्वभवनं गत्वा गवाक्षस्थः स्वामी न किञ्चिज्ञानीति जनकोलाहलं श्रुत्वा स्वामिनं वीक्ष्य च मया क्वापीदृशं नेपथ्यं दृष्टपूर्वं इतीहापोहं कुर्वन् जातिस्मरणं प्राप। अहोऽहं पूर्वभवे भगवतः सारथिर्भगवता सह दीक्षां गृहीतवान्। तदा च वज्रसेनजिनेन कथितमासीत् यदयं वज्रनाभो भरतक्षेत्रे प्रथमो जिनो भावीति स एष भगवान् तदानीमिव तथैको मनुष्यः प्रधानेक्षुरस-कुम्भसमूहप्राभृतमादायागतः। ततोऽयो तत्कुम्भमादाय भगवन्! गृह्णेमां योग्यां भिक्षामिति जगाद। भगवतापि पाणौ प्रसारितो निमृष्टश्च तेन सर्वोऽपि रसः। न चात्र बिन्दुरप्यधः पतति। किन्तूपरि शिखा वर्धते। ततस्तेन रसेन भगवता सांवत्सरिकतपःपारणा कृता।

२ भरतबाहुबलियुद्धवर्णन यथा—बाहुबलिः क्रोधान्धदर्पोद्धुरः सन् स्वसैन्ययुतः सम्मुखमागत्य भरतेन सह द्वादशवर्षी यावद्युद्धमकरोत् परं न च हारितः। तदा शक्रेणागत्य भूयस्तरजनसंहारं भवन्तं ज्ञात्वा दृष्टियुद्धमुष्टिदण्डलक्षणाश्चत्वारो युद्धाः प्रतिष्ठिताः तेष्वपि भरतस्य पराजयो जज्ञे। तदा भरतेन क्रोधान्धेन बाहु-बलिनः उपरि चक्रं मुक्तं परमकगोत्रीयत्वात्तत्तं न पराभवत्। तदाऽमर्षवशा-द्भरतं हन्तुमना मुष्टिमुत्पाटय धावन् बाहुबलिर्हो पितृतुल्यज्येष्ठभ्रातृहननं ममानु-चितमेव। उत्पातिता मुष्टिरपि कथं मोघा भवेदिति विचार्य स्वशिरसि तां मुक्त्वा लोचं कृत्वा सर्वं च त्यक्त्वा कायोत्सर्गं चक्रे।

न च कावलिकाहारविरहे औदारिकशरीरस्थितिकालेयत्तानियमप्रतिपादकं प्रमाणमस्तीत्येकेन्द्रियाद्याहारप्रतिपादकसूत्रभेदकरणनिमित्ताऽसम्भवाद्यथाश्रुतमेव सूत्रार्थपरिकल्पनमस्तु । किं च केवली कवलाहारं भुञ्जानः किं बुभुक्षया, उत शरीरस्थित्यन्यथानुपपत्त्या, आहोस्वित्स्वभावत एव भुंक्ते ।

विपक्षपक्षप्रसरप्रशान्त्यै त्रयः स्थिता व्याहतशक्तयोऽमी ॥
त्रिनेत्रनेत्रत्रितयेन साम्यं समाश्रयन्तः प्रभवन्ति पक्षाः ॥ ४२७ ॥

न तावत्प्रथमः पक्षः । बुभुक्षाया दुःखस्वरूपत्वाद्दुःखहेतुदोषकदम्बकापाये केवलिन्यसम्भवात् । दोषाणामनपाये वा दोषजन्यस्य दुःखराशेः संभवे आत्यन्तिकसौख्यस्यानुपपत्तिस्तत्र स्यात् । न क्षुत्समानाऽन्या वेदना शरीरे सम्भवति, यतः ।

शङ्कां पल्लवभ्रान्त्या तत्पाणिचरणं मुहुः ।
कर्षन्तः कर्षुमसहा वैलक्ष्यं कारिणो ययुः ॥ ६९ ॥
उत्कण्टकैः करालाभिर्जिह्वाभिः करपत्रवत् ।
विश्रस्तास्तं लिहन्ति स्मादननाश्वमरीगणाः ॥ ७० ॥
लताभिः शतशाखाभिः प्रचरन्तिभिरुच्चकैः ।
मुरजश्चर्मवद्धीभिरिव सोऽवेद्यताभितः ॥ ७१ ॥
परितस्तं शरस्तम्बाः प्ररोहन्ति स्म संततम् ।
पूर्वस्नेहवशायातशराद्यशरधिश्रियः ॥ ७२ ॥
उद्ययुः पादयोस्तस्य प्रावृषेण्कनिमग्नयोः ।
चलच्छतपदीगर्भा अदभ्रा दर्भसूचयः ॥ ७३ ॥
प्रचक्रिरे कुलायाश्च तद्देहे वल्लिसंकुले ।
परस्परविरोधेन ते श्येनचटकादयः ॥ ७४ ॥
अरण्ये केकिकेकातल्लास्तासूत्रमहोरागाः ॥
पल्लीवितानगहने समारोहान्सहस्रशः ॥ ७५ ॥
शरीरमधिरूढस्तैर्लवमानैर्भुजङ्गमैः ॥
बभौ बाहुबलिर्बाहुसहस्रमिव धारयन् ॥ ७६ ॥
पादपर्यन्तवल्मीकविनिर्यातैर्महोरगैः ॥
पादयोर्विष्टयांचक्रे सपादकटकैरिव ॥ ७७ ॥

गुणगणकथास्तावत्तावद्विलासकुतूहलं
स्मरपरिचयस्तावत्तावन्नपापरिशीलनम् ॥
वचनरचनास्तावत्तावन्मतिश्च विजृम्भते
जठरपिठरी सेयं यावत्कथञ्चन पूरिता ॥ ४२८ ॥

अथ शरीरस्थित्यन्यथानुपपत्त्येति द्वितीयः पक्षः । सोऽपि न वर्यः । अनन्तवीर्यस्य भगवतः केवलिनः कावलिकाहारमन्तरेणाऽपि शरीरस्थितेरुपपद्यमानत्वात् । अपि च ।

ये शक्ताः कुलशैलकाननननदीप्राकाररत्नाकरैः
संकीर्णामपि काश्यपीं रचयितुं रम्यातपत्रप्रभाम् ॥
मेरुं दण्डनिभं तथाऽत्र सुसखे तेषां स्वकीयस्थितौ
शक्तिर्नास्ति विनैव भुक्तिमिति नश्चित्रीयते मानसम्॥४२९॥

अथ स्वभावत एव भुंक्ते इति तृतीयः पक्षः । सोऽपि न प्रशस्तः । प्रस्तुतभुक्तिमुक्तस्वभावकल्पनयैव दोषाभावात् ।

कवलभुक्तिरियं जिनकुञ्जरे श्रयति मानविरोधधुरां ततः ॥
कथमसौ विफलं कलितादरास्तदिह शुक्लपटाङ्कितमूर्तयः ॥४३०॥

कवलभुक्तिविपाटनलम्पटं किमपि दिक्पटपाटवमीक्षितम् ॥
तव सखे क्षणमेकमिदं तु नः किमपि पश्य तदुद्धरणोत्सुकम् ॥४३१॥

तथा हि । यत्तावत्कवलाहारसर्वज्ञत्वयोर्विरोधप्रतिपत्त्यर्थं छद्मस्थाद्विजातीयत्वादित्यादिसाधनमुपन्यस्तम् । तत्रेदं पर्यनुयुज्यते । किं सर्वथा छद्मस्थाद्विजातीयत्वं केवलिनः संमतमाहोस्वित्कथञ्चित् । आद्यकल्पनायां वादिप्रतिवादिनोः स्वरूपासिद्धो हेतुः । त्रसत्वपञ्चेन्द्रियत्वमनुष्यत्वपुरुषत्वादिभिर्धर्मैश्छद्मस्थेन सह सजातीयत्वस्याप्युभाभ्यां भगवति सम्प्रतिपन्नत्वात् । द्वितीयकल्पनायां पुनरनैकान्तिकः । विपक्षेऽप्यस्मदादौ

पूर्वोक्तपूर्वपक्षस्य खण्डनं विस्तरशः ।

---

१ अस्मन्मुद्रापितसभाष्यतत्त्वार्थाधिगमसूत्रेषु पृ. ४४ टि. २.

कवलाहारवति कथञ्चिच्छद्मस्थाद्विजातीयत्वस्य हेतोर्वर्त्तमानत्वात् । न खल्वस्मदादिच्छद्मस्थेन सह सर्वथा सजातीयः । प्रतीतिविरोधादैक्यापत्तेश्च । अथ छद्मस्थादछद्मस्थत्वेनैव धर्मेण कथञ्चिद्विजातीयत्वं केवलिनः कथ्यते । ततो नानेकान्तोऽस्मदादावछद्मस्थत्वेन विजातीयत्वस्य हेतोरवृत्तेरिति चेत् । तदचतुरस्रमेव । सन्दिग्धानैकान्तिकत्वकलङ्कापत्तेः । प्रस्तुतहेतोः कवलाहारेण सार्धं विरोधासिद्धेः । न खलु कवलाहारभावाभावौ छद्मस्थत्वाछद्मस्थत्वप्रयुक्तौ । रसनेन्द्रियौदारिकशरीरादिपर्याप्तिवेद्यतैजसादिभावाभावप्रयुक्तत्वात्तयोरस्मदादौ सिद्धेषु च तथा दर्शनादिति प्रसाधयिष्यते । यच्च केवली कवलाहारवान् देहित्वादस्मदादिवदित्यनुमानमाशङ्क्य दूषितं तदनभ्युपगतोपालम्भमात्रम् । यतो न देहित्वमात्रं केवलिनि कवलाहारवत्त्वकारणमभ्युपेयते, किं तर्हि विशिष्टपर्याप्त्यादिसामग्री । तस्याश्च ततोऽद्याप्यव्यावृत्तेः । कथं तत्र कवलाहारवत्त्वाभावः सम्भवी । यदपि न्यगादि न खलु तत्र कवलाहारनिबन्धनमित्यादि । तत्रौदारिकव्यपदेशस्य भगवत्तनौ प्रधानपुद्गलारब्धत्वनिबन्धनत्वेऽपि न प्रस्तुतभुक्तेर्भगवत्यभावसिद्धिः । स्वकारणनिबन्धनायास्तस्यास्तत्र निवारयितुमशक्यत्वात् । यदप्येकेन्द्रियादिभिः सह निर्देशान्निरन्तराहारोपदेशाच्चेत्यवाचि । तदप्यनल्पमात्सर्यावेशविस्फुरितमाशाम्बराणाम् । यथा खल्वस्मदादीनामेकेन्द्रियादिभिः सह निर्देशेऽपि निरन्तराहारोपदेशेऽपि च कवलाहारोऽपि न विरुध्यते तथा केवलिनोऽपि नासौ विरोधी । न च नास्मदादीनामत्र सूत्रे आहारचिन्तापीति वाच्यम् । "एगिंदियपभिइ" इति प्रभृतिशब्देन तेषां सूचनात् । तस्मादाहारसामान्यमिह विवक्षितम् । तत्र यदि कवलाहारोऽपि केवलिनि स्वकारणोपैढाकितः स्यात्तदा किं नाम क्षुण्णं भवेत् "विग्गहगइमावन्ना केवलिणो समुहया" इत्याद्यागमोऽपि यः श्रूयते सोऽपि केवलिनः कवलाहारा-

१ अस्मन्मुद्रापिततत्त्वार्थाधिगमसूत्रेषु पृ. ५७. २ दिगम्बराणाम् ३ 'समोहया' इति पाठः सूत्रकृताङ्गे श्रु. २ अ. ३.

नुकूल एव। यतोऽत्र विग्रहगत्यापन्नादिव्यतिरिक्तप्राणिनामाहारमात्रेणाहारकत्वमुक्तम्। तत्र च कवलाहारस्याप्याविरोधः। विरोधे तु भवतोऽप्येतादृशस्यैवाहारस्यापत्त्या प्रतिदिनं प्रतिगृहं प्रतिबुद्धविशुद्धश्राद्धसम्बन्धबन्धुरश्राद्धपाणिपद्मोपनीयमानप्रबलविगलदाज्यस्निग्धमुग्धाहाराभ्यवहारप्रतिहारः प्रसज्येत। अथात्रापि यथा सम्भवमाहारव्यवस्थानादस्मदादीनां कवलाहारोऽपि कल्पते ननु केवलिन इति चेत्। ननु कुतः केवलिनः कवलाहारासम्भवः। मोहाभावादिति चेत्। न, मोहे क्षुत्कारणत्वस्य निराकरिष्यमाणत्वात्। यदप्यवाचि, अन्यथा निरन्तराहारः कवलाहारेण भगवान् केवली भवेदिति। तदपि न सुव्यवस्थितम्। विशिष्टाहारस्य विशिष्टकारणप्रभवत्वाद्विशिष्टकारणस्य च प्रतिक्षणमसम्भवाद्भगवति कवलाहारस्य कादाचित्कत्वोपपत्तेः। यस्तु पुद्गलादानलक्षणो लोमाद्याहारस्तस्य प्रतिक्षणमपि तत्र सद्भावो न विरुध्यते। प्रतिक्षणभाविस्वकारणाधीनप्रवृत्तिकत्वात्। यच्चान्यदाशङ्कितं यथासम्भवमाहारव्यवस्थितेरित्यादि तदुपपन्नमेव। न हि देशोनपूर्वकोटीं यावद्विशिष्टाहारमन्तरेणौदारिकशरीरस्थितिः सम्भविनी। निरुपक्रमायुष्कत्वात्केवलिनः सम्भवत्यथमिति चेत्। ननु निरुपक्रमायुष्कत्वं छद्मस्थावस्थायामप्यस्त्येव ततस्तदापि भोजनं कुतः कुर्यात्। तदन्तरेणापि देहस्थितेः सम्भवात्। तर्किं निरुपक्रमायुष्कत्वं देहस्थितेः कारणं न भवतीत्यभिप्रायो भवताम्। नैवम्। किन्तु यथा स्वकारणसद्भावाच्छद्मस्थावस्थायामसौ निरुपक्रमायुष्कत्वेऽपि भुंक्ते तथा तत एव केवलिदशायामपि भुञ्जानः कथं निषिध्यत इत्यभिप्रायः। ननु छद्मस्थावस्थायां मोहनीयकर्मवशोपजातमधुरादिरसास्वादलौल्यातिरेकात्कवलनं कुर्वतेऽसौ न केवल्य-

१ अस्मन्नुद्राभिमतस्वार्थाधिगममूत्रेषु पृ. ४८ टि० २. २ तत्त्वार्थ. अ. ४. सू. १२. ३ न स्त्रियां प्राणापानाहारनिरोधाध्यवसाननिमित्तवेदनापराघातसपर्याख्याः सप्त वेदना विशेषाः सन्त्यायुषो भेदका उपक्रमा इत्यतो निरुपक्रमा एव।

वस्थायां तदभावादिति चेत् । तदचारु । न खलु छद्मस्थावस्थायामपि मोहनीयस्य कार्यं कवलनम् । किन्तु वेदनीयादेः । ततः केवलिदशायां मोहनीयाभावात्कवलनलाम्पट्यं मास्तु कवलनं तु स्वकारणोपनीतं तद्दशायामपि कथं पराणुद्यते । न च छद्मस्थावस्थातः केवल्यवस्थायामात्यन्तिकं तच्छरीरस्य विजातीयत्वम् । येन प्रकृताहारविरहेऽपि तच्छरीरस्थितिरविरुद्धा स्यात् । ज्ञानाद्यतिशयस्यापि प्राक्तनसंहननाद्यधिष्ठितस्य तस्यैव शरीरस्य पातं यावदनुवर्त्तनात् । अस्मदाद्यौदारिकशरीरविशिष्टस्थितेर्विशिष्टाहारनिमित्तत्वमुपलम्भानुपलम्भप्रभवतर्क्कास्त्र्यप्रमाणेन सर्वत्र प्रतिपन्नमिति विशिष्टाहारमन्तरेणापि विशिष्टौदारिकदेहस्थितेः क्वचिदन्यत्र सद्भावे सकृदपि सा विशिष्टाहारनिबन्धना न भवेत् । अहेतोः सकाशात्सकृदपि कार्यस्य सद्भावाभावात् । यदि पुनरस्मदादिषु विशिष्टाहारनिमित्तापि विशिष्टौदारिकशरीरस्थितिः क्वचित्पुरुषविशेषे विशिष्टाहारमन्तरेणाऽपि स्यात्तर्हि महानसादौ वह्निप्रभवोऽपि धूमः क्षितिधरकन्धरादौ वह्निं विनापि स्यादिति धूमादेर्वह्न्याद्यनुमानमनुपपन्नं भवेद्व्यभिचारात् । नन्वेतज्जातीयो धूम एतज्जातीयाग्निप्रभवः सर्वत्र सकृत्प्रवृत्तेनैव प्रमाणेन तत्कार्यतापत्तिबलाद्व्यवस्थाप्यते, अग्निस्वभावादन्यतो हि तस्य भावे सकृदप्यग्नेर्भावो न भवेत्, अग्निस्वभावादन्यत्वात्तस्य । भवति चाग्निस्वभावाद्रसवतीप्रदेशादौ धूम इति सर्वत्र सर्वदाऽग्निस्वभावादेव धूमस्योत्पत्तिरतदुत्पत्तिकस्याधूमस्वभावत्वादिति न धूमादेरन्याद्यनुमाने व्यभिचार इति चेत् । तन्न । अस्य न्यायस्यान्यत्रापि समानत्वात् । विशिष्टौदारिकशरीरस्थितेर्हि विशिष्टाहारमन्तरेणापि भावे विशिष्टौदारिकशरीरस्थितिरेवासौ न भवेत् । न चात्यन्तविजातीयत्वं तस्याः केवलिनीत्यभिहितमेव । सर्वथा समानजातीयत्वं तु महानसमेदिनीधरकन्धरोपलब्धधूमयोरपि न सम्भवति ।

---

१ अस्मन्मुद्रापितप्रमाणमीमांसायां पृ. १८ टिप्पन्याम् ।

ततोऽस्मदादेरिव केवलिनोऽपि कावलिकाहारमन्तरेणौदारिकशरीरस्थितिश्चिरतरकालो न सम्भवतीति । अतो या विशिष्टौदारिकशरीरस्थितिः सा विशिष्टाहारमन्तरेण न भवति । यथाऽस्मदादेः । विशिष्टौदारिकशरीरस्थितिश्च विवादास्पदकेवलिन इत्यनुमानं प्रवर्त्तत एव । अन्यथा धूमादेरग्न्याद्यनुमानमपि न स्यात् । यदपि सर्वज्ञतानिश्चयोऽपि तत्र दुर्लभः स्यादित्यभिधायि । तदपि केवलं तदाग्रहविलसितम् । घातिकर्म्मक्षयप्रभवसर्वज्ञतायाः केवलिनि कवलाहारेण तत्कार्येण वा चिरतरकालभाव्यौदारिकशरीरस्थित्यादिना सार्धं विरोधासम्भवात् । यदपि समाकर्ण्यते चेत्यादिकमौदारिकशरीरस्थितिकालेयत्तानियमप्रतिपादकं प्रमाणमस्तीत्येतदन्तमगादि । तदप्यगाधानवबोधसिन्धुसमुच्छलितप्रबलाभिनिवेशकालकूटकवलनाकुलीकृतस्वान्तस्य प्रलपितम् । समयस्य प्रामाण्याभ्युपगमे कावलिकाहारमन्तरेणौदारिकशरीरस्थितिकालेयत्तानियमस्यापि तत एव स्थितेः । प्रथमतीर्थकरादीनां संवत्सरादिप्रतिनियतकालाधिकनिराहारौदारिकशरीरस्थितेः सूत्रे प्रतिषेधात् । निरशनकालस्य तावत एवोत्कृष्टताप्रतिपादकसूत्रभेदकरणनिमित्तासम्भवादित्याद्युक्तं, तदप्ययुक्तम् । यतो भगवच्छरीरस्य चिरतरकालस्थितिरेव सूत्रभेदकरणनिमित्तं समस्ति । प्रस्तुताहारं विना तच्छरीरस्थितेरसम्भवस्यानन्तरमेवाभिहितत्वात् । यदपि केवली कवलाहारं भुञ्जानः किं बुभुक्षेयेत्यादि विकल्पत्रयं परिकल्प्य तत्र दूषणोद्भावणम् । तदप्यपारतरतमःस्तोमास्तसमस्तशेमुषीप्रकाशस्य दिग्वाससः प्रलापमात्रम् । यतः प्रथमविकल्पे तावद्बुभुक्षया भुञ्जानस्य भगवतो दुःखितप्रसक्तिदोषस्त्वयोद्भावितः, स चादोष एव । असातानुभवत्वात्प्रतिबद्धवेदनीयकर्म्मप्रभवस्यायोग्यवस्थाचरमक्षणं यावत्संभवात् । अविकलकारणस्य कार्यस्योत्पत्तेरनिवारणात्, अन्यथा तस्य तत्कारणत्वायोगात् । न च दग्धरज्जुसंस्थानीयत्वादसातावेदनीयस्य स्वकार्याजनकत्वमिति वाच्यम् । तत एव सातावेदनीयस्यापि स्वकार्याजनकत्वापत्तेः सुखानु-

१ अस्मन्मुद्रापितप्रमाणमीमांसायां पृ. १८ टिप्पन्याम् ।

भवस्यापि भगवत्यभावप्रसङ्गात् । यथा च दग्धरज्जुसंस्थानीयायुष्कर्मोदयकार्यप्राणादिधारणं भवति तथा प्रकृतमभ्युपगम्यताम् । विशेषाभावात् ।

किं चैकादशेति सूत्रात् क्षुदादिपरिषहैकादशकस्य दुःखरूपस्य केवलिनि सिद्धेः कथं दुःखरूपाया अपि बुभुक्षायास्तत्र न सिद्धिः । **प्रभाचन्द्रस्तु** "**छद्मस्थवीतरागयोश्चतुर्दशेति बादरसंपरायेसर्वे**" इति च पूर्वापरपरिगतां सूत्रद्वयीं विधिपरां परामृशताऽन्तरालिकं त्वेकादशजिन इति सूत्रं निषेधनिष्ठं निष्टङ्कयितुमेकादशशब्दस्यैकाधिकदशस्वरूपं प्रसिद्धं सम्भविनं चार्थमवगणय्यैकादशजिने इत्यागमोऽपि क्षुदाद्येकादशपरीषहप्रतिषेधपरः प्रतिपत्तव्यः । एकेनाधिका न दश एकादश इति व्युत्पत्तेरित्येवमर्थं परिकल्पयन्नियतं लोकं यानि प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यं नाऽभ्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वेति सकलकलाविद्विदितमपि न्यायं न कदाचिदश्रौषीत् । एकाधिकदशस्वरूपो ह्यर्थः प्रस्तुतशब्दस्य प्रसिद्ध एव । न चासौ न सम्भवी । वेदनीयोदयभाविनामेकादशपरीषहाणां तत्र सम्भवात् । अथैकाधिकदशप्रतिषेधलक्षणोऽप्यर्थः प्रसिद्ध एवेति कथमसावस्य परिकल्पित इति चेत् ।

> भो भगवन्तः सभ्याः सर्वेऽप्याकर्णयन्तु कृतकर्णाः ॥
> एकादशशब्दार्थः प्रख्यातः कापि यद्येवम् ॥ ४३० ॥

नाप्यसौ सम्भवी । वेदनीयोदयेत्यादिन्यायस्य प्रदर्शितत्वात् । अपि चैकादशेत्यत्र नञ् दशशब्देन सम्बद्धः पर्युदासः प्रसज्यो वा भवेत् । पर्युदासश्चेत्, तदा दशसदृशा नवादय एकादश एकादशादयो

५ 'एकादश जिने' इत्यादिसूत्रस्य क्षुदाद्येकादशप्रतिषेधपरता व्याचक्षाणस्य प्रभाचन्द्रस्य विद्यानन्दादीनां च खण्डनम् ।

१० १५ २०

---

१ अस्मन्मुद्रापितप्रमाणमीमांसायां पृ. १८ टिप्पन्याम् । २ तत्वार्थ. ९।११. ३ तत्वार्थश्लो. वा ९।१०. ४ तत्वार्थश्लो. वा. ९।१२. ५ तत्त्वार्थसूत्रे ९–९ इत्यत्र द्रष्टव्यम् ।

वाऽदशशब्दवाच्याः स्युः । ततश्चैकेनाधिका अदशेति विग्रहे दशादीनां द्वादशादीनां वा परीषहाणां तत्र विधानप्रसङ्गात्कथमेकादशपरीषहप्रतिषेधपरताऽस्य सूत्रस्य स्यात् । प्रसज्यश्चेत्, तर्ह्यदशेति समासो न प्राप्नोति । तत्र समासप्रतिषेधात् । सत्यपि चास्मिन्नदशशब्दस्य दशप्रतिषेधमात्रबोधकतायामेकेनाधिका अदशेति दशप्रतिषेधस्यैकशब्देन कीदृशी संगतिः स्यात् । तदयं तपस्वी स्वकीयदर्शनाभिनिवेशविसंस्थुलीकृतस्वान्तः काशकुशावलम्बनैरात्मानं विडम्बयति । यत्पुनरेकादशजिन इति सूत्रव्याख्यायां स्वयमाशङ्कितमभिनन्दयन्निदं निजगाद विद्यानन्दः, "तर्हि जिनेन्द्रे क्षुदादयोऽपि माभूवन् । मोहरहितस्य वेदनीयस्य तत्र सतोऽपि तज्जननासमर्थत्वात् । तथाप्रसिद्धोदासीनावस्थपुरुषवत् । सत्यमेतत् । उपचारेण तत्र तेषाममिधानात् । सकलार्थसाक्षात्कारिणोऽमनस्कस्य चित्तवृत्तिनिरोधाभावेऽपि ध्यानाभिधानवत् । किं तदुपचारनिमित्तमिति चेत्, तत्सामग्र्येकादशवेदनीयसद्भाव इति" । तदिदं सहृदयहृदयानामानन्दं मनाग्दधानं तदभिधानस्यायथार्थत्वमेव व्यञ्जयति । तथा हि तत्सामग्र्येकादशवेदनीयसद्भाव इत्थमुनैकादशपरीषहोपचारनिमित्तं केवलिन्यावेदयतो मोहनीयोपबृंहितवेदनीयलक्षणस्यैवास्याभिप्रेता तत्सामग्री । सा च न क्षोदक्षमा । मोहनीयोपबृंहणमन्तरेणैव नामादिकर्म्मण इव वेद्यकर्म्मणोऽपि केवलिनि स्वकार्यकरणप्रावीण्योपपत्तेः । अन्यथा तीर्थकरनामकर्म्माद्यपि तीर्थप्रवर्त्तनादिस्वसाध्यसाधनासाधीयस्तां न धारयेत् । एवं चोपचारवचनमचतुरस्रम् । मुख्यवृत्त्यैव स्वहेतुप्रभवपरीषहाणां केवलिन्युपपादितत्वात् । उपपाद्यिष्यते चैतत्पुरस्तात् । एतेन सर्वार्थसिद्धिरप्यत्रोपचारव्याख्यानं कुर्वन्परास्तः । यदप्ययमेवैकादशजिने परीषहा न सन्तीत्यध्याहार्यमिति पक्षान्तरमुपक्षिप्तवान् तदपि न सूक्ष्मम् । प्रकृतस्यार्थस्याप्रसिद्धावसम्भवे वा सति ह्यध्याहारः कर्त्तव्यो नान्यथा ।

---

१ प्रसज्यः—प्रसज्यप्रतिषेधः । २ तत्त्वार्थश्लो. वा. सू. ९।११. ३ लक्षणया । ४ अस्मन्मुद्रापितसभाष्यतत्त्वार्थाधिगमसूत्रेषु पृ. २ टि. १. ५ सर्वार्थसिद्धितत्त्वार्थटीकायां पृ. २५३. पं. १६.

न चैवं तदिहास्तीति प्रोक्तं प्राक्। शरीरस्थित्यन्यथानुपपत्त्येति द्वितीयविकल्पे तु यदनन्तवीर्यत्वं प्रस्तुताहारमन्तरेणापि केवलिनि शरीरस्थितिकारणमुच्यते। तच्छद्मस्थावस्थायामपि तत्रापरिमितबलश्रवणात्समस्त्येव। न च प्रस्तुताहारं विना तत्तस्यामवस्थायां तत्र शरीरस्थितिकारणम्। अन्यथा कर्म्मक्षयार्थमनशनादितपस्युद्यमवतो भगवतः प्राणवृत्तिप्रत्ययमशनाद्यभ्यवहरणमसङ्गतं स्यात्। न च छद्मस्थावस्थायां क्षायोपशमिकं तस्य वीर्यं केवल्यवस्थायां तु क्षायिकमिति विशिष्टाहारमन्तरेणापि केवल्यवस्थायां तु तत्तत्र शरीरस्थितिनिबन्धनमित्यभिधानीयम्। क्षायिकवीर्यसद्भावेऽपि शरीरस्थितिनिमित्तोपवेशनादिवत्प्रकृताहारस्याप्यविरोधात्। न चोपवेशनादिकमपि शरीरस्थित्यर्थं तत्रासिद्धम्। समुद्घातावस्थान्तरकालं केवलिनः पीठफलादिप्रत्यर्पणश्रुतेः। न च तद्ग्रहणमन्तरेण तत्प्रत्यर्प्पणं सम्भवतीति। स्वभावत एव भुक्त इति तृतीयविकल्पस्त्वनभ्युपगमादेव प्रतिहत इति।

यच्चेदमुच्यते,

'किं देहोपचयार्थमेव केवली भुंक्ते' इत्यादीनां षण्णां विकल्पानां प्रदर्शनपूर्वकं खण्डनम्।

किं देहोपचयार्थमेव यदि वा ज्ञानादि मा क्षीयतामित्येवं किमथ क्षुधः क्षतिकृते किं वायुषोऽसाधिते।
निर्वाणे क्षयरक्षणार्थमथ वा गृद्धिं रसेषूत्कटां
हन्तुं लोकमनुग्रहीतुमथ किं भुंक्ते जिनः केवली
॥४३३॥

इति, तत्र देहोपचयार्थमिति प्रथमपक्षस्तावन्नाभ्युपगम्यते। न खलु मम शरीरे उपचयः संजायतामित्यभिसन्धाय भगवान् भुंक्ते। वीतरागत्वात्। अन्यथा प्राकृतपुरुषस्येव तस्यापि सरागत्वप्रसङ्गात्। ज्ञानादि मा क्षीयतामिति द्वितीयपक्षोऽपि नाङ्गीक्रियते। ज्ञानादिक्षय-

---

१-२ अस्मन्मुद्रापितसभाष्यतत्त्वार्थाधिगमसूत्रेषु पृ. ८ टि. ५-६. ६ अस्मन्मुद्रापितस्याद्वादमञ्जर्यां पृ. ६६. टि. १. ३ पीठमासनं फलकमवष्टम्भनार्थः।

निबन्धनाभावादेव तत्र ज्ञानादीनामक्षयप्रसिद्धेः । ज्ञानादिक्षयस्य हि निबन्धनं ज्ञानावरणादिकर्म । तच्च प्रक्षीणाशेषावरणे भगवति नास्तीति कथं ज्ञानादिप्रक्षयाशङ्काऽपि । ततस्तत्क्षयरक्षणार्थमपि न भुंक्ते भगवान् । क्षुधः क्षतिकृते भुंक्त इत्ययं तु तृतीयः पक्षः कक्षीक्रियत एव । यत्पुनरत्र दूषणं दिक्पटैः प्रकटीक्रियतेऽनन्तसुखत्वेन भगवति दुःखस्यासम्भवादनुपपद्यमानं क्षुद्वेदनाप्रतीकारार्थं तत्र भोजनमिति । तदतीवासम्बद्धम् । अनन्तसुखस्यैव भवस्थकेवलिन्यसिद्धेः । सातासातवेदनीयकर्म्मणः संभवेन किञ्चिद्दुःखानुषक्तसुखस्यैव तत्र प्रसिद्धत्वात् । आयुषोऽसाधिते निर्वाणे क्षयरक्षणार्थमिति चतुर्थपक्षोऽपि न स्वीक्रियते । चरमोत्तमदेहानामनपवर्त्त्यायुष्कत्वादेव । अनपवर्त्तनीयस्यायुषः स्वस्थितिकालसमाप्तिं विहाय क्षयानुपपत्तेः । इत्यायुःक्षयरक्षणार्थमपि नासौ भुक्ते । गृद्धिं रसेषूत्कटां हन्तुमिति पञ्चमपक्षोऽपि नाभ्युपेयते । वीतमोहे भगवति रसगृद्धिमात्रस्याप्यनुपपत्तेः । लोकमनुग्रहीतुं भुंक्ते । इति षष्ठपक्षोऽपि नोररीक्रियते । न खलु लोकमनुगृह्णामीत्यभिसन्धिपुरस्सरमाहारमभ्यवहरति भगवान् । लोकानुग्रहे तु सामान्यकेवलिनः स्वकीयासाधारणनामकर्मनिर्मितं तत् स्वाभाव्यनिमित्ता प्रवृत्तिः । तीर्थकरस्य तु तीर्थकृन्नामकर्म्मोदयमाहात्म्यकृतं तत्स्वाभाव्यनिबन्धना । यदाह भगवानुमास्वातिवाचकः, " तीर्थप्रवर्त्तनफलं यत्प्रोक्तं कर्म तीर्थकरनाम । तस्योदयात्कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्त्तयति ॥ तत्स्वाभाव्यादेव प्रकाशयति भास्करो यथा लोकम् । तीर्थप्रवर्त्तनाय प्रवर्त्तते तीर्थकर एवम् ॥" इति । तथा हि स भगवान् पूर्वाह्णेऽपराह्णे च पादोनप्रहरं यावद्धर्मोपदेशकाल एव सिंहासनाद्यधिरूढ आस्ते । शेषं तु दिनं देवच्छंदकनाम्नि दिव्यस्थाने यथासुखं गमयति ।

---

१ भवो नारकादिजन्म तत्रेह भवो मनुष्यभव एव ग्राह्यः अन्यत्र केवलोत्पादाभावात् । भवे तिष्ठतीति भवस्थः तस्य केवलज्ञानं भवस्थकेवलज्ञानम् । २ तत्त्वार्थ. सं. का. ९।१०.

तत्र च गणधरदेवादिभिरानीतमाहारं निखिलदोषविशुद्धं विज्ञाय क्षुद्वेदनोदये गृह्णाति । आहारं च तदीयपाणिपल्लवन्यस्तं मांसचक्षुषः पश्यन्ति । कथमसौ भुंक्ते इत्येतत्तु न पश्यन्ति । सर्वज्ञाहारविहारयोर्मांसचक्षुषामगोचरत्वात् ।

यत्पुनरत्र **प्रभाचन्द्रानुसारी** प्राह । किमर्थं भगवान् देवच्छंदके गच्छति । मनोविक्षेपपरिहारेण ध्यानसिद्धयर्थं निरोधाक्षमतया यथासुखमवस्थानार्थं रहस्यकार्यानुष्ठानार्थं वा । तत्राद्यः पक्षोऽयुक्तः । अमनस्कतया भगवतो मनोविक्षेपासंभवाद्योगनिरोधसद्भावेनोपचारस्तत्र ध्यानाभिधानाच्च । द्वितीयपक्षोप्यनुपपन्नः । अनन्तवीर्यस्य निरोधाक्षमत्वानुपपत्तेः । अनन्तसुखान्वितस्य दुःखलेशस्याप्यभावतो यथासुखमित्यस्यापि दुर्घटत्वात् । रहस्यकार्यं च निन्द्यमनिन्द्यं वा । न तावन्निन्द्यम् । प्रक्षीणाशेषदोषस्य निन्द्यकार्यानुष्ठानविरोधात् । अथानिन्द्यम् । तर्हि किं भोजनं कर्मक्षपणं वा । न तावद्भोजनम् । तस्यामोहे भगवति प्रतिपिद्धत्वात् । अप्रतिषेधे वा कस्मादसावेकान्ते गत्वा भुंक्ते । दृष्टिभयाद्याचकभयादनुचितानुष्ठानत्वाद्वा । तत्राद्यविकल्पोऽनुपपन्नः । भगवतो दृष्टिदोषागोचरत्वात् । अपि च ।

कुष्ठं कुण्ठयति ज्वरं जरयति प्रोन्मूलयत्यश्मरीं
शोषं शोषयति क्षयं क्षपयति स्फोटं पिनष्टि क्षणात् ॥
तेषां[1] नाम कथंचन स्मृतमपि प्राणिप्रबन्धस्य भो-
स्तेषां दृष्टिभयं भवत्यतितरां चित्रं तदेतद्बुधाः ॥ ४३४ ॥

द्वितीयविकल्पे तु भगवता महद्दीनत्वं प्रख्यापितम् । न खलु महासत्त्वस्य पृष्ठतो लग्नान्बुभुक्षापीडिताञ्शिष्यान्विहाय पितुरिव पुत्रानेकान्ते गत्वा भोजनं युक्तम् । अनुचितानुष्ठानत्वेन तु न तत्र

विकल्पप्रदर्शनपूर्वकं प्रभाचन्द्रानुसारिणः पूर्वपक्षस्योपादनपूर्वकं खण्डनम् ।

---

1 'येषाम्' इति प. भ. पुस्तकयोः पाठः ।

तत्परिकल्पना श्रेयसी । रूयादिसेवनपरिकल्पनावत् । कर्म्मणामपि क्षपणं पूर्वोपार्जितानां भुक्तिकालोपार्जितानां वा तत्राऽऽद्यानां विधीयेत । पूर्वोपार्जितानां चेत्, घातिनामघातिनां वा । न तावद्घातिनाम्, तेषां पूर्वमेव क्षपितत्वात् । नाप्यघातिनाम्, तेषां यथाकालं क्षपथिष्यमाणत्वात् । सततं शुक्लध्यानानलतः कर्मेन्धननिचयनिर्दहनसमर्थत्वाच्चास्य । न हि भगवतः शुक्लध्यानानलो देवच्छंदक एव प्रज्वलति न समवसरणादावित्यभ्युपगमो युक्तः । तत्रस्थस्यास्य ध्यानान्तरप्रसङ्गात् । भुक्तिकालोपार्जितकर्मणां च कथं क्षपणम्, प्रतिक्रमणंतश्चेत्, अस्तु, परं भगवतो निर्दोषता दुर्लभा । यः प्रतिक्रमणां करोति नासौ निर्दोषः । यथाऽस्मदादिः प्रतिक्रमणां करोति च भगवानिति । कृतदोषनिराकरणं हि प्रतिक्रमणं तत्कुर्वतः कथमस्य निर्दोषता स्यात् । अथ तन्न करोति । कथं भुक्तिक्रियातः समुत्पन्नं दोषं निराकुर्यात् । आहारकथामात्रेणापि ह्यप्रमत्तोऽपि सन्साधुः प्रमत्तो भवति नार्हन् भुञ्जानोऽपीति महच्चित्रम् । दोषवत्त्वे वाऽस्य श्रेणितः पतितत्वान्न केवलभाक्त्वं स्यात् । भुञ्जानोऽसौ पिशितलोचनैर्न विलोक्यत इत्यत्र च किं कारणम् । बहुलतमतमःपटलप्रच्छादितत्वं काण्डपटाद्यावृतत्वं विद्याविशेषेण स्वस्य तिरोधानमन्यजनातिशायी माहात्म्यविशेषो वा । तत्राद्यपक्षोऽनुपपन्नः । तद्देहदीप्त्या तमःपटलस्य निर्मूलमुन्मूलितत्वात् । काण्डपटाद्यावृतावयवस्तस्मै कथं भिक्षा दीयेत । विद्याविशेषाभ्युपगमे चाऽस्य विद्याधरादिवन्निर्ग्रन्थताविरोधः । अथान्यजनातिशायी माहात्म्यविशेषः कश्चित्तस्येष्यते येन भुञ्जानो नावलोक्यत इति । नन्वन्यजनातिशायी क्षुद्भावलक्षण एवातिशयोऽस्येष्यतां तस्यैव प्रमाणोपपन्नत्वादिति । तदेतन्निखिलमनादिमिथ्यावासनापरवशशेमुषीकस्याही-

१ शुक्लं शुभस्वाभाविकं सर्वोपाधिशाधारहितं चित्तमन्तःकरणं यस्मिन्ध्याने तद्ध्यानमुपचाराच्छुक्लम् । २ समवसरन्ति नाना परिणामा जीवाः कथञ्चित्तुच्छतया यस्मिन् तत्समवसरणम् । ३ 'स्वस्थानाद्यत्परस्थानं प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भूयः प्रतिक्रमणमुच्यते ॥' इति ।

कस्यास्य प्रलपितम् । तथा हि । यत्तावन्मनोविक्षेपपरिहारेण ध्यानसिध्यर्थमित्यादि पक्षत्रयमुत्थाप्य दूषितम् । तत्र प्रथमतृतीयपक्षौ दूषयता भवता कण्ठशोषः केवलमनुभूतः । अनभ्युपगतोपालम्भात् । निरोधाक्षमतया यथासुखमवस्थानार्थं भगवान्देवच्छन्दके गच्छतीत्ययं तु द्वितीयपक्षः कक्षीक्रियत एव । तत्र च यद्दूषणमुक्तमनन्तवीर्यस्य निरोधाक्षमत्वानुपपत्तेरिति । तदनुपपन्नम् । वीर्येऽनन्तत्वस्य क्वचिदप्यात्मन्यप्रसिद्धेः । वीर्यविभागानामसंख्यातत्वेन परमागमे प्रतिपादनात् । भवतु वा कथंचिदनन्तवीर्यत्वं भगवति । तथापि तन्माहात्म्येन शक्तिक्षयः केवलं न भवति तस्य । यत्तु धर्मदेशनासमयसम्भवियोजनव्यापिवाणीविलासपरिश्रमसमुद्भूतासातोदयसम्पाद्यं किञ्चिद्दुःखं तन्न निवारयितुं पार्यतेऽतस्तदुपशान्तये भगवान्देवच्छन्दके गच्छतीत्युपपन्नं पश्यामः । यच्चाऽभिहितमनन्तसुखान्वितस्य दुःखलेशस्याप्यभावतो यथासुखमित्यस्यापि दुर्घटत्वादिति । तदप्यघटमानम् । अनन्तसुखान्वितत्वस्यैव भगवत्यद्याप्यसिद्धेरित्युक्तप्रायम् । यच्चावाचि । भुञ्जाऽनोसौ पिशितलोचनैर्नावलोक्यत इत्यत्र च किं कारणम् । किं बहलतमतमःपटलप्रच्छादितत्वमित्यादि । तत्राऽप्याद्यं विकल्पत्रयमनभ्युपगमादेव प्रतिहतम् । अन्यजनातिशायी माहात्म्यविशेषस्तद्भोजनादर्शने कारणमित्ययं चतुर्थो विकल्पः स्वीक्रियते । तत्र च यद्दूषणमुदग्राहि नन्वन्यजनातिशायी क्षुदभावातिशयोऽस्येप्यतां तस्यैव प्रमाणोपपन्नत्वादिति । तत्र हेतोरसिद्धिः । तथाहि प्रमाणमागमोऽन्यद्वा क्षुदभावे भवेत् । न तावदागमः । सिद्धवत्सयोगकेवलिनि क्षुदभावप्रतिपादकस्यागमस्यासम्भवात् । अन्यस्माच्च प्रमाणात्क्षुदभावः स्वभावानुपलम्भादन्यतो वा स्यात् । न तावत्स्वभावानुपलम्भात् । केवलिनो विप्रकृष्टस्वभावे भावे स्वभावानुपलम्भोऽयुक्तः । एकज्ञानसंसर्गिपदार्थान्तरोपलम्भलक्षणत्वात्तस्य । अन्यतोऽपि विधीयमानान्निषिध्यमानाद्वा तन्निषेधः स्यात् ।

---

१ सूत्रकृताङ्गे प्रथमश्रु. स्कं. अ. ८.

यदि विधीयमानात्, तदा तेन क्षुद्विरोधिना भवितव्यम् । अविरुद्धविधेरभावासाधकत्वात् । न च क्षुद्विरोधः केवलिनि किंचित्प्रतीयते । न च ज्ञानादिगुणा एव तत्र तद्विरोधिन इत्यभिधातुमुचितम् । यतो ज्ञानादिमात्रस्य क्षुधा विरोधस्तद्विशेषस्य वा । यदि ज्ञानादिमात्रस्य तर्हि यथा यथा ज्ञानादयो गुणा विवर्धन्ते तथा तथा क्षुधो हानितारतम्येन भवितव्यम् । प्रकाशविवृद्धाविव तमसः । न चैवमस्ति । न हि बालादौ ज्ञानाद्युपचये क्षुदुपचयस्ततः प्रभृति च ज्ञानाद्युपचये तारतम्येन क्षुदपचयो लक्ष्यते । तन्न ज्ञानादिमात्रस्य क्षुधा विरोधः । अथ ये केवलिगता ज्ञानादयः प्रकर्षपर्यन्तप्राप्तास्तेषामेव क्षुधा विरोधः । तन्न । तथा प्रतिपत्तुमशक्तेः । नहि केवलिगता ज्ञानादयः क्षुधं विरुन्धन्तीत्यर्वाग्दृशा प्रतिपत्तुं शक्यम् । अतीन्द्रियत्वात्तेषाम् । किंचाविकलकारणस्य भगवतोऽन्यभावेऽभावाद्विरोधगतिर्भवति शीतस्पर्शस्येवाग्निसन्निधौ । एतच्चात्र दुर्घटम् । केवलिगुणानामतीन्द्रियतयैतत्सन्निधौ क्षुन्न भवतीति प्रतीतेरनुपपत्तेः । तन्न विधीयमानात्कुतश्चित्तत्र क्षुधोऽभावसिद्धिः । निषिध्यमानश्च भावस्तस्याः कार्यं कारणं व्यापको वा स्यात् । यदि कार्यम्, तदा तन्निवर्त्तमानमात्मनिर्वर्त्तनसमर्थाया एव क्षुधो निवृत्तिमवगमयेन्न तु सर्वथा । कारणमात्रस्य कार्याभावेऽपि भावाविरोधात् । कारणमपि निवर्त्तमानं कार्यं निवर्त्तयति, यथा वह्निर्धूमम् । व्यापकं वा निवर्त्तमानं व्याप्यम्, यथा वृक्षः शिंशपाम् । न चात्र क्षुधः कारणस्य व्यापकस्य वा कस्यचिन्निवृत्तिरस्ति । न च मोहनीयाभावात्क्षुधोऽभावः । तस्यास्तत्कार्यत्वस्य तत्त्वभावत्वस्य चासम्भवात् । न हि क्षुन्मोहनीयकार्या । वेदनीयप्रभवत्वात् । अन्यथा वेदनीयशेषा इत्यागमविरोधापत्तेः । ननु नास्ति विरोधः । न हि वयं वेदनीयस्य क्षुत्कारणत्ववारणं विदध्महे किन्तु मोहनीयमपि तत्र सहकारितया व्यापिपर्त्तीति ब्रूमहे । न च सहकारिकारणविरहेऽपि कार्योत्पत्तिर्दृष्टचरी । न खलु बीजजलानिलातपसम्पर्के पृथिवीविरहेऽङ्कुरो जायत इति चेत् । नैवम् । मोहनी-

यस्य सहकारित्वासिद्धेः । न हि स्वाभिप्रायानुरोधेन किंचित्कचित्सहकारितया कल्पयितुमुचितम् । किन्तु यस्यान्वयव्यतिरेकौ कार्येणानुविधीयेते । न चात्र क्षुन्मोहनीयव्यतिरेकमनुविदधती क्वापि निश्चिता । ननु सिद्धेषु तन्निश्चयो भविष्यतीति । मैवम् । सन्देहात् । तथा हि सिद्धेषु किं वेदनीयाभावात्क्षुन्न भवति, आहोस्विन्मोहनीयाभावादिति । भवस्थकेवलिनि क्षुदभावो मोहनीयाभावप्रयुक्तो निश्चितो वेदनीयसद्भावादिति चेत् । न । तत्र क्षुदभावस्याऽद्यापि विवादाम्पदत्वात् । नन्वेवं मोहनीयवदेव वेदनीयस्यापि क्षुत्कारणत्वं न स्यात् । मैवम् । क्षुत्कारणत्वेन तस्योभयसम्प्रतिपन्नत्वात् । नापि मोहनीयस्वभावा क्षुत् । प्रतिपक्षभावनानिवर्त्त्यत्वप्रसङ्गात् । यो हि मोहस्वभावः स प्रतिपक्षभावनया निवर्त्त्यते । यथा क्षमादिभावनया क्रोधादिः । मोहस्वभावा च क्षुद्भवद्भिरिष्टेति । तथा च क्षुद्वेदनाप्रतीकाराय शास्त्रं प्रतिपक्षभावनैवोपदिश्येत । न क्लेशभूयिष्ठा ध्यानाध्ययनविघातकारिणी पिण्डेषणा । शीतोष्णबाधातुल्यत्वाच्च क्षुधो न मोहस्वभावत्वम् । अन्यथा तद्बाधाया अपि मोहस्वभावत्वं स्यात् । ननु भगवतः क्षुदुपगमेऽशेषज्ञत्वादिविरोधः क्षुदुदयेऽस्मदादिवत्तत्र ज्ञानदर्शनचेष्टादेः प्रक्षयात् । तदसमीचीनम् । ज्ञानावरणादिप्रक्षये जातायामपि क्षुधि तत्क्षयायोगात् । तत्क्षयो हि ज्ञानावरणादिकर्मोदयनिबन्धनोऽतोऽस्मदादौ तदुदयातिशयात्तत्क्षयातिशयो युक्तो भगवति तु तदावरणादेरशेषस्यापगमात्सत्यामपि क्षुधि न ज्ञानादिक्षयः । न ह्यग्न्यभावे सत्यपीन्धने धूमो भवति । तदेवं प्रमाणोपपन्नत्वादिति क्षुदभावसाधको हेतुरसिद्धः । तथा च कथं भुक्तिप्रतिषेधः । भुक्तिसाधकश्चैतत्प्रमाणम् । विवादविषयापन्ने केवलिनि कदाचित्कवलाहारभुक्तिरस्ति । अविकलकारणत्वात् । यद्यत्राविकलकारणं तत्तत्रास्ति । यथा कचित्प्रदेशेऽङ्कुरः । तथाभूता च कदाचित्कवलाहारभुक्तिर्विवादविषयापन्ने केवलिनि ।

---

१ आहारादिग्रहणविधेः । २ 'ज्ञानादिक्षया' इति भ. पुस्तके पाठः ।

तस्मात्तत्र साऽस्तीति। न वाऽत्रासिद्धो हेतुः। यतः कवलाहारभुक्तेर्द्विधा कारणं बाह्यमाभ्यन्तरं च। तत्र बाह्यमनशनादि। तत्तावदस्त्येव। न तत्र कस्यापि विवादः। आभ्यन्तरं पर्याप्तिवेद्यतैजसदीर्घायुष्ट्वोदयलक्षणम्। तदपि विद्यत एव। यतो हि शरीरेन्द्रियादिनिष्पत्तिः सा पर्याप्तिर्नामकर्मविशेषः। वेद्यं सुखदुःखसम्पादकं वेदनीयाख्यं कर्म। तैजसं भुक्तान्नपाकादिकारणोष्मस्वरूपान्तस्तैजसशरीरकारणं नामकर्मैव। दीर्घमायुश्चिरजीवनकारणं कर्म। एतेषामुदयात्क्षुद्वेदनोपजायते। अस्ति चैतदुदयो भगवति स च भुक्तिकारणमिति। यदाह शाकटायनः "अस्ति च केवलिभुक्तिः समग्रहेतुर्यथा पुरा भुक्तेः। पर्याप्तिवेद्यतैजसदीर्घायुष्कोदयो हेतुः ॥१॥" इति। यत्तु प्रभाचन्द्रेणाभिधीयते 'असिद्धं चाविकलकारणत्वं भुक्तेः। मोहनीयसहायं हि वेद्यादिकर्म क्षुदादिकार्यकरणेऽविकलसामर्थ्यं भवति नान्यथा। अतिप्रसङ्गात्। यथैव हि पतिते सैन्यनायकेऽसामर्थ्यं सैन्यस्य। तथा मोहविनष्टेऽघातिकर्मणाम्। यथा च निर्विषीकृत्य मन्त्रिणोपयुज्यमानमपि विषं न दाहमुर्च्छादि कर्तुं समर्थम्। तथा शुक्लध्यानानलनिर्दग्धमोहसहायं वेद्यादिक्षुदादिकम्। प्रयोगः, भगवति बुभुक्षा नास्ति तत्कारणमोहाभावात्, यस्य यत्र यत्कारणाभावो न तत्र कार्यं यथाऽनग्निप्रदेशे धूमः। नास्ति चार्हति मोह इति।" तदेतत्स्वापर्यालोचिताभिधानम्। मोहनीयसहायकविकलस्यापि नामादिकर्मण इव वेदनीयादिकर्मणः स्वकार्यकरणे विरोधाभावात्। अन्यथा नामादिकर्मापि केवलिनि तीर्थप्रवर्त्तनादिस्वकार्यकरणं कौशलं नावलम्बेत। अथ नामादिषु शुभप्रकृतीनां तत्राप्रतिबद्धसामर्थ्यत्वेन स्वकार्यकारित्वं युज्यते। नन्वसातवेद्यादिशुभप्रकृतीनां भगवति विपाकोदयस्यागमे प्रतिपादनात्। द्वितीयपक्षे तु न काचिन्नः पीडा। कियतोऽप्यनुभागस्य घातेऽप्यसाता-

---

१ भगवदाचार्यशाकटायनभदन्तकृतकेवलिभुक्तिप्रकरणे श्लो. १. २ प्र. क. मा. ८६।१।३. २ अस्मन्मुद्रापितप्रमाणमीमांसायां पृ. १८ टिप्पन्याम्।

वाच्यम् । एकादशजिने परीषहा इत्यागमविरोधादिति । अनन्तसुखत्वाख्यं तृतीयसाधनमप्यसिद्धम् । निखिलकर्मविप्रमुक्तानां सिद्धानामेव हि तत्सम्भवति नाऽर्हतः । तत्राऽसद्वेद्यसम्पाद्यस्य दुःखस्यापि सम्भवात् । चतुर्थमपि क्षुद्दुःखविरोधिबलवदनन्तसुखत्वलक्षणं साधनमसिद्धं अनन्तसुखासम्भवस्य भगवत्यनन्तरमेवाऽभिहितत्वादिति । अत एव पञ्चममपि वेद्यफलविरुद्धानिवर्त्यसुखान्वितत्वस्वरूपं साधनमसिद्धमेवेत्यपकर्णनीयं सकर्णैः । यदपि स एव प्रमेयकमलमार्तण्डे साधनमभिधत्ते स्म । "केवली न भुंक्ते, रागद्वेषाभावान्तवीर्यसद्भावान्यथानुपपत्तेः" इति । तदपि न प्रयोजकम् । रागद्वेषाभावानन्तवीर्यसद्भावयोः केवलिनि भुक्त्यभावेन साधमन्यथानुपपत्तेरसम्भवात् । भुक्त्यभावमन्तरेणापि स्वकारणनिबन्धनयोस्तयोस्तत्र विरोधाभावात् । विद्यते हि केवलिनि रागद्वेषाभावस्य कारणं मोहनीयकर्मप्रलयोऽनन्तवीर्यसद्भावस्य च वीर्यान्तरायकर्मापगम इति । अनन्तत्वं वीर्यस्य पराभ्युपगमेनेह समर्थितम् । असङ्ख्यातत्वस्यैव तत्रागमेऽभिहितत्वादिति । कथं चैवं वादिनोऽस्य केवलिनि वचनगमनादिकमपि घटेत । शक्यं हि वक्तुं न केवली वक्ति न गच्छति न निषीदति च रागद्वेषाभावानन्तवीर्यसद्भावान्यथानुपपत्तेरिति । अथान्यथानुपपत्तिविकलत्वान्नेदं साधनं वचनगमनाद्यभावस्य स्वसाध्यस्य प्रयोजकम् । तथा हि रागद्वेषयोरभावेऽनन्तवीर्यसद्भावेऽपि च तीर्थप्रवर्त्तनफलतीर्थकृन्नामकर्मोदयलक्षणतः स्वकारणादेव भगवति वचनगमनादिकमुपपद्यत एव । अन्यथा तीर्थप्रवृत्तेरुच्छेद एव स्यादिति चेत् । नन्वत एव भवदुपन्यस्तमपि साधनं केवलिभुक्तिप्रतिषेधलक्षणस्य स्वसाध्यस्य प्रयोजकं कथं नाम भवेत् । शक्यमत्रापि ह्येतद्वक्तुं रागद्वेषयोरभावेऽनन्तवीर्यसद्भावेऽपि च दुःखोत्पादफलादसातावेदनीयकर्मोदयलक्षणतः स्वकारणादेव भगवति कवलार्हभुक्तिरुपपद्यत एव । अन्यथा क्षुद्वेदनाप्रतीकार एव न स्यादिति ।

अनन्तवीर्यप्रभृतिप्रणीताः कुहेतवः केवलिभुक्तिसिद्धये ॥
अन्येऽपि ये तेऽपि निवारणीयाः स्वयं सुतर्कोज्ज्वलबुद्धिशौण्डैः॥४३३॥

यतः,—

मिथ्याभिमानानलदग्धबोधैर्दिगम्बरैः सार्धमनुद्धुराणाम् ॥
श्वेताम्बराणां कलहातिरेकः पदे पदे कीदृश एव भाति ॥ ४३६ ॥ ५
जिनागमार्थानुगमप्रधानः संदर्शितो यस्त्विह तर्कलेशः ॥
स सङ्गतोऽन्यो यदि चेति तत्त्वं विचारयिष्यन्त्यनुयोगवृद्धाः ॥४३७॥

तदेवं केवलिभुक्तिकारणस्योपपादितत्वात्सिद्धोऽविकलकारणत्वादिति हेतुः। नापि विरुद्धः। सपक्षे वर्त्तमानत्वात्। नाप्यनैकान्तिकः। सुरसरणिसरोरुहादेर्विपक्षादत्यन्तं व्यावृत्तत्वात्। १०

इत्थं प्रत्यावृत्तं समस्तदूषणकलङ्ककणतोऽपि ॥
साधनमेतन्नूनं केवलिभुक्तिं प्रसाधयति ॥ ४३८ ॥

केवलिभुक्तावनुमानम्।

अथ चेदमनुमानं केवलिभुक्तौ। विवादः केवली कदाचित्कवलाहारवान्, केवलित्वे सति दीर्घतनुस्थितिमत्त्वात्, यः कदाचित्कवलाहारवान्न भवति स न १५
केवलित्वे सति दीर्घतनुस्थितिमान्, यथा परमाणुः, न च न केवलित्वे सति दीर्घतनुस्थितिमान्विवादः केवली, तस्माद्यथोदितसाध्यसम्पन्नः। अयोगिकृतसमुद्घातकेवलिसिद्धानां पक्षत्वव्यवच्छेदाय विवादग्रहणम्। सदा केवल्याहारवत्त्वप्रसङ्गनिवृत्तये कदाचिदिति साध्यविशेषणम्। दीर्घतनुस्थितिमत्त्वादित्यभिधीयमाने एकेन्द्रियदेवनार- २०
कैर्व्यभिचारस्तन्निरासाय केवलित्वे सतीति विशेषणम्। अस्मिन्नेव तु व्याप्रियमाणे सिद्धैरयोगिभिश्चानैकान्तः, तत्प्रतिषेधाय दीर्घत्वाद्युपादानम्। एवं च—

अस्मादप्यनुमानात्केवलिभुक्तिः प्रयाति सिद्धिपदम् ॥
येनात्राऽपि न किंचिद्दूषणमुपलभ्यते सभ्याः ॥ ४३९ ॥ २५

अपि च । उत्कर्षेण देशोनपूर्वकोटिं विहरतः सयोगिकेवलिनस्तावत्कालं शरीरस्थितिर्भुक्तिं विना कथं घटेत । अथाऽनन्तवीर्यत्वात्तां विनाऽप्यस्य तत्स्थितिः । तर्ह्यायुःकर्मणाऽपि विना तत्स्थितिप्रसङ्गान्न कदाचिच्छरीराद्यपायः स्यादिति मोक्षाय दत्तो जलाञ्जलिः । तत्स्थितेरायुःकर्मापेक्षणे वाहारापेक्षणमप्यस्तु । उभयस्यापि तत्कारणत्वाविशेषात् । किं च प्रदीपज्वालाजलधारासमानं शरीरम् । तत्र च यथा तैलक्षये सति न प्रदीपज्वालाऽवतिष्ठते जलागमनमन्तरेण वा जलधारा । तथा शरीरमपि भुक्त्यभावे न स्थितिमास्कन्दति । अथ भुक्तिर्दोषो यदुपवासादि प्रत्याख्यानं क्रियते । निर्दोषे च केवलिनि दोषो विरुद्धः । तर्हि निषद्यागमनं चार्हति न प्राप्नोति । स्थानयोगादिना निषद्यादेः प्रत्याख्यानात् । वचनं च न प्राप्नोति । मौनवृत्तिकोपलम्भात् । अथ मतमशेषज्ञस्य मांसादिकं पश्यतः कथं भुक्तिरन्तरायोपपत्तेरिति । एतदप्यनल्पतमोविलासितम् । यतोऽन्तरायकर्मोदयजन्यः परिणामविशेष एवाऽन्तरायशब्देनोच्यते । न च भगवत्यन्तरायकर्मसम्भवः । प्रक्षीणघातिकर्मत्वात्तस्य । भवतु वा कश्चित्स्वकल्पनाशिल्पिनिर्मितोऽन्तरायः । तथाप्यवधिज्ञानिभिः परमर्षिभिरनेकान्तः । ते हि सकलं त्रैलोक्यं पश्यन्ति, अथ च भुञ्जते । अथ यदैवावधिज्ञानोपयोगमवधिज्ञानी करोति तदैवाऽसाववधिज्ञानी तद्विषयभूतमशेषं वस्तु पश्यति नाऽन्यदेति भोजनकाले यद्यसावुपयोगं करोति तस्यान्तरायो भवत्येव, न चायं प्रकारः केवलज्ञाने सम्भवति । तस्य सदोपयुक्तत्वादिति चेत् । एवं तर्हि दिव्यपरमाणुरूपं निरन्तराहारग्रहणमप्यस्य न प्राप्नोति । सततोपयोगित्वेन निरन्तरमन्तरायसद्भावात् । अपि च महासामायिकपरिणामवतो भगवतः का नाम पिशितादिदर्शने सति भोजनकरणेऽपि करुणायाः खण्डनेऽपि परिभाव्यता मध्यस्थेनाऽन्तरात्मना । अथ भुक्तौ जिह्वायां रसप्राप्तेः केवलिनो मतिज्ञानानुषङ्ग

---

१ ' तत्कालम् ' इति प. पुस्तके पाठः ।

इत्युच्यते । तन्न वाच्यम् । यतो नेन्द्रियविषयसम्बन्धमात्रेण मतिज्ञानं भवति । किं तर्हि सम्बन्धे मतिज्ञानावरणक्षयोपशमे च सति । एतच्च क्षीणाशेषावरणे केवलिनि नास्तीति न तज्ज्ञानानुषङ्गः । अन्यथा श्रोत्रादीन्द्रियाणां दिव्यतूर्य्यादिरवेण **गणधर**देवादिरूपेण सुगन्धिकुसुमधूपवासादिगन्धेन मरुत्सिंहासनस्पर्शेन सम्बन्धेऽपि मतिज्ञानमनुषज्यते । एवं च ।

कवलभुक्तिरियं प्रणयाकुला सकलवेदिनमुज्झितुमक्षमाः ॥
क्षपणका: किमिमां तु सतीमपि प्रकटयन्ति विरुद्धतया ततः ॥४४०॥

विक्षिप्ता मानसंख्या परसमयमता व्योमकेशादिकानां
विश्वज्ञत्वं व्यपास्तं निपुणनयवशादर्हतः स्थापितं च ॥
भुक्तिं तस्य क्षिपन्तः **क्षपणकहतका**: शिक्षिताः किञ्चिदेते
नानाभेदप्रभेदैः परिकरितमतः सिद्धमध्यक्षमत्र ॥४४१॥

श्रीमानस्मानजस्रं स जिनपरिवृढः सुव्रतः **सुव्रताख्यः**
पायादानाम्रशक्रस्फुटमुकुटतटीकोटिघृष्टाङ्घ्रिपीठः ॥
संसारक्षारपाथःपतिपतितजनोत्तारणं यस्य कामं
कुर्वाणस्यैव कान्तेर्वपुषि परिणता श्यामिका कान्तिरस्ति ॥४४२॥

भ्रश्यद्भूधरतुङ्गशृङ्गविसरं दृप्यद्भुजङ्गेश्वरं
नश्यद्दिक्करटिस्फुटत्क्षितितलं क्षुभ्यन्महाम्भोनिधि ॥
वामाङ्गुष्ठविघट्टनेन झटिति स्वर्णाचले दोलिते
येनेदं जगदीदृशं समभवज्जीयात्स वीरो जिनः ॥ ४४३ ॥

---

१ ' प्रक्षीण ' प. भ. पुस्तकयोः पाठः । २ अनुत्तरज्ञानदर्शनादिधर्मगणं धरतीति गणधरः । ३ ' संचकारित ' इति प. भ. पुस्तकयोः पाठः ।

४ ततः सिंहासनं चाक्रं चचालाचलनिश्चलम् ।
प्रयुज्याऽथावधिं ज्ञात्वा जन्मान्तिमजिनेशितुः ॥ १ ॥
वज्रयेकयोजनां घण्टां सुघोषां नैगमेषिणा ।
अवादयत्ततो घण्टारेणुः सर्वविमानगाः ॥ २ ॥

येषां कर्कशतर्ककर्कणकलाप्रागल्भ्यसम्पादिका-
मभ्यस्यन्ति सुशास्त्रसंहतिमिह प्राज्ञाः प्रमोदाञ्चिताः ।।
सिद्धान्तामृतसिन्धुतारणतरीतुल्यान्निबन्धांश्च ते
श्रीमन्तो मुनिचन्द्रसूरिगुरवः शश्वत्प्रसीदन्तु नः ॥ ४४४ ॥

शक्रादेशं ततः सोऽथ सुरेभ्यो ज्ञापयत्स्वयम् ।
तेन प्रमुदिता देवाश्चलनापक्रमं व्यधुः ॥ ३ ॥
पालकाख्यामरकृतं लक्षयोजनसंमितम् ।
विमानं पालकं नामाऽऽरोहत् त्रिदशेश्वरः ॥ ४ ॥
अन्येऽपि घनदेवैर्वृतः सिंहासनास्थितः ।
गीयमानगुणोऽचालीदपरेऽपि सुरास्ततः ॥ ५ ॥
देवेन्द्रशासनात्केचित्केचिन्मित्रानुवर्तनात् ।
पत्नीभिः प्रेरिताः केचिन्केचिदात्मीयभावतः ॥ ६ ॥
केऽपि कौतुकतः केऽपि विस्मयात्केऽपि भक्तितः ।
चेलुरेवं सुराः सर्वे विविधैर्वाहनैर्युताः ॥ ७ ॥
विविधैस्तूर्यनिर्घोषैर्घण्टानां क्वणितैरपि ।
कोलाहलेन देवानां शब्दाद्वैतं तदाऽजनि ॥ ८ ॥
नन्दीश्वरे विमानानि संक्षिप्याऽगात्सुराधिपः ।
जिनेन्द्रं च जिनाम्बां च त्रिः प्रदक्षिणयंस्ततः ॥ ९ ॥
वन्दित्वा च नमस्यित्वेत्यवं देवेश्वरोऽवदत् ।
नमोऽस्तु ते रत्नकुक्षिधारिके ! विश्वदीपिके ! ॥ १० ॥
अहं शक्रोऽस्मि देवेन्द्रः कल्पादाद्यादिहागमम् ।
प्रभोरन्तिमदेवस्य करिष्ये जननोत्सवम् ॥ ११ ॥
भेतव्यं देवि ! तन्नेत्युक्त्वावस्वापिनीं ददौ ।
कृत्वा जिनप्रतिबिम्बं जिनाम्बासन्निधौ न्यधात् ॥ १२ ॥
भगवन्तं तीर्थकरं गृहीत्वा करसम्पुटे ।
विचक्रे पञ्चधा रूपं सर्वश्रेयोऽर्थिकः स्वयम् ॥ १३ ॥
एको गृहीततीर्थेशः पार्श्वे द्वौ चामरोद्यतौ ।
एको गृहीतातपत्र एको वज्रधरः पुनः ॥ १४ ॥
अग्रगः पृष्ठगं स्तौति पृष्ठस्थोऽग्रगं पुनः ।
नेत्रे पश्चात्समीहन्ते केचनाग्रेतना सुराः ॥ १५ ॥
शक्रः सुमेरुशृङ्गस्थं गत्वाऽथो पाण्डुकं वनम् ।
मेरुचूलादक्षिणेनातिपाण्डुकम्बलासने ॥ १६ ॥

इति श्रीललितविस्तरापुण्ड्रेक्षुनिर्पीडप्रौढयन्त्रायमाणधिषणापहस्तित-धिषणनिखिलनैष्ठिकावचूलश्रीमन्मुनिचन्द्रसूरिपदपङ्कजमज्जुरसोपजीविना श्रीदेवाचार्येण विरचिते स्याद्वादरत्नाकरे प्रमाणनयतत्त्वालोकालङ्कारे प्रत्यक्षमूलभेदोत्तरभेदस्वरूपनिर्णयो नाम द्वितीयः परिच्छेदः ॥ २ ॥

कृतोत्सङ्गे जिनं पूर्वाभिमुखोऽसौ निषीदति ।
समस्ता अपि देवेन्द्राः स्वामिपादान्तमेयुरुः ॥ १७ ॥
सौवर्णा राजता रात्नाः स्वर्णरूप्यमया अपि ।
स्वर्णरत्नमयाश्चापि रूप्यरत्नमया अपि ॥ १८ ॥
स्वर्णरूप्यरत्नमया अपि मृत्स्नामया अपि ।
कुम्भाः प्रत्येकमष्टाढ्यं सहस्रं योजनाननाः ॥ १९ ॥
क्षीरनीरघटैर्वक्षःस्थलस्थैस्त्रिदशा बभुः ।
संसारौघ तरीतुं द्राक् धृतकुम्भा इव स्फुटम् ॥ २० ॥
सिञ्चन्त इव भावद्भं क्षिपन्तो वा निजं मलम् ।
कलशं स्थापयन्तो वा धर्मबीजे सुरा बभुः ॥ २१ ॥
संशयं त्रिदशेशस्य मत्वा वीरोऽमराचलम् ।
वामाङ्गुष्ठाङ्गसम्पर्कात्समन्तादप्यचीचलत् ॥ २२ ॥
कम्पमाने गिरौ तत्र चकम्पेऽथ वसुन्धरा ।
शृङ्गाणि सर्वतः पेतुश्चुक्षुभुः सागरा अपि ॥ २३ ॥
ब्रह्माण्डस्फोटसदृशं शब्दाद्वैते प्रसर्पति ।
रुष्टः शक्रोऽवधेर्ज्ञात्वा क्षमयामास तीर्थपम् ॥ २४ ॥
संख्यातीतार्हतां मध्ये स्पृष्टः केनापि नांघ्रिणा ।
मेरुः कम्पमिषादिह्यानन्दादिव ननर्त सः ॥ २५ ॥
शैलेषु राजता मेऽभूत् स्नाननीराभिषेकनः ।
तेनाऽमी निर्जरा हाराः स्वर्णपीडो जिनस्तथा ॥ २६ ॥
तत्र पूर्वमच्युतेन्द्रो विदधात्यभिषेचनम् ।
ततोऽनुपरिपाटीतो यावच्चन्द्रार्यमादयः ॥ २७ ॥

कल्पसूत्रे व्या. ५ सू. ९७.

१ " श्रीतीर्थकरसुन्दराननमुधारोचिस्समुज्जृम्भितं
सद्योगीन्द्रनिरङ्कशङ्कहृदयोद्दीप्यत्सरामण्डनम् ॥
नानातत्त्वविचारसारविलसद्वृशादिशोभाभृतम्
शास्त्राम्भोजमिदं जयत्वनुदिनं सद्वंशहंसाश्रितम् ॥ १ ॥"

इत्यधिकं म. पुस्तके प्रक्षिप्तम् ।

शुद्धिपत्रकम्

अशुद्धम्	शुद्धम्	पृ.	पं.
श्रेयसीति	श्रेयसीति ।	५	१२
इात	इति	६	२१
पटली निर्व	पटलीनिर्व	७	१७
व्यावस्था	व्यवस्था	८	१९
नयन	नय	९	१२
वा ।	वा	१०	६
साक्ष	साक्षा	१०	२२
प्रधानञ्च	प्रधानञ्च ।	१०	२४
पूर्वाचार्यैः	पूर्वाचार्यैः–	११	२५
विस्मृदय	विमृदय	१५	१०
दित्यन	दित्यनेन	१६	१
न्यस्यरे	न्यस्येर	१६	१४
इतीत्य	इत्य	२१	२२
र्दशन	दर्शन	२२	२४
कल्पना	कल्पना–	२३	८
सदैत्य	सदैन्य	२७	१३
बद्धं	बद्धुं	२७	१९
शायिनिधनं	शायि निधनं	२८	३
५१	१४	२८	२८
रुत्विजः	ऋत्विजः	२९	२
त्यादिः	त्यादि	,,	२०
सम्भवि	सम्भवि	४०	२२
मुखेण	मुखेन	४३	१३
चेत् ननु न तावत्संयोगः ।	चेत् । ननु न तावत्संयोगः	५१	१२
नैवधर्म	नैव धर्म	५५	१६
प्रेक्षया	पेक्षया	५७	१९
मम्बर	डम्बर	६१	१
र्थस्यवा	र्थस्य वा	६१	२३
सामग्रीप्र	सामग्री प्र	६२	२५
हार	हार-	६३	१६
ग्रयां	ग्रायां	६५	१५
सामा	साम	६५	२०
		६८	७
नुद्य	द्यनु	,,	२५
त्सद्धौ	त्सिद्धौ	६९	९
कापिलः	कापिलाः	७१	२५
खाद	खाद	७९	९
नीलपी	नीलपी-	७९	२१
माव	मवा	८०	८
वार्द्धि नि	वार्द्धिनि	८६	७
सन्धानो	संदधानो	९०	२३
तदुक्तम्	तदुक्तम्	९१	५
निरुप्य	निरूप्य	९१	२४
प्रसक्तेः	प्रसक्तेः ।	९२	५
तात्म्ये	तादात्म्ये	९२	१४
श्रुयेत	श्रयेत	९२	१६
सषुप्ता	सुषुप्ता	९६	२
तदा	तथा	९७	२
तत्त्वं ।	तत्त्वं	१००	६
प्रतिद्य	प्रनिपद्य	१०१	१४
र्यय	र्यय	१०२	१४
रिता	रीता	,,	१८
विलि	वलि	१०३	११
सपृक्त	संपृक्त	१०४	७
पुरःस्थितं	पुरःस्थितं	१०५	२६
संवदे	संवेद	१०७	१५
विहिति पद	विहितिपद	१०७	२४
भेदो अत्र	भेदोऽत्र	१०९	१३
महा	माहा	११०	१६
चारी	चारि	,,	१८
रणेऽपि	रणे अपि	११२	१९
भात्त	मात्त	११३	१०
नाभ	नाम	११४	३
नाद्य	नाद्यः	११४	४
हास्ये	हारस्ये	,,	१२
वप्यम्य	वपम्य	११४	२५
पेन	पेण	११५	१
सकल	शकल	११५	१३
		१२१	२
अन्यत्व	अन्यत्त्व	,,	२०
रजन	रजत	,,	२१

अशुद्धम्	शुद्धम्	पृ.	पं.
का यां	कायां	,,	२५
पत्तेः	पत्तेः ।	११६	८
कार्थं	कार्यं	११६	९
पीदं ।	पीदं	११६	११
प्रता	पता	,,	२५
यनीवृ	यनी वृ	११८	८
किं नि	किंनि	१११	२४
त्तयां	त्तायां	११९	१४
मय	यम	११९	२४
थिंय	थिंत	१२१	९
भाव	भवा	,,	२१
तल्या	तल्या	१२५	२०
यंते	यंत	१२६	११
कंमिदा	कंमुदी	,,	२५
वाद	वादः	१२७	२२
लोकि	लोकिक	१३५	१८
स्याः	स्या	१३७	५
र्थाध्यवसाया	र्थाध्यवसाया	१४७	१२
च्छद्वा	च्छन्दा	१५१	१७
प्राय	प्रायः	,,	१९
च्छिनार्थ	च्छिन्नार्थ	१५४	११
कमु	कत्वमु	,,	२३
लम्भो	लम्भो	१५५	१५
		१५६	७
एकस्यैव	एकस्येव	१५८	२२
पक्षे	पक्षे	,,	२३
मूनी	मूनी–	,,	२६
प्रामातु	प्रमातु	१५९	४
कुरुता	कुरुतां	१६४	१५
एवं	एव	१६६	५
प्रकश	प्रकाश	,,	२१
यद्यने	यद्यनेन	१६७	१०
धदे	दधे	१७०	२१
पाज	पजा	१७१	९
विभिन्न	विभिन्न	१७८	१६-१७
ऽस्ति	ऽस्ति ।	१७९	२

अशुद्धम्	शुद्धम्	पृ.	पं.
राहित	रहित	१८१	३
पतृ	पतृ ।	१८२	१५
संन्विन्मा	संविन्मा	१८३	१४
केकिना	केकिनां	,,	२१
सुधाभ्रमी	सुधाभ्रमी	१८७	१९
इह	य इह	१९१	१५
क्त्यामुष्मिन्	युक्त्यामुष्मिन्	१९४	९
मानमदर्शितम्	मानं दर्शितम्	१९४	२४
द्धटा	द्धटा	१९८	६
च्छिनम्	च्छिन्नम्	२०१	३
तुम	तुम	२०४	१६
योगः	योगः ।	२०५	१५
तन्न	त्वन्न	२०६	७
मिति	मिति ।	,,	१०
वात्यादी	वीत्यादि	,,	१७
द्वैतरू	द्वैरू	२०९	१३
धन्मी	धर्मी	२१०	१३
ज्ञानं	ज्ञातं	,,	२२
परेदा	परेषा	२१७	१६
यार्थो ज्ञानार्थ	यार्थी ज्ञानार्था	२१८	१४
मूयते	भूयते	२२०	५
कल्पा	कलो	२२२	१९
नात्र-	नात्र	,	२०
दृष्टान्त	दृष्टा त	२२३	४
शरी	शरीर	,,	२४
कयो	कयोः	,,	२६
वेद	वेद्य	२२४	२
स्यादि	स्यापि	२३०	३
बाधा	बाध	२३५	३
स्तम्बरेम	स्तम्बेरम	२३६	१९
अस्था	अथा	२३०	१२
अथो	अथा	२३६	१
योग	यॉग	२३९	२
न च तेषां"	"न च तेषां	२३९	२४
त्वाप्र	त्वप्रा	२४०	५
न्नवे	न्न वे	२४०	१

शुद्धिपत्रकम् ।



अशुद्धं	शुद्धं	पृ.	पं.
सहस्र	सहस्र	२३४	४
द्वैध्य	द्वैविध्य	२७०	१६
भर्व	भव	२७४	१४
सूर्ये	सूर्यं	२७७	९
वयायि	वायि	२८०	१०
अस्यार्थः	अस्यार्थः	२८०	१५
आभाव	अभाव	२८२	१२
द्रगादि	द्रवादि	२८३	३
पेक्षयास्तस्या	पेक्षायास्तस्याः	२८७	४
रूप	रूप	२८७	२४
क्रियाविद	क्रियां विद	२९४	१०
दाद्यता पर	दाद्यतापर	२९६	२४
रनरस्याः पुनर	नरस्याः पुनरु	२९७	१७
मान शक्ति	मानशक्ति	२९८	१५
घट	घट	२९९	२०
त्मेव	त्येव	३००	२४
व्याभि	व्यभि	३०२	८
प्रन्धा	बन्धा	३०२	१८
वहि	बहि	३०९	१०
भावा	भावां	३१२	८
चे	च	३१२	९
र्भिन्न	र्भिन्न	३१३	१०
प्रवृत्त	प्रवर्त	३१५	१८
संवेऽ	संवे	३१६	८
वैशलद्य	वैशद्य	३१७	१५
प्रका	प्रका	३२२	६
पाद	पादन	,,	७
रश्मयः	रश्मय	३२३	१३
चक्षुष	चक्षु	३२४	५
प्रात	प्रति	३२५	२०
पाथो विध्व	पाथोविध्व	३२७	१८
तेजो	तेजो-	३२७	२०
पेक्षो	पेक्ष्यो	३३०	१७
बाधि	बाधि	३३१	२१
लम्भः ।	लम्भः	३३२	६
कार	कारा	३३४	२३
श्रोत्रण	श्रोत्रेण	३३५	८
वर्ती	वर्ति	,,	१०
मनिकी	मानिकी	,,	१२
विशेष	विशेषे	,,	१६
दात्रे	पात्रे	३३८	२०
वद्ध	वद्ध्व	३४१	१६
पुरु	पुरु	३४२	१५
जैमिनी-	जैमिनीय-	३४२	२५
कारिका	रिका	३४६	११
यथा	याथा	३४८	९
मुह्व	मुह्व	३४९	२६
धारणा	धारणा	३५०	३
स्साप्र	स्सा प्र	३५०	७
तथाव्य	तथा व्य	३५०	१२
दीना	दीनां	३५१	१४
वऽसं	वसं	३५२	८
तथा क	तथाक	,,	२३
शतपत्र	पत्रशत	३५३	११
पर	पार	,,	२२
उत्तर	उत्तरः	३५४	२४
णाना	णानां	३५५	१३
दवे	देव	३५५	२५
विधस्त	विधन्त	३५७	२४
वरण	वरणं	३५८	२१
सन्व	सम्व	३६०	२१
श्रूत	श्रुत	३६२	२
विद्या	विद्य	३६७	४
क्षणा	क्षाणा	३७३	१७

अशुद्धं	शुद्धं	पृ.	पं.
हमें	धर्मे	३७६	१०
यीय	र्तीय	३७७	२
भित	भिमत	३७८	१
धात्	धात् ।	,,	२
स्त्वय्यव	स्त्वय्येव	३८१	१२
प्यऽस्मि	ध्यस्मि	३८२	२३
ध्यत्	ध्येन	,,	१५
नोत्थं	नोत्थे-	,,	२२
प्यऽस्मि	प्यस्मि	३८२	२३
लम्भी	लम्भी	३८५	९
लभ्य	लम्भ	३८५	११
शानां ।	शानां	३८६	१०
पा	प	३८६	१६
ताया	तायां	३८६	१८
भिति	मनि	,,	२१
धनम्	धनम् ।	,,	२५
नेन	नेव	३८८	१६
स्तात्र	स्तत्रि	३९०	९
प्राप्त	प्रातयं	३९२	५
हैम्	हैन्	३९२	२०
पतृ	पत्तृ	३९६	४
वं भूता	वंभूता	३९७	२
श्रेय	श्रेयस	४०३	२३
खेति ।	खेति	४०५	१३
तः पात्	तस्पात्	४१०	२५
ते न	तेन	४११	८
वादी	वादि	४१३	३
कत्वा	यकत्वा	,,	६
दोषः।	दोषः	,,	१२
शषे	शेष	४१६	२४
भिर्नी	भिर्ना	४१८	१
भूतत्वा	भूत्वा	४१८	१५
न्ताम्	ताम्	४२४	४

अशुद्धं	शुद्धं	पृ.	पं.
धुम	धूम	४२६	१६
पस्तके	पुस्तके	४२७	२७
धूमत्वा	धूमत्व	४३१	२
एवं	एव	४३१	६
तिति ।	तेति	४३४	३
तूप	तृपा	४३७	१५
धम्मो	धर्मो	,,	२४
शान्त	शात	४४१	५
नानादि	नादि	४४३	१८
णर	रण	४४९	२१
द्यं भा	द्यंभा	४४६	१२
सह कारि	सहकारि	४४७	७
त्थं भू	त्थंभू	४४९	७
स्यदि	स्यादि	४४९	१८
दश म	दश म	४५२	२२
योंग	योग	४५५	११
खाणा	खाना	४५८	१८
रागा	रगा	४६०	२४
ज्ञत्वं	ज्ञत्व	४६१	१८
था स	थास	४६३	५
ना वि	नावि	४६३	२६
मिथा	भिधा	४६७	११
मिथ्य	सिद्ध्य	४७२	२
Sना	नोऽ	४७२	१४
दर्ग्ध	र्दग्ध	४७५	१५
मुच्छा	मूर्च्छा	,,	१५
तथ	तथा	४७६	१४
वल्क्या	वत्क्या	४७६	१५
प्राक्ते	प्रोक्त	४७७	३
वान्त	वानन्त	४७८	८
लम्भा	लम्भा	४८०	१२
नाम्र	नम्र	४८१	१४

भारतीय ज्ञानपीठ ग्रन्थागार काशी
यह पुस्तक अन्तर्गत लिखित पुस्तकालयसे ली गई थी।
१५ दिनके अन्दर वापस आजानी चाहिये।